





मं·कु·
१

ॐ श्रीगणेशाय नमः ॐ नमः सरस्वत्यै ॐ नमः सक
लकल्याणभाजनाय पिनाकिने नमो लक्ष्मीनिवासा
य देवतायै गिरां नमः प्रबलाविप्रस्यद्युतिनिचयपर्या
यवपुषे नमो विघ्नश्रेणीविघट्टनप्रथिष्ठाय महसे ज
गत्प्रादुर्भावस्थितिलयनिरूढासरचनाविनोदासक्ताय
प्रणतफलसिद्धिप्रतिभुवे यदिन्दिरानाथपुरंदराद्यैराराधि
तं भक्तिभरानतांगैः श्रीचण्डिकायाश्चरणारविन्दं वन्दाम
हे तत्कुलदेवतायाः प्रकृष्टचलत्कुण्डललसन्नवकचूष्टगंड
स्थलं महार्हमणिमेखलं मरकतोरुश्यामलं करोत्तक
रुणं सदाकलितपंचशाद्वक्रमं महः किमपि मोहनं क
पटैशशवं केशवम् कान्तेहृतनागसिरुषामकृषतुवा
णाक्रोडीकृतापि रमनार्थनियन्त्रणेन मोनेन मामनुमधि
गच्छति याददात सा पार्वती हरविभक्ततनुः शिवं वः
आसीदसीमगुणजीककुलाम्बुराशावुद्यन्नभूत शुभकी
र्तिघनप्रकाशः लोकैः सदाप्यदितितोगुणसन्निविष्टः श्री
रत्नपालनृपतिर्भुवनैकरत्नम् तस्यात्मजो भरफपालनृ
तिप्रसिद्धः सिद्धांगनाजनसमाजसमसिद्धकीर्तिः दानेन
यः सुकृतिनोऽतिपतिः सदैन्यं सैन्यं च वैन्यसदृशः प्रतिष्ठ
पतीनाम् तस्तोस्यजातः सुकृतोत्तमनस्य नतस्यकश्चित्स
दृशो बभूव यमसबलतालयमवेत्यतातो नाम्नाहरिश्च

नृतिव्यपत्त तस्यात्मजोभूदत्तलप्रतापः साधारणोभू
दत्तलप्रतापः अभूत्तदर्वामवनीश्वराणांस्वजीगणो यो
जगतिस्वकीर्तिम् वन्याछिदोकीर्तिमहाग्निनार्थामद्रा
परञ्चतथैवविधातुमिच्छुः कीनाशपाशचयबंधवि
मोचनार्थंतीर्थत्रयीकरविमुक्तिमचीकरद्यः अस्यात्म
जः श्रीमदनोथनाम्नाधाम्नाचरूपेणचसंगतार्थः रोषा
रुणोचवत्सप्रियद्विपत्नीनितान्तकान्तारसमाश्रितोभूत्
यः कृपाणागमान्यमोयत्तनानिसत्रिवर्न्यांश कृता
सकीर्तिमेकामचीकरन्मूर्तिभेदेन परिशीलयताकला
कलापंविदधानेनचभूरिशः प्रबंधान् मदनेनमहीभ्र
ताधयेनप्रथितान्नूतनभोजराजकीर्तिः पुत्रेषुतस्यापि
कलाकुशलेषुपुत्रौतस्माज्जगत्त्रयविस्तरकीर्तिशैरो
जातौप्रियावतितरांप्रथमप्रसूतौनीतौमहोन्नतिम
नल्पगुणैर्विनीतौ उदारशीलौसमनोविकासमनोज्ञ
वृन्दावनकोकिलौलौ यशोदयावर्धितमंगलांगौ
यौरामकृष्णाविति संप्रतीतौ यः शेषशावानुकरणेन
भुवानहद्धः शक्नोतिकर्तुमपरः श्रुतसद्गुणोपि दाने
निदानमखिलार्थिजनार्थसिद्धेः कीर्तिर्दिगन्तविरता
चयतस्तदीयाः अप्रतिमल्लः श्लाघ्यो श्लाघ्यमल्लस्तयोर
भ्रजेषः अपरोमान्यात्तगुणोमान्यानामीयतीजगति

सोयंसकलविद्यातातिचकुलजेनानन्तनोतिमान्यातो विद्व
त्सुखेनमतिमान्सकृतिरत्नेमहार्णवंनाम मातात्रुण्यचरि
त्रकीर्तिविभवायस्याम्बिकानामतः साकल्यापस्मृतिरा
यंचरितश्रीपेदिभट्टःपिता सोयंकौशिकवंशभूषणम
णिःश्रीमद्विश्वेश्वरोदेवेस्मानमतेन्नयेवसयदेवाकोक्षो
वर्द्धते मतिर्येषांशास्त्रप्रकृतिरमणीयाव्यवहृतिः परा
शीलस्माच्चंजगतित्रजवस्तेकृतिपद्ये विंचितेनेषांसु
कृतलब्धेनेस्थितिप्रियादिवंवासारण्यप्रवरस्तुतिशिष्ट
स्यभणितिः श्रुतिस्मृतिपुराणानिसमालोक्ययथामतिः
विरच्यतेसमासेननिबन्धोयंमहार्णवः तत्रतावदस्मा
णांसकलकर्मोपयोगित्वेनकर्मविपाकरूपरोगादिनिह
त्यर्थंप्रायश्चित्तादेरवश्यकर्तव्यतामप्रतिपाद्यते तद्यथा
ब्रह्महात्ययेरोगीस्यादित्यादिरोगनिदानकथनात् नि
दानोच्छेदेनचव्याधिनिवृत्तेरवगतत्वान्निदानोच्छेदायत
यत्नादिलक्षणरोगपुष्के द्वादशवार्षिकादिप्रायश्चित्तव्या
धिप्रकृजदानादिकर्तव्यम् अत्रकेचित्प्रत्यवतिष्ठन्ते न
ध्याहिपापापूर्वस्यायप्रायश्चित्तादिकर्तव्यमितियदु
च्यतेतेनतन्नसाम्प्रतम् नहिप्रारब्धफलस्यापूर्वस्यनाशो
किमपिप्रयोजनमस्तिफलस्यप्रारब्धत्वात् यथाल्प
वेधरूपफलायचापनिस्पृतः शरोवेतुलस्याप्रारब्धा

कारणत्वपर्याप्तिर्नेनापेक्ष्यते तथा रोगफलं प्रारब्धं स
स्वकारणभूतस्य पापापूर्वस्य नाशं नापेक्ष्यते अथ रोगा
दिरूपफलनाशस्येष्टत्वात्तन्निदानात्मकदुरितापूर्वना
शाय प्रायश्चित्तादिकर्तव्यमिति चेन्न समवायकारण
शरीरनाशेनैव तस्य रोगादेर्नाशेन निमित्तकारणदुरि
तापूर्वनाशेन यथा घटादिनाशेनैव घटादिनाशो न द
ण्डचक्रादिनाशेन च सहजसिद्धंकृतविनादिधर्म्यादेष्टु
शक्यते अपि च नरकतिर्यग्योन्यादिजन्यदुःखपरम्प
रानुभवतः कौनख्यादिको विकारश्चरमं फलं वाच
स्यान्तरानुभवात् अथवा प्रतिजन्मभिन्नमेव तद्योग्यत
मात्रेण फलेन स्वकारणदुरितापूर्वनाशो जन्यते तस्य
तज्जनितानुत्तणोवारणीयः तस्मात्पापविनाशा
र्थं व्रतचर्येति अत्र ब्रूमः तत्तावच्चरमं फलमिति नि
श्चेतुं शक्यते यत एकस्मिन्नेव जन्मनि कौनख्यादिनिश्चये
चरमफलत्वनिश्चयो भवेत् न च तथा अनेकजन्मभो
ग्यत्वात्तस्य तथा च शातातपीयकर्मविपाके महापातक
जं चिह्नं सप्तजन्मानि जायते उपपापोद्भवं पञ्च त्रीणि पाप
समुद्भवमिति सप्तजन्मान्यभिव्याप्येत्यर्थः ननु सप्तस्व
पि जन्मस्वेकमेव फलमनुगतमिति तस्य चरमफलत्वा
द्युत्पन्ने चरमफले निमित्तकारणस्य दुरितापूर्वस्य स्वय

म० क० ३

3

मेव नष्टत्वात् तदर्थं प्रायश्चित्तादि विफलमिति चेन्न उत्प
न्नो हि व्याधिर्निमित्तकारणं नापेक्षते नत्वनुत्पद्यमानः सत्तम
एव जन्मन्युत्पन्नमित्यभिधीयते कौनख्यादिकं ततः पूर्वमु
त्पद्यमानमेवावस्थान्तरादुद्भवात् अथवा प्रतिजन्मनि
मित्तमेव कौनख्यादिकमुत्पद्यते तत्र च निमित्तं दुरितापू
र्वमनुवर्तते अतश्चेदं सप्तमे वा जन्मन्यथमादिवा जन्मे
न्यत्तानामत्रेसम्भावितदुरितापूर्वनिवृत्त्यर्थं प्रायश्चित्ता
दिकं विधेयमेव अतः शातातपीयकर्मविपाके प्रतिज
न्मभवेन्नेषां चिह्नमुत्पात तस्य च कर्म प्रायश्चित्ते कृते याति
पश्चात्तापवतोऽनरीति यदुक्तं न च कौनख्यादिकं प्रत्या
देष्टुं शक्यत इति तदुक्तदोषेत्यानुमानमेव विरुद्धं ततः प्रा
यश्चित्तानन्तरमेव तत्तद्रोगनिवृत्तेर्दृष्टत्वात् यत्र चा
निवृत्तिस्तत्र कर्मवैगुण्यं चरमजन्मत्वं वा कल्प्यम् निमि
त्तदुरितापूर्वस्य प्रायश्चित्तादिभिर्निवृत्तौ समवायिका
रणस्य तद्विषमधातव्याश्रयशरीरापगमेन कार्यस्यापि रोगा
देर्निवृत्तिः एतदेव पापापूर्वस्य विनाशे प्रयोजनम् यत्र य
त्र च षण्ढत्वादेरनिवृत्तिस्तत्रानेकजन्मोपभोग्यषण्ढ
त्वादेर्जन्मान्तरे निवृत्तिः प्रायश्चित्तादिके कृते सतीत्यव
गन्तव्यम् तस्माद्रोगनिवृत्त्यर्थं कर्तव्यं प्रायश्चित्तादिकम्
महार्णवादिमहतीप्रबन्धेमान्यात्तत्राग्नौ मदनात्मज

स्य सत्कर्मरत्नौघनिधानमाद्यः तं गत्वा रंगोयमगाद्गा
यः अथ परिभाषा तत्र शातातपीयकर्मविपाके प्राय
श्चित्तविहीनानां महापातकिनां नृणाम् नरकान्ते भवेज्ज
न्म चिह्नांकितशरीरिणाम् प्रतिजन्म भवेत्तेषां चिह्नं तत्पा
तकसूचकम् प्रायश्चित्ते कृते याति पश्चात्तापवतां पुनः म
हापातकजं चिह्नं सप्तजन्मानि जायते उपपापोद्भवं पंच
त्रीणि पापसमुद्भवम् दुष्कर्मजा नृणां रोगा यान्ति चैव
क्रमाः शमम् जपैः सुरार्चनैर्होमैर्दानैस्तेषां शमो भवेत्
पूर्वजन्मकृतं पापं नरकस्य परिक्षये बाधते व्याधिरूपे
ण तस्य कृच्छ्रादिभिः शमः कुष्ठं च राजयक्ष्मा च प्रमेहो ग्र
हणी तथा मूत्रकृच्छ्राश्मरीकासा अतीसारभगन्दरौ दु
ष्टव्रणं गण्डमाला पक्षाघातोऽक्षिनाशनम् इत्येवमादयो
रोगा महापापोद्भवाः स्मृताः जलोदरं यकृत्प्लीहशूलशो
फव्रणानि च श्वासाजीर्णज्वरच्छर्दिभ्रममोहगलग्रहाः
रक्तार्बुदविसर्पाद्या उपपापोद्भवा गदाः ब्रह्महा मद्यपः
स्तेनस्तथैव गुरुतल्पगः एते महापातकिनो यश्चैतैः सं
वसेत्समम् गुरूणामप्यधिक्षेपो वेदनिन्दा सुहृद्वधः ब्र
ह्महत्यासमं ज्ञेयमधीतस्य च नाशनम् अग्न्युत्सादनमनु
पस्त्रीभूयेन्द्रहरणं तथा निक्षेपदानं तस्यैव कौटिल्यं ब्र
तलोपनं आत्मनोऽर्थे क्रियारंभो मद्यपस्त्रीनिषेवणम्

म॰
क॰
४

स्वाध्यायाग्निसुतत्यागो बान्धवत्याग एव च इन्धनार्थं द्रु
मच्छेदः स्त्रीहिंसौषधजीवनं हिंसायन्त्रविधानं च व्यसना
न्यात्मविक्रयः शूद्रप्रेष्यं हीनसख्यं हीनयोनिनिषेवनम्
तथैवानाश्रमे वासः परान्नपरिपुष्टिता असच्छास्त्राधिग
मनमाकरेष्वधिकारिता भार्याया विक्रयश्चैषामेकैकमु
पपातकं पतत्यतिरिक्तं पापं तत्सवर्णाहेतु यस्मिन्नतम् स
खिभार्याकुमारीषु स्वयोनिष्वन्त्यजासु च सगोत्रासु सुत
स्त्रीषु गुरुतल्पसमं स्मृतं पितुः स्वसारं मातुश्च मातुलानीं
स्नुषामपि आचार्यपत्नीं स्वसुतां गच्छंस्तु गुरुतल्पगः ॥
अथोपपातकानि गोवधो व्रात्यता स्तेनो ऋणानामपनक्रि
या अनाहिताग्निता पण्यविक्रयः परिवेदनम् भृतादध्या
पनादानं भृतकाध्यापनं तथा पारदार्यं पारिवित्त्यं वा
र्धुष्यं लवणक्रिया स्त्रीशूद्रविट्क्षत्रवधो निन्दितार्थोपजी
वनम् नास्तिक्यं व्रतलोपश्च सुतानां परित्याजनं भ्रंशो विद्
परिवेद्यं च परिवित्तियाजनम् धान्यकुप्यपशुस्तेयम
याज्यानां च याजनम् पितृमातृसुतत्यागस्तडागारामवि
क्रयः कन्यासंदूषणं चैव परिविन्दकयाजनं कन्याप्रदानं
तस्यैव अनुपपातकानि दंडापातादिना चित्रवपुष्कम्पावि
चर्चिकाः वाल्मीकपुण्डरीकाद्या रोगाः पापसमुद्भवाः न
यावचाण्डालानां रोगा अभिशापाद्भवंति हि अन्येच बहुधा

रोगाजायन्तेदोषसंकरात् उच्यन्तेयदिनानानिशाय
श्चित्तानिचक्रमात् महापापेषुसर्वस्वान्तदर्धन्तूपपातके
दद्यात्पापेषुषष्ठांशंकल्प्यंव्याधिबलाबलं महापापेषु
सर्वस्वादित्यादिसमर्थविषयेयोज्यम् असमर्थस्यतुप
दुर्णादिकंवक्ष्यति अथसाधारणंतन्त्रंगोदानादिषुकथ्य
ते गोदानेवत्सयुक्तागौःसुशीलासुपयस्विनी वृषदा
नेसुभोनड्वान्सशुक्लाम्बरकाञ्चनः निवर्तनादिभूदाने
दद्याद्द्विजातये निवर्तनस्वरूपंपरिमाणप्रकरणे
वक्ष्यते तथासुवर्णपरिमाणमपि सुवर्णंतुनिष्कंत
तदर्धार्धप्रमाणतः सदुकूलेनाश्वदानेसाश्वंसोपस्करंदि
शेत् महिषीमहिषीदानेदद्यात्सुवर्णाम्बरान्वितां सुवर्णं
चाम्बरंचेतिविग्रहः दद्यादजामजादानेसुवर्णपलसंयु
ताम् पललक्षणमपिपरिमाणप्रकरणएववक्ष्यते ल
तसुरक्तावचंवृषभंप्रदद्याद्देवतार्चने दद्याद्द्विजसहस्रा
यमिष्टान्नंद्विजभोजने ब्राह्मणभोजनेसहस्रसंख्याव
च्छिन्नमित्यादिशक्तविषयं अशक्तस्यशक्त्यनुसारेण
कल्प्यं रुद्रजपोलक्षपुष्पैःपूजयित्वाचत्र्यम्बकंप्रकाद
शजपेत् रुद्रान् दशांशेनततुगुग्गुलेनाभिषेचनंकु
र्यान्मन्त्रैर्वरुणदैवतैः शान्तिरेकगणशान्तिरथर
शान्तिकपूर्वकम् धान्यदानेसुभंधान्यंखारीषष्टिसम

म॰
क॰
५

न्वितम् वस्त्रदानेत्रिशूलंचदेयंकर्पूरसंयुतम् रुद्रजपप्र
स्यादिरुद्रस्वरूपमृषिदेवतादिचाग्रेवक्ष्यते मन्त्रैर्वरुणदै
वतैः दशांशेनगुग्गुलहोमानन्तरंवारुणमन्त्रैर्यजमान
मभिषिंचेत् यद्येकादशवारान्रुद्रंजपेत् तदैकवारंरु
द्राहुत्याहोमःकार्यः अयमेवदशांशहोमः तत्रचप्रति
मंत्रंस्वाहाशब्दसंज्ञार्यंजुहुयात् नसकलरुद्राहुत्यैक
वारमेवजुहुयात् मन्त्रविच्छेदस्याध्ययनादेवावगम्य
ते अथचाग्रेपितर्पयते गणशांतिर्गणेशशांतिःसाचा
ग्रेभिधास्यते ग्रहशांतिर्नवग्रहशांतिरयमप्यग्रेनिरुणं
प्रदर्शयते रुद्रीलक्षणोपरिमाणप्रकरणेवक्ष्यते प्राय
श्चित्तोपक्रमप्रकारमाह दशपंचाष्टचत्वारउपवेश्यद्वि
जान्शुभान् तेषामनुज्ञयासर्वंप्रायश्चित्तमुपक्रमेत् वि
धायवैसर्वंश्रावंसंकल्पंनिजकाम्यया येत्रुंदद्याद्द्विजे
भ्योयदक्षिणांचस्वशक्तितः तेषामनुज्ञयेत्यादि तेषां
ब्राह्मणानामनुज्ञयाप्रायश्चित्तंभवतीतिभवत्तैरध्याहा
रः उपक्रमेप्रायश्चित्तस्योपक्रमेविस्रमुद्दिश्यश्राद्धं वि
दधीतेतिश्राद्धंतथ्यसंकल्पेपिंडदानरहितंयेत्रुंदद्यात्
सभार्याउपवेशितानांब्राह्मणानांब्रह्मदंडत्वेनदक्षि
णादिकंश्रद्धादिकंतच्छ्राद्धांगत्वेनब्रह्मदंडत्वेनचयाचे
तुंदीयतेस्मानप्रत्यक्षायेत्रुः प्रत्याम्नायद्वारान्ततोव

द्भ्यश्चैकादीयते नदोषैः साविक्रयास्यात् विक्रियश्च
निषिद्धोगौस्सा बहुभ्यो न प्रदेया निगौर्गृहं शयनं स्त्रियः वि
भक्तिदक्षिणाहीना दातारं पातयन्ति हि एकाएकस्य दात
व्या न बहुभ्यः कदाचन सा तु विक्रयमापन्ना दहत्या सप्त
मं कुलम् इति पेतुर्देया द्विजेभ्यो यद्दक्षिणां च स्वशक्तितः
इत्युक्तेन तदनन्तरकृत्यमाह अलंकृत्य यथाशक्त्या वस्त्रा
लंकरणैर्द्विजान् याचेत दंडवन्नत्वा प्रायश्चित्तं यथोचितं
तेषामनुज्ञया कृत्वा प्रायश्चित्तं यथाविधि भूयस्तान्परितो
ष्यैवं पूजयेद्विधिवद्द्विजान् दद्याद्व्रतांगदानानि तेभ्यः श्र
द्धासमन्वितः व्रतांगदानानि गोभूहिरण्यरजततिलवा
सोघृतगुडधान्यलवणदानानि अन्यान्यपि विशेषविहि
तानिदानानि व्रतांगदानानीत्युच्यन्ते सन्तुष्टा ब्राह्मणाद्
ब्रूयाच्छिद्रं व्रतकारिणः अच्छिद्रमिति इदं वाक्यं दद्युरि
त्यर्थः अथवा वक्ष्यमाणवचनमेवाच्छिद्रवाक्यम् व्र
तच्छिद्रं तपश्छिद्रं यच्छिद्रं यज्ञकर्मणि सर्वं भवतु तेऽच्छि
द्रं यस्य चेच्छन्ति वै द्विजाः ब्राह्मणा यानि भाषन्ते मन्यन्ते
तानि देवताः सर्वदेवमया विप्रा न तद्वचनमन्यथा उप
वासो व्रतं चैव स्नानं तीर्थफलं तपः विप्रैः सम्पादितं यस्य
सम्पन्नं तस्य तद्भवेत् ब्राह्मणा जंगमं तीर्थं निर्जलं सर्वका
मिकम् तेषां वाक्योदकेनैव शुद्ध्यन्ति मलिना जनाः

म॰
क॰
६

सम्यगिति यथाकं वदन्तीति देवताः प्रणम्याशिरसा या
र्थमभिष्टोमफलं लभेत् तेभ्यो ज्ञात्वा मिति प्राप्य प्रतिपाद्य त
थाशिषः भोजयित्वा द्विजान्शक्त्याज्ञातिभिः सह बन्धुभिः
इति शातातपीयकर्मविपाकोक्तपरिभाषा अथ विपाकसा
रोक्तपरिभाषा अथ कर्मतयोपायो कृच्छ्रव्याधिविपर्ययौ
क्लेशसमहत्वात्तत्राद्येगां दद्याद्व्याधिकर्षितः कृच्छ्रशब्देन
प्राजापत्यकृच्छ्रचान्द्रायणादीन्युच्यन्ते तेषां सर्वेषां क्लेशसा
ध्यत्वात् तल्लक्षणानि चाभिधास्यन्ते प्राजापत्यादिकरणमे
ककोटिः व्याधिविपर्ययो नाम व्याधिप्रतिकृतिदानेऽदं त
पराकोटिः एवं चायमुपदेशसारात्कृच्छ्राद्याचरणस्य क्लेशा
त्मकत्वात् रुगणस्य क्लेशासहत्वात् कृच्छ्रप्रत्याम्नाये
न गां दद्यात् कृच्छ्रादिप्रत्याम्नायत्वेन गावो दातव्या इत्य
र्थः तत्र कस्मिन्कृच्छ्रे किं संख्याका गावो दातव्या इत्यत आ
ह एकां कृच्छ्रे इति कृच्छ्रेऽतिकृच्छ्रे चान्द्रायणे व्रते गवामभावे
निष्कं वा साशीतिशतकृच्छ्रेदः जपदाने पितर्योक्तं कृच्छ्रा
ऽवगाणहोमकृत् सर्वपापप्रणाशनार्थमथ व्याधिविपर्य
यः एकां कृच्छ्र इत्यादि एकां गां कृच्छ्रे प्राजापत्ये निष्कल
क्षणं पविमाणमकरणेऽभिधास्यते साशीतिशतकृच्छ्र
दः षड्वार्षिकप्रायश्चित्ते त्र्यशीत्युत्तरं कृच्छ्राणां शतं भव
ति षड्वार्षिकप्रायश्चित्तदर्शनं च प्रायेण कर्मविपाके

त्तीर्णपापत्वेन षड्वार्षिकप्रायश्चित्तपेक्षयाऽधिकप्राय
श्चित्तप्राप्त्यभावात् साशीतिशतकृच्छ्रप्रत्याम्नायत्वेन ग
वादिकं ददातीति साशीतिशतकृच्छ्रदः अथवा कृत्वा
वा ब्रह्महत्यायाः षडब्दं कृच्छ्रमाचरेदिति संभावितपाप
निवृत्त्यर्थं साशीतिशतकृच्छ्रदः षडब्दप्रायश्चित्तप्रत्या
म्नायत्वेन गवादिदाता भवेदित्यर्थः जपदानेऽपीति ज
पश्च दाने जपदाने तेऽपि कुर्वीत तत्र जपे सूक्तं तद्व्या
ध्युपशमार्थं विहितं सौरादिकसूक्तं भवतीत्यर्थः दा
नं च गोहिरण्यादीनां तानि च सर्वमभिहितानि सर्वपा
पप्रणाशार्थं कूष्माण्डगणहोमः कृतं भवेत् अथ व्याधि
विपर्यये वक्ष्यते इति शेषः कर्मस्तयोपायत्वेनोपायत्व
यमभिहितम् कृच्छ्रादिकरणं व्याधिप्रतिकृतिदानं चे
ति तत्र कृच्छ्रशब्दस्तपः प्रधानं कर्माचष्टे कूष्माण्डगण
होमावपि तपःप्रधानाविति तावपि प्राजापत्यादिकृच्छ्र
कोटावेवान्तर्भवतः अतः समग्रो कृच्छ्रकोटिमभिधाय
व्याधिप्रतिकृतिदानं वक्तव्यम् तस्मात्कूष्माण्डगणहो
मावभिधीयेते तत्र कर्मणि यद्देवादेवहेडनमित्याद
यो मन्त्रास्तैत्तिरीयारण्यके समाम्नाताः कूष्माण्डहोमः
यस्मिंश्चाग्नेनयसुपथेति तथाऽग्ने व्रतपते प्रथमस्य चे
न सहत्यायामृचैस्तैत्तिरीयशाखायां समाम्नाताः स ग

स॰
क॰
७

णहोमः तत्रजमदग्निभिरितः कूष्मांडगणहोमविधिः
अथातःसंप्रवक्ष्यामिकूष्मांडविधिमुत्तमम् एनसांस्थलसू
क्ष्माणांप्रायश्चित्तंतुवैदिकम् अकुर्वन्विहितंकर्मनिंदितं
चसमाचरन् प्रसज्जंश्चेन्द्रियार्थेषुप्रायश्चित्तीभवेद्द्विजः के
शश्मश्रुवापयित्वास्नात्वातुएपजलाशये आज्यभागांतंत
त्रेणकूष्मांडैर्जुहुयाद्द्विजः यद्देवत्यनुवाकैस्त्रिभिर्हुत्वा
ज्यमन्वहम् वैश्वानरायेत्येताभिस्तमग्निमुपतिष्ठते यदि
न्यायायस्मिन्नियंजयादिप्रतिपद्यते कर्मादिष्वेतैर्जुहुया
ततःस्वर्गंसमश्नुते संवत्सरंवीरहात्रमासंवैवीरहाद्विजः
चतुर्विंशतिरात्रीस्तुपरिवेत्तापिदीक्षितः द्वादशचाग्रेदि
धिषुश्चत्रात्रीस्त्वावदन्नपि अग्रेदिधिषुः ज्येष्ठश्रकृतताधा
नेस्मतिकनीयान्सुयस्मीनाददाति तदाज्येष्ठः अग्रेदिधि
षुरुच्यतेपरिवित्तिरित्यर्थः त्रिरात्रीस्तुकनतोदीक्षि
तोभवतिद्विजः नमांसमश्नीयान्नोपेयात्कामिनीमपि
नोपवासीनखट्वायांजपस्सेतान्नताद्विजः पयोव्रतंत्राल
णस्ययवार्थःक्षत्रियस्यतु आमिक्षाचैववैश्यस्यप्रायश्चि
त्तार्थमिष्यते सावित्रीचजपन्नित्यंपवित्राणिचशक्तितः
सर्वेष्वेवतुपापेषुप्रायश्चित्तार्थमिष्यते इतिजमदग्निप्रोक्तः
कूष्मांडगणहोमविधिः अथबौधायनप्रोक्तः कूष्मांड
विधिः अथकूष्मांडैर्जुहुयाद्योऽपूतइवमन्यते यथास्तेना

हैवमेष भवति यो योनौ रेतः सिंचति यद्वा बीजमेणो भ्रूण
हत्यायास्तस्मात्तु च्येतइति अयोनौ रेतः सेकः समादन्यत्र भ्रू
णहत्या ब्रह्महत्या यो वा पवित्रकामो मावस्यायां पौर्णमास्यां
वाश्व इष्टस्य रोहिण्यां वा स्नातः शुचिः शुक्लवासाः कृष्णा
जिनवासा वा केशश्मश्रुलोमनखानि वापयित्वा ब्रह्मचा
रिकल्पेन व्रतमुपेति संवत्सरं मासं चतुर्विंशतिं द्वादश वा
ऽहस्त्रिंशोऽर्धरात्रीर्न मांसमश्नीयात् न स्त्रियमुपेयान्नोपरि
शयीत जघन्यशेतान्नतात्ययो व्रतयतीति प्रथमः कल्पः
यावकं वोपसंजीत कृच्छ्रं द्वादशरात्रं वा चरेत् भिक्षेत वा
नाद्विषिषति नाद्विषिषु कृच्छ्रगतैकभक्तादि विषिषु प
कभक्ताद्युचितभैक्षाहारेणैकभक्ताशी त्रिषष्ट्या दयेदित्यर्थः
यवाग्रं राजन्यः आमिक्षां वैश्यः यदि मन्येत पदोस्यामीति
ओदनं धानाः सक्तून्घृतमित्येव व्रतयेदात्मनोऽनुपदासा
येति ब्राह्मणं यत्किंच धर्मेणाग्निमुपसमाधाय संपरिस्ती
र्य परिधान प्रभृत्याग्निमुखं कृत्वा सावित्रीं पुरो रवाकाम
न्त्रयस्साविश्या पक्वान्नहोति अथ स्विष्टकृतं हव्यवाहन
मभिमातिषाहं रक्षोहणं पृतनासु जिष्णुं ज्योतिष्मन्तं दीद्य
तं पुरन्धिमग्निं स्विष्टकृतमाहुवेमो मित्यन्त्र यास्विष्टमग्ने
अभितद्गृणाहि विश्वेदेवा पृतना अभिष्टा उरुज्जनः पन्थां
प्रदिशान्विभाहि ज्योतिष्मद्धेह्यजरन्न आयुरिति याज्यया

म· क ८

चरुशेषं जुहोति अथ कूष्माण्डैर्यद्देवा देवहेलनं यद्दीव्य
न्नृणमहं बभूव आयुष्टे विश्वतो दधदित्येतैस्त्रिभिरनुवाकैः
इति मंत्रमाज्यस्य हुत्वा सिंहे व्याघ्र इति चतस्रः स्रुवाहुतीः अ
ग्नीषोमावग्निरग्ने अङ्गिरः ऊर्जं सहस्येति च हुत्वा समिधा
यजमानलोके वस्याय वैश्वानराय प्रतिवेदयाम इति द्वादशै
कलकेनोपतिष्ठते यन्मया मनसा वाचा कृतमेनः कदाच
न सर्वस्मात्तस्मादेनसो मम मा गुप्तिं त्वं हि वेत्थ यथायथं स्वा
हेति समिधमादाय वरं ददाति जयप्रभृति सिद्धमाधेनु
वरप्रमाणदानात् इति बोधायनोक्तकूष्माण्डविधिः अ
थ कूष्माण्डविधिर्मन्त्रपाठानुष्ठानक्रमसहितः प्रदर्श्यते
तत्रैकोऽजमदग्निप्रोक्तः पक्वहोमादिरहितो लघुकल्पः प्र
दर्शितः अपरश्च पक्वहोमादिसहितो गुरुकल्पो बोधाय
नोक्तो निरूपितः पर्वशाखास्विकरणन्यायेन बहुभिर्निरू
पितः कूष्माण्डहोमपक्वपवेनिगुणोपसंहारन्यायेनाविरु
द्धसकलाङ्गोपसंहारः कर्तव्यः अथ चैनसि गुरुणि गुरूणि
लघुनि लघूनीति गौतमस्मरणादपनोद्यपापमात्रसारेण गु
रुलघुपक्षः स्वीकार्य इति तथा गुरुपक्ष इति व्यवस्थया यो
महापातकादिदोषदूषितः कृतप्रायश्चित्तोऽपि मनःपरितो
षं न प्रतिपद्यते यश्चायोनौ वान्ययोनौ वा रेतः सिंचति य
श्च ब्रह्महत्यावर्ज्जं सातात् द्वादशवार्षिकादि गुरुप्रायश्चि

ज्ञानामविषयाणिमहापातकादीनिकरोतियोपिपावि
त्रकामःसकूष्मांडहोमंकुर्वीत यश्चादानादिकर्माणि
चिकीर्षतिसोपिकूष्मांडीभिर्जुहुयात् अथप्रयोगः
अमावस्यायांपौर्णमास्यांवान्यत्रवाविहितेकालेपूर्वा
ह्णेकेशश्मश्रूनखानिवापयित्वातीर्थावगाहनाचाम
नमन्त्रैस्तर्पणपुण्याहवाचनानिकृत्वास्थंडिलमुपक
ल्प्यस्वगृह्योक्तविधिनाग्निंप्रतिष्ठाप्यप्राणायाममग्निप्र
तिष्ठान्तःपूर्वपश्चाद्वाविधायात्मकप्रयोजनार्थंकूष्मां
डहोमंकरिष्यइतिसंकल्प्य चरुहोमपक्षेयथाशाखंस
वितादेवताचरुर्हविः आघारवन्तमित्याद्यभिलष्य
निर्वापप्रोक्षणसाधनचरुपाकांतेचयथाशाखंविधायप
क्वंचरुमभिघार्यहोमप्रतिष्ठितमभिघार्यवचनक
र्मणावचसायसावित्रीपुरोनुवाक्यामन्त्रयसावित्र्यैव
याज्ययाजुहुयात् गायत्रीमंत्रः गायत्र्याविश्वामित्रऋ
षिःसवितादेवता गायत्रंछन्दः चरुहोमेविनियोगः
ॐतत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहिधियोयोनःप्रचो
दयात् ॐइतिसावित्रीपुरोनुवाक्यामनूच्यपुनरपिसा
वित्रीमवयाज्यांपठित्वास्वाहा सवित्रइतिजुहोति ततः
स्विष्टकृतमेवादायहव्यवाहनमितिपुरोनुवाक्यास्विष्ट
मद्गणइतियाज्ययाजुहुयात् द्वयोरनयोर्विश्वेदेवा

म
क
९

ऋषयः अग्निः स्विष्टकृद्देवता अनुष्टुब्विराट्छन्दः स्विष्टकृ
द्धोमे विनियोगः हव्यवाहनमभिमातिषाहं रक्षोहणं पृत
नासु जिष्णुं ज्योतिष्मन्तं दीद्यतं पुरन्धिमग्निं स्विष्टकृतमाहु
वेमोमितिघ्नुरेवाकाममन्नूयस्विष्टमग्ने अभितं पृणीहि वि
श्वे देवाः पृतनाअभिष्याउर्कं नः पथ्ये प्रदिशान्विभाहि ज्योति
ष्मदेहजरन्न आयुरिति याज्यां स्वाहान्तं पठित्वाज्जुहोति
अत्राग्नये स्विष्टकृत इत्युद्देशत्यागः हुतशेषमग्नेः पुरस्ता
द्दर्भस्य पर्णीषु निदधीत अथ यद्देवा देवहेडनमिति विभि
रनुवाकैराज्यहोमः केचन सावित्र्यापक्वहोमानन्तरं स्वि
ष्टिकृतमवधार्यस्थापयित्वा यद्देवेत्यादिराज्यहोमं विधा
य ततः स्विष्टकृद्धोममिच्छन्ति येषु पक्वहोमेन कुर्वीत
तेषामाज्यभागानन्तरमेवैतैरेव त्रिभिरनुवाकैराज्यहोमः
तत्र यद्देवा देवहेडनमित्येकविंशर्चस्य प्रथमानुवाकस्य
ब्रह्मा स्वयंभूऋषिः लिंगोक्ता देवता आदितआरभ्य क्रमेण
चतसृणामनुष्टुप्छन्दः पंचमी त्रिष्टुप् षष्ठी षडवसाना विज
गती सप्तमी जगती अष्टमीकत्रुडती त्रिष्टुप् नवमी षट्प
दा जगती दशमी कऽत्ये ततो द्वे षट्पदे शाक्वर्यौ त्रयोदशी
त्रिष्टुप् चतुर्दशी सप्तपदा अष्टिः पंचदश्यनुष्टुप् षोडश्यनु
ष्टुप् विराट्सप्तदशी गायत्री ततस्तिस्रस्त्रिष्टुभः एकविंश्य
नुष्टुप् आज्यहोमे विनियोगः प्रथममन्त्रः यद्देवा देवहेड

नंदेवासश्चकृमावयम् आदित्यास्तस्मान्मोचंतेनस्यते
नमामुनस्वाहा आदित्येभ्यःस्वाहाआदित्येभ्यश्शन्नुदेशान्या
गोनमन्नानः पातीपवस्तुनरवापिशेयंदेवाजीवनका
म्यायद्वाचानृतमूदिम तस्मान्मश्शहस्वेचन्नविश्वेदेवास
जोषसःस्वाहा विश्वेभ्योदेवेभ्यः ऋतेनद्यावापृथिवी
ऋतेनत्वंसरस्वती कृतान्नःपात्वेनसोयत्किंचनतमूदि
म २ स्वाहाद्यावापृथिवीभ्यांसरस्वत्यैच ३ इंद्राग्नीमित्रा
वरुणोसोमोधाताबृहस्पतिस्तेनोमुंचन्त्वेनसोयदन्य
कृतमूदिमस्वाहा इन्द्राग्निमित्रावरुणसोमोधाताबृह
स्पतिभ्यः सजातशंसादुतजामिशंसाज्ज्यायसःशंसादु
तवाकनीयसः अनादृष्टंदेवकृतंयदेनःतस्मात्वमस्मा
ज्जातवेदोमुमुग्धिस्वाहाजातवेदसे ५ यद्वाचायन्मन
सावाहुभ्यामुरुभ्यामष्ठीवद्भ्यांशिश्नैर्यदनृतंचकृमाव
यं अग्निर्मातस्मादेनसोगार्हपत्यःप्रमुंचतुचकृमयां
निदुष्कृतास्वाहागार्हपत्यायाग्नये ६ येनत्रितोअर्णवान्नि
र्बभूवयेनसूर्यंतमसोनिर्मुमोच येनेन्द्रोविश्वाअजहा
दरातीन् तेनतंज्योतिषाज्योतिरानशानःअक्षितिस्वाहाअग्न
ये ७ यत्कुसीदमप्रतीतंमयेहयेनयमस्यनिधनाचरा
मिएतत्तदग्नेअनृणोभवामिजीवन्नेवप्रतितत्तेददामि
स्वाहाअग्नये ८ यन्मयिमातागर्भेसतिएनश्चकारय

त्पिता अग्निर्मा तस्मादेनसो गार्हपत्यः प्रमुञ्चतु दुरिता
नि यानि चकृम करोतु मामनेनसं स्वाहा गार्हपत्याग्नये
९ यदापिपेष मातरं पितरं पुत्रः प्रमुदितो धयन् अहिंसि
तौ पितरौ मया तत्तदग्ने अनृणो भवामि स्वाहा अग्नये १०
यदन्तरिक्षं पृथिवीमुत द्यां यन्मातरं पितरं वा जिहिंसि
म अग्निर्मा तस्मादेनसो विश्वान्मुञ्चतु दुरिता यानि चकृ
म करोतु मामनेनसं स्वाहा गार्हपत्याग्नये यदशमानि
शम्मा यत्पराशमा येनेदं चकृमा नूतनं यत्पुराणं अग्नि
र्मा तस्मादेनसो गार्हपत्यः प्रमुञ्चतु दुरितानि चकृम क
रोतु मामनेनसं स्वाहा गार्हपत्याग्नये ११ अतिक्रमा
मि दुरितं यदेनो जहामि रिप्रं मे रसे सधस्थे यत्र यन्ति
सुकृतो नापि दुष्कृतः तमारोहामि सुकृतान्नु लोकं स्वा
हा अग्नये १२ त्रिते देवा अमृजतैतदेनः त्रित एतन्म
नुष्येषु मामृजे ततो मा यदि किञ्चिदानशे अग्निर्मा तस्मा
देनसो गार्हपत्यः प्रमुञ्चतु दुरिता यानि चकृम करोतु मा
ममनेनसं स्वाहा अग्नये गार्हपत्याय यादिवि पता अप्स
जाता या जाता यदापो उल्कं दुरितं चराम यद्वा दिवा नूतनं
यत्पुराणम् हिरण्यवर्णास्तत्पुनीत नः स्वाहा अद्भ्यः ओष
धीभ्यः अयो या अग्निजा आपः ता नः शुन्धन्तु शुन्धनीः स्वा
हा अद्भ्यः १५ इमम्मे वरुण श्रुधि हवमद्या च मृडय त्वा

मवस्पृशा चके स्वाहा वरुणाय तत्वायामि वरुणं वन्दमा
नस्तदाशास्ते यजमानो हविर्भिः अहेडमानो वरुणेह बो
ध्युरुशंसमान आयुः प्रमोषीः स्वाहा वरुणाय १८ त्व
न्नो अग्ने वरुणस्य विद्वान्देवस्य हेडोऽवयासिसीष्ठाः यजिष्ठो
वह्नितमः शोशुचानो विश्वा द्वेषांसि प्रमुमुग्ध्यस्मत् स्वाहा
अग्नीवरुणाभ्याम् सत्वन्नो अग्नेऽवमो भवती नेदिष्ठो अस्या
उषसो व्युष्टौ अवयक्ष्वानो वरुणं रराणो वीहि मृडीकं सुह
वो न एधि स्वाहा २० त्वमग्ने अमावस्यायाममन्दन साहितः
अयासन्हव्यमूहिषे यज्ञो ऐहि भेषजं स्वाहा अग्नयेऽयसे
२१ इति प्रथमोऽनुवाकः यदीदीव्यमिति द्वितीयानुवाक
स्य त्रयोदशर्चस्य ब्रह्मा स्वयम्भूरृषिः लिंगोक्ता देवताः
आद्या प्रस्तारपंक्तिः द्वितीयाद्याः पंच त्रिष्टुभः षष्ठी गाय
त्री सप्तम्याद्यास्तिस्रस्त्रिष्टुभः दशम्यनुष्टुप् एकादशी चत
ष्पदोष्णिक् द्वादश्यनुष्टुप् त्रयोदशी त्रिष्टुप् आज्यहोमे वि
नियोगः यदीदीव्यमृणमहं बभूवादित्सन्वा संजगर जने
भ्यः अग्निर्मा तस्मादिन्द्रश्च संविदानौ प्रमुञ्चतां स्वाहा
अग्नये १ यद्धस्ताभ्यां चकर किल्बिषाण्यक्षाणां वग्नुमुपजि
घ्नमानः उग्रंपश्या राष्ट्रभृच्च तान्यप्सरसावनुदत्तामृणा
नि स्वाहा अप्सरोभ्यः २ उग्रंपश्ये राष्ट्रभृत्किल्बिषाणि यदक्ष
वृत्तमनुदत्तमेतत् नेन ऋणानृणवा इच्छमानो यमस्य

म· क· ११

लोकेअधिराजराय स्वाहा यत्कस्मभ्यमस्मरप्रचेतोराजन्ते
नोमिमिशिश्रयः कृतानिस्वाहावरुणाय ४ उदुत्तमंवरुण
पाशमस्मदवाधमंविमध्यमंश्रथयअथावयमादित्यव्र
तेतवानागसोअदितयेस्यामस्वाहावरुणाय ५ इममेव
रुणतत्वायामितत्वनोअग्नेसत्वनोअग्नेइतिचतस्रःप्रथ
मानुवाकेपठिताअत्रापिग्राह्याः ९ संकसकोविक
सकोनिऋथोयश्चनिस्वरः तेयेस्मद्यक्ष्ममनागसोदूराद्दू
रमचीचतंस्वाहामन्त्रोक्तदेवताभ्यः १० निर्यक्ष्ममचीचते
कृत्यानिर्ऋतिंचतेनयोतेस्मन्मच्छतोतमस्मैप्रसुवामसि
स्वाहामन्त्रोक्तदेवताये ११ दुर्मंसानुशंसाभ्यांघानेनानु
घेनेनचतेनान्योतेस्मत्तमृच्छतेतमस्मैप्रसुवामसिस्वाहा
मन्त्रोक्तदेवताभ्यः १२ संवर्चसापयसासंतनूभिरगन्महि
मनसासंशिवेनत्वष्टानोअत्रविदधातुरायोनुमार्ष्टुतन्वोय
द्विलिष्टंस्वाहात्वष्ट्रे १३ इतिद्वितीयोनुवाकः आयुष्टइति
तृतीयानुवाकस्यसप्तदशर्चस्यब्रह्मास्वयम्भूऋषिः लिंगो
क्तादेवता आद्यानुष्टुप्द्वितीयातृतीयात्रिष्टुप् ततस्तिस्रो
गायत्र्यः सप्तम्यष्टमौत्रिष्टुभौ ततस्तुअनुष्टुभः पंचदशीक
कुम्मतीषोडश्यनुष्टुप् सप्तदशीपंचपाशक्वर्यायाश्चिवा
आज्यहोमेविनियोगः आयुष्टेविश्वतोदधदयमग्निर्वरे
ण्यः पुनस्तेप्राणआयातिपरायक्ष्मंसुवामितेस्वाहाअग्न

ये १ आयुष्यमग्ने हविषो जुषाणो घृतप्रतीको घृतयोनि
रेधि घृतं पीत्वा मधु चारु गव्यं पितेव पुत्रमभिरक्षतादिमं
स्वाहा आयुर्देऽग्नये २ इममग्न आयुषे वर्चसे कृधि तिग्म
मोजो वरुण संशिशाधि मातेवास्मा अदिते शर्म यच्छ वि
श्वे देवा जरदष्टिर्यथासत्स्वाहा अग्न आयूंषि पवस आसुवो
र्जमिषञ्च नः आरे बाधस्व दुच्छुनां स्वाहा अग्नये ४ अ
ग्ने पवस्व स्वपा अस्मे वर्चस्सुवीर्यम् दधद्रयिं मयि पोषं स्वा
हाऽग्नये ५ अग्निर्ऋषिः पवमानः पाञ्चजन्यः पुरोहितः
तमीमहे महागयं स्वाहाऽग्नये ६ अग्ने जातान्प्रणुदा
नः सपत्नान्प्रत्यजाताञ्जातवेदो नुदस्व अस्मे दीदिहि सु
मना अहेडंस्तव स्याम शर्मं त्रिवरूथ उद्भौ स्वाहाऽग्नये जा
तवेदसे ७ सहसा जातान्प्रणुदा नः सपत्नान्प्रत्यजाता
ञ्जातवेदो नुदस्व अधि नो ब्रूहि सुमनस्यमानो वयं स्याम प्रणुदा
नः सपत्नान्स्वाहा जातवेदसे ८ अग्ने ये नो भितो जनो
वृको वारो जिघांसति तांस्त्वं वृत्रहञ्जहि वस्वस्मभ्यमाभर
स्वाहा अग्नये वृत्रघ्ने ९ अग्ने यो नो भिदासति समानो य
श्च नेष्ट्यः तं वयं समिधं कृत्वा तुभ्यमग्ने भियाम सि स्वाहाऽग्न
ये १० यो नश्शपादशपते यश्च नः शपतः शपात् उषा
श्च तस्मै निम्रुच्च सर्वं पापं समूहतां स्वाहा उषसे निःम्रुचे
११ यो नः सपत्नो यो रणो मर्त्तो भिदासति देवाः इध्मस्येव

म
क॰
१२

प्रव्यायतोमातस्मोऽद्विषिकिंचनस्वाहा॥ अग्नयेजातवेद
से १२ योमांद्वेष्टिजातवेदोयंचाहंद्वेष्मियश्चमांसर्वांस्ता
नग्नेसन्दहयाश्चायंद्वेष्मियेचमांस्वाहा॥ अग्नयेजातवेदसे
१३ योस्मध्यमरातीयाद्यश्चनोद्विषतेजनः निन्दाद्योअस्मा
न्दिप्साश्चसर्वांस्तान्मस्मसाकुरुस्वाहा॥ मन्त्रोक्तदेवतायै
१४ संशितंमेब्रह्मसंशितंवीर्यंबलंसंशितंक्षत्रंमेजिष्णु
र्यस्याहमस्मिपुरोहितः १५ नदेषांबाहूअतिरमुद्वर्चोअथो
बलम् क्षणोमिब्रह्मणामित्रानुन्नयामिस्वांअहंस्वाहा॥ मं
त्रोक्तदेवतायै १६ पुनर्मनःपुनरायुर्मआगात्पुनःश्रोत्रं
पुनश्चक्षुरमागात् पुनःप्राणःपुनराकूतमागात् पुनश्चि
त्तंपुनराधीतंमआगात् वैश्वानरोमेदब्धस्तनूपाअववा
धतांदुरितानिविश्वास्वाहा॥ वैश्वानराय १७ इतीयोऽनुवा
कः इत्यनुवाकत्रयेणाज्यंहुत्वाप्रतिमन्त्रंहुत्वायजमानोऽग्ने
र्दक्षिणतःसमित्पाणिरुदङ्मुखस्तिष्ठन् वैश्वानरायप्र
तिवेदयामीतिद्वादशर्चेनसूक्तेनाग्निमुपस्थाय यन्मया
मनसेत्यनुयास्वाहा॥ क्ष्यामात्मित्यमग्नौप्रतिपद्यजयादिहो
मंकुर्वीत एतद्ब्रजमदग्निमतेनबौधायनमतेत्वनुवा
कत्रयेणाज्यहोमानन्तरंसमिद्धस्याञ्जुहुयादित्यादिभिश्चतसृभिः
स्नुचाहुतीराज्येनप्रत्येकंहुत्वातथाग्नेव्रतपतेत्यादि.
भिश्चतसृभिःपिस्रुचाहुतीःप्रत्येकंहुत्वायजमानःसर्वो

क्तप्रकारेण समिधमाधायाग्निमुपस्थाय समिधं श्वीक्ष्य कर्मं
त्रेणाग्नौ प्रक्षिप्य जयादिभिर्हुत्वा प्रणीतमोक्षं ब्रह्मविसर्ज
नान्तं कर्म कुर्वीत चाज्यहोमानन्तरं स्विष्टकृद्धोमं मन्वते स
मिधाधानानन्तरं तैः सर्ववत् स्विष्टकृतं हुत्वा जयादिकं कु
र्वीत एतच्च कर्मपापतारतम्यानुसारेण श्वीक्षे त्रिरात्रा
दिसंवत्सरान्तं पत्ताणां मध्येन्यतरपत्ताश्रयेण कर्तव्यं याव
त्कर्मसमाप्तिः पयोव्रतं ब्राह्मणस्य यवागूव्रतं क्षत्रियस्या
मिक्षाव्रतं वैश्यस्येत्यादि मन्येत पयोव्रतादिभिः क्षीणो
भवामीति तत्र दोहनादिभिः श्वीक्षैः शरीरधारणं कुर्वीत
पयोव्रतमित्यादेरयमर्थः पय एव ब्राह्मणः सकृद्भुञ्जीत
तथा क्षत्रियो यवागूमामिक्षां वैश्य इति अथ सिंहे व्याघ्रा
दयो मन्त्रा आरख्यादिसहिताः प्रदर्श्यन्ते सिंहे व्याघ्रेति चतसृ
णां सोम ऋषिः त्विषिर्देवता त्रिष्टुप् छन्दः आज्यहोमे विनि
योगः सिंहे व्याघ्र उत या पृदाकौ त्विषिरग्नौ ब्राह्मणे सूर्ये इन्द्रं
या देवी सुभगा जजान सेयमागाद्वर्चसा संविदाना स्वाहा
त्विष्यै १ या राजन्ये दुन्दुभावायतायामश्वस्य क्रन्दे पुरुष
स्य मायौ इन्द्रं या देवी सुभगेत्यादि २ या हस्तिनि द्वीपि
नि या हिरण्ये त्विषिरश्वेषु पुरुषेषु इन्द्रं या देवीत्यादि ३ रथे
अक्षेषु ऋषभस्य वाजे वाते पर्जन्ये वरुणस्य शुष्मे इन्द्रमि
त्यादि ४ अग्नेभ्यावर्तिन्निति चतसृणामाङ्गिरऋषिः अग्निर

व्यावर्त्तीदेवता आद्यापञ्चपदे त्रिष्टुप् द्वितीयापंचपदा महा
बृहती श्नतरे द्वे गायत्र्यौ आज्यहोमे विनियोगः अग्नेऽभ्यावर्त्तिन्न
भि न आवर्त्तस्व आयुषा वर्चसा सन्या मेधया प्रजया धनेन स्वा
हाग्नेयेऽभ्यावर्त्तिने पवस्तु नर मन्त्रे श्रद्धे शत्यागः अग्ने अंगिरः
सन्तुते:समावृत:सहस्रस्तउपावृत:तासांपोषस्य पोषेण
पुनर्नो नष्टमाकृधि पुनर्नो रयिमाकृधि स्वाहा पुनरूर्जा नि
वर्तस्व पुनरग्न इषायुषा पुनर्नः पाहि विश्वतः स्वाहा सहरय्या नि
वर्त्तस्वाग्ने पिन्वस्व धारया विश्वप्स्न्या विश्वतस्परि स्वाहा अ
थ समिधमाधायोपस्थानं कुर्वीत वैश्वानराय इत्यनेन सूक्ते
न अस्य सूक्तस्य द्वादशर्चस्य ब्रह्मा स्वयम्भूः ऋषिः वैश्वान
रो यथालिंगोक्ता देवता आद्ये त्रिष्टुभौ तृतीया चतुर्थी अनुष्टु
भौ ततस्तिस्रः त्रिष्टुभः अष्टमी पंक्तिः ततो द्वे त्रिष्टुभौ एकाद
शी द्वादशी च पंचपदे शक्वर्यौ उपस्थाने विनियोगः वैश्वान
राय प्रतिवेदयामो यदीमृणं संगरो देवतासु स एतान्पाशा
न्मुञ्चप्रवेद स नो मुंचतु दुरितादवद्यात् १ वैश्वानरःपाव
यान:पवित्रैर्यत्संगरमभिधावाम्याशाम् २ अनाजानन्मन
सा याचमानो यदत्रैनो अपतत्सुवामि अमूयेसुभगेदिवि
विचृतौ नामतारके प्रेहामृतस्य यच्छतामेतद्बद्धकमोचनं
३ विजिहीर्ष्व लोकान्कृधि बन्धान्मुंचासि बद्धकं योनेरिव प्र
च्युतो गर्भः सर्वान्पथो अश्नात् ४ स प्रजानन्प्रतिगृह्णाति

विद्वान्प्रजापतिःप्रथमजाऋतस्य अस्माभिर्दत्तंजरसः
परस्तादछिन्नंतन्तुमनुसंचरेम ५ ततन्तन्तुमन्वेकेअनुसं
चरन्ति येषांदत्तंपित्र्यमायतनवत् अबन्ध्वेकेददतःप्रय
छन्तंदातुंचेच्छक्नवामसस्वर्गएषाम् आरभेथामनुसंरभेथां
समानंपन्थामवथोघृतेन यद्वांपूर्तंपरिविष्टंयदग्नौत
स्मैगोत्रायेहजायापतीसंरभेथाम् यदन्तरिक्षंपृथिवीमु
तद्यांयन्मातरंपितरंवाजिहिंसिम अग्निर्मातस्मादेनसो
गार्हपत्यउन्नोनेषदुरितायानिचकृमभूमिर्मातादिति
र्नोजनित्रंभ्रातान्तरिक्षमभिशस्त्यानःद्यौर्नःपितापित्र्या
च्छंभवतिजामिमृत्वामावपत्सिलोकात् यत्रासुहार्दस्सु
कृतोमदन्तिविहायरोगंतन्वंस्वां अश्लोणाअङ्गैरहुताःस्व
र्गेतत्रपश्येमपितरौचपुत्रं यदन्नमद्म्यनृतेनदेवाःदास्य
न्नदास्यन्नुतवाकरिष्यन् यद्देवानांचक्षुष्यागोअस्तियदे
वकिंचप्रतिजग्राहेअग्निर्मातस्मादनृणंकृणोतु यदन्नम
द्मिबहुधाविरूपंवासोहिरण्यमुतगामजामविम् यद्देवानां
चक्षुष्यागोअस्तीत्यादिएवमग्निमुपस्थाययन्मयेत्यनय
र्चाग्नौसमिधंनिदधीत अस्याऋचःस्वयम्भूऋषिः अग्नि
र्देवताअनुष्टुप्छन्दःसमिद्धोमेविनियोगः यन्मयामनसा
वाचाकृतमेनःकदाचन सर्वस्मात्तस्मान्मामितोमोक्षि
त्वंहिवेत्थयथातथंस्वाहा अथजयादिहोमः आज्यहो

म॰
क
१८

14

मात्सर्वमेवस्विष्टकृद्धोमाकरणपक्षे सर्ववत् हविषा स्विष्ट
कृतं जुहोति तत्र सर्वाकाशेष्वपि मन्त्रोऽसौ कार्योऽर्थमत्र उत्तर
पि प्रदर्शिते हव्यवाहनमित्येषा पुरोनुवाक्या स्विष्टमग्ने इत्ये
षा याज्या द्वयोरनयोर्विश्वेदेवा ऋषयः अग्निः स्विष्टकृद्दे
वता त्रिष्टुब्विराट् छन्दः स्विष्टकृद्धोमे विनियोगः हव्यवा
हनमभिमातिषाहं रक्षोहणं पृतनासु जिष्णुम् ज्योतिष्म
न्तं दीद्यतं पुरन्धिमग्निं स्विष्टकृतमाहुवेमोमिति पुरोनु
वाक्या मन्त्रः स्विष्टमग्ने अभितः गृणीहि विश्वेदेवाः पृत
नाश्च भिक्षा उरुक्षयमस्यो प्रतिषाल्विभाहि ज्योतिष्मद्धेहि जर
अमृता आयुरिति याज्यां स्वाहान्तां पठित्वा जुहुयात् अत्र ये
स्विष्टकृत इत्युद्देशात्यागः अथ इतः शेषमग्नेः पुरस्ताद्दक्ष
स्य पत्रे उपनिधाय कर्मसमृद्ध्यर्थं जयादिहोमं करिष्येत्यभि
लप्य जयादिहोमं कुर्वीत तत्र त्रयोदशानां याज्ञषाणां
जयमन्त्राणां विश्वेदेवा ऋषयः प्रतिमन्त्रं मन्त्रप्रथमप
दोक्ता गणा विशिष्टदेवता आज्यहोमे विनियोगः कर्म
समृद्ध्यर्थं वा विनियोगः एवमेव स्वाहा प्रभृत्युत्तरत्रापि
द्रष्टव्यम् चित्तं च स्वाहा चित्ताय चित्तिश्च स्वाहा चित्त्यै २
आकूतं च स्वाहा आकूताय ३ आकूतिश्च स्वाहा आकू
त्यै ४ विज्ञातं च स्वाहा विज्ञाताय ५ विज्ञानं च स्वाहा
विज्ञानाय ६ मनश्च स्वाहा मनसे ७ शक्करीश्च स्वाहा

शाक्वरीभ्यः ८ दार्शाय स्वाहा दार्शाय ९ पूर्णमासाय स्वा
हा पूर्णमासाय १० बृहते स्वाहा बृहते ११ रथन्तराय स्वा
हा रथन्तराय १२ प्रजापतिर्जायानिन्द्राय वृष्णे प्रायच्छ
दुग्रः पृतनाज्येषु तस्मै विशः समनमन्त सर्वाः स उग्रः स
इहव्यो बभूव स्वाहा प्रजापतये १३ इति जयाः अथा
भ्यातानः अष्टादशानामाभ्याताननानां विश्वेदेवा ऋषयः
प्रतिमन्त्रं मन्त्रपदोक्तैवगणविशिष्टा देवता यजुष्ट्वान्न
छन्दोनियमः आज्यहोमे कर्मसमृद्ध्यर्थं वा विनियोगः
अग्निर्भूतानामधिपतिः स मावत्वस्मिन्ब्रह्मन्नस्मिन्क्षत्रेऽस्या
माशिष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यां देवहूत्यां स्वाहा
अग्नये भूतानामधिपतये उत्तरमन्त्रेषु स मावत्वित्यादे
रनुषंगः १ इन्द्रो ज्येष्ठानामधिपतिः स मावत्वस्मिं इन्द्रा
य ज्येष्ठानामधिपतये २ यमः पृथिव्या अधिपतिः स
मावत्वस्मि यमाय पृथिव्या अधिपतये ४ सूर्यो दिवो दि
पतिः स मावत्वस्मिन्सूर्याय दिवोधिपतये ५ चन्द्रमा
नक्षत्राणामधिपतिः स मावत्वस्मिन् चन्द्रमसे नक्षत्राधि
पतये ६ बृहस्पतिर्ब्रह्मणामधिपतिः स मा बृहस्पत
ये ब्रह्मणोधिपतये ७ मित्रं सत्यानामधिपतिः स मा
मित्राय सत्यानामधिपतये ८ वरुणोपामधिपति
स मा वरुणायापामधिपतये ९ समुद्रः स्रवन्त्याना

स०
क०
१५

मधिपतिः स मा समुद्राय स्रवन्त्यानामधिपतये १० अन्नं साम्रा
ज्यानामधिपतिः स मा अन्नाय साम्राज्यानामधिपतये ११ सोम
ओषधीनामधिपतिः स मा सोमायौषधीनामधिपतये स्वाहा
१२ सविता प्रसवानामधिपतिः स मा सवित्रे प्रसवानामधिपत
ये १३ रुद्रः पशूनामधिपतिः स मा रुद्राय पशूनामधिपतये
१४ अप उपस्पृशेत् त्वष्टा रूपाणामधिपतिः स मा त्वष्ट्रे रूपा
धिपतये १५ विष्णुः पर्वतानामधिपतिः स मा विष्णवे पर्वता
धिपतये १६ मरुतो गणानामधिपतिः स मा मरुद्भ्यो गणा
नामधिपतिभ्यः १७ पितरः पितामहाः परेवरे ततस्ततामा
हाः इह मावन्तु अस्मिन्पितृभ्यः पितामहेभ्यः ततेभ्यस्ततामा
महेभ्यः १८ इत्यभ्यातना अथ राष्ट्रभृतः अन्नाद्यायपादेन द
शमंत्राः अथर्वं तप एव द्वाविंशतिः पंचाद्वाविंशतिर्यज्ञषोवि
श्वेदेवा ऋषयः स्वस्वमन्त्रोक्तगुणविशिष्टा गन्धर्वाप्सरसश्च
देवताः अन्नायपादेस मनस्य द्वादशस्य च भुवनस्य पतिर्देव
ता आज्यहोमे विनियोगः कर्मसमृद्ध्यर्थे वा विनियोगः
ऋताषाड् ऋतधामाग्निर्गन्धर्वः स इदं ब्रह्म क्षत्रं पातु तस्मै स्वा
हा ऋतसाहे ऋतधाम्ने अग्नये गन्धर्वाय १ तस्यौषधयोऽप्स
रस ऊर्जो नाम त इदं ब्रह्म क्षत्रं पान्तु ताभ्यः स्वाहा ओषधीभ्य
अप्सरोभ्य ऊर्ग्भ्यः २ संहितो विश्वसामा सूर्यो गन्धर्वः स न इदं
ब्रह्म क्षत्रं पातु तस्मै स्वाहा संहिताय विश्वसाम्ने सूर्याय गंध

र्वाय ३ तस्य मरीचयोप्सरस आयुवो नाम त इदं ब्रह्म क्षत्रं पान्तु
ताभ्यः स्वाहा मरीचिभ्योप्सरोभ्य आयुभ्यः ४ सुषुम्नः सूर्यरश्मिश्च
न्द्रमा गन्धर्वः स इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा सुषुम्नाय सूर्यरश्मये
चन्द्रमसे गंधर्वाय ५ तस्य नक्षत्राण्यप्सरसो वेकुरयो नाम त इदं
ब्रह्म क्षत्रं पान्तु ताभ्यः स्वाहा नक्षत्रेभ्यः प्सरोभ्यो वेकुरिभ्यः ६
भुज्युः सुपर्णो यज्ञो गन्धर्वः स इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा भु
ज्यवे सुपर्णाय यज्ञाय गन्धर्वाय ७ तस्य दक्षिणा अप्सरस
स्तवा नाम त इदं ब्रह्म क्षत्रं पान्तु ताभ्यः स्वाहा दक्षिणाभ्योप्सरो
भ्यस्तवाभ्यः ८ प्रजापतिर्विश्वकर्मा मनो गन्धर्वः स इदं ब्रह्म
क्षत्रं पातु तस्मै स्वाहा प्रजापतये विश्वकर्मणे मनसे गन्धर्वा
य ९ तस्य ऋक्सामान्यप्सरसो वह्नयो नाम त इदं ब्रह्म क्षत्रं
पान्तु ताभ्यः स्वाहा ऋक्सामभ्य अप्सरोभ्यो वह्निभ्यः १० इषि
रो विश्वव्यचा वातो गन्धर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा
इषिराय विश्वव्यचसे वाताय गन्धर्वाय ११ तस्यापोप्सरसो मुदा
नाम त इदं ब्रह्म क्षत्रं पान्तु ताभ्यः स्वाहा अद्भ्योप्सरोभ्यो मुदाभ्यः
१२ भुवनस्य पते यस्य त उपरि गृहा इहा स रोज्यानिं रायस्पोषं सु
वीर्यं संवत्सरीणां स्वस्तिं स्वाहा भुवनपतये १३ परमेष्ठ्यधिप
तिर्मृत्युर्गन्धर्वः स इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा परमेष्ठिनेधि
पतये मृत्यवे गन्धर्वाय १४ तस्य विश्वमप्सरसो भुवो नाम त इदं
ब्रह्म क्षत्रं पान्तु ताभ्यः स्वाहा विश्वस्या अप्सरोभ्यो भूभ्यः १५ स

म॰
क॰
१६

तितिः सम्भूतिर्मेहूरुक् सुपर्णः पर्जन्यो गन्धर्वः स न इदं ब्रह्म क्षत्रं पा
तु तस्मै स्वाहा स्वस्तितये सम्भूतये मेहूरुके सुपर्णाय पर्जन्याय
गन्धर्वाय १६ तस्य विद्युतोऽप्सरसो नाम ता न इदं ब्रह्म क्षत्रं पान्तु
ताभ्यः स्वाहा विद्युद्भ्योऽप्सरोभ्य ऋग्भ्यः १७ दूरेहेतिरमृतयो
मृत्युर्गन्धर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा दूरेहेतयेऽमृता
यमृत्यवे गन्धर्वाय १८ तस्य प्रजा अप्सरसो भीरुवो नाम इदं ब्र
ह्म क्षत्रं पान्तु ताभ्यः स्वाहा प्रजाभ्योऽप्सरोभ्यो भीरुभ्यः १९ चारुः
कृपणकाशी कामो गन्धर्वः स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा
चमवे कृपणकाशिने कामाय गन्धर्वाय २० तस्याधयोऽप्स
रसो शोचयन्तीर्नाम ता न इदं ब्रह्म क्षत्रं पान्तु ताभ्यः स्वाहा आधिभ्यो
ऽप्सरोभ्यः शोचयन्तीभ्यः २१ मनो भुवनस्पतये यस्य त उपरि गृ
हा इह च न रु ब्रह्मणेऽस्मै क्षत्राय महि शर्म यच्छ स्वाहा भुवन
स्य पत्ये २२ इति राष्ट्रभृतः जयाजया अभ्यातना राष्ट्रभृत इ
ति गणत्रयमन्त्रो न पहोम इत्युच्यते तथा समनन्तरं वक्ष्यमा
णाः प्रजापतये इत्यारभ्य स्विष्टकृत्पर्यन्ताः पश्चाद् उपहोमा
अभिधीयन्ते ते पश्चात् प्रायश्चित्तार्थमपि तत्र पंचानां मंत्रा
णां प्रजापते इत्यादीनां मध्ये प्रथमोऽन्त्यो विश्वेदेवा ऋषयः
मध्ये स्थितानां व्यस्तानां तिसृणां व्याहृतीनां क्रमेण जमद
ग्निभरद्वाजभृगव ऋषय आदित आरभ्य प्रजापतिरग्निर्वायुः
सूर्योऽग्निः स्विष्टकृदिति देवताः प्रजापत इति त्रिष्टुप् आद्या

व्याहृतिर्देवीगायत्रीछंदोऽग्निर्होमदस्येतिप्रादिष्टंयजुःआ
ज्यहोमेकर्मसमृद्ध्यर्थे विनियोगः प्रजापतेनत्वदेवताभ्यो
न्यविश्वाजातानिपरिताबभूवयत्कामास्तेजुहोमस्तन्नोअ
स्तुवयंस्यामपतयोरयीणांस्वाहाप्रजापतये १ भूःस्वाहाग्न
ये भुवःस्वाहावायवे स्वःस्वाहासूर्याय ४ यदस्यकर्मणो
त्यरीरिचंयद्वान्यूनमिहाकरं अग्निःस्विष्टकृद्विद्वान्सर्वंस्वि
ष्टंसुहुतंकरोतुस्वाहाअग्नयेस्विष्टकृते ५ अथभूयाजम
मिद्धमग्नयेस्वाहेत्यया वा यथाकहोमपत्नेवहिर्यजन
परिधिप्रकरणे संस्रावभागेभ्यइति संस्रावंजुहोति अथ
वाप्रजापतिदिष्टंस्रावभागदैवत्यंसस्रावभागास्थेतियजुः
पठित्वाजुहुयात् मंत्रस्तु संस्रावभागास्तेषांबृहन्तः प्रस्त
रेष्ठावर्हिषदश्चदेवाः इमांवाचमभिविश्वेगृणन्ति आसा
द्यास्मिन्वर्हिषिमादयध्वमिति अथप्रायश्चित्ताहुतयः
तत्रानाज्ञातत्रयंप्रथमतोजुहुयात् अनाज्ञातत्रयस्य
विश्वेदेवाऋषयोऽग्निर्देवता आद्येऽनुष्टुभौतृतीयात्रिष्टुप्
अनाज्ञातदोषनिर्हरणार्थे विनियोगः अनाज्ञातंयदाज्ञा
तंयज्ञस्यक्रियतेमिथुः अग्नेतदस्यकल्पयत्वंहिवेत्थयथा
यथंस्वाहाग्नये १ पुरुषसंमितोयज्ञोयज्ञःपुरुषसंमितः
अग्नेतदस्यकल्पयेत्यादि २ यत्पाकत्रामनसादीनदक्षा
नयज्ञस्यामन्वतेमर्तासः अग्निष्टद्धोताक्रतुविद्विजान

म० क १८

17

न्याजिष्ठो देवान् ऋतुथयजाति स्वाहा अग्नये २ अथ त्वन्नो स
त्वन्नो अग्ने इति द्वाभ्यां होमः एतयोर्द्वयोः ब्रह्मा स्वयम्भूरृषिः
अग्निवरुणौ देवता त्रिष्टुप्छन्दः विपर्यासान्तरायदोषनिर्हृतये
विनियोगः त्वन्नो अग्ने वरुणस्य विद्वान्देवस्य हेडो अवयासिसीष्ठाः
यजिष्ठो वह्नितमः शोशुचानो विश्वान्द्वेषांसि प्रमुमुग्ध्यस्मत्स्वाहा
अग्निवरुणाभ्यां १ स त्वन्नो अग्नेवमो भवतीनेदिष्ठो अस्या उष
सो व्युष्टौ अवयक्ष्वानो वरुणं रराणो वीहि मृडीकं सहवो न
एधि स्वाहा अग्निवरुणाभ्यां २ अथ केचित्त्वमग्ने अयासीत्यन
याज्ञिकाः अस्या ब्रह्मा स्वयम्भूरृषिः अनाग्निरया देवता अनु
ष्टुप्छन्दः सर्वप्रायश्चित्तार्थे विनियोगः त्वमग्ने अयास्ययाम
नसाहितः अयासन्हव्यमूहिषे अयानो धेहि भेषजं स्वाहा अग्न
येऽयसे १ अथ यजनदोषपरिहारार्थं भूः स्वाहेति जुहुयात्
अत्र च ब्यादिप्रयोगे वोक्तं अथ यत इन्द्रेति स्वास्ति चेति चाभ्यां
जुहुयात् अनयोर्विश्वेदेवा ऋषयः इन्द्रो देवता अनुष्टुप्छं
दः न्यूनातिरेकपरिहारार्थे विनियोगः यत इन्द्र भयामहे त
तो नो अभयं कृधि मघवञ्छग्धि तव तन्न ऊतिभिर्विद्विषो विमृ
धो जहि २ अथ यन्म आत्मनः प्रजाग्निरिति चेति द्वाभ्यां वा जुहु
यात् क्रमेण वाजः ऋच्छन्नयो रनयोर्विश्वेदेवा ऋषयः आद्या
स्या अग्निर्जातवेदा देवता द्वितीयस्याग्नी बृहस्पत्यश्विनो देवताः
अनुष्टुप्छंदः कर्मणः सम्पूर्णार्थे विनियोगः यन्म आत्मनो

मिर्माभूदग्निस्तस्मैनरायजातवेदाविचर्षणिःस्वाहा अग्नयेजा
तवेदसे १ पुनरग्निश्चक्षुर्दद्यात्पुनरिन्द्रोबृहस्पतिःपुनरश्विनायु
वंचक्षुराधत्तमक्ष्योःस्वाहा अग्नयइन्द्रायबृहस्पतयेअश्विभ्यांच
अथरुद्रंविष्णुस्त्र्यम्बकमित्याभ्यांहोमः तत्रक्रमेणसोमोविश्वेदे
वाश्चऋषयः विष्णुरुद्रश्चदेवतेयथाक्रमंगायत्र्यनुष्टुप्छंदः
नियमासनवाग्दोषनिवृत्त्यर्थेविनियोगः इदंविष्णुर्विचक्रमे
त्रेधानिदधेपदम् समूढमस्यपांसुरेस्वाहा विष्णवे त्र्यम्बकं
यजामहेसुगन्धिंपुष्टिवर्धनम् उर्वारुकमिवबन्धनान्मृत्योर्मु
क्षीयमामृतात्स्वाहा रुद्राय २ अथयाभिर्गीर्भिरित्यनयाजुहु
यात् अस्याविश्वेदेवाऋषयः इन्द्रोहरिर्देवतात्रिष्टुप्छंदः व
र्णकालस्वरस्थानलोमपरिहारार्थेविनियोगः याभिर्गीर्भिर्यद
तोनर्थनसाम्यायहरिवोवर्धमानः यदास्तोतृभ्योमहिगोत्रारुज
सिभूयिष्ठभाजोअधतेस्यामस्वाहाइन्द्रायहरिवते अथपुनस्त्वे
तस्याअग्निर्ऋषिः वसुरुद्रादित्यादेवतात्रिष्टुप्छन्दः मन्त्रव
त्वष्टयस्याप्युपस्थानदोषपरिहारेविनियोगः अत्रव्याहृतिभि
र्हुत्वापुनस्त्वेत्यनयाजुहुयात् विपरीतेपुनस्त्वादित्यारुद्रावस
वः समिन्धतांपुनर्ब्रह्माणोवसुनीथयज्ञैः घृतेनत्वातनवोव
र्धयस्वसत्याःसन्तुयजमानस्यकामाःस्वाहा वसुभ्योरुद्रेभ्य
आदित्येभ्यश्च अथसमस्ताभिर्व्याहृतिभिर्जुहुयात् अस्यमंत्र
स्यजमदग्निभारद्वाजभृगवऋषयः प्रजापतिर्देवता देवीबृ

म॰
क॰
१८

इतीध्मन्दः सर्वप्रायश्चित्तार्थे विनियोगः भूर्भुवः स्वः स्वाहा प्र
जापतये इदं न मम अथ परिषेचनादि ब्रह्मविसर्जनान्तं कर्म कु
र्वीत एतच्च कर्म यावन्ति व्रतदिनानि तेषु प्रतिदिनं मावर्तनीयं
अथ कूष्माण्डहोमे तैत्तिरीयशाखोक्तमाम्नायात् अष्टहीनमंत्राश्चे
गभावे मज्जेन श्रुतितन्त्रोक्तौ अत्र क्रमेणार्षमभिहितं अतः शाखां
तराद्रक्षमेणार्षभेदेऽपि न विरोधः एवमेवोत्तरत्र गणहोमेष्वव
गन्तव्यम् कूष्माण्डहोमादावेष क्रमः महार्णवाख्ये महितेऽप्र
बन्धेमान्यान्नामेभदनात्मजस्य तत्कर्मरत्नेच निरूपिर्हि
नीयसंगलसंयोगमगादगाथः अथ गणहोमः सत्याषाढं भम
तानुसारेणतावदभिधीयते अथानादवाककाम्यानां कर्मणां
वा आदौ पवित्रत्वादिकामनाया यदा तदैतत्कर्म कर्तव्यम् येषु
कर्मसु पतिपत्न्योः सहाधिकारः तेषामाधानादीनामादौ पत्नीस
हितोन्यत्र पवित्रत्वकामनायामेक एव स्वयं यजमानो दर्भेष्वा
सीनो दर्भान्धारयमाणः प्राणायामत्रयं कृत्वा प्रयोजनार्थं देशका
हंसवनत्रयं गणहोमान्होष्यामीति संकल्प्य स्वगृह्यानुसारेण
अग्निस्थापनप्रभृति स्थालीपाकतन्त्रोक्तिष्ठिनचर्वभिघारणांतं कृत्वा
पात्रप्रयोगकाले प्रोक्षणीपात्रेण सह प्रणीतापात्रं तं च तत्त्रिभि
र्वेष्टितं कलशं च प्रयुनक्ति प्रणीताप्रणयकाले प्रणीताथासा
धकलशे सपवित्रे अप आनीयोत्तरतो विदधाति आज्यविलाप
नप्रभृति स्रुवांते कर्मणि कृतेचैरोद्घृतमानीयदर्भाणुपस्तीर्य

18

द्विभुर्यो दायामिन्द्रार्यो मेन येतिषडर्चेन सूक्तेन सहस्रशीर्षो
त्यष्टादशार्चेन अग्निर्देवेति द्वाविंशत्यृचेनामगारस्य सूक्तेन यवा
मिन्द्रावरुणेत्यनेन गणेन चतुर्मंत्रेण यो वामिन्द्रावरुणेत्यने
न गणेन चतुर्मंत्रेण यो वामिन्द्रावरुणेत्यनेनाष्टर्चमन्त्रेण पव
मानः स्वरित्यनेन चानुवाकेन सप्तदशार्चेन यद्देवा देवहेड
नमिति विंशत्यृचेनाच्छिद्रपदितेनानुवाकेन वैश्वानरीनुका
केनाष्टमंत्रेण च पवमानभिर्गणैः प्रतिमन्त्रं जुहोति अथवा स
कृदुपहृत्य जुहुयात् आयं ततो जयादयः नवाज्यादयः
जयादिहोमं प्रत्येकं जयादीन् हुत्वा स्विष्टकृतं जुहोति तत्र सकृदु
पस्तरणं सकृदवदानं द्विरवधारणं च ततः शेषावशिष्टकर्म यथा
शक्त्यं कुर्वीतास्य कर्मणः प्रायश्चित्तार्थे शम्यः परिधयः प्रकारांत
रत्वेन परिधिग्रहणं भवति ततः कलशमादाय चतुष्पथं गत्वा पा
दप्रक्षालनं कृत्वाचम्य प्राङ्मुखः कलशमादाय सिंहे मे मन्युरि
त्यनुवाकेन कलशस्यां स्वात्मच्छायां पत्नीभिः सह कर्तृकत्वेन स
स्वात्मनोच्छायां दृष्ट्वा अमित्रानश्यापतो ये पथयः संतितिश्च यां
किंचिज्जलमानीय दुर्मित्रास्तस्मै भूयासुरिति दृष्ट्वा ततः कलशं
क्षिपेत् यस्यामस्य दिशि द्वेष्यो भवति ततोऽप उपस्पृश्य गृहा
न्व्रजेत् एवं समाहरेत् त्रिषवणे हुत्वा तेन आशीर्वचनं कारयेत्
ब्राह्मणभोजनं कुर्वीत समाहरेत् सवनत्रये मौनव्रती सकृदु
विष्याशी नियतेंद्रियश्च भवेदिति अन्यापसलमीययोगेनहो

म॰ क॰ १९

19

मविधिः अथ बौधायनमतेन गणहोमविधिः काम्यानां क
र्मणामाधानस्य वाग्न्यादौ वा यदा पवित्रकामनातदा गणहोमं
कुर्यात् सर्वाङ्गमिश्रनिष्ठापनान्तं कृत्वा प्राणानायम्य सकल
पापक्षयार्थमशेषकर्मानुष्ठानयोग्यतासिद्ध्यर्थं वा गणहोमं क
रिष्ये तत्र सविता देवता अयतावदित्यादि संकल्प्य पश्चाद्धोमांते
कृत्वा वशिष्ठचरौ प्रभृत्य माज्यमानीयमोल्लेनोपघातंके
होति अथेन यत्ति षड्ऋचेन पवित्रसूक्तेन सहस्रशीर्षेति
षोडशसूक्तेनाष्टादशर्चेन अग्निर्मत्वेति सप्तर्गादिसूक्तेन द्वात्रिं
शदृचेन चतुष्पतीकेन यावामिन्द्रावरुणेति चत्वारो मन्त्राः
सावर्षगाः इत्यहोमञ्चाग्नाभ्यां पावमानः स्ववरित्येते नानु
वाकेन विंशदृचेन वैश्वानरे यजेत्यष्टाभिः गणैः समुनरशतंच
रुणाहुत्वा स्विष्टकृतमवधाय व्याहृत्या स्विष्टकृदादि वरदानां
तं कृत्वोदपात्रमादायनैरृतीं दिशं गत्वा चतुष्पथ उपविश्योद
कपात्रं पुरो निधायतत्रात्मनो त्वममवेक्ष्यमाणः पाप्मानो वि
निधीय पाप्मानं विविच्यतास्तत्र तत्र विनिधाय विनिधीन्मंत्रा
न्निंद्रस्ते मन्युरित्यनुवाकं निगदयन्निनीयाप्सुः पुरोऽस्य पात्रमन
वेक्षमाण आगत्य हस्तपादं प्रक्षाल्यतेनैव यथोक्रमेतस्ना
स्नानं कुर्यात् एवमेव समाहं स्वनत्रयेकृत्वा समाहान्ते पा
यसेन सर्पिषा ब्राह्मणान्भोजयित्वा तेभ्यो गोभूमितिलहि
रण्यादि दत्वा सर्वेभ्यः पापेभ्यः प्रमुच्यते महतः पातकाद

पिकाम्यानां कर्मणामाधानादिकर्मणां चयोग्यो भवति इमां
क्रियामाचार्यपितृमातृणामात्मनश्चकुर्यात् नान्यस्य अन्य
स्य कुर्वन्नश्यति कारयितास्तु सर्वस्मात्पापात् प्रमुच्यते अष्टाय
नर्तमात्मपत्नाश्चस्य विकल्पितः अष्टानां गणानां होममात्रम
पि कुर्यात् एकं वा गणं जुहुयात् जपेत् द्वादश स्वीन्दशा
परानात्मनं चैव विंशं या वज्ञपश्यति तावत्तु नातियावद्धार
यति यश्चैतदाशयः स एव तदाहेत्याह भगवान्बौधायनः
इति बौधायनप्रोक्तगणहोमविधिः अथ मेधातिथ्यानुक्र
मसहितो गणहोमविधिः अथापि शुक्लत्रयुकस्यादौ कू
ष्माण्डगणहोमे के व व्यवस्थायास्तावाधाने चिकीर्षुः का
म्यकर्माणि वा चिकीर्षुस्तदादौ यदा वा सात्वा द्वादशं वार्षिका
दिप्रायश्चित्तविषयभूतपापनिवृत्तिकामनास्तदायज्ञमनः
स्वात्वनित्यं कर्माभिर्वर्त्य येषु कर्मसु हाधिकारस्तत्र पत्नी
सहितः पत्नीवहुत्वे चानिषिद्धाभिस्ताभिः सहितः पापस्त
यार्थस्य कर्मणः स्वयमेकैकः पवित्रपाणिर्दर्भेष्वासीनः प्रा
णानायाम्यात्मकप्रयोजनार्थं समारे सवनत्रयेण गणहो
मानहं ते ष्यामीत्यभिलष्यसे कल्पात्सर्वपश्चाद्धायथा स्त
मग्निं प्रतिष्ठाप्य यथाशास्त्रं प्रधानचरुहोमात्प्रागङ्गभूत
एकहोमकरणाय देनतत्र सविता देवताश्चास्वं तं त्रामित्या
यभिलष्यस्थालीपाकवत्पन्यवहं तीत्यादि प्रतिष्ठितवर्ध

म॰ क॰ २॰

20

भिघारणात् कृत्वा पात्रप्रयोगसमये प्रोक्षणीपात्रेण सह प्रणी
तपात्रेण तथा तन्नाभिर्वेष्टितं कलशं प्रयुज्य प्रणीताप्रणयनका
ले प्रणीताप्रसादनतः पवित्रे कलशोपस्थापनीयोदकस्य प्रणीत
पात्रस्योत्तरतो निदधीत ततश्च ब्रह्मप्रतिष्ठाज्यविलापनप्रभृ
त्यग्निमुखान्ते कृतांगभूतपक्वहोमकरणपक्षे चरुमवदानधर्मे
णादाय स्रुचा कण्डहोमोक्तनीत्या गायत्र्यौ पुरोनुवाक्यामनूच्य ततो मे
वयाज्यामुपदिश्य स्वाहेति जुहोति पवित्रं इदं शत्यागः आपस्तंभ
मतेऽग्निमुखानन्तरमेव प्रधानचरुहोमः बौधायनमतेनांग
भूतः पक्वहोमानन्तरमथ चरौ प्रभूतं घृतमानीय दर्व्या उपस्ती
र्याभिघारयेदवदायाभिघार्याग्ने नयेति मन्त्रेणान्यैश्च वक्ष्यमाणैः पुरुष
सूक्तादिभिस्तु नरशतं प्रतिमन्त्रं जुहुयात् अग्ने नयेति षड्ऋचस्य
पवित्रस्य अगस्त्यविश्वेदेवा ऋषयोऽग्निर्देवता त्रिष्टुप् छन्दः चरुहोमे
विनियोगः अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि वि
द्वान् युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम स्वाहा
अग्नये १ शुक्राय भानवे भरध्वं हव्यं मतिं चाग्नये सुपूतं यो दैव्या
नि मानुषा जनूंष्यन्तर्विश्वानि विद्मना जिगाति स्वाहा अग्नये २
अच्छा गिरो मतयो देवयन्तीरग्निं यन्ति द्रविणं भिक्षमाणाः सुस
न्दृशं सुप्रतीकं स्वञ्चं हव्यवाहमरतिं मानुषाणां स्वाहा अग्नये ३
अग्ने त्वमस्मद्युयोध्यमीवा अनग्नित्रा अभ्यमन्त कृष्टीः पुनरस्मभ्यं सुविता
य देव क्षां विश्वेभिरजरेभिर्यजत्र स्वाहा अग्नये ४ अग्ने त्वं पारया

नोयोअस्माभिःस्वस्तिभिरितिदुर्गाणिविश्वापृथ्वीवहुला
नउर्वीभवातोकायतनयायशंयोःस्वाहा अग्नये ५ प्रकारवो
ममनावच्यमानादेवद्रीचीर्नयथादेवन्तःदक्षिणावाड्वाजिनी
प्राच्येतिहविर्भिरण्यग्नयेस्वाहा अग्नये ६ अथवकंसूक्तम्
अयमेकोगणः सहस्रशीर्षेति अष्टादशर्चस्यपुरुषसूक्त
स्यप्रजापतिर्ऋषिः जगद्बीजंपुरुषोनारायणोवासुदेवो
देवताआद्याःपंचदशानुष्टुभः अन्त्यास्तिस्रस्त्रिष्टुभःचरुहो
मेविनियोगः सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात्
सभूमिंविश्वतोवृत्वात्यतिष्ठद्दशांगुलंस्वाहा जगद्बीजायपुरु
षायनारायणायवासुदेवायपुरुषदेवतत्वेनवत्यति वर्हि
षिपुरुषायेन्द्रदेशत्यागः १ अथनारायणस्तदानारायणा
येतिपवशुत्तरमन्त्रेषपि १ पुरुषएवेदंसर्वंयद्भूतंयच्चभव्यं
उतामृतत्वस्येशानोयदन्नेनातिरोहतिस्वाहा २ एतावान
स्यमहिमातोज्यायांश्चपुरुषःपादोस्यविश्वाभूतानित्रिपादस्या
मृतंदिवि ३ त्रिपादूर्ध्वउदैत्पुरुषःपादोस्येहाभवत्पुनः ततो
विश्वंव्यक्रामत्साशनानशनेअभिस्वाहा ४ तस्माद्विराडजा
यतविराजोअधिपूरुषः सजातोअत्यरिच्यतपश्चाद्भूमिमथो
पुरःस्वाहा ५ यत्पुरुषेणहविषादेवायज्ञमतन्वतवसंतोअ
स्यासीदाज्यंग्रीष्मइध्मशरद्धविःस्वाहा ६ सप्तास्यासन्परिध
यस्त्रिःसप्तसमिधःकृताः देवायद्यज्ञंतन्वानाअवध्नन्पुरुषं

म॰
क॰
२१

पुरुषम् ७ तंयज्ञंबर्हिषिप्रौक्षन्पुरुषंजातमग्रतः तेनदेवाअ
यजन्तसाध्याऋषयश्चये ८ तस्माद्यज्ञात्सर्वहुतःसम्भृ
तंपृषदाज्यं पशूंस्तांश्चक्रेवायव्यानारण्यान्ग्राम्याश्चये ९
तस्माद्यज्ञात्सर्वहुतऋचःसामानिजज्ञिरे छन्दांसिजज्ञिरेतस्मा
द्यजुस्तस्मादजायत १० तस्मादश्वाअजायन्तयेकेचोभयादतः
गावोहजज्ञिरेतस्मात्तस्माज्जाताअजावयः ११ यत्पुरुषंव्यदधुः
कतिधाव्यकल्पयन् मुखंकिमस्यकौबाहूकाऊरूपादाउच्यते १२
ब्राह्मणोस्यमुखमासीद्बाहूराजन्यःकृतः ऊरूतदस्ययद्वैश्यः
पद्भ्यांशूद्रोअजायत १३ चन्द्रमामनसोजातश्चक्षोःसूर्योअजा
यत श्रोत्राद्वायुश्चप्राणश्चमुखादग्निरजायत १४ नाभ्याआसी
दन्तरिक्षंशीर्ष्णोद्यौःसमवर्तत पद्भ्यांभूमिर्दिशःश्रोत्रात्तथालो
कामकल्पयन् १५ वेदाहमेतंपुरुषंमहान्तमादित्यवर्णंतमस
स्तुपारे सर्वाणिरूपाणिविचित्यधीरोनामानिकृत्वाभिवद
न्यदास्तेस्वाहा १६ धातापुरस्ताद्यमुदाजहारशक्रःप्रविद्वा
न्प्रदिशोदिशश्चतमेवंविद्वानमृतमिहभवतिनान्यःपन्थाअय
नायविद्यतेस्वाहा १७ यज्ञेनयज्ञमयजन्तदेवास्तानिधर्मा
णिप्रथमान्यासन् तेहनाकंमहिमानःसचन्तयत्रपूर्वेसा
ध्याःसन्तिदेवाः १८ जगद्बीजायनारायणायेतिवारत्रितिद्विती
यंसकृत् अथापरोगणः अग्निर्मन्वेतिद्वाविंशर्चस्यस्यगारि
सूक्तस्यविश्वेदेवाऋषयः लिंगोक्तादेवता आदितःसप्तोपरि

ष्टाज्योतिषः चतुर्दशी पथ्यापंचदशी षडष्ट्या व्वत्रुष्टुभौ सप्त
दशीजगतीतत्रात्रिष्टुप् ऊनविंशी विंशीचेपरिष्टाज्योतिषां
ग्रंत्येत्रिष्टुभौ चरुहोमे विनियोगः अग्नेर्मन्वे प्रथमस्य प्रचे
तसो यंपांचजन्यंबहवः समिंधते विश्वस्यांदिशि प्रविवि
शिवांसमीमहेसनोमुंचत्वंहसःस्वाहा १ यस्येदंप्राणंनिमि
षोयदेजतियस्यजातंजनमानंचकेवलंस्तौम्यग्निंनाथितो
जोहवीमिसनोमुंचत्वंहसःस्वाहाग्नये २ इन्द्रस्यमन्येप्रथ
मस्यमन्येप्रचेतसोवृत्रघ्नःस्तोमाउपमानस्तुपेयुः योदाशु
षःसुकृतोहवमुपगंतासनोमुंचत्वंहसःस्वाहेन्द्रस्य ३ यः
संग्रामंनयतिसंवशीयोयुधः पुष्टानिसंसृजतित्रयाणिस्तौ
मीन्द्रंनाथितोजोहवीमिसनोमुंचत्वंहसःस्वाहेन्द्राय ४
मन्वेवांमित्रावरुणानस्यवितंसत्योजरयाद्रंहणायन्नुदेथे
यराजानंसरथंयाथवंरथेजरश्मिभिःसत्यधर्मामिथस्नत
मुपयातिदूषयन् तौमित्रावरुणानाथितोजोहवीमितौनौ
मुंचतमागमःस्वाहामित्रावरुणाभ्यां ५ वयोःसवितुर्विद
थानिमन्महेयावात्मनविडिभर्तोयोचरावितःतौविश्वस्यपरि
भूयवभूवतःतौनोमुंचतमागमःस्वाहावायुसवितृभ्याम् ६
उपश्रेष्ठानोआशिषोदेवयोर्धर्मेअस्थिरन् स्तौमिवायुंसवि
तारंनाथितोजोहवीमितौनोमुंचतमागमःस्वाहावायुस
वीभ्याम् रथीतमौरथीनामकूतयेसभगामिष्ठौस्वयमेभि

रश्विभिः यद्योर्वान्देवौ देवेष्टनिशितमोजस्तौ नो मुंचतमागसः स्वाहा
अश्विभ्याम् ९ यद्यानेवहन्तं सूर्यायास्तिचक्रेण संसदमिच्छ
मानौ तौ मिदेवावश्विनौ नाथितो जुहवीमि तौ नो मुंचतमाग
मः स्वाहाश्विभ्यां १० मरुतामन्वेअधिनो वन्तुप्रेमां वाचं विश्व
वन्तविश्वेअश्नुद्वेसयमानुतयेते नो मुंचतेनमः स्वाहा मरुद्भ्यः
११ तिग्ममायुधं वीडितं सहस्वद्दिव्यं शर्द्धः पृतनासु जिष्णुंस्तौ
मिदेवान्मरुतो नाथितो जुहोमि ते नो मुंचन्त्वेनसः स्वाहा मरुद्भ्यः
१२ देवानामन्वेअधिनो भुवंतप्रेमां वाचं विश्वामवंतुविश्वेअ
श्नुद्वेसयमानुतयेते नो मुंचतं हसः स्वाहा विश्वेदेवेभ्यः १३
यदिदं मामभिशोचति पौरुषेयेण दैव्येन स्तौमि विश्वान्देवान्ना
थितो जुहवीमि ते नो मुंचन्त्वेनसः स्वाहा विश्वेभ्यो देवेभ्यः १४
अनुनोद्यानुमतिर्यज्ञं देवेषु मन्यतामग्निश्च हव्यवाहनो दाशुष
मयः स्वाहानुमत्यै हव्यवाहनायाग्नयेच १५ अन्विदनुमते
त्वमन्यमेशञ्जानः कृधि क्रत्वे दक्षाय नो हिन प्राण आयूंषि ता
रिषः स्वाहानुमत्यै १६ वैश्वानरो न ऊत्या प्रयातु परावतः
अग्निरुक्थेन वहसा स्वाहा वैश्वानरायाग्नये १७ पृष्टो दिवि
पृष्टो अग्निः पृथिव्यां पृष्टो विश्वा ओषधीरा विवेश वैश्वानरः स
हसा पृष्टो अग्निः स नो दिवा स रिषः पातु नक्तम् स्वाहा वैश्वानरा
यग्नये १८ येअप्रथेताममितेभिरोजोभिर्जे प्रतिष्ठे अभवतां
वसूनां तौ मि द्यावापृथिवी नाथितो जुहवीमि ते नो मुंचतमं

हसःस्वाहाद्यावापृथिवीभ्याम् १९ उर्वीरोदसीवरिवःकृणोतं
क्षेत्रस्यपत्नीअधिनोब्रूयामेतौमिद्यावापृथिवीनाधितोजड्
वीमितेनोमुंचतमंहसःस्वाहाद्यावापृथिवीभ्याम् २० यन्नेवयं
प्रकुषच्चायविद्वांसश्चकृमाकश्चनागाःकृधीत्वस्मोअदितेरना
गाव्येनांसिशिश्रथोविष्वग्नेस्वाहाऽग्नये २१ यथाहतद्वसवोगौ
र्यंचित्पदिषितमुंचतायजत्राःएवात्वमस्मात्प्रमुंचाव्यंहः
प्रातार्यग्नेप्रतरान्नआयुःस्वाहाअग्नये २२ इतितृतीयस्तृणम्
अथतृतीयोगणःयावांमित्रेत्येषांचतुर्णांयजुर्मंत्राणांवि
श्वेदेवाऋषयःइंद्रावरुणौदेवताचरुहोमेविनियोगःइंद्रावरु
णाभ्यां १ यावांमिन्द्रावरुणायतव्यास्तनूस्तयेहमंमुंचतस्वाहा
इन्द्रावरुणाभ्यां १ यावांमिन्द्रावरुणाःसहस्यास्तनूस्तयेहमो
मुंचतेस्वाहा २ यावामिंद्रावरुणारक्षास्तनूस्तयेहमंहसोमुंच
तस्वाहा इंद्रावरुणाभ्यां ३ यावांमिंद्रावरुणातेजस्यास्तनूस्त
येहमंहसोमुंचतस्वाहाइंद्रावरुणाभ्यां ४ अथचतुर्थोगणः
योवांमित्रावरुणावितिषट्यजुर्मंत्राणांविश्वेदेवाऋषयःइंद्रा
वरुणौदेवताचरुहोमेविनियोगः योवांमित्रावरुणावग्नौस्राम
स्तंयामेतेनावयजेस्वाहाइंद्रावरुणाभ्यां १ योवांमित्रावरुणा
विपानेषुशस्त्रस्रावस्तंवामेतेनावयजेस्वाहाइंद्रावरुणाभ्यां २
योवांमित्रावरुणाचतुर्षुस्रावस्तंवामेतेनावयजेस्वाहाइंद्रावरु
णाभ्यां ३ योवांमित्रावरुणागृहेषुस्रावस्तंवामेतेनावयजेस्वाहा

इन्द्रावरुणाभ्यां ५ योवांमित्रावरुणास्वस्त्यावस्तंवामेतेनावय
जेस्वाहाऽइंद्रावरुणाभ्यां ६ योवांमित्रावरुणौषधीषुस्वावस्तंवा
मेतेनावयजेस्वाहाऽइन्द्रावरुणाभ्यां ७ योवांमित्रावरुणावन
स्पतिषुस्वावस्तंवामेतेनावयजेस्वाहाऽइन्द्रावरुणाभ्यां ८ अथ यं
पंचमोगणः पवमानइतिसप्तदशर्चस्यानुवाकस्यसोमऋ
षिः लिंगोक्तादेवतापावमान्योवादेवता आद्येद्वेगायत्र्यौतृती
यानुष्टुप्चतुर्थीपंचम्यौगायत्रीततोद्वेत्रिष्टुभौअष्टमीगायत्री
ततोष्टावनुष्टुभःसप्तदशीत्रिष्टुप्चरुहोमेविनियोगः पव
मानःसुवर्जनःपवित्रेणविचर्षणिःयःपोतासपुनातुस्वाहा
पवमानायपावमानीभ्योवाउत्तरमन्त्रेष्वपिपावमानीभ्योवाउ
त्तरमंत्रेष्वपिपावमानीभ्योवेत्युद्देशत्यागः १ पुनन्तुमादेवज
नाःपुनन्तुमनवोधियाःपुनन्तुविश्वआयवःस्वाहादेवजनेभ्यो
मनुष्येभ्योविश्वेभ्यआयुभ्यः २ जातवेदःपवित्रवत्पवित्रेणपु
नीहिमाशुक्रेणचदीप्यत् अग्नेक्रत्वाक्रतूंरनुस्वाहाजातवेदसे
ऽग्नये ३ यत्तेपवित्रमर्चिष्यग्नेविततमन्तराब्रह्मतेनपुनी
महेस्वाहाऽग्नये ४ उभाभ्यांदेवसवितःपवित्रेणसवेनचेदं
ब्रह्मपुनीमहेस्वाहासवित्रे ५ वैश्वदेवीपुनतीदेव्यागाद्यस्यैब
ह्वीस्तन्वोवीतपृष्ठाःतयामदन्तःसधमाद्येषुवयंस्यामपतयोर
यीणांस्वाहावैश्वदेव्यै ६ वैश्वानरोरश्मिभिर्मापुनातुवातःप्रा
णेनेषिरोमयोभूःद्यावापृथिवीपयसापयोभिःऋतावरीयज्ञि

यमापुनीतास्वाहावैश्वानरायवाताभुवेद्यावापृथिवीभ्यांच
७ बृहद्भिःसवितस्त्रिभिर्वर्षिष्ठैर्देवमन्मभिः अग्नेदक्षैःपुनीहिमा
स्वाहासवित्रेअग्नयेच ८ देवाशम्भुननयोनमोदिव्यंकषः
तेनादिव्येनब्रह्मणेदंब्रह्मपुनीमहेस्वाहाब्रह्मणे ९ यःपा
वमानीरध्येत्यृषिभिःसंभृतंरसं सर्वंसपूतमश्नातिस्वदितं
मातरिश्वनास्वाहापावमानीभ्यः १० यःपावमानीरध्येत्यृ
षिभिःसंभृतंरसंतस्मैसरस्वतीदुहेक्षीरंसर्पिर्मधूदकम्स्वाहा
पावमानीभ्यः ११ पावमानीःस्वस्त्ययनीःसुदुघाहिपयस्वतीः
ऋषिभिःसंभृतोरसोब्राह्मणेष्वमृतंहितंस्वाहापावमानीभ्यः
१२ पावमानीर्दिशन्त्विमंलोकमथोअमुम् कामान्समर्धयन्तु
नोदेवीर्देवैःसमाभृताःस्वाहापावमानीभ्यः १३ पावमानीः
स्वस्त्ययनीःसुदुघाहिघृतश्चुतः ऋषिभिःसंभृतोरसंब्राह्मणे
ष्वमृतंहितंस्वाहापावमानीभ्यः १४ येनदेवाःपवित्रेणात्मा
नंपुनतेसहस्रधारेणपावमानःपुनन्तुमास्वाहापावमानीभ्यः
१५ प्राजापत्यंपवित्रंशतोद्यामंहिरण्मयंतेनब्रह्मविदोवयं
पूतंब्रह्मपुनीमहेस्वाहापावमानीभ्यःप्रजापत्यायपवित्राय
वा १६ इंद्रःसुनीत्यःसहसापुनातुसोमःस्वस्त्यावरुणःसमी
च्यायमोराजाप्रमृणाभिःपुनातुजातवेदामूर्जयंत्यापुनातु
स्वाहासुनीत्यासहितायइंद्रायस्वस्त्यासहितायसोमायसमी
च्यासहितायवरुणाय प्रमृणाभिःसहिताययमायराज्ञेम्

म॰
क॰
२८

२५

र्येयंत्वा सहितायजातवेदसे ९ अयंतस्य शेषगणः यद्देवा
देवहेडनमित्यास्याच्छिद्रपदितस्य विंशद्दचस्यानुवाकस्यावि
श्वेदेवा ऋषयः लिंगोक्तादेवता आद्यानुष्टुप् द्वितीयाषडवसा
नाजगतीमहापंक्त्याख्यातृतीयानुष्टुप्चतुर्थीत्रिष्टुप् पंचमी
सप्तपदातिशक्करीषष्ठीत्रिष्टुप् सप्तमीषडवसानातिजगती
अष्टमीषट्पदाजगतीनवमीबृहतीततोद्वेषट्पदेशाक्वर्यौ
द्वादशीत्रिष्टुप्त्रयोदशीसप्तपदा अष्टिः चतुर्दशीअनुष्टुप्
विराट् षोडशीगायत्रीततस्तिस्रः त्रिष्टुभः विंशत्यनुष्टुप् च
तद्धोमे विनियोगः यद्देवा देवहेडनं देवासश्चकृमावयम्
आदित्यास्तस्मान्मुंचतऋतस्यर्तेन सप्रत्रस्वाहा आदित्येभ्यः १
देवा जीवनकाम्या यद्वाचानृतमूदिम अग्निर्मा तस्मादेनसो
गार्हपत्यः प्रमुंचतु दुरिता यानिचकृम करोतु मामनेनसं स्वा
हा अग्नये गार्हपत्याय २ ऋतेन द्यावापृथिवी ऋतेन त्वं सर
स्वति ऋतं मां मुंचतांहसो यदन्यकृतमारिम स्वाहा द्यावापृ
थिवीभ्यां सरस्वत्यै च ३ सजातशंसादुतजामिशंसाज्ज्यायसः
शंसादुतवा कनीयसः अनाज्ञातं देवकृतं यदेनः तस्मात्त्वम
स्मान् जातवेदो मुमुग्धि स्वाहा जातवेदसे ४ यद्वाचा यन्मन
सा बाहुभ्यामूरुभ्यामष्ठीवद्भ्यां शिश्नैर्यदनृतं चकृमा वयं अ
ग्निर्मा तस्मादेनसो गार्हपत्यः प्रमुंचतु दुरितानि यानि चकृ
म करोतु मामनेनसं स्वाहा अग्नये गार्हपत्याय ५ यदुक्ता

ध्यां च करा किल्बिषाण्यक्षाणां वग्नुमुपजिघ्नमानाः उग्रंपश्या च
राष्ट्रभृत्तस्तान्यप्सरसावनुदत्तामृणानि स्वाहा राष्ट्रभृते अप्सरो
भ्यश्च ६ उद्दीव्यन्नृणं यदाहं चकार यद्वा दास्यन्त्संजगा
राजन्येभ्यः अग्निर्मा तस्मादेनसो गार्हपत्यः प्रमुंचतु दुरिता
नि यानि चकृम करोतु मामनेनसं स्वाहा गार्हपत्याग्नये ७
यन्मयि माता गर्भे सति एनश्चकार यत्पिता अग्निर्मा तस्मा
दित्यादि ८ यदापिपेष मातरं पितरं पुत्रः प्रमुदितो धयन्
अहिंसितौ पितरौ मया तत्तदग्ने अनृणो भवति स्वाहा
अग्नये ९ यदन्तरिक्षं पृथिवीमुत द्यां यन्मातरं पितरं वा जिहिं
सिम अग्निर्मा तस्मादित्यादि १० यदाशसा निःशसा यत्प
राशसा यदेनश्चकृमा नूतनं यत्पुराणं अग्निर्मा तस्मादित्या
दि ११ अतिक्रम्य दुरितं यदेनो जिहिंसिम यो अस्मे मदस्य य
द्वयंति सह कृतो वा पितृकृत संरोहा मिश्र कृतं लोकं स्वाहा
अग्नये १२ त्रिते देवा अमृजतैतदेनस्त्रित एतन्मनुष्येषु मामृ
जे ततो मा यदि किंचिदानशे अग्निर्मा तस्मादित्यादि १३
दिवि जाता अप्सु जाता या जाता ओषधीभ्यः अथो या अग्नि
जा आपस्ता नः शुन्धन्तु शुंधनीः स्वाहा अद्भ्यः १४ यदापो न
क्तं दुरितं चराम यद्वा दिवा नूतनं यत्पुराणं हिरण्यवर्णा
ततस्त्वनीतन स्वाहा अद्भ्यः १५ इमं मे वरुण श्रुधी हवमद्या
च मृडय त्वामवस्युराचके स्वाहा वरुणाय १६ तत्त्वा या

म॰
क
२५
95

मिब्रह्मणावन्दमानस्तदाशास्तेयजमानोहविर्भिरहेडमानोव
रुणेहबोध्युरुशंसमानआयुःप्रमोषीःस्वाहावरुणाय १७ त्वंनो
अग्नेवरुणस्यविद्वान्देवस्यहेडोऽवयासिसीष्ठाःयजिष्ठोवह्नितमः
शोशुचानोविश्वाद्वेषांसिप्रमुमुग्ध्यस्मत्स्वाहाऽग्नीवरुणाभ्याम् १८
सत्वंनोअग्नेऽवमोभवतीनेदिष्ठोअस्याउषसोव्युष्टौअवयक्ष्वनोव
रुणंरराणोवीहिमृडीकंसुहवोनएधिस्वाहाऽग्नीवरुणाभ्यां १९
त्वमग्नेअयास्ययासन्मनसाहितःअयासन्हव्यमूहिषेयानोदेहि
भेषजंस्वाहाऽग्नयेअयासे २० अथमन्त्रवाकःसप्तमोगणः वैश्वान
रेत्यष्टानामृचांविश्वेदेवाऋषयः वैश्वानरोदेवता
आद्येगायत्र्यौ तृतीयाजगतीततःतिस्रस्त्रिष्टुभःसप्तमीजगती
अष्टमीत्रिष्टुप् चरुहोमेविनियोगः वैश्वानरोऽभयातुपरावतः
अग्निरुक्थेनवाहसास्वाहाऽग्नयेवैश्वानराय १ ऋतवानंवैश्वान
रंऋतस्यज्योतिषस्पतिंअजस्रंघर्मसीमहेस्वाहाऽग्नयेवैश्वान
राय २ वैश्वानरस्यदंसनाभ्योबृहदरिणादेकःस्वपस्ययाकविः
उभापितरामहयन्नजायताग्निर्द्यावापृथिवीभूरिरेतःस्वाहाऽग्न
येवैश्वानराय ३ पृष्टोदिविपृष्टोअग्निःपृथिव्यांपृष्टोविश्वाओ
षधीराविवेशवैश्वानरःसहसापृष्टोअग्निःसनोदिवासरिषः
पातुनक्तंस्वाहाऽग्नयेवैश्वानराय ४ जातोयदग्नेभुवनाव्यख्यः
पशुन्नगोपइर्यःपरिज्मावैश्वानरब्रह्मणेविन्दगातुंयूयंपातस्व
स्तिभिःसदानःस्वाहाऽग्नयेवैश्वानराय ५ त्वमग्नेशोचिषा

शोसुचानआरोदसीअपृणाज्जायमानः त्वंदेवामभिशस्तेर
मुंचोवैश्वानरजातवेदोमहित्वास्वाहाग्नयेवैश्वानरायजातवेद
से ६ अस्माकमग्नेमघवत्सुदीदिह्यधश्वसीवान्वृषभोदमूना
अवास्याशिशुमतीवदीदेर्वयत्सुपरिजर्हमाणःस्वाहाग्नये
वैश्वानराय ७ वैश्वानरस्यसुमतौस्यामराजातिकंभुवनाना
ममिःश्रीःइतोजातोविश्वमिदंविचष्टेवैश्वानरोयततेसूर्ये
णस्वाहाग्नयेवैश्वानराय ८ अथहोमगणः इत्यष्टाभिर्गणैः
प्रतिमंत्रंचतुरंशंतेचरुणाहुत्वाजयादिहोमंजुहुयात् नव
जयादयोभवन्तिजयादिमंत्राः कूष्मांडहोमेप्रदर्शिताः यदस्य
कर्मणोत्यरीरिचइत्येतदन्ताःजयादिहोमपक्षेजयादिहोमा
नन्तरंसकृदुपस्तीर्यसकृदवदायद्विरभिघार्याग्नयेस्विष्टकृ
तेस्वाहेतिस्विष्टकृतंजुहुयादित्यादित्यापस्तम्बमतेबोधायन
मतेतुप्रधानचरुहोमानन्तरंएवयानथमेणास्विष्टकृतमव
दायविश्वेदेवर्षेवाग्निस्विष्टकृद्देवतेयत्रत्रिष्टुप्विराट्छन्दसोया
ज्यानुवाक्यमंत्रौपठित्वाजुहुयात् मन्त्रौतुहव्यवाहनमभि
मातिषाहंरक्षोहणंपृतनासुजिष्णुंज्योतिष्मन्तंदीद्यतंपुरंधिम
ग्निंस्विष्टकृतमाहुवेमेमितिपुरोनुवाकाअथयाज्याततःस्वि
ष्टमग्नेअभितःपृणाहि विश्वेदेवाःपृतनाअभिष्यागरुन्नःप
न्थांप्रविशन्विभाहिज्योतिष्मद्धेह्यजरंनआयुःस्वाहाग्नयेस्वि
ष्टकृते एवंस्विष्टकृतंहुत्वाब्रह्मवरदानान्तंकर्मकुर्वीत

आपस्तंभमतेन स्विष्टकृतं हुत्वाथ त्रयाज्यसमिधमग्नये स्वाहे
आवाहयन्द्राय नान्निचिराय स्वाहेति इध्मइन्धनीमपि हुत्वा न
नष्टस्य कर्मणः प्रायश्चित्ते परिधिप्रहरणाभावः प्रकारान्तर
णैतद्वा होरं जनपरिधि प्रहरणसंस्रावहोमान्ते कर्मकृत्वा ततः
प्रायश्चित्ताहुतीर्जुहुयात् संस्रावादिहोमप्रकारोऽपि समंत्रको
विश्वेभ्यो देवेभ्यः संस्रावभागेभ्य इत्यादिनाग्रन्थेन जयादिहोमा
नन्तरं कूष्माण्डहोमप्रकरणे दर्शितः अथ मतद्वयेऽपि ब्रह्मविस
र्जनान्ते कर्माणि संपूर्णे पूर्वोक्तादितः कलशमादाय नैर्ऋती दि
शमागत्य चतुष्पथे उपविश्य पादौ प्रक्षाल्याचम्य प्राङ्मुख उपवि
श्य कलशं पुरो निधाय तत्र पत्नीभिः सहकर्तृकत्वेनाभिः सहै
कस्यैव कर्तृत्वे तदा स्वयमेव यजमानः कलशमात्मनेऽपमवे
क्षमाणो विनिधि संज्ञकमंत्रसमुदायात्मकं सिंहे मे मन्युरित्यनु
वाकं वैधायनप्राणीतकल्पसूत्रस्थं पठेत् अस्यानुवाकस्य सौ
भाग्यादेवताऽप्यादयः प्रदर्शिताः सिंहे मे मन्युर्व्याघ्रे मेन्तरायोऽह
के मे त्वष्टवेसंश्रमितृतिर्वृके मे पिपासा राजगृहे मे श्रयानाश्मनि
मे तं द्विगर्दभे मेऽरिशः श्वर्यके मे क्षीरपचक्रे मे वपश्रुः कूर्मे मेग
रोवर्त्मे मेश्रुपर्याश्रांतच्छाश्रिये मेमन्युपमे पापा सपत्ने मे निष
त्रिर्ङ्क्षीर्मे त्रृडिः पश्यन्ति समृडिः त्वहि मे ऋतिर्गवये मे अंकु
गोरे मे वातियर्म हस्ते मे शोको गोधायां मे स्वेदो जरायां मे हिसहु
लशब्दौमे भीरुता काशे मो पापगान्धउलूके मे शुक्रात्ययः को

केमे ईर्ष्यामर्कटे मेड्डुर्त्तेडिः क्षलले मे प्रालस्य लले मे प्राव्याउ
ष्ठेमे तस्माउरे मे श्रमतव्यामे श्रार्ये कोशे मे गन्धः कुमार्यामे ल
कारः संकरे मे क्रन्दघुः शदाकुनिमे सम्भोजगरे मे डुः स्वप्नो
विद्युति मस्मयो लोभार्यां मे क्लेदः शारभे मे पापात्मा लक्ष्मीः स्त्री
षु मे नृतमर्णः सककर्कशे श्वाते मे पत्न्यास्त्वदे मे स्तेयं वैश्ये मे
कार्मं हत्यं राजन्यं वेषु निमे त्तानं निषादे मे ब्रह्महत्या कुलिं
गे मे द्रव्यघुः शल्ले मे विलासः किं पुरुषेषु मे नादेः ह्रीपिति
मे रिष्टं हालितिनि किलासः स्तुनिमे डुरितं स्वार्तवेषु मे श्रेष्ठो
विदेहेषु मे शापघो महावर्षेषु मे लालं वत्से मे वज्रातं दतौ मे शो
षः शहलाकुषु मे पित्रे कलिङ्गेषु मे मे ध्यं उं अक्षल्या मे उअक्षरिभ्रमा
दुनिमे दद्रुरोगो मालिकायां मे स्वल्कः स्तुके मे हरिमा मष्टरेज
लपाप्रेषु मे जराचाषमे पापवादश्च स्तमे श्रमो भौमे किल्विष
मप्येहि पाप्मन् पुनरपनाशिभो भवान् नः पाप्मन् सुकृतस्य लो
के पापमेत्तावद्यतो यो नः पाप्मानं जहाति तमद्र. कुजहि मे
वयमन्यत्रास्मिन्ना विशातं सहस्रा देव्य मर्त्यो यो नो द्वेष्टि मारि
ष्यं तियस्य द्विष्मस्तमञ्ज होत्यभिमंत्र्य यस्यामस्यादिशि द्वेष्यो
भवति तां दिशमेताश्च पउपसिंचेत् एष्टतो ड्डर्मिं ब्रास्त्र स्मे भूया
सः यो स्मान्द्वेष्टि यं च वयं द्विष्मः इति अथापरे उपस्पृश्य पात्रमेन
वेत्समारुणे यथेतं देवयजनं प्रविशेत् नतस्माश्नतपनं समा
हे त्रिषु भवनेषु कृत्वा नेष्मा शीर्वचनं कारयित्वा प्राणायमेनम्

षिकायथाशक्तिब्राह्मणान्भोजयित्वा तेभ्यो गोभूतिलहिरण्या
नि दद्यात् यावद्व्रतं सवनत्रये मौनी सकृद्धविष्यादी नियतें
द्रियश्च भवेत् एवं कुर्वन्सर्वेभ्यः पापेभ्यः प्रमुच्यते महार्ण
वाख्ये महिते प्रबन्धे मान्धातृनाम्नो मदनात्मजस्य सत्कर्म
रत्नोच्चनिधिप्रतीपस्तं गतस्तं रोगोयमगादगाधः ॥ सत्कर्म
विपाकपरिभाषायां प्रासंगिकं परिसमाप्य प्रातिमनुसरामः
अथ कर्मतयोपायौ कृच्छ्रव्याधिविपर्ययौ क्लेशामहत्वात्त
त्वात्येगां दयाद्व्याधिकर्षितः एकां कृच्छ्रेतिकृच्छ्रे देतिसच्छ्रो
द्वायनेव्रते गवामभावे निष्कं वासाशीतिशतकृच्छ्रः जप
दानेपितत्समं कूष्मांडगणहोमवत् सर्वपापप्रमुक्त्यर्थम
थव्याधिविपर्ययः इत्येते श्लोकाः कूष्मांडहोमात्साध्याख्या
तः तत्राथ व्याधिविपर्ययः इत्यनेन व्याधिप्रतिकृतिदानं वक्ष्य
ति इतितदिदानीं व्याधिप्रतिकृतिदानं विवक्षन्तदुपयुक्तं किं
चिदाह प्रतिमादिप्रकाराधिदेवताश्चानेके देवता तत्र तत्र रु
जादिदेवताप्रायेण सूर्यः सर्वेषां रोगाणामधिदैवतम् आ
रोग्यं भास्करादिच्छेदिति प्रसातनाश्रुतिस्मृतिः ततो व्याधिप्र
तिमायामानेकनाम्नी देवता भवति तत्र रुजादिदेवतानत्र
व्याधिप्रकृतिरुजाकर्मणोऽधिदेवता सूत्र मूर्तिः रुज्याश्च ध
नाव्याधिप्रकृतिद्रव्यपरिमाणमधिदेवताप्रतिमाद्रव्यपरि
माणं चाह सूर्यं हि लोचनं पद्मदथानं तत्करद्वये व्याधिप्रति

मालक्षणेतत्रापिहरकर्मप्रकरणेइत्थंकथयगमियास्यते
व्यापिभेदात्मतिमालक्षणान्यपिभिन्नानिमंडपपरिमाणेवे
दिकापरिमाणेचाह षोडशद्वादशाष्टौवाहस्ताःस्युर्मंडपेकृते
तत्पादेनचतुरश्राचांहस्तोच्छ्रायांचवेदिकाम् षोडशवाद्वाद
शावाष्टौवाहस्तास्तत्परिमिताशांतिकर्मणिभवति तेर्हस्ते
स्तत्संख्याकहस्तपरिमितएवमंडपोभवेत् तस्मिन्मंडपेकृ
तेतत्पादेनमंडपस्यचतुर्थांशेनवेदिकामेकहस्तोन्नतांकुर्वी
तमंडपस्यचतुर्थांशयामोव्यायामश्चवेदिकायाभवतीत्यर्थः
उत्तरप्राच्यांमंडपान्तईशानदिशि ब्राह्मणेवेदशास्त्रज्ञंशांतं
शांतेकुटुम्बिनम् सत्यसन्धंसदाचारंश्रवानेकरुणामृदुं
दरिद्रंमंत्रतंत्रज्ञंनिष्ठंतेचप्रतिष्ठयात् आचार्यंवृणुयाद्भक्तिः
नम्रःसत्कारपूर्वकम् भक्तिनम्रश्रशक्त्यनुसारेणवस्त्राल
कारादीन्याचार्यायवरणकालेदत्वायथाआचार्योप्रीतोभवेत्
सभक्तिनम्रइत्युच्यते सत्कारोगंधपुष्पादिभिःपूजनम् आ
चार्यकृत्यमाह कृतोपवासस्तांगौप्रतिमामधिवसतांच
रोगप्रतिमाधिदेवतायैनमःइतिषोडशोपचारपूजांविदधी
तअथवावक्ष्यमाणसौराष्ट्राक्षरमंत्रेणपूजयेत् तदनंतर
कृत्यमाह अर्धरात्रेतुततोविप्रैस्तुभिर्मंडलाद्बहिः प्राच्यां
पायसमांसादिबलिंनिक्षिप्यमंत्रतः विप्रैर्युतआचार्यःब
लिदानमंत्रमाह आदित्यावसवोरुद्रादेवाभूतानिपन्नगाः

बलिदानेनदमेनशांतिंकुर्वंतसर्वदा इतिज्ञात्याउपविस्ना
त्वाधारयन्वाससीशुभेनिर्मलेशंखइवशुक्लेशुक्लमाल्यानुले
पनः सालंकारःसपर्यंतेमंडलस्याधिवेदिकाम् मंडलंतस्य
पर्यंतइत्यन्वयः अधिवेदिकांवेदिकायाउपरिमंडलंचतरस्रं
वातन्मध्येष्टदलाम्बुजम् पिष्टचूर्णेनतत्रोपर्युपर्युक्तपरिक्र
मात् तिलानांपंचचतुस्त्रिभिर्द्रोणैस्तथाष्टभिः पलैस्तत्रिभि
र्द्वाभ्यांवाताम्रपात्रंभवेन्नवम् शालेयैस्तंतैः शर्गैःसौरेणाष्ट
त्तरेणताम् स्नापितांपंचगव्येनवस्त्रालंकारशोभिताम्
मंडलंचतुरस्रंवेत्यादिग्रंथेनमंडलाकारश्चतुष्कोणंवाउप
त्तिमद्वेदिकायाएवोपरितत्रोपर्युपरिक्रमात् तत्राष्टदलाब्जे
वक्ष्यमाणद्रव्याणिपकस्योपर्येकमित्येवंक्रमाद्भवंतीत्य
र्थः पंचवाचत्वारोवापंचचतुरः तैः त्रयोवाचत्वारोवापंचवा
द्वेवेतितिलद्रोणानांसंख्याक्रमायंक्रमः उपलिप्तेवेदिकाप्रदे
शेऽष्टदलपद्मस्योपरिउक्तसंख्याकास्तिलाःस्थापनीयाः त
स्मिंस्तिलराशौपलद्वयेनचतुष्टयेनवाघटितंताम्रपात्रंनि
क्षिपेत् तस्यात्रमत्तैः शरयेदितिसौरेणताम्रप्रतिमामपिवि
न्यसेत्युत्तरत्रवक्ष्यमाणमत्रसंबध्यतेनेनायमर्थः तांप्रतिमांरो
गप्रतिमामधिदेवतेप्रतिमांचपंचगव्येनाष्टोत्तरेणमंत्रेण
स्नापितांवस्त्रालंकारयुक्तांताम्रपात्रस्योपरिश्रद्धातन्मध्येऽष्ट
दलपद्मंलिखित्वावक्ष्यमाणप्रकारेणमध्येविन्यस्यवक्ष्यमा

णेऽकुर्वीतेति ॐ घृणिः सूर्य आदित्यं इत्यष्टाक्षरस्य सौरमंत्रस्य
देवऋषिः सूर्यो देवता गायत्रीछन्दः अनंतरकृत्यमाह प्रतिमा
मपि विन्यसेत्तत्र देवं दिवाकरम् दीप्यमानप्रभाचक्रं भानुसिं
दूरभूषितं पद्मं ददानं हस्ताभ्यां स्मरेद्व्यक्तं त्रिलोचनम् दिव्या
भरणसंपन्नैरक्तस्रग्गन्धवाससम् सांगहेमारविन्दस्य कर्णि
कर्णिकायां निषेदुषम् मूले पूर्वादिपत्राणां शुक्रांगारबुधा
न्क्रमः गुरुमंदकेतूंश्च नक्षत्राणि त्रिसप्तयः मध्यतः पूर्व
पत्राग्रे रेवत्यन्तान्विन्यसेत् प्रतिमासममीत्यादि श्लोकपिश
हः सप्तद्वये अनन्तपर्वरोगप्रतिमां दिवाकरप्रतिमां च विन्यसेदित्य
र्थः सिद्धो भवति सांगहोमेति अंगानि दलानि अष्टदलोपेत
सौवर्णकमलस्य कर्णिकायां मध्यभागे निषेदुषं दिवाकरं वि
न्यसेदित्यन्वयः मूले आदिभागे तमोराहुः मध्यतः पूर्वपत्राग्रे म
ध्यतः कर्णिकामध्ये पूर्वपत्राग्रे पूर्वदलस्यांते अयमर्थः सौव
र्णकमलप्रथमदलपूर्वभागे शुक्रं स्थापयेत् एवमाग्नेयदला
दिष्वंगारप्रभृतीन् श्लोकपाठमंत्रेण स्थापयेत् कर्णिकाम
ध्ये सूर्यसमीपे अश्विन्यादीनि त्रीणि नक्षत्राणि स्थापयेत् पूर्व
दलस्याग्रे रोहिण्यादीनि त्रीणि एवमुत्तरत्रापि प्रदक्षिणाकारं
त्रीणि त्रीणि नक्षत्राणि विन्यसेदिति ततः किमित्याह यथा
स्वं नाममंत्रेण गंधपुष्पासनादिभिः सर्वोपचारैरभ्यर्च्य क्षीरा
हारं निवेदयेत् नाममंत्रेणेति सूर्यप्रजापतष्टाक्षरेण सौरमंत्रे

णव्याधिप्रतिमायाः शुक्रादिग्रहाणामश्विन्यादिनक्षत्राणां
चनाम्नाचतुर्थ्यंतेननमोन्तकेनतत्तद्देवतानांस्वमंत्रेणचतत्
भिर्वर्णविभिः सहितस्त्वाचार्यः तत्रैवतिलराशिसमीपेवेदि
कायांपूर्वस्यांदिशिधान्यराशौवक्ष्यमाणलक्षणोपेतान्पंचक
लशान्स्थापयेत् इत्याह तत्रैवसहितोविप्रैस्तत्रभिर्लोहिता
नवान् निर्व्रणान्नवभीरत्नैर्युक्तांश्चामीकरेणच अश्वस्थाना
द्गजस्थानाद्वल्मीकात्तीर्थसंगमात् राजद्वाराच्च शकलैःश
कलेर्मृत्पिंडरित्यर्थः अश्वस्थानादिभ्यआहृतैश्चन्दनस
हितैर्युक्तानित्यन्वयः रोचनागुग्गुलभ्यांचवरुणतीर्थाम्बुपू
रितान् पल्लवालंकृतमुखान् श्वेतवस्त्रेणवेष्टितान् पंचाभिषे
ककलशान्धान्यराशौविनिक्षिपेत् ततः किंकुर्यादित्याह
आपोहिष्ठादिभिर्मंत्रैः हिरण्येत्यादिभिस्त्रिभिः पावमानानु
वाकेनमंत्रश्चेद्राग्नुवाकतः शन्नोवातानुवाकेनयोजयेच्छां
तिवचनम् आपोहिष्ठेत्यस्यसिन्धुद्वीपऋषिः आपोदेवता
गायत्रीछन्दः शांतिपाठेविनियोगः आपोहिष्ठामयोभुव
स्तानऊर्जेदधातन महेरणायचक्षसे १ योवःशिवतमोरस
स्तस्यभाजयतेहनः उशतीरिवमातरः २ तस्माअरंगमाम
वोःयस्यक्षयायजिन्वथआपोजनयथाचनः ३ हिरण्येति
त्र्यृचस्याग्निकांडोतः पातित्वेनाग्निर्ऋषिः आपोदेवतात्रिष्टुप
छंदः शांतिपाठेविनियोगः हिरण्यवर्णाःशुचयःपावका

यासुजाताःकश्यपोयास्विंद्रःयाग्निंगर्भंदधिरेविरूपास्तान
आपःशंस्योनाभवंतु १ यासांराजावरुणोयातिमध्येसत्या
नृतेअवपश्यञ्जनानां मधुश्चुतःशुचयोयाःपावकास्तानआ
पः २ यासांदेवादिविकृण्वंतिभक्षंयाअंतरिक्षेबहुधाभवंति
याःपृथिवीपयसोंदंति शुक्रास्तान ३ पवमानःसुवर्जनइत्य
नुवाकोगणहोमप्रकरणेदर्शितः शमग्निरित्यनुवाकेनाश्वला
यनशाखोपरिपठितोघोषशांतिरुपलक्ष्यते तत्रचवेदक्र
मेणप्रथमतश्चंशांतिःपठनीयापश्चाद्यजुर्घोषशांतिः आश्व
लायनघोषशांतिरागमन्याभिधीयते आनोभद्राइतिदशर्चंसूक्तं
गौतमेनराहूगणेनदृष्टंवैश्वदेवमाद्याःपंचसप्तमीचजगत्यः
षष्ठीविराट्शेषास्त्रिष्टुभःस्वस्तिनोमीमितांपंचर्चोवर्गःआत्रे
येणस्वस्त्यात्रेयेणदृष्टोवैश्वदेवस्तिस्रस्त्रिष्टुभोद्वेअनुष्टुभौशन्नइं
द्राग्नीतिपंचदशर्चंसूक्तंवसिष्ठार्षम् वैश्वदेवंत्रिष्टुभंतन्नोहण
मितिपंचविंशर्चंसूक्तंमांगिरसेन मापुनादृष्टमाद्येद्वेत्रिष्टुभे
चतस्रष्टुभोंतम् आशुःशिशानइतित्रयोदशर्चंसूक्तमैंद्रमप्र
तिरथेनदृष्टमैंद्रंत्रिष्टुभमंत्यानुष्टुप्शन्नमभुवाजिनमितिचत्व
सूक्तमारिष्टनेमिनादृष्टंतार्क्ष्यंत्रिष्टुभंसर्वेषामेतेषांशांतिपाठे
विनियोगः एवमार्षादिविदित्वाशांतिंपठेदेवंपठन् भद्रमश्नु
ते अथगोशांतिवर्गः आनोभद्राःक्रतवोयंतुविश्वतोदब्धा
सोअपरीतासउद्भिदः देवानोयथासदमिद्वृधेअसन्नःप्रायं

म॰
क॰
ख॰

वोऽरक्षितारोदिवेदिवे १ देवानांभद्रासुमतिर्ऋजूयतांदेवानां
रातिरभिनोनिवर्त्तताम् देवानांसख्यमुपसेदिमावयन्देवाना
मायुःप्रतिरंतुजीवसे २ तान्पूर्वयानिविदाहूमहेवयंभगंमि
त्रमदितिंदक्षमस्रिधम् अर्यमणंवरुणंसोममश्विनासरस्वती
नःसुभगामयस्करत् तन्नोवातोमयोभुवातुभेषजंतन्माता
पृथिवीतत्पितायाःतद्ग्रावाणःसोमसुतेमयोभुवस्तदश्विना
शृणुतंधिष्ण्यायुवम् ४ तमीशानंजगतस्तस्थुषस्पतिंधियं
जिन्वमवसेहूमहेवयम् पूषानोयथावेदसामसद्वृधेरक्षि
तापायुरदब्धःस्वस्तये ५ स्वस्तिनइन्द्रोवृद्धश्रवाःस्वस्तिनःपू
षाविश्ववेदाःस्वस्तिनस्तार्क्ष्योअरिष्टनेमिःस्वस्तिनोबृहस्पतिर्द
धातु ६ पृषदश्वामरुतःपृश्निमातरःशुभंयावानोविदथेषु
जग्मयः अग्निजिह्वामनवःसूरचक्षसोविश्वेनोदेवाअवसाग
मन्निह ७ भद्रंकर्णेभिःशृणुयामदेवाभद्रंपश्येमाक्षभिर्यज
त्राःस्थिरैरंगैस्तुष्टुवांसस्तनूभिर्व्यशेमदेवहितंयदायुः ८
शतमिन्नुशरदोअंतिदेवायत्रानश्चक्राजरसंतनूनाम् पुत्रा
सोयत्रपितरोभवंतिमानोमध्यारीरिषतायुर्गंतोः ९ अदिति
र्द्यौरदितिरंतरिक्षमदितिर्मातासपितासपुत्रः विश्वेदेवाअदि
तिःपंचजनाअदितिर्जातमदितिर्जनित्वम् १० इदमेकंस्वक्तं
स्वस्तिनोमिमितामश्विनाभगःस्वस्तिदेव्यदितिरनर्वणःस्वस्ति
पूषाअसुरोदधातुनःस्वस्तिद्यावापृथिवीसुचेतुनाः ११ स्व

स्तयेवायुमुपब्रवामहेसोमंस्वस्तिभुवनस्ययस्पतिः बृहस्पतिं
सर्वगणंस्वस्तयेस्वस्तयआदित्यासोभवंतुनः २ विश्वेदेवानो
अद्यास्वस्तयेवैश्वानरोवसुरग्निःस्वस्तयेदेवाअवन्त्वृभवःस्व
स्तयेस्वस्तिनोरुद्रःपात्वंहसः ३ स्वस्तिनोमित्रावरुणास्वस्ति
पथ्येरेवतिस्वस्तिनइंद्रश्चाग्निश्चस्वस्तिनोअदितेकृधि ४
स्वस्तिपन्थामनुचरेमसूर्याचंद्रमसाविव पुनर्ददताघ्नताजा
नतासंगमेमहि ५ इत्येकोवर्गः अत्रपरिशिष्टस्यमन्त्रद्वयमा
मनंतितद्यथास्वस्त्ययनंतार्क्ष्यमरिष्टनेमिंमहद्भूतंवायसंदे
वतानाम् असुरघ्नमिन्द्रसखंसमत्सुबृहद्यशोनावमिवारुहेम १
अंहोमुचमांगिरसंगयंचस्वस्त्यात्रेयंमनसाचतार्क्ष्यंप्रयतपा
णिःशरणंप्रपद्येस्वस्तिसम्बाधेष्वभयंनोअस्तु २ इतिपरिशि
ष्टस्यमन्त्रद्वयम् शंनइंद्राग्नीभवतामवोभिःशंनइंद्रावरुणा
रातहव्याशमिन्द्रासोमासुवितायशंयोःशंनोइंद्रापूषणावा
जसातौ १ शंनोभगःशमुनःशंसोअस्तुशंनःपुरंधिःशमुसं
तुरायः शंनःसत्यस्यसुयमस्यशंसःशंनोअर्यमापुरुजातो
अस्तुशंनोधाताशमुधर्तानोअस्तुशंनउरूचीभवतुस्वधाभिः
शंरोदसीबृहतीशंनोअद्रिःशंनोदेवानांसुहवानिसन्तु २
शंनोअग्निर्ज्योतिरनीकोअस्तुशंनोमित्रावरुणावश्विनाशंदेवा
नोसुहवानिसंतु नाशम् शंनःसुकृतांसुकृतानिसंतुशंन
इषिरोअभिवातुवातः ४ शंनोद्यावापृथिवीपूर्वहूतौशमं

म·क·
३१
31

तरिक्षंदृशयेनोअस्तुशंनओषधीर्वनिनोभवन्तुशंनोरज
सस्पतिरस्तुजिष्णुः ५ शंनइन्द्रोवसुभिर्देवोअस्तुशमादि
त्येभिर्वरुणःसुशंसःशंनोरुद्रेभिर्जलाषःशंनस्त्वष्टाग्नाभि
रिहशृणोतु ६ शंनःसोमोभवतुब्रह्मशंनःशंनोग्रावाणः
शमुसन्तुयज्ञाः ७ शंनःस्वरूणांमितयोभवन्तुशंनःशंनः
प्रस्वःशम्वस्तुवेदिः शंनःसूर्यउरुचक्षाउदेतुशंनश्चतस्रः
प्रदिशोभवन्तुशंनःपर्वताध्रुवयोभवन्तुशंनःसिन्धवःश
मुसन्त्वापः ८ शंनोअदितिर्भवतुव्रतेभिःशंनोभवन्तु
शंनोमरुतःस्वर्काःशंनोविष्णुःशमुपूषाणोशंनोअस्तुभवि
त्रंशम्वस्तुवायुः ९ शंनोदेवःसवितात्रायमाणःशंनोभव
न्तुषसोविभातीःपर्जन्योभवतुप्रजाभ्यःशंनःक्षेत्रस्यपतिर
स्तुशम्भुः १० शंनोदेवाविश्वेदेवाशंनःभवन्तुशंसरस्वती
सहधीभिरस्तुशमाभिषाचःशमुरातिषाचशंनोदिव्याःपार्थि
वाःशंनोअप्यः ११ शंनःसत्यस्यपतयोभवन्तुशंनोअर्वन्तः
शमुसन्तुगावःशंनऋभवःसुकृतःसुहस्ताःशंनोभवन्तुपि
तरोहवेषु १२ शंनोअजएकपादेवोअस्तुशंनोहिर्बुध्न्यःशंस
मुद्रःशंनोअपांनपात्पेरुरस्तुशंनःपृश्निर्भवतुदेवगोपा १३
आदित्यारुद्रावसवोजुषन्तेदंब्रह्मक्रियमाणंनवीयः शृण्व
न्तुनोदिव्याःपार्थिवासोगोजाताउतयेयज्ञियासः येदेवानांय
ज्ञियायज्ञियानांमनोर्यजत्राअमृताऋतज्ञाःतेनोरासन्तामुरु

गायमयश्चयंपातस्वस्तिभिःसदानः इदमपरंसूक्तम् रक्षोह
णंवाजिनमाजिघर्मिमित्रंप्रतिष्ठमुपयामिशर्मशिशानोग्निः
क्रतुभिःसमिद्धःसनोदिवासरिषःपातुनक्तम् १ अयोदंष्ट्रोर्चि
षायातुधानानुपस्पृशजातवेदःसमिद्धः आजिह्वयामूरदे
वान्रभस्वक्रव्यादोवृक्त्व्यापिधत्स्वासन् २ उभोभयाविन्नुपधेहि
दंष्ट्रौहिंस्रःशिशानोवरंपरंचउतान्तरिक्षेपरियाहिराजन् जम्भैः
सन्धेह्यभियातुधानान् यज्ञैरिषूःसन्नमानोअग्नेवाचाशल्यां
अशनिभिर्दिहानः ताभिर्विध्यहृदयेयातुधानान्प्रतीचो
बाहून्प्रतिभङ्ग्ध्येषाम् अग्नेत्वचंयातुधानस्यभिन्धिहिंस्राशनिर्हर
साहन्त्वेनंप्रपर्वाणिजातवेदाः शृणीहिक्रव्यात्क्रविष्णुर्विचिनो
तुवृक्णम् यत्रेदानींपश्यसिजातवेदस्तिष्ठन्तमग्नउतवाचरन्तं
यद्वान्तरिक्षेपथिभिःपतन्तंतमस्ताविध्यशर्वाशिशानः ६ उता
लब्धंस्पृणुहिजातवेदआलेभानादृष्टिभिर्यातुधानात् अग्ने
पूर्वोनिजहिशोशुचानआमादःक्ष्विङ्कास्तमदन्त्वेनी ७ इहप्रब्रूहि
यतमःसोअग्नेयोयातुधानोयइदंकृणोतितमारभस्वसमिधा
यविष्ठनृचक्षसश्चक्षुषेरन्धयैनम् ८ तीक्ष्णेनाग्नेचक्षुषारक्ष
यज्ञंप्राञ्चंवसुभ्यःप्रणयप्रचेतःहिंस्रंरक्षांस्यभिशोशुचानंमात्वा
दभन्यातुधानानृचक्षः ९ नृचक्षारक्षःपरिपश्यविक्षुतस्यत्रीणि
प्रतिशृणीह्यग्रातस्याग्नेपृष्टीर्हरसाशृणीहित्रेधामूलंयातुधा
नस्यवृश्च १० त्रिर्यातुधानःप्रसितिंतएत्वृतंयोअग्नेअनृतेन

म॰
क॰
३२

हन्त्वग्निर्विबाधस्फूर्जयज्जातवेदाः समहत्मेनं वृणते नवद्भिः ११
तदग्नेचक्षुप्रतिदेहिरेभेसहारुजंयेनपश्यसियातुधानमथ
र्वरज्ज्योतिषादिव्येनसत्यंनशाश्वत्सत्ववन्तसवित्त्योचे १२
यदग्नेअद्यमिथुनाशपातोयद्वाचोतस्र्ष्टंजनयन्तरेभाः मन्यो
र्मनसःशरव्याजायतेयातयाविध्यहृदयेयातुधानान् १३
परास्पृणीहितपसायातुधानान्पराग्नेरक्षोहरसाशृणीहि परा
र्चिषामूरदेवाःशृणीहिपरासुतृपोअभिशोशुचानः १४ पराद्य
देवावृजिनंशृणन्तुप्रत्यगेनंशपथायन्तुतृष्टाः वाचास्तेनंश
रवऋच्छन्तुमर्मविश्वस्यैतुप्रसितियातुधानाः १५ यःपौरुषेण
क्रविषासमङ्क्तेयोअश्व्येनपशुनायातुधानाः योअघ्न्यायाभ
रतिक्षीरमग्नेतेषांशीर्षाणिहरसापिवृश्च १६ संवत्सरीणंपय
उस्रियायास्तस्यामाशीयातुधानोनृचक्षः पीयूषमग्नेयतमस्ति
तृप्सात्प्रत्यञ्चमर्चिषाविध्यमर्मन् १७ विषङ्गवंयातुधानाः
पिबन्त्वामदितिदुरेवाःपरैनान्देवःसवितादादातु परागमोषधी
याजयन्ताम् १८ सनादग्नेमृणासियातुधानानत्वारक्षांसिपृतना
सुजिग्युः अनुदहसहमूरान्क्रव्यादोमातेहेत्यामुक्षतदैव्या
याः १९ त्वंनोअग्नेअधरादुदक्तात्त्वंपश्चादुतरक्षापुरस्तात् प्रतितो
अजरासस्तमिष्ठाअघशंसंशोशुचतोदहन्तु २० पश्चात्पुरस्ता
दधरादुदक्तात्कविःकाव्येनपरिपाहिराजन् सखेसखायम
जरोजरिम्णेअग्नेमर्त्यामर्त्यस्त्वंनः २१ परित्वाग्नेपुरंवयंविप्रंसहस्य

स्वधीमहित्वषेहर्णं दिविदेवेहन्तारंभंगुरावताम् २२ मिषाण
भंगुरावानःप्रतिष्मरन्तशानोहत्याग्नेतिग्मेनशोचिषातपुरग्रा
भिरर्चिभिः २३ प्रत्यग्नेमिथुनादहयातुधानाकिमीदिना
संत्वाशिशामिजागृह्यदब्धंविप्रमन्मभिः २४ प्रत्यग्नेहरसा
हरःशृणीहिविश्वतःप्रतियातुधानस्यरक्षसोबलंवीरुजवी
र्यम् २५ एतदन्तमपरंसूक्तम् आशुःशिशानोवृषभोनभी
मोघनाघनःक्षोभणश्चर्षणीनां संक्रन्दनोनिमिषएकवी
रःशतंसेनाअजयत्साकमिन्द्रः १ संक्रन्दनेनानिमिषेण
जिष्णुनायुत्कारेणदुश्च्यवनेनधृष्णुनातदिन्द्रेणजयततत्सह
ध्वंयुधोनरइषुहस्तेनवृष्णा २ सइषुहस्तैःसनिषंगिभिर्वशीसं
स्रष्टासयुधइन्द्रोगणेन संसृष्टजित्सोमपाबाहुशर्ध्युग्र
धन्वाप्रतिहिताभिरस्ता ३ बृहस्पतेपरिदीयारथेनरक्षोहा
मित्राँअपबाधमानःप्रभञ्जन्सेनाःप्रमृणोयुधाजयन्नस्मा
कमेध्यविताराथानाम् ४ बलविज्ञायःस्थविरःप्रवीरःसहस्वा
न्वाजीसहमानउग्रः अभिवीरोअभिषत्वासहोजिज्जैत्रायनोर
थमातिष्ठगोवित् ५ गोत्रभिदंगोविदंवज्रबाहुंजयन्तमज्म
प्रमृणन्तमोजसा इमंसजाताअनुवीरयध्वमिन्द्रंसखायोअनु
न्वीरयध्वम् ६ अभिगोत्राणिसहसागाहमानोदयोवीरः
शतमन्युरिन्द्रः दुश्च्यवनःपृतनाषाडयुध्योस्माकंसेनाअवतु
प्रयुत्सु ७ इन्द्रआसांनेताबृहस्पतिर्दक्षिणायज्ञःपुरएतुसो

म॰
क
३३

मः देवसेनानामभिभञ्जतीनांजयन्तीनांमरुतोयन्त्वग्रम् इंद्रस्य
वृष्णोवरुणस्यराज्ञआदित्यानांमरुतांशर्धउग्रम् महामनसा
नांभुवनच्यवानांघोषोदेवानांजयतामुदस्थात् ९ उद्धर्षय
मघवन्नायुधान्युत्सत्वनांमामकानांमनांसि उद्वृत्रहन्वाजि
नांवाजिनान्युद्रथानांजयतांयन्तुघोषाः १० अस्माकमिन्द्रःसमृते
षुध्वजेष्वस्माकंयाइषवस्ताजयन्तु अस्माकंवीराउत्तरेभवन्त्व
स्मानुदेवाअवताहवेषु ११ अमीषांचित्तंप्रतिलोभयन्तीगृ
हाणाङ्गान्यप्वेपरेहि अभिप्रेहिनिर्दहहृत्सुशोकैरन्धेनामित्रा
स्तमसासचन्ताम् १२ प्रेताजयतानरइन्द्रोवःशर्मयच्छतु उ
ग्रावःसन्तुबाहवोनाधृष्यायथासथ १३ इदंतमन्यत्सूक्तम्
मुञ्चामित्वाहविषाजीवनायकमज्ञातयक्ष्मादुतराजयक्ष्मात्
ग्राहिर्जग्राहयदिवैतदेनंतस्याइन्द्राग्नीप्रमुमुक्तमेनम् १ य
दिक्षितायुर्यदिवापरेतोयदिमृत्योरन्तिकंनीतएव तमाहरामिनि
र्ऋतेरुपस्थादस्पार्षमेनंशतशारदाय २ सहस्राक्षेणशतशा
रदेनशतायुषाहविषाहार्षमेनं शतंयथेमंशरदोनयातीन्द्रोवि
श्वस्यदुरितस्यपारम् ३ शतंजीवशरदोवर्धमानःशतंहेमन्ता
ञ्छतमुवसन्तान् शतमिन्द्राग्नीसवितावृहस्पतिःशतायुषाह
विषेमंपुनर्दुः ४ आहार्षमविदंत्वापुनरागाःपुनर्नवसर्वाङ्गस
र्वंतेचक्षुःसर्वमायुश्चतेविदम् ५ इदमन्यत्सूक्तम् त्यमूषुवा
जिनंदेवजूतंसहावानंतरुतारंरथानाम् अरिष्टनेमिंपृतना

तराजन्सोमंस्वस्तयेतर्थाभिवाऽयेम १ इन्द्रस्ववरातिमाजोहू
वानास्वस्तयेनावमिवावरुहेमउर्वी नपृथ्वीवद्द्लेगभीरमावा
मेतौमापरोतौनिवाम २ सघदिद्य्रःशवमापश्यकृष्टीःसूर्यइ
वज्योतिषापस्तानसहस्रशःशतशाअस्परंहिलस्यावस्तैः
अवातिर्नेशर्येम् ३ एतदेकंसूक्तम् अप्रसंहितावमानभग
स्यसम्यग्येपरिशिष्टंपठित्वा नमोब्राह्मणइत्यादिकपदंति
नयथा तच्छंयोरावृणीमहिगातंयज्ञयगातंयज्ञपतयेदेवी
स्वस्तिरस्तुनःस्वस्तिर्मानुषेभ्यः ऊर्ध्वंजिगातुभेषजंशंनोअस्तुद्विपदे
शंचतुष्पदे नमोब्रह्मणेनमोस्त्वग्नयेनमःपृथिव्यैनमओषधीभ्यः
नमोवाचेनमोवाचस्पतयेनमोविष्णवेकरोमीत्येवंत्रिःपठेत्
रुद्रन्मोआपवस्तुमानःशान्तिःशान्तिःशान्तिः इत्यस्वस्त्यापनी
यच्छोवशान्तिः अथतैत्तिरीयाणांच्छोवशान्तिः तत्रशन्नोवा
तःपवतामित्यस्यानुवाकस्यसोमकोऽन्तःपातित्वात्सोमऋषिः
वातादयोलिंगोक्तादेवताः आद्याषट्पदाजगतीद्वितीयागाय
त्रीइन्द्रायैवावस्त्रवीमीतिप्रतिमेतिचद्वेयज्ञयोआवातवाहीतिद्वे
अनुष्टुभौयदादीव्यताइतिपंचपदापंक्तिः वातआवात्वितिगा
यत्र्यंतैष्टुभःप्रपथइति अंतरिक्षंसइतिप्राणापानावितिचश्रीणिय
ग्नेषित्रिष्टुभिरक्तमितितित्रिष्टुप्एकयानाश्चित्रेतितिस्रोगायत्र्यः वयं
सवर्णाइतित्रिष्टुप् शन्नोदेवीतिद्वेगायत्र्यौसमित्रानइतिदुर्मि
त्रानइतिचद्वेयज्ञयोआपोहिष्ठेतितिस्रोगायत्र्यः पृथिवीशांते

म॰ तिमन्तरिक्षं शंतम्मितिद्यौः शांतिरिति पृथिवी शांतिरितितया
क॰ हं शांतिरिति पञ्चश्रीश्चेति षडङ्गं षितदाग्रुषेत्यनुष्टुप् तच्चक्ष
३५ रित्याकृति यउदगादिति पंक्तिस्तत्पदाब्राह्मणाश्चेति अतसी
तियज्ञरादिकादिमहे देवीति पकपदागायत्रीमथामनीषीति
यजुः शुभिर्गीर्भिरित्यनुष्टुप् ब्रह्मपवादिष्टेति यजुः शांतिपाठे
विनियोगः अथ शांत्यनुवाकः शन्नो वातः पवतां मातरिश्वा श
न्नस्तपतु सूर्यः अहानि शंभवशंरात्रिः प्रतिधीयतांशमुषानो
व्युच्छन्तु शमादित्य उदेतु नः १ शिवा नः शंतमा भव सुमृडीका
सरस्वति मा ते व्योम संदृशि २ इडायै वास्त्वसि वास्तुमद्वास्तुमंतो
भूयास्म मा वास्तोश्छित्स्मह्यवास्तुः स भूयाद्योऽस्मान्द्वेष्टि यं च व
यं द्विष्मः ३ प्रतिष्ठासि प्रतिष्ठावंतो भूयास्म मा प्रतिष्ठायाश्छि
त्स्म्यप्रतिष्ठः स भूयाद्योऽस्मान्द्वेष्टि यं च वयं द्विष्मः आवात वाहि भे
षजं वि वात वाहि यद्रपः त्वं हि विश्वभेषजो देवानां दूत ईयसे द्वा
विमौ वातौ वात ५ आ सिन्धोरा परावतो दक्षं मे अन्य आवातु
परान्यो वातु यद्रपः ६ यददो वात ते गृहेऽमृतस्य निधिर्हितः
ततो नो देहि भेषजं ततो नो महः आवह ७ वात आ वातु भेषजं शं
भुर्मयोभुर्नो हृदे प्रण आयूंषि तारिषत् ८ इन्द्रस्य गृहोऽसि तं त्वा
प्रपद्ये सगुः साश्वः सह यन्मे अस्ति तेन ९ भूः प्रपद्ये भुवः प्रप
द्ये स्वः प्रपद्ये भूर्भुवः स्वः प्रपद्ये वायुं प्रपद्ये नार्तां देवतां प्रपद्ये
ऽश्मानमाखणं प्रपद्ये प्रजापतेर्ब्रह्मकोशं प्रपद्ये ओं प्रप

ये १० अंतरिक्षंसमनवेतरं ह्रहदानयः पर्वताश्चयथावातः स्व
स्त्याश्वत्थिमानसानि ११ प्राणापानौमृत्योर्मापातं प्राणापानौ
समह्रामिष्टंमयिमेधांमयिप्रजांमय्यग्निस्तेजोददातु मयिमेधां
मयिप्रजांमयीन्द्रइन्द्रियंददातुमयिमेधांमयिप्रजांमयिसूर्योभ्रा
जोददातु १२ शुभिरक्तुभिःपरिपातमस्माननिष्टेभिरश्विनासौभ
गभिः तन्नोमित्रोवरुणोमामहंतामदितिःसिंधुःपृथिवीउतद्यौः
कयानश्चित्रआभुवदूतीसदावृधःसखाकयाशचिष्ठयावृता क
स्त्वासत्योमदानांमंहिष्ठोमत्सदन्धसःदृढाचिदारुजेवसुअभी
षुणःसखीनामविताजरितॄणांशतंभवास्यूतये १४ वयःसु
पर्णाउपसेदुरिन्द्रंप्रियमेधाऋषयोनाथमानाः अपध्वांतमूर्णु
ध्विचक्षुर्मुमुग्ध्यस्मान्निधयेवबद्धान् १७ शंनोदेवीरभिष्टयआ
पोभवंतुपीतयेशंयोरभिस्रवंतुनः १८ ईशानावार्याणांक्षय
न्तीश्चर्षणीनांअपोयाचामिभेषजं १९ सुमित्रानआपओष
धयोभवन्तु २० दुर्मित्राःसंतुतस्मैयोस्मान्द्वेष्टियंचवयंद्विष्मः २१
आपोहिष्ठामयोभुवइत्यादि २२ योवःशिवतमेत्यादि २३ तस्मा
अरंगमेत्यादि २४ पृथिवीशांतासाग्निनाशांतासामेशांताशुचंशमयन्तु
२५ अंतरिक्षंशांतंतद्वायुनाशांतंतन्मेशांतंशुचंशमयतु २६ द्यौः
शांतासादित्येनशांतासामेशांताशुचंशमयतु २७ पृथिवीशां
तिरन्तरिक्षंशांतिर्द्यौःशांतिर्दिशःशांतिरवांतरदिशःशांतिरग्निः
शांतिर्वायुःशांतिरादित्यःशांतिश्चंद्रमाःशांतिर्नक्षत्राणिशांति

म॰
क॰
३५

राषः शांतिरोषधयः शांतिर्वनस्पतयः शांतिर्गौः शांतिरश्वः शां
तिः पुरुषः शांतिर्ब्रह्म शांतिर्ब्राह्मणाः शांतिरेव शांतिः शांतिर्मे
अस्तु शांतिः २० पह्र श्रीश्च ह्रीश्च धृतिश्च तपो मेधा प्रतिष्ठा श्रद्धा
श्रद्धा सत्यं धर्मश्चैतानि मोत्तिष्ठंतमनूत्तिष्ठंतु मा मा श्रीश्च ह्रीश्च धृतिश्च
तपो मेधा प्रद्धा श्रद्धा सत्यं धर्मश्चैतानि मा मा हासिषुः २१ उदायुषा
स्वायुषोदोषधीनां रसेनोत्पर्जन्यस्य शुष्मेणोदस्थाममृतां अनु २२ त
च्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् पश्येम शरदः शतं जीवेम
शरदः शतम् नन्दाम शरदः शतं मोदाम शरदः शतं शृणवाम
शरदः शतम् प्रब्रवाम शरदः शतमजिताः स्याम शरदः शतं ज्यो
क् च सूर्यं दृशे २३ य उदगान्महतोऽर्णवाद्विभ्राजमानः
सरिरस्य मध्ये स मा वृषभो रोहिताक्षः सूर्यो विपश्चिन्मनसा पुना
तु ब्रह्मणश्चोतनमसि ब्रह्मणः प्रणीस्थो ब्रह्मणामावपनमसि
धारितेयं पृथिवी ब्रह्मणा मही धारितमेनेन महदन्तरिक्षं दिवं दा
धार पृथिवीं सदेवां यदहं वेद तदहं धारयाणि मा मद्वेदोऽधिविस्र
सने २४ मेधामनीषे मा विशतं समीची भूतस्य भव्यस्यावरुद्ध्यै
सर्वमायुरयाणि आभिर्गीर्भिर्यदतो न ऊनमाप्यायय हरिवो वर्धमा
नः यदा स्तोतृभ्यो महि गोत्रा रुजासि भूयिष्ठभाजो अध ते स्याम
ब्रह्म प्रावादिष्म तन्नो मा हासीत् ॐ शांतिः शांतिः शांतिः २५ इति
तैत्तिरीयशांति अथ प्रासंगिकं परिसमाप्य प्रकृतमनुसरामः
पंचाभिषेककलशान्यान्पराशौ विनिक्षिपेत् आपो हि ष्ठादिभि

35

मंत्रैर्हिरण्येत्यादिभिस्त्रिभिः पवमानानुवाकेन शन्नइंद्रानुवा
कतः शान्तोवातानुवाकेन चोषयेच्छान्तिवाचनमित्युक्तमपु
नात्तदनंतरकृत्यमाह विधायकत्वे ब्रह्मणं चत्वारो ब्राह्मणांज
पे अयुतनामितैर्वीचैरर्थेनचरणेनवा देवतालिंगमंत्राणांहु
त्वातैः परिचारिते आग्नेय्यांदिशिकुंडे वा स्थंडिले वाहुत्वा शाने
स्थापयित्वा स्वगृह्योक्तमन्त्रार्कसमिधो हविः तत्संपाय ततःपा
त्र्यामभिषिच्याभिचार्यं च चरुतिलाज्य स्वाहान्तं मूलमंत्रमुदाहर
न् वारान् सहस्रं वाष्टशतमष्टाविंशतिमेव वाहुत्वा शरणं प्रदा
तव्यामणीनामोदसमाचरेत् विधायकत्वे ब्राह्मणमित्यादि
विधायकत्वे ब्राह्मणं हुत्वा तयादेवतालिंगमन्त्रं जपेच्चत्वारो ब्रा
ह्मणान्हुवेत्यन्वय विधायकत्वमुपद्रष्टव्यम् ब्राह्मणाहुपद
ष्टम्भवति ब्रह्मवरणं न केवलं वक्ष्यमाणहोमकर्मार्थमपितु
विशिष्टसकलकर्मार्थमपि देवतालिंगमन्त्राणामिति बहु
लवचनान्मन्त्रबहुत्वमवगम्यते मूलमंत्रस्यचूर्णिः सूर्य इत्येक
एवप्रदर्शितः तस्मादयमभिप्रायः रोगप्रतिमादाने सर्वत्रसू
र्यएवापिदेवताच भिन्नध्यायीनांभिन्नत्वादतः जलरोगादि
षुवरुणादयोदेवताभवन्तीति तदभिप्रायेणमन्त्राणामिति ब
हुत्वं किंचैकस्मिन्नपि कर्मणि आतंकसूर्यादिग्रहाणां श्रूयत्वात
दभिप्रायेणमन्त्राणामपि बहुवचनम् अतएव मूलमंत्रजपे
चत्वारो ब्राह्मणान्वृणीत इतरमन्त्रजपेत्वेकमेकं यथासंभवं वा

तत्र जपसंख्यामाह अयुतेनेत्यादिना अयुतेन वारैः अयु
तावृत्त्येत्यर्थः अमितैर्वा वारैः अयुताधिकैर्वेत्यर्थः अर्थेनायु
तार्थेन चरणेनायुतपादेन इयं संख्या प्रधानमंत्रजपे सूर्यव्य
तिरिक्ते ग्रहे न तत्र जपे तु शास्त्रानुसारेण प्रधानमंत्रजपसंख्या
तो न्यूनसंख्या कल्प्यतैः परिचारितः इति तैराचार्यब्राह्मणादि
भिः कुंडे वा स्थंडिले वा परिचारिते परिकल्पिते तत्रैव हुताश
नं स्थापयित्वेत्यर्थः अर्कसमिधो हविः तत्सम्याघेति तस्मिन्हो
मे कर्म समिधो भवति हविश्च भवति हविर्नामाज्यं चरुश्च
तत्सम्याघाज्यस्य सम्पादनं स्वगृह्योक्तप्रकारेण संस्कारः चरो
स्तु यादेवताय इष्टव्या तत्सम्बन्धित्वेन चतुरो मुष्टीन्निर्वपतीत्या
दिविधिना निरुप्य श्रपणं संपादनं ततः पाद्याम वाशिष्याभि
घार्य समिधो हुत्वा ततश्चरुतिलांश्च जुहुयात् स्वाहान्तं मूल
मंत्रमुदाहरन् मूलमन्त्रः वाद्यादिव्याधिप्रतिमा देवताभूत
वायुवरुणाधिदेवताप्रकाशको मंत्रः आरोग्यं भास्करादि
च्छेदिति वचनादधिदेवतासूर्यप्रकाशकः प्रागभिहितः घृ
णिः सूर्य इत्यष्टाक्षरमन्त्रोपि मूलमन्त्रः होमसंख्यामाह वा
रान्सहस्रं चाष्टशतमष्टाविंशतिमेव वा इति प्रधानहोमं व्याधि
प्रतिमादेवतोद्देशेन होमश्च अतः सूर्यव्यतिरिक्तग्रहहोमन
तत्र होमे प्रधानहोमापेक्षया न्यूनसंख्या परिकल्प्या हुत्वा पूर्णा
हुतिं चान्ते प्रणीतमोक्षमाचरेत् एवं पूर्वोक्तप्रकारेण हुत्वान्ते

शरणंकृतिमपि वक्ष्यमाणमंत्रैर्दत्वाप्रणीतमोदंशरणंपात्रविमो
क्षंकुर्यात् अथदेवतालिंगमंत्राणामित्यनेनपदेनसूचितामं
त्राःप्रदर्श्यन्ते तत्रशूलेदूर्वादिमंत्राणां शुक्रांगारकयोस्तमःशु
क्रमन्देनुकेतुश्चनत्तत्राणित्रिंशास्त्रिंशश्त्येतद्वचनोपात्तक्रमे
णग्रहमंत्राःप्रदर्श्यन्ते व्याधिप्रतिमादानेतत्तयादेवतावाञ्छव
रुणादिरूपात्तद्देवताप्रकाशकवैदिकोमंत्रोग्राह्यः अथवा
सर्वव्याधिप्रतिमादानेसौरमंत्रएवग्राह्यः सचश्वैक्रोचूर्णीत्या
दिरष्टाक्षरःश्वैक्रोमंत्रः उद्यन्नद्येतिऋचस्यकण्वःप्रस्कण्वऋ
षिःसूर्योदेवताअनुष्टुप्छन्दोजपेविनियोगः विनियोगस्याक्रि
यमाणजपहोमपूजाभेदेनपार्थक्यंभवति उद्यन्नद्यमित्रमह
आरोहन्नुत्तरांदिवम् हृद्रोगंममसूर्यहरिमाणंचनाशयशुके
षुमेहरिमाणंरोपणाकासुदध्मसि अथोहारिद्रवेषुमेहरिमाणं
निदध्मसि उदगादयमादित्योविश्वेनसहसासहद्विषन्तंमह्यं
रन्धयन्मोअहंद्विषतेरधमित्यर्चः सौरमन्त्रः शुक्रंतेअन्यदि
ति शुक्रमंत्रस्य भरद्वाजऋषिःशुक्रोदेवता त्रिष्टुप्छन्दःपूजा
दौविनियोगः एवमन्यत्रापिविनियोगोज्ञेयः शुक्रंतेअन्यद्य
जतंतेअन्यद्विषुरूपे अहनीद्यौरिवासिविश्वाहिमायाअवसिस्व
धावोभद्रातेपूषन्निहरातिरस्तु अग्निर्मूर्धेत्यंगारमंत्रस्यविरूप
ऋषिरंगारकोदेवतागायत्रीछंदः अग्निर्मूर्धादिवःककुत्पतिः
पृथिव्याअयंअपांरेतांसिजिन्वति उद्बुध्यस्वेतिबुधमंत्रस्याग्नि

म॰ क॰ ३२

र्षिर्बुधो देवता त्रिष्टुप्छंदः उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापू
र्ते संसृजेथामयं च पुनः कृण्वंतः पितरो युवानो अन्वातांसीत्त्वयि
तंतुमेतम् कयानेति राज्ञमंत्रस्य वामदेव ऋषिः राज्ञो देवता
गायत्री छंदः कया नश्चित्र आभुवदूती सदावृधः सखा कया
शचिष्ठया वृता बृहस्पतीति बृहस्पतिमंत्रस्य गृत्समद ऋषिर्बृ
हस्पतिर्देवता त्रिष्टुप्छंदः बृहस्पते अतियदर्यो अर्हाद्द्युमद्विभा
ति क्रतुमज्जनेषु यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चि
त्रम् शन्नो देवीति शनिमंत्रस्य सिंधुद्वीप ऋषिः शनिः देवता
गायत्रं छन्दः शन्नो देवीरभिष्टय इत्यादि आप्यायस्वेति सोममंत्र
स्य गोतम ऋषिः सोमो देवता गायत्री छंदः आप्यायस्व समेतु
ते विश्वतः सोम वृष्ण्यम् भवा वाजस्य संगथे केतुं कृण्वन्निति
केतुमंत्रस्य मधुच्छंद ऋषिः गायत्री छंदः केतुर्देवता केतुं कृण्व
न्नकेतवे पेशो मर्या अपेशसे समुषद्भिरजायथा इति ग्रह
मंत्राः अथ नक्षत्रमंत्राः तत्र तेषामार्षादि कथ्यते अग्निर्नः पा
तु कृत्तिकेत्यादीनां नक्षत्रेष्टिपठितानां मंत्राणां विश्वेदेवा ऋष
यः क्रमेणाग्निः प्रजापतिः सोमो रुद्रोऽदितिर्बृहस्पतिः सर्पाः पित
रोऽर्यमा भगः सविता त्वष्टा वायुरिंद्राग्नी मित्र इंद्रः प्रजापतिर्गणा वि
शिष्टा निर्ऋतिः आपो विश्वेदेवा ब्रह्मा विष्णुर्वसव इंद्रात्मको व
रुणः अजैकपादहिर्बुध्न्यः पूषाश्विनौ यम इति देवताः छंदः त्रि
ष्टुप् आया त्रिष्टुप् प्रचंदायेति जगती जपे विनियोगः तत्रय

यत्कर्तव्यं होमादिकं भवति तत्र तत्कर्मणि होमादौ विनि
योगो वाच्यः अथ मंत्राः अग्निर्नः पातु कृत्तिकाः नक्षत्रं देवमिंद्रि
यमिदं मासां विचक्षणं हविरासं जुहोत नायोस्य भांति रश्मयोः
यस्य केतवः यस्येमा विश्वा भुवनानि सर्वा स कृत्तिकाभिः सव
मानः अग्निर्नो देवः सुविते दधातु प्रजापते रोहिणी केतु पत्नी
विश्वरूपा बृहती चित्रभानुः सा नो यज्ञस्य सुविते दधातु यथा
जीवेम शरदः सवीराः ३ रोहिणी देव्युदगात्पुरस्ताद्विश्वा रूपा
णि प्रतिमोदमाना प्रजापतिं हविषा वर्धयंती प्रिया देवानामुपया
तु यज्ञम् ४ सोमो राजा मृगशीर्षेणागात् शिवं नक्षत्रं प्रियम
स्य धाम आप्यायमानो बहुधा जनेषु रेतः प्रजां यजमाने दधा
तु ५ यत्ते नक्षत्रं मृगशीर्षमस्ति प्रियं राजन् प्रियतमं प्रियाणां
तस्मै सोम हविषा विधेम शन्न एधि द्विपदे शं चतुष्पदे ६ आर्द्र
या रुद्रः प्रथमा न एति श्रेष्ठो देवानां पतिरघ्नियानां नक्षत्रमस्य
हविषा विधेम मा नः प्रजां रीरिषन्मोत वीरान् ७ हेती रुद्रस्य
परि णो वृणक्तु आर्द्रा नक्षत्रं जुषतां हविर्नः प्रमुंचमानौ दुरितानि
विश्वा अपाघशंसं नुदतामरातीः ८ पुनर्नो देव्यदितिः स्पृणो
तु पुनर्वसू नः पुनरेतां यज्ञं पुनर्नो हविषा यजामः एता न देव्य
दितिनवा विश्वस्य भर्त्री जगतः प्रतिष्ठा पुनर्वसू हविषा व
र्धयंती प्रियं देवानामप्येतु पाथः ९ बृहस्पतिः प्रथमं जाय
मानस्तिष्यं नक्षत्रमभि संबभूव श्रेष्ठो देवानां पृतनासु जिष्णुर्दिशोन

म॰
क॰
३८

सर्वाशाअभयंनोअस्तु ११ तिष्यःपुरस्तादुतमध्यतोनोबृहस्प
तिर्नःपरिपातुपश्चात् बाधतांद्वेषोअभयंकृणुतांसुवीर्य
स्यपतयःस्याम १२ इदंसर्पेभ्योहविरस्तुजुष्टमाश्रेषायेषामनु
यंतिचेतः येअंतरिक्षंपृथिवींक्षियंतितेनःसर्पासोहवमागमि
ष्ठाः योरोचनेसूर्यस्यापिसर्पायेदिवादिवमनुसंचरंतियेषाम्
माश्रेषाअनुयंतिकामंतेभ्यःसर्पेभ्योमधुमज्जुहोमि १३ उ
पहूताःपितरोयेमघासुमनोजवसःसुकृतःसुकृत्यास्तेनो
नक्षत्रेहवमागमिष्ठाःस्वधाभिर्यज्ञंप्रयतंजुषंताम् १५ येअग्नि
दग्धायेनाग्निदग्धायेमुंलोकंपितरःक्षियंति यांश्चविद्मयांउ
चनप्रविद्ममघासुयज्ञंसुकृतंजुषंताम् १६ गवांपतिःफ
ल्गुनीनामसित्वंतदर्यमन्वरुणमित्रचारु तंत्वावयंसवितारं
सनीनांजीवाजीवंतउपसंविशेम १७ येनेमाविश्वाभुवना
निसंजितायस्यदेवाअनुसंयंतिचेतः अर्यमाराजाजरस्तु
विष्टरेफल्गुनीनामृषभोरोरवीति १८ श्रेष्ठोदेवानांभगवोभ
गासितत्त्वाविदुःफल्गुनीस्तस्यवित्तात् अस्मभ्यंक्षत्रमजरं
सुवीर्यंगोमदश्ववदुपसंनुदेह १९ भगोहदाताभगइत्प्रदा
ताभगोदेवीफल्गुनीराविवेश भगस्येत्तंप्रसवंगमेमयत्रदे
वैःसधमादंमदेम २० आयातुदेवःसवितोपयातुहिरण्य
येनसुवृतारथेन वहन्हस्तंसुभगंविद्मनापसम्प्रयच्छं
तंपपुरिंपुण्यमच्छ २१ हस्तःप्रयच्छत्वमृतंवसीयःप्रपद

38

त्वमृतंवसीवदक्षिणेनप्रतिगृभ्णीमएनत् दातारमद्यसवि
ताविदेयनोहस्तायप्रसवातियज्ञम् २२ त्वष्टानक्षत्र
मभ्येतिचित्रांसुभंससंयुवतिंरोचमानां निवेशयन्नमृतान्म
र्त्यांश्चरूपाणिपिंशन्भुवनानिविश्वा २३ तन्नस्त्वष्टातदुचि
त्राविचष्टांतन्नक्षत्रंभूरिदाअस्तुनःप्रजांवीरवतीःसनोतु
गोभिर्नोअश्वैःसमनक्तुयज्ञम् २४ वायुर्नक्षत्रमभ्येतिनिष्ट्यांतिग्म
शृंगोवृषभोरोरुवाणः समीरयन्भुवनामातरिश्वाअपद्वे
षांसिनुदतामरातीः २५ तन्नोवायुस्तदुनिष्ट्याशृणोतुत
न्नक्षत्रंभूरिदाअस्तुमह्यम् तन्नोदेवासोअनुजानंतुकामंय
थातरेमदुरितानिविश्वा २६ दूरमस्मच्छत्रवोयंतुभीता
स्तदिंद्राग्नीकृणुतांतद्विशाखे तन्नोदेवाअनुमदंतुय
ज्ञंपश्चात्पुरस्तादभयंनोअस्तु २७ नक्षत्राणामधिपत्नीवि
शाखेश्रेष्ठाविंद्राग्नीभुवनस्यगोपौ विषूचःशत्रूनपबाधमा
नौअपक्षुधंनुदतामरातिम् २८ ऋध्यास्महव्यैर्नमसोपसाद्य
मित्रंदेवंमित्रधेयंनोअस्तु अनूराधान्हविषावर्धयंतःशतं
जीवेमशरदःसवीराः २९ चित्रंनक्षत्रमुदगात्पुरस्तादनूरा
धासइतियद्वदंति तन्मित्रएतिपथिभिर्देवयानैःहिरण्मयै
र्विततैरंतरिक्षे इंद्रोज्येष्ठामनुनक्षत्रमेति यस्मिन्वृत्रंवृत्रतूर्ये
ततार तस्मिन्वयममृतंदुहानाःक्षुधंतरेमदुरितिंदुरिष्टम् पुर
न्दरायवृषभायधृष्णवे अषाढायसहमानायमीढुषे इंद्रा

म· क· ३९

यज्ञेषु सामधुमदुहान तऽवेत्तणोतु यजमानाय लोकम् ३१ स्थू
लेप्रजावीरवतीविवेयपरायेतनिर्ऋतिः पराचः गोभिर्नेत्र
यंपशुभिः समनक्तुमहायजमानायमह्यम् ३२ अहमोत्र
यस्त्वितेदधातमूलनतत्रमितियद्धदेति पराचीवाचानिः
ऋतिनदासिशिवंप्रजायेशिवमह्यम् ३४ यादिव्या आपः
पयसासंबभूवुः याअंतरिक्षेउतपार्थिवीर्याः यासामाषाढा
मनुयांतिकामंतानआपः शंस्योनाभवंतु ३५ यास्वकूप्याया
श्चनद्यः समुद्रियायाश्चवैशंतीरुत प्रासवीर्याः यासामाषा
ढामधुमत्यंति तानआपः शंस्योनाभवंतु ३६ तन्नोवि
श्वेउपशृण्वंतुदेवास्तदाषाढाअभिशायंतुतत्रः तेनतद्वंप्र
यतांपशुभ्यः कृषिर्वृष्टिर्यजमानायकल्पताम् ३७ शुक्राः क
न्यायुवतयः सुपेशसः कर्मकृतः सुकृतोवीर्यवतीः विश्वादे
वाहविषावर्धयंतीआषाढाः काममुपयांतुयज्ञम् ३८ य
स्मिन्नुत्तायजयत्सर्वमेतदमुंचलोकमिदमूचसर्वं तन्नोनक्ष
त्रमभिजिद्विजित्यश्रियंदधात्वहृणीयमाणात् ३९ उभौलो
कौब्रह्मणासंजितेमौतन्नोनक्षत्रमभिजिद्विचष्टां तस्मिन्वयंपृ
तनासंजयेमतन्नोदेवासोअनुजानंतुकामम् ४० शृण्वंतिश्रोणा
ममृतस्यगोपापुण्यमस्याउपशृणोतिवाचं महींदेवींविष्णुप
त्नीमजूर्यांप्रतीचीमनोहविषायजाम ४१ त्रेधाविष्णुरुगा
योविचक्रमेमहींदिवंपृथिवीमंतरिक्षं तच्छ्रोणाइति श्रवइ

ख्रुमानाभुवनेलोकंयजमानायकृण्वती अष्टौदेवावसवः
सोम्यासश्चतस्रोदेवीरजनाश्रविष्ठाः तेयज्ञंपांतुरजसःपरस्ता
त्संवत्सरीणममृतंस्वस्ति यज्ञंवःपांतुवसवःपुरस्ताद्दक्षिणतो
भियंतुश्रविष्ठाः पुण्यंनक्षत्रमभिशोचिशासमानोऽरातिरघ
यशंसनत्ताम् नक्षत्रराजोवरुणोधिराजोनक्षत्राणांशतभि
षग्वसिष्ठः तौदेवेभ्यःकृण्वतोदीर्घमायुःशतंसहस्राभेषजा
निधुः ४५ यज्ञंनोराजावरुणउपयातु तन्नोविश्वेअभिवियंतु
देवाः तन्नोनक्षत्रंशतभिषग्जुषाणंदीर्घमायुःप्रतिरद्भेषजा
नि ४८ अजएकपाडुदगात्पुरस्ताद्विश्वाभूतानिप्रतिमोदमानः त
स्यदेवाःप्रसवंयंतिसर्वेप्रोष्ठपदासोअमृतस्यगोपाः विभ्राजमा
नःसमिधानउग्रआंतरिक्षमरुहदगंद्यां तंसूर्यंदेवमजमेकपा
दंप्रोष्ठपादासोअनुयंतिसर्वे ४९ अहिर्बुध्नियःप्रथमानएति
श्रेष्ठोदेवानामुतमानुषाणाम् तेब्राह्मणाःसोमपाःसोम्यासःप्रो
ष्ठपदासोअभिरक्षंतिसर्वे चत्वारएकमभिकर्मदेवाःप्रोष्ठपदा
इतियान्वदंति तेबुध्नियंपरिषद्यंस्तुवंतः अहिंरक्षंतिनमसोप
सद्य पूषारेवत्यन्वेतिपंथांपुष्टिमतीपशुपावाजवस्त्यै इमानि
हव्याप्रयताजुषाणासुगैर्नोयानैरुपयातांयज्ञम् क्षुद्रान्पशून्र
क्षतुरेवतीनःगावोनोअश्वाँअन्वेतुपूषा अन्नंरक्षंतौबहुधावि
रूपंवाजंसनुतांयजमानाययज्ञम् तदश्विनावश्वयुजोपयाता
तांशुभंगमिष्ठौसुयमेभिरश्वैः स्वंनक्षत्रंहविषायजंतौमध्वासंपृ

म॰
क॰
५॰

कौयोदेवानांभिषजौहव्यवाहौविश्वस्यदूतावमृतस्यगोपौतौनस्त्
त्रेज्जुषमाणोपयातांनमोश्विभ्यांकृणुमऋतुगभ्याम् ५८ अ
पोपाप्मानंभरणीभिर्रक्षतयमोराजाभगवान्विचष्टम् लोकस्य
राजामहतोमहान्हिगनः पंथामभयंकृणोतु यस्मिन्नक्षत्रेय
मएतिराजायस्मिन्नेवमभिषिंचंतदेवाः तदस्यचित्रंहविषाय
जाम अपाप्मानंभरणीभिर्भवंतु ५९ इतिनक्षत्रमंत्राः अथशर्णी
इतिमंत्राः समुद्रादूर्मिरितित्रृचस्यगौतमोवामदेवऋषिर
ग्निर्देवतात्रिष्टुप्छंदः मूर्धानंदिवइत्यस्यबार्हस्पत्योभारद्वाज
ऋषिः वैश्वानरोदेवतात्रिष्टुप्छंदः पुनन्त्वादित्येत्यस्याग्निर्ऋ
षिः वसुरुद्रादित्यादेवताः त्रिष्टुप्छंदः शर्णीदेवीत्यस्याविश्वे
देवाऋषयः शतक्रतुर्देवतानुष्टुप्छंदः ममस्तुवअग्निरित्यस्य
अग्निर्ऋषिः समवानाग्निर्देवताजगतीत्रिष्टुप्चसर्वेषांमंत्राणां
शर्णीहतौविनियोगः समुद्रादूर्मिर्मधुमाँउदगाउपांशुनामम
मृतत्वमानट् घृतस्यनामगुह्यंयदस्तिजिह्वादेवानाममृतस्य
नाभिः वयंनामप्रब्रवाम घृतेनास्मिन्यज्ञेधारयामानमोभिः उ
पब्रह्माशृणवच्छस्यमानंचतुःशृंगोवमीद्गौरएतत् चत्वारिशृंगा
त्रयोअस्यपादाद्वेशीर्षेसप्तहस्तासोअस्य त्रिधाबद्धोवृषभोरोर
वीतिमहोदेवोमर्त्यानाविवेश मूर्धानंदिवअरतिंपृथिव्यावै
श्वानरमृतायजातमग्निं कविंसम्राजमतिथिंजनानामासन्न
पात्रंजनयंतदेवाः पुनन्त्वादित्यारुद्रावसवःसमिंधतांपुनर्ब्रह्मा

णो वसुनीयथयज्ञैः हुतेनतेतनवोवर्धयस्वसत्याः सन्तुयजमा
नस्यकामाः पूर्णादर्विपरापतसुपूर्णापुनरापतवस्नेवक्रीणा
वहइषमूर्जंशतक्रतो १ सप्ततेअग्नेसमिधःसप्तजिह्वाःसप्त
र्षयःसप्तधामप्रियाणि सप्तहोत्राःसप्तधात्वायजंति सप्तयो
णीरापृणस्वाघृतेनस्वाहाग्नये वैश्वानरायवसुरुद्रादित्येभ्यः
शतक्रतवेअग्नयेसप्तवेच इतिपूर्णाहुतिमंत्राः एवंपूर्णाहुति
प्रणीतमोक्षणस्यचानंतरंकिंकुर्यादित्याह अनुलोमाययालि
गमश्लीभ्यामत्रपादतः प्राङ्मुखस्याज्यसंपातैरभ्यज्यांगानिरो
गिणः आच्छिन्नाग्रेणदर्भाणांहेमगर्भेणमुष्टिना निष्प्रमृज्यततः
शांतिंवाचयेद्ब्राह्मणैःसह तैःस्नानकलशांभोभिरभिषिच्यस्व
यंपुनः मार्जयेच्चयथापूर्वंदर्भगर्भेणवाससा सगणस्यप्रति
शुक्लीयात्सदक्षिणमनान्तरः उत्तराभिमुखःश्वेतवस्त्रमाल्यानु
लेपनः शांतिंग्रहाणांनिर्वर्त्यबद्धानांत्वविमोचकीम् पूर्वाभिमु
खमाचार्यमभ्यर्च्यप्रतिमोक्षमान् प्रदद्याद्दक्षिणांतस्मैमध्याह्ने
समुपस्थिते अनुलोमाययालिंगमित्यादिश्लोकादितःपादांतमा
नुलोम्यम् शिरःप्रभृतिपादपर्यंतमित्यर्थः यथालिंगंतत्तद
वयवरोगनिराकरणेद्योतकमंत्रपदंलिंगंतदनतिक्रमेणाक्षी
भ्यांतेनासिकाभ्यामित्येतत्कंपदेत आच्छिन्नाग्रेणदर्भाणांमु
ष्टिनासुवर्णशलाकागर्भेणचशिरःप्रभृतिपादपर्यंतंरोगिणों
गानियथालिंगंनिष्प्रमृज्यततःशांतिपाठंकुर्वन् आलिंगादि

भिर्ब्राह्मणैः सहितस्तैः सर्वस्थापितैः स्नानकलशैरंभोभिरभिषि
च्य स्वयमाचार्यः पुनर्यथा सर्वमानुलोम्येनाद्भिर्भ्यामित्यनेन स्व
कंपदत्रेव दर्भगर्भेणवाससापरिमार्जयेदिति अत्राभिषेकका
ले सर्वस्थापितकलशास्थितस्तंपरिशोषपेदत्रेमंगलस्नानार्थं
अतएव पाशांतरे मंत्रस्तेपयो गृहीत्वा स्वस्वशाखोक्तमंत्रपाठंकु
र्वद्भिरभिषेकः कार्यः रुग्णस्य कृत्वा गृहस्ती या दिव्यस्य रुग्णस्य रो
गिणः अपद्ध्यादिति पाठे रोगशांतिं प्रकुर्वीत्येत्यर्थः अथ स द
क्षिणां व्याधिप्रतिमां प्रतिगृहीता आचार्यादिभिः प्रतिगृह्णीया
त् अतः परं रोगी श्वेतवस्त्रादिभिरलंकृत उत्तराभिमुखः सन् सर्वा
भिमुखमाचार्यमभ्यर्च्य तां व्याधिप्रतिमां स्वर्णप्रतिमां च दद्यात्
ग्रहशांतिं च पठेत् कारागृहे च बद्धानोनिवर्त्यैव उमोचनेनस
तिसंभवे ग्रहशांतिर्नव ग्रहशांतिः स चाग्रे दर्शयिष्यति अत्रस
र्वप्रतिमाया आवरणपूजाक्रमेण ग्रहपूजा प्रदर्शिता न प्राधान्ये
नातः समर्थश्चेत्सप्तग्रहयज्ञं कुर्वीतेति मुख्यः पक्षः असमर्थ
श्चेदावरणपूजयैव ग्रहपूजा निर्वर्त्येति गौणः पक्षः तां प्रतिमां
दद्यादिति तत्रोभयत्र प्रतिमादानेमंत्रमाह पद्मोद्भवः पद्मक
रः समस्तभुवनाद्धतः प्रतिमानेन दत्तेन तुष्टोस्तु सर्वजगद्गुरुः
गृहजन्मनि पत्यापमन्यजन्मनि वा कृतम् प्रत्ययाप्रत्ययाभ्यां
च तत्सर्वं शमयत्वसौ मंत्रेणानेन दत्वा तं प्रणिपत्य तस्मात्पश्च
आमोसांतमनुब्रज्य तन्मुखं नावलोकयेत् तन्मुखं प्रत्यगृही

तस्तुत्वेश्चाचार्येणाभ्यनुज्ञातोवसिष्ठोभवनंनिजम् आचार्यस्या
प्रतिगृहीत्वपदेतेनदत्तुज्ञातः सुतिभ्योदक्षिणांदत्वाकृत्वाराथ
नमश्विनोः धन्वंतरिंचसंतर्प्यदीनानाथानुपस्थितान् मंग
लधनिनातोयैः सप्तवैर्यौषधिपल्लवैः मंत्राभिमंत्रितैःस्नातःकृ
तकौतुकमंडनः प्रसन्नचेताःपुण्याहंवाचयित्वाशतंद्विजान्
तदर्धंवातदर्धंवाक्रियायाःपुण्यसिद्धये मिष्टान्नैर्भोजयित्वायस्त्व
यंभुंजीतबंधुभिः येयेरोगाःप्रबाधंतेराजयक्ष्मज्वरादयः तेषां
तेषांप्रतिच्छंदोदानैरिज्याप्रयत्नतः प्रतिच्छंदःप्रतिकृतिः इज्या
पूजा अक्षीभ्यामितिसूक्तंप्रदर्श्यते अक्षीभ्यामिति षडृच
स्यसूक्तस्यकाश्यपोविवृहाऋषिः यक्ष्मनाशिनीदेवता अनुष्टु
प्छंदः यक्ष्मनिवर्हणेविनियोगः अक्षीभ्यांतेनासिकाभ्यांक
र्णाभ्यांछुबुकादधि यक्ष्मंशीर्षण्यंमस्तिष्काज्जिह्वायाविवृहामि
ते ग्रीवाभ्यस्तउष्णिहाभ्यःकीकसाभ्योअनूक्यात् यक्ष्मंदोष
ण्यमंसाभ्यांबाहुभ्यांविवृहामिति २ आंत्रेभ्यस्तेगुदाभ्योवनि
ष्ठोर्हृदयादधियक्ष्मंहस्ताभ्यांयक्नः प्लाशिभ्योविवृहामिते ३
ऊरुभ्यांतेअष्ठीवद्भ्यांपार्ष्णिभ्यांप्रपदाभ्यांयक्ष्मंश्रोणिभ्यांभास
दाद्भ्यांसंसुहोविवृहामिते ४ मेहनाद्वंनःकरणाल्लोमभ्यस्तेन
खेभ्यःयक्ष्मंसर्वस्मादात्मनस्तमिमंविवृहामिते ५ अंगादंगा
ल्लोम्नोजातंपर्वणिपर्वणियक्ष्मंसर्वस्मादात्मनःतमिमंविवृहा
मिते ६ अस्यसूक्तस्याश्वलायनशाखोक्तमारणंयथाप्रार्थ

श्च तैत्तिरीयशाखोक्तसारेण तच्चामिकोऽन्तःपातित्वादग्रिमैर्व्या
धिः कृत्स्नया मित्य स्यामस्य विकल्पन स्वरवर्णयोर्भेदः शिष्टं समानम्
महार्णवाख्ये महति प्रबन्धे मान्धातृनाम्नो मदनात्मजस्य स
कर्मरत्नोच्चनिधिप्रसूतेर्धस्तरंगस्तरंगोऽयमगादगाधः चतुर्थ
स्तरंगः रोगाश्च त्रिविधाः कर्मजा दोषजा उभयजाश्चेति तथा
श्रुतेर्वेदे कर्मप्रकोपेन कदाचिद्दिते दोषप्रकोपेन भवन्ति चान्ये त
थापरे प्राणिषु कर्मदोषप्रकोपजाः कायमनोविकारादिति
ततः प्रथमतः प्रायश्चित्तं विधाय पश्चाच्चिकित्सितदानादि कु
र्वीत तथा कर्मविपाकसंग्रहे प्रायश्चित्तमकृत्वा तु न कुर्यात्क
र्म किंचन अनिस्तीर्णमघं नित्यं वर्धते द्विगुणं पुनः दानैर्दया
द्विभिरपि द्विजदेवतागोवेदार्चनप्रणतिभिश्च जपैस्तपोभिः र
त्नैकपुण्यनिचयैरपनीयमानाः प्राक्पापजातमशुभं प्रशमं न
यन्ति वेदार्चनं वेदविद्ब्राह्मणपूजनात् वेदाविद्ब्राह्मणवेदपुस्तका
र्चनाच्च प्रणतिभिर्देवतानमस्कारैर्विशेषतः सूर्यनमस्कारैरा
रोग्यं भास्करादिच्छेदिति च नमस्कारप्रियः सूर्य इत्यपि च स्मरणा
त् तथा प्रणतिशाट्येनाश्वस्य प्रदक्षिणाक्रियापि लक्ष्यते जपैर्वे
दपारायणमहासौरशतरुद्ररुद्रसूक्तसहस्रनामापामार्जनादि
स्तवरूढयादिजपैरशुभं रोगं तथा दृष्टापराधजः काश्चित्काश्चिद
दीपराधजः तत्संकराद्भवत्यन्यो व्याधिरेवं त्रिधा मतः दृष्टापरा
धजो दोषोत्थः पूर्वापचारजः कर्मजः संकरजः उभयजः एतेषां

भेदस्तत्रोपायमाह यथा निदाने निदानमनतिक्रम्य समनं
तरं दृश्यमानमाहारवैषम्यादि निदानमनतिक्रम्य तज्जायते
तद्दोषोक्तहेतुभिर्विना समनंतरदृश्यमानहेतुभिर्विना यथा
दोषस्य महारंभः स कर्मजो दोषः अल्पहेतावंतकः स्वल्पमिति
मितेर्व्याथावंतकौंतिमस्तनीयः पस्तो भवेत् तमेवाह दोषजे
ति तथा निष्कृत्या दोषजन्मा न दोषजस्तौषधेन हि उभयात्मा
यमानस्तन्निष्कृत्यौषधसेवया अपगच्छेदित्ययमर्थः अदोष
जन्मा कर्मोद्भव इत्यर्थः यत्रापि कर्मजत्वदोषत्वानिश्चयः तत्र
प्रायश्चित्ताद्यौषधं च कर्तव्यम् प्राणातिशाहेनाश्वत्थप्रदक्षि
णाक्रियालक्षणमुक्तम् तत्राश्वत्थाभिमंत्रणमंत्रः आरात्तरु
त्यस्याग्निकोऽन्तःपातित्वेनाग्निर्ऋषिः वनस्पतिर्देवता अनुष्टु
प् छंदः वनस्पत्यभिमंत्रणे विनियोगः आराते अग्निरस्मादारात्
रक्षस्तने निवाते त्वाभिवर्षतु स्वस्तितेस्तु वनस्पते स्वस्ति मे स्तु
वनस्पते तथा पौराणिकश्लोकोऽपि स्मर्यते अक्षिस्पंदं भुजस्पं
दं दुःस्वप्नं दुर्विचिंतितम् शत्रूणां च समुत्पन्नमश्वत्थ शमयस्व
मे इति शत्रुसंबंधितेन समुत्पन्नं भयं शमयस्वेत्यर्थः शत्रूणां च
समुत्थानमित्यपि पाठः इत्यश्वत्थाभिमंत्रणप्रकारः अथ वेद
पारायणविधिः स्थंडिलं कल्पयित्वाग्निमुपसमाधाय परिस्तीर्या
ज्येनैताभ्यो देवताभ्यो जुहोति अग्नये सोमायेन्द्राय विश्वेभ्यो दे
वेभ्यो ऋषिभ्यो ऋग्भ्यो यजुर्भ्यः सामभ्यः श्रद्धायै मेधायै धारणा

येऽग्नयेऽग्नये सावित्र्यै सवित्रे प्रजापतये सोमायाग्नये कांडऋष
येऽग्नये कांडऋषये विश्वेभ्यो देवेभ्यः कांडऋषिभ्यः सांहितेभ्यो
देवताभ्यः उपनिषद्भ्यो हव्यवाहविश्वेभ्यो वरुणेभ्यः श्रद्धमत्यै
स्विष्टकृते च षट्पञ्च स्वाहाकारेण हुत्वा व्याहृतिभिश्च पुनः परि
षिंचति समाप्ते चैता यज्ञपातर्पयति एवं ऋग्वेदस्य कांडऋष्या
दिवर्जमास्विष्टकृतस्तेषां स्थाने शतर्चिभ्यो माध्यमिभ्यो गृत्सम
दाय विश्वामित्राय वामदेवाय अत्रये भरद्वाजाय जामदग्न्या
य गौतमाय वसिष्ठाय प्रगाथेभ्यो क्षुद्रसूक्तेभ्यो महासूक्तेभ्यः
महानाम्नीभ्य इति ततो वेदादिमारभ्य संततमधीयेत्याह भगवा
न्बौधायनः इति वेदपारायणोपक्रमविधिः अथ वेदपाराय
णे कलशप्रतिष्ठापरादिप्रकारः तीर्थे देवालये गेहे प्रशस्ते सुप
रिष्कृते कलशं सदृढं तत्र सनिर्णिक्तविभूषिते पुष्पपल्लवमा
लाभिश्चंदनैः कुंकुमादिभिः मृत्तिकायवसंमिश्रं वेदिमध्ये ततो
न्यसेत् पंचाशद्भिः कुशैः कार्यो ब्रह्मा पश्चान्मुखस्थितः स्थापितः
स्थापितः कुंभे चतुर्बाहुश्चतुर्मुखः वस्त्रजान्वाकृतिं वेदकृतराग्रैः
कुशैः कृतम् ब्रह्मोपधाने दत्वा तेन ततः स्वस्त्ययनं पठेत् प्रतिष्ठां
कारयेत्सम्यक् ब्रह्मा आज्यमथोच्यते यज्ञोपवीतं नैवेद्य वस्त्रं चंदनकुं
कुमैः स्रग्धूपदीपतांबूलैरर्चयेत्पितामहम् ब्रह्मजज्ञानमिति
वा गायत्रीं वा प्रसर्जयेत् उपाध्यायं च संपीड्य यथापारं पठेत्ततः
इति वेदपारायणे कलशप्रतिष्ठाप्रकारः अथानध्यायपारायणवि

यिः अथातोनध्यारायणविधिंव्याख्यास्यामः आसमाप्तेर्नवा
श्नीयाद्यथाशक्तिपिबेत्पयः फलान्योदनंचहविष्यमात्रमलंउ
श्वात्तदाशेषमधीयेत ग्रामात्प्राचीमुदीचींवादिशमुपक्रम्या
ग्निमुपसमाधायपरिस्तीर्यैंषंप्रदायाज्येनताभ्योदेवताभ्योजु
होति अग्नयेसोमायेन्द्रायप्रजापतयेबृहस्पतयेविश्वेभ्योदेवे
भ्योब्रह्मणऋषिभ्योऋग्भ्योयजुर्भ्यःसामभ्यःश्रद्धायैमेधायै
धारणायैसदसस्पतये अनुमत्यैश्रियैसावित्र्याऋक्पैसवित्रेप्र
जापतयेकांडऋषये अग्नयेकांडऋषयेविश्वेभ्योदेवेभ्यःकां
डऋषिभ्यःसांहिताभ्योदेवताभ्योदेवताभ्यउपनिषद्भ्योयाज्ञिके
भ्योदेवताभ्यःउपनिषद्भ्योवारुणीभ्योदेवताभ्यःउपनिषद्भ्योह
व्यवाहायविश्वेभ्योगणेभ्यःअनुमत्यैस्विष्टकृतेचरथ्यकस्वाहा
कारेणहुत्वाव्याहृतिभिश्चपुनःपरिषिंचति परिसमाप्तिश्चेता
यज्ञपात्रपर्ययति एवंऋग्वेदिनांकांडऋषिवर्जमास्विष्टकृतस्ते
षांस्थानेशतर्चिभ्योमध्यमेभ्योगृत्समदायविश्वामित्रायवामदे
वायात्रयेभारद्वाजायजामदग्न्यायगौतमायवसिष्ठायप्रगाथे
भ्यःपावमानीभ्यःक्षुद्रसूक्तेभ्यःमहानाम्नीभ्यइति ततोवेदादि
मारभ्यसंततमधीयेतनास्यांतराध्यायीनास्यांतराज्जननमरण
आशौचेनांतराव्याहरेन्नांतराविरमेत त्रीन्प्राणायामानायम्य
प्रणवंवा यावत्कालमधीयते ततःसर्वंनिशांतरेसंग्रामारण्य
सलिलंलोष्टपरिदद्यात् आदावंतेचब्राह्मणभोजनंदक्षिणा

दानं दद्यात् यश्चैतेन विधिना वेदमधीयते स ततो वेदशक्तो
भवति मनःशुद्धिश्च भवति ताभ्यां पारायणाभ्यामभिवीक्षो
जनश्शास्त्राधीतेश्च न तेभ्यः प्रमुच्यते त्रिभिर्बद्धेभ्यः पातनीयपा
तकेभ्यः शूद्रायां रेतःसिक्तां गमनस्थानिमज्जेश्च भवति चतुर्भिः
शूद्रान्नभोजनं तर्पणात् तत्स्त्रीसेवनाच्च पंचभिरयाज्ययाजना
त्सतो भवति अग्राह्यग्रहणाद्ब्राह्मणग्रहणात् असत्योपासना
च्चतुर्भिर्ब्राह्मणस्य लोहितकरणात् स्त्रीलोहितकरणात्सु
संहननात्स्वर्णस्तेयात् पतितसंप्रयोगाच्च सप्तभिः प्राजाप
त्यानाचरणात् यज्ञोपवेधनाच्च अष्टभिश्चांद्रायणस्याचरणा
द्गुरुतल्पगमनाद्द्विजस्वस्त्रागमनाच्च नवभिः सुरापानाद्दशभि
रश्रोत्रिययाजनात् असोमपानात् अन्यायतश्च एकादशभि
र्ब्रह्महननात् गर्भहननात् द्वादशभिः सर्वजन्मेह जन्मकृतैः पा
पैः प्रमुच्यते स्वर्गलोकं गच्छति पितॄंश्च स्वर्गलोकं गमयति अ
ग्निष्टोमादीन् क्रतून् यजति तैः क्रतुभिरिष्टं भवति वेदाध्यायी
सदैव स्यादपामासत्यवाक्शुचिः यं यं काममयते कामं तं तेवे
देन साधयेत् असाध्यं नास्ति यत्किंचिद्ब्राह्मणोति फलं महत्
ब्राह्मणोपि फलं महदिति समासेनैतायज्ञपानर्पयतीति स
मासे वेदपारायणेन स्ववेदस्य प्राधान्यमुच्यते अथ श्राद्धव्या
हृति च तस्यात्मकं यज्ञः शाठेन शृणुते तेनैतदुक्तं भवति भूर्दे
वां स्तर्पयामीत्यनेन प्रकारेण तर्पयित्वा अग्निसोमादींस्तर्पयेदि

ति नाध्यं तराञ्जनेन मरणेऽप्याशौचेति नाश्नुविद्वेनश्नतेत्यर्थः
नोत्तराद्याहरेदिति उपक्रान्तवेदपारायणमध्ये नाध्यापयेत्
तथा लौकिकवचनमपि न ब्रूयात् विहितनित्यनैमित्तिककर्मा
नुपयुक्तानु किं न कुर्यादित्यर्थः निशान्निशान्तरे संध्यामारण्ये
सलिले लोप्यपरिदद्यात् इति लोप्यच्छिन्नापरिहार्यवर्जयित्वे
ति यावत्परिदद्यात्समापयेत् निशान्ते निशीथः संध्या वा सलि
लं नु शिरुदकसमीपो भ्रमिका वा निशादिकालान्देशान्वर्जयित्वा
समापयेदित्यर्थः स ततः श्रुतवेदो भवति इति वेदात्मिको भव
ति उत्कृष्टज्ञानवान्भवेदित्यर्थः द्वाभ्यां पारायणाभ्यां ऋग्भिश्चे
ति ऋग्भिः पावमानीभिः पारायणद्वयं पावमान्यश्च मिलित्वोक्त
फलाय कल्पन्त इत्यर्थः एवमृग्ऋग्यापि पारायणत्रयं गंगास्नानं
च मिलित्वा साधनेन निमज्जेत् स्वस्तो भवतीत्यर्थः प्राजापत्याना
चरणे प्रक्रान्त प्राजापत्या नाम नष्टमेवं चान्द्रायणस्याचरणेय
ज्ञोपवेयन्नं यज्ञविनाशः इत्यनन्तरं पारायणविधिः अथ सौरमं
त्राणामृष्याद्यभिधीयते अथ सौराणां मंत्राणामृषिं छन्दो दे
वताश्चेदौसिचवक्ष्यामः सर्वाचार्यक्रमेण उदुत्यं जातवेदसमि
ति त्रयोदशर्चं सूक्तं कंवेन दृष्टं गायत्र्यमन्त्यास्तत स्रोनुष्टुभो सूर्यो दे
वता शुचये मे चं रोगघ्नमन्त्याद्विषनाशिनी चित्रं देवानामिति षड्ऋचं
सूक्तमांगिरसेन कुत्सेन दृष्टं त्रैष्टुभमन्त्रैवेदं वरुणामिति द्वृचं ने
पथ्येन दीर्घतपसा दृष्टं त्रैष्टुभो हंसः शुचिषदिति पथा गौतमपुत्रे

म॰
कं॰
९५

ण वामदेवेन दृष्टा जगती यद्यास्सूर्येत्येषा भ्र्मिपुत्रेणाविणा दृ
ष्टानुष्टुप् यदद्य सूर्येत्येका तत्सूर्यस्येति सप्तः उद्वेतेति चतस्रो
वर्षिष्ठ उ यत दर्शतमित्येति सप्ता मैत्रावरुणेन वसिष्ठेन दृष्टा
त्रिष्टुभः उ यत दर्शतश्चति बृहती शीर्षिश्चति शतोबृहती नवत्व
तिति परातो सिकं वग्माहसीति सुचो भरद्वाजेन जमदग्निना
दृष्टः श्वी बृहत्युत्तरामतो बृहतीनमो मित्रस्येत्येन ह्वादशर्चसू
क्तं सूर्यपुत्रेणाभितपसा दृष्टं जागतं शान्नोभवेति त्रिष्टुप् सूर्यो नो
दिवस्पात्विति पंचर्चस्सूक्तं सूर्यपुत्रेण विभ्राजा दृष्टं जागतं विभ्रा
डं ज्योतिषेत्यावस्याः पंक्तिरयं गौरिति त्र्यृचं सूक्तं सार्पराज्ञा दृष्टं गाय
त्रं सर्वत्र सूर्यो देवता न्यस्सूक्तं केविदाल्पस्तवं मन्यन्ते यदेवः सोह
मिति ध्यातव्यः यपतेन सौर्येण सूर्यमहरहरुपतिष्ठेते तेषामायुष्मं
तमारोग्यवंतो भवंति सर्वकामवंतो भवंत्यन्ते सूर्यसायुज्यं गच्छंति
इति महासौरमंत्राणां व्याख्यानं विधानम् अथ महासौरमंत्राः

उदु त्यं जातवेदसं देवं वहंति केतवः दृशे विश्वाय सूर्यम् १ अप
त्ये तायवो यथा नक्षत्रा यंत्यक्तुभिः सूराय विश्वचक्षसे २ अदृ
श्रमस्य केतवो वि रश्मयो जनाँ अनु भ्राजंतो अग्नयो यथा ३ तर
णिर्विश्वदर्शितो ज्योतिष्कृदसि सूर्य विश्वमाभासि रोचनम् ४ प्र
त्यङ् देवानां विशः प्रत्यङ् ङुदेषि मानुषान् प्रत्यग्विश्वं स्वर्दृशे ५
येन पावक चक्षसा भुरण्यंतं जनाँ अनु त्वं वरुण पश्यसि ६ वि
द्यामेषि रजस्पृथ्वहा मिमानो अक्तुभिः पश्यं जन्मानि सूर्य ७

सप्तत्वाहरितोरथेवहंतिदेवसूर्यशोचिष्केशंविचक्षण ८ अयु
क्तसप्तशुंध्युवःसूरोरथस्यनप्त्यःताभिर्यातिस्वयुक्तिभिः ९ उद्व
यंतमसस्परिज्योतिष्पश्यंतउत्तरम् देवंदेवत्रासूर्यमगन्मज्यो
तिरुत्तमम् १० उद्यन्नद्यमित्रमहआरोहन्नुत्तरांदिवंहृद्रोगंमम
सूर्यहरिमाणंचनाशय ११ शुकेषुमेहरिमाणंरोपणाकासुद
ध्मसिअथोहारिद्रवेषुमेहरिमाणंनिदध्मसि १२ उदगादयमा
दित्योविश्वेनसहसासह द्विषंतंमह्यंरंधयन्मोअहंद्विषतेरधम्
१३ इतीदमेकत्रयोदशर्चंसूक्तम् चित्रंदेवानामुदगादनीकंच
क्षुर्मित्रस्यवरुणस्याग्नेः आप्राद्यावापृथिवीअंतरिक्षंसूर्यआत्मा
जगतस्तस्थुषश्च १ सूर्योदेवीमुषसंरोचमानांमर्योनयोषाम
भ्येतिपश्चात् यत्रानरोदेवयंतोयुगानिवितन्वतेप्रतिभद्रा
यभद्रम् २ भद्राअश्वाहरितःसूर्यस्यचित्राएतग्वाअनुमाद्यासः न
मस्यंतोदिवआपृष्ठमस्थुःपरिद्यावापृथिवीयंतिसद्यः तत्सूर्यस्य
देवत्वंतन्महित्वंमध्याकर्तोर्विततंसंजभारयदेदयुक्तहरितःस
धस्थादाद्रात्रीवासस्तनुतेसिमस्मै तन्मित्रस्यवरुणस्याभिचक्षेसू
र्योरूपंकृणुतेद्योरुपस्थे अनंतमन्यद्रुशदस्यपाजःकृष्णमन्य
द्धरितःसंभरंतिअद्यादेवाउदितासूर्यस्यनिरंहसःपिपृतानिरव
द्यात् तन्नोमित्रोवरुणोमामहंतामदितिःसिंधुःपृथिवीउतद्यौः
इदमपरंषडृचम् इंद्रंमित्रंवरुणमग्निमाहुरथोदिव्यःसुपर्णो
गरुत्मान् एकंसद्विप्राबहुधावदंत्यग्निंयमंमातरिश्वानमाहुः

कृष्णंनियानंहरयःसुपर्णाअपोवसानादिवमुत्पतंतितआव
वृत्रन्सदनादृतस्यादिद्घृतेनपृथिवीव्युद्यते अयंह्यृचः हंसः
शुचिषद्वसुरंतरिक्षसद्धोतावेदिषदतिथिर्दुरोणसत् नृषद्वर
सदृतसद्व्योमसदब्जागोजाऋतजाअद्रिजाऋतम् इयमेका
ऋक् यद्वा सूर्यस्वर्भानुस्तमसाविध्यदासुरः अक्षेत्रविद्यथामु
ग्धोभुवनान्यदीधयुः इयमप्येकाऋक् यदद्यसूर्यब्रवोनागाउ
द्यन्मित्रावरुणायासत्यंवयंदेवत्रादितेस्याम तवप्रियासोअ
र्यमाणंगृणंतः इयमेकाऋक् उत्सूर्योबृहदर्चींष्यश्रेत्पुरु
विश्वाजनिममानुषाणाम् समोदिवाददृशेरोचमानःक्रत्वा
कृतःसुकृतःकर्तृभिर्भूतम् १ ससूर्यप्रतिपुरोनउद्गाएभिः
स्तोमेभिरेतशेभिरेवैः प्रनोमित्रायवरुणायवोचोनागसोअर्य
म्णेअग्नयेच २ विनःसहस्रंशुरुधोरदंत्वृतावानोमित्रोवरु
णोअग्निः यच्छंतुचंद्राउपमान्नर्कमलकामंपपुरंतुस्तवानाः ३
अयंत्र्यृचः उदेतिसुभगोविश्वचक्षाःसाधारणःसूर्योमानुषाणां
चक्षुर्मित्रस्यवरुणस्यदेवश्चर्मेवयःसमविव्यक्तमांसि १
उदेतिप्रसवीताजनानांमहान्केतुरर्णवःसूर्यस्यसमंचक्रंपर्या
विवृत्सन्यदेतशोवहतिधूर्षुयुक्तः २ विभ्राजमानउषसा
मुपस्थाद्रेभैरुदेत्यनुमद्यमानः एषमेदेवःसविताचच्छंदयःसमा
नंनप्रमिनातिधाम ३ दिवोरुक्मउरुचक्षाउदेतिदूरेअर्थस्तर
णिर्भ्राजमानः नूनंजनाःसूर्येणप्रसूताअयन्नर्थानिकृणवन्नपां

स्ति ४ यत्रचक्रुरमृतागातुमस्मैश्येनोनदीयन्नन्वेतिपाथः सूर
कृत्तष्ठ्यम् उदुत्यंदर्शनंवसुर्देवपत्तिप्रतिकुरेयदीमात्स्याव
हन्तिदेवपतयोविश्वस्मैचक्षसेश्वरम् शीर्ल्ःशीर्लेजगतस्त
स्थुषस्पतिंसमयाविश्वमारजः सप्तस्वसारः सवितासूर्यैव
हंतिनतोरथे तच्चक्षुर्देवहितंपुरस्ताच्छुक्रमुच्चरत् पश्येम
शरदः शतंजीवेमशरदः शतम् अयंऋचः बण्महाँअसिसूर्य
बलादित्यमहाँअसिमहस्तेदेवानामसूर्यःपुरोहितोविभुर्ज्यो
तिरदब्धं अयंऋचः नमोमित्रस्यवरुणस्यचक्षसेमहोदेवाय
तदृतंसपर्यतदूरदृशेदिविजातायकेतवेदिवस्पुत्रायसूर्याय
शंसत १ समासचोक्तिःपरिपातविश्वतोद्यावाचयत्रततनन्न
हानिचविश्वमन्यन्निविशतेयदेजविश्वापोविश्वाहोदेतिसूर्यः
२ नतोऽग्रदेवःप्रदिवोनिवासतेयदेतदाभिःपतनैरथर्यसि प्रा
चीनमन्यदनुवर्तते रजतदन्येवज्योतिषायामिसूर्ये ३ ते
नसूर्यज्योतिषावाधसेतमोजगच्चविश्वमुदियर्षिभानुना ते
नास्मद्विश्वामनिरामनाहुतिमपाम् वामसः दुःस्वप्न्यंसुव ४
विश्वस्यहिप्रेषितोरक्षसिव्रतमहेलयंतमुचरसिस्वधा अनुयद
ध्यात्वासूर्योपह्वामहैतंनोदेवाअनुमंसीतक्रतुं ५ नमोद्या
वापृथिवीनभ्रआपइंद्रःश्रृण्वंतुमरुतोहवंवचः मास्थनेऽम
सूर्यस्यसंदृशोभद्रंजीवंतोजरणामशीमहि ६ विश्वाहात्वा
सुमनसःसुचक्षसःप्रजावंतोअनमीवाअनागसः उद्यंतंत्वामि

म॰
क॰
८३

अमहोदिवादिविज्योग्जीवाः प्रतिपश्येमसूर्य महिज्योतिर्बि
भ्रतंत्वा विचक्षणभास्वंतंचक्षुषेमयः आरोहंतंबृहतःपाजस
स्परिवयंजीवाःप्रतिपश्येमसूर्य यस्यतेविश्वाभुवनानिकेतु
नाप्रचेरंतेनिचविशंतेअक्तुभिः अनागास्त्वेनहरिकेशसूर्याह्ना
ह्नानोवस्यसावस्यसोदिहि शंनोभवचक्षसाशंनोअह्नाशंभा
नुनाशंहिमाशंघृणेनयथाशमध्वंछमसद्दुरोणेतत्सूर्यद्र
विणंदेहिचित्रम् ॥ अस्माकंदेवाउभयायजन्मनेशर्मयच्छ
तद्विपदेचतुष्पदे अदत्पिबदूर्जयमानमाशितंतदस्मेशंयोर
पोदधातन १२ यद्वोदेवाश्चकृमजिह्वयागुरुमनसोवाप्रयु
तीदेवहेडनं अरावायोनोअभिदुच्छुनायतेतस्मिंस्तदेनोवस
वोनिधेतन १३ इंद्वादशर्चंसूक्तम् सूर्योनोदिवस्पातुवातो
अंतरिक्षात् अग्निर्नःपार्थिवेभ्यः १ जोषासवितर्यस्यतेहरःश
तंसवाँअर्हति पाहिनोदिद्युतःपतंत्याः २ चक्षुर्नोदेवःसविता
चक्षुर्नउतपर्वतःचक्षुर्धातादधातुनः चक्षुर्नोधेहिचक्षुषेच
क्षुर्विख्यैतनूभ्यःसंचेदंविचपश्येम ४ सुसंदृशंत्वावयंसूर्य
प्रतिपश्येमनृचक्षसः ५ इदंपंचर्चंसूक्तं विभ्राड्बृहत्पिबतु
सोम्यंमध्वायुर्दधद्यज्ञपतावविह्रुतम् वातजूतोयोअभिरक्षतित्मना
प्रजाःपुपोषपुरुधाविराजति १ विभ्राड्बृहत्सुभृतंवाजसात
मंधर्मन्दिवोधरुणेसत्यमर्पितं अमित्रहावृत्रहादस्युहंतमंज्यो
तिर्जज्ञेअसुरहासपत्नहा २ इदंश्रेष्ठंज्योतिषांज्योतिरुत्तमंवि

श्वजिद्धनजिदुच्यतेबृहत् विश्वभ्राड्भ्राजोमहिसूर्योदृशउरु
पप्रथेसहओजोअच्युतम् ३ विभ्राजंज्योतिषास्वरगच्छोरोचनं
दिवः येनेमाविश्वाभुवनान्याभृताविश्वकर्मणाविश्वदेव्या
वता इतिचतुर्ऋचंसूक्तं आयंगौः पृश्निरक्रमीदसदन्मातरंपु
रःपितरंचप्रयन्स्वः १ अन्तश्चरतिरोचनास्यप्राणादपानतीव्य
ख्यन्महिषोदिवम् २ त्रिंशद्धामविराजतिवाक्पतंगायधीय
तेप्रतिवस्तोरहद्युभिः ३ इदंत्र्यृचंसूक्तम् महार्णवाख्येमह
तेग्रन्थेमान्याततनाश्रीमद्रत्नात्मजस्य सत्कर्मरत्नोद्धृतिषिस्व
रेणःस्वर्णस्तरंगःखलुपंचमोयम् ५ इतिमहासौरमंत्राः अथ
श्रीरुद्रविधिः तत्रतावदुपयुक्तत्वेनाविनियोगादिविधिंत्वाते
विनियोगोनामसंबंधः संयोगांगिभावरूपः एकस्यैवमंत्रस्य
विधिबलादनेकेषुसजातीयेषुकर्मसुअंगत्वमस्ति अतोयस्मिन्क
र्मणितदंगभावंभजते तदातस्मिन्कर्मणिविनियोगोज्ञेयः प
वंचयद्यपिचयनयागमिष्टकायांशतरुद्रीयंजुहोतीत्यादिब्राह्म
णवाक्यैरग्निचयनेऽग्नमिष्टकायामेकादशभीरुद्रानुवाकैर्होमे
विहितइतिहोमाख्येकर्मणिअंगत्वंशतरुद्रानुवाकानां तथा
पिजाबालश्रुतौ किंजप्येनामृतत्वंब्रूहीति शतरुद्रीयकरणेने
ति तथारुद्राध्यायीशुच्यतेसर्वपापेभ्य इतितथारुद्राणांजपहोमा
र्चनविधिंव्याख्यास्यामः इत्यादिश्रुतिस्मृतिपुराणवाक्यैर्जपहो
मार्चनाभिषेकेषुविनियोगात्जपादिष्वंगत्वमस्तिअतःसाध्येजप

म·
क·
४८

विनियोगः अथ मंत्रविभागः तत्र मंत्रांतैः कर्मादीन्सन्निपात
येदित्यापस्तंबः मंत्रांतैर्मंत्रसमाप्तिभिः कर्मादीन्कर्मोपक्रमा
न्सन्निपातयेद्योजयेत् समग्रं मंत्रं पठित्वा कर्म कुर्यादित्यर्थः
तद्यथा नमस्ते रुद्र मन्यव उतत इषवे नमः नमस्ते अस्तु धन्व
ने बाहुभ्यामुत ते नमः स्वाहेति स्वाहाकारांते हविरग्नौ प्रक्षिप्य रु
द्रायेदमिति त्यागः कार्य इति मंत्रप्रविभागश्च रुद्रानुवाकेषु ना
नाविधः मंत्रश्रौते कर्मणि चरमायामिष्टकायां जुहोति इत्वा त्रि
धा विभक्तं जुहोति अथ इमे लोका इति त्रेधा रुद्रानुवाकानामे
कादशानां विभाग उक्तः ततस्तिस्र उत्तरा आहुतीर्जुहोति षड्
संपद्यंते षड्वा ऋतव इति षोढा विभागोपि प्रदर्शितः नमस्ते रुद्र
मन्यव इत्येतानत्रुवाकांस्त्रेधं विभज्यापि वा प्रथमादुपक्रम्य
नमस्तक्षभ्य इति धारयमाणो रथकारेभ्यश्च वो नमः इत्युपक्रम्य
नमः स्वायुधायेति नाभिदघ्ने शेषेण आगवत्नारेभ्य आस्यदघ्ने इ
त्वा सहस्राणि सहस्रश इति दशावतारा हुत्वा रोहाञ्जुहोति
नमो रुद्रेभ्यो ये पृथिव्यामिति जानुदघ्ने धारयमाणो नमो रुद्रेभ्यो
येंतरिक्ष इति नाभिदघ्ने नमो रुद्रेभ्यो ये दिवि इत्यास्यदघ्ने इत्येति
त्रेधा षोढा विभागो दर्शितो बौधायनेन अपरस्तत्र प्रथमेनुवा
के पंचदश ऋचः पंचदश मंत्राः द्वितीये त्रयोदश यजूंषीति त्रयो
दशान्तृतीयचतुर्थयोः प्रत्येकं सप्तदश यजूंषि षष्ठद्वितीयतृ
तीयचतुर्थेषु नवके इमयतो नमस्कारमंत्राः पंचमषष्ठानुवा

कयोः प्रत्येकंपंचदशयजूंषिसप्तमेषोडशाष्टमेसप्तदशमे
नवमेएकोनविंशतिः एषुपंचमषष्ठसप्तमाष्टमनवमेष्वनुवा
केष्वेकतरतोनमस्कारमंत्राः तत्रापिपुरस्तान्नमस्कारः नवमानु
वाकेनमोवः किरिकेभ्योदेवानांहृदयेभ्यइत्येतदंतरमंत्रचतुष्ट
येपि अनुवर्तते तद्यथा नमोविक्षीणकेभ्योदेवानांहृदये
भ्योनमोविचिन्वत्केभ्योदेवानांहृदयेभ्योनमः आनिर्हतेभ्योदेवा
नांहृदयेभ्योनमः आसीनकेभ्योदेवानांहृदयेभ्यइत्ययंचानु
षंगोयत्रहोमादिषुतेषांमंत्राणांपृथक्करणंविभज्यप्रयोगः
तत्रैवयत्रतज्जपादावपृथक्करणेतत्राप्ययथाध्ययनमेव
पाठः एवंसर्वत्राप्यनुषंगस्थानेज्ञेयम् अत्रचद्वितीयादिनव
मान्तेष्वनुवाकेषुनमस्कारांतमेकंयजुरितिशाकपूणिः नमस्का
रैकंयजुरितियास्कः अष्टावनुवाकाअष्टयजूंषिइतिकाशकृत्स्नः
तत्रशाकपूणिपक्षेउभयतोनमस्कारेषुसुकरोमंत्रविभागः
अन्यतरतोनमस्कारेष्वेकपदोभयतोग्राह्यः तद्यथा नमोभवाय
चरुद्रायच नमःशर्वायचपशुपतयेचेत्यादि द्वितीयोनमःश
ब्दःसर्वमंत्रस्यांतत्वेनोत्तरमंत्रस्यादित्वेनचोभयार्थःसमाम्ना
यः काकाक्षिवदुभयत्रसंबध्यते तथानमोभवायचरुद्रायनम
इत्येकोमंत्रः एवमुभयत्रापिज्ञेयम् अथवानमोभवायचरुद्राय
चेत्येवमादिषुचशब्देनप्रथमोनमःशब्दोनुषज्यते एवमुभय
तोनमस्कारमंत्राभवंति यास्कपक्षेतु अन्यतरतोनमस्कारेषु

म॰
क
५९

स्फुटो मंत्रविभागः उभयतो नमस्कार इत्युक्तः तद्यथा नमो हिरण्यबा
हवे सेनान्ये दिशां च पतये नमः इत्येको मंत्रः पुरस्तादेकैकमंत्रयुक्तः
नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतये नमः इति प्रथमत एव द्वि
नमस्कारो द्वितीयो मंत्रः एवमुत्तरत्रापि च तथा चानुवाके चरममं
त्रवर्जं चरमस्यादौ द्विनमस्कारः अत एकतरनमस्कारकल्पे उभय
तो नमस्कारः स्वीकार्यः एवंविधस्य विभागो बहुभिर्भाष्यकारै
रनुमत इति बहुसंमतः सर्वोऽप्येवं विभागो ग्राह्यः तथा च शा
कल्पादिरपि न विरोधः तथा हि द्वितीयचतुर्थानुवाकाभिप्रा
येण नमस्कारादि नमस्कारान्तमेकं यजुरिति शाकल्पेणोक्तं एवं
पंचमादिनवमान्तानुवाकाभिप्रायेण नमस्काराद्येकं यजुरिति
यास्कः शाकल्पमतस्तथानुवाकाभ्यासे यजूंषीत्येतन्महावाक्याभि
प्रायेणाह अन्यत्राप्यवांतरं महावाक्यानि वेदभाष्ये रुद्रभास्करे द
र्शितानि ग्रन्थे प्रदर्श्यंते तस्मात्सर्वोऽप्यन्यायेमादि नमआरभ्य नवस्व
नुवाकेषु चतुश्चत्वारिंशदधिकशतं मंत्राः दशमेऽनुवाके द्वादश
वै द्वादश मंत्राः एकादशेऽनुवाके त्रयोदश एवमेकादशस्वप्य
नुवाकेषु मंत्रा एकोनसप्तत्युत्तरं शतं भवतीति रुद्रानुवाकेषु
मंत्रविभागः अथ चमकानुवाकेषु केवलेषु च तथा च नमकच
मकयोर्विशिष्टप्रयोगे च मंत्रविभागः तत्राग्नाविष्णू सजोषसे
ति चतुर्गृहीतं हुत्वाभ्युपक्रम्य वाजश्च मे प्रसवश्च मे इति संततो
वसोर्धारां जुहोत्या मंत्रसमापनादिति बौधायने प्रथमाम्नचम

पास्य अवशिष्टस्य चमकस्यैकमंत्रत्वे वसोर्धारायामभिहितं
तेनैव न्यायेन यदैकवारं नमकानुवाकाहुतिः क्रियते तदास
र्वस्यैकमंत्रत्वं यदा त्वाम्नेन प्रतिमंत्रं होमः क्रियते तदा चमके
प्रथमामृचं पठित्वा चतुर्गृहीतेन हुत्वावशिष्टेन चमकेन संततो
धारां जुहुयात् यदा तु तिलादिभिर्होमः तदा तिलादिभिरवद
ध्यैः संततधाराया अनिष्पन्नेनैकमंत्रत्वमिति यज्ञसंग्रहे कर्म
णि जपादावनुवाकभेदस्पष्टः षडुमंत्रत्वेनाद्यष्टानामप्रथमानुगे
को मंत्रः अवशिष्टादशानुवाका दशमंत्रः इत्येवं द्वादशभिर्मंत्रै
र्जुहुयात् अंते वसुधारामपि कुर्वीत वसोर्धाराया अभिलाषिता
र्थप्राप्तिहेतुत्वात् यत्रापि रुद्रानुवाकानामेकादशावृत्त्या प्रति
मंत्रं होमस्तत्रापि नमस्ते रुद्र मन्यव इत्यादि एकादशानामनुवा
कानामेकं जपेत् इति बौधायनमतेनैकवारमेकादशानुवा
कपाठोत्पक्षं प्रथमं चमकानुवाकं पठेत् पुनरपि समग्रनम
काहुतिं कृत्वा द्वितीयचमकानुवाकमावर्तयेत् एवमेव समग्र
नमकानां प्रत्याहुति चमकानुवाके क्रमेणैकोनुवाक आवर्त
नीय इत्यभिधानात् प्रतिमंत्रं रुद्रानुवाकहोमान्तेपक्षं प्रथमानु
वाकमेकमंत्रात्मकं पठित्वा हुत्वा पुनरपि पूर्वोक्तन्यायेन रुद्रानु
वाकेन हुत्वा द्वितीयेन चमकानुवाकेन जुहुयादित्येवमेकादश
रुद्रानुवाकानामेकादशत्या होमे प्रत्याहुति चमकानामेकमेक
मनुवाकं क्रमेणाहुत्यंते वसोर्धारां जुहुयात् अयं च होमप्रकारा

म॰
क॰
५॰

द्वादुवद्व्यसाधारणः सर्वत्र नवसंधाराज्ये नैवपवमेव रुद्रै
कादशिन्यो महारुद्र इति रुद्रैव दश्यम् एतल्लक्षणानिवार शा
नात पः षडंगैकादशीरुद्रो रुद्रैकादशरुद्रतः एकादशभिरे
ताभिरुद्रैकादशरुद्रतः एकादशभिरेताभिर्महारुद्रश्च कथ्य
ते एकादशमहारुद्रैरतिरुद्र इतीष्यते इत्ययमर्थः वक्ष्यमाण
षडंगन्यासादिपूर्वकमेकादशानां नमकानुवाकानां जपानंत
रमेकं चमकप्रथमानुवाकं जपेत् पुनः पूर्ववन्नमकजपानंतरं द्वि
तीयं चमकानुवाकं पठेत् एवमेकादशवारान्नमकक्रमेणैके
कं चमकानुवाकमुदीरयेत् अनेन च प्रकारेण नमकैकादशा
नुवाकानामेकादशधावृत्तिः षडंगैकादशीत्युच्यते एषए
व रुद्र इति संज्ञां लभते एकादशरुद्रतः पूर्वोक्तस्य रुद्रस्यैकादशा
वृत्येत्यर्थः एकादशरुद्रतो रुद्रीत्यन्वयः रु॰ ॰ द्रस्यैकादशधा
वृत्तिरेव रुद्रीति रुद्रैकादशिनी चेति व्यपदेशद्वयमाग्भवति ए
कादशभिरेताभिः रुद्रीभी रुद्रैकादशिनीति पर्यायनाम्नीभिरेकाद
शसंख्याभिर्महारुद्रः कथ्यते महारुद्रस्यैकादशावृत्तिरतिरुद्र
इति चमकनमकयोर्मंत्रविभागः अथ मंत्रविभागप्रकाराणा
मनेकेषां दर्शितत्वात्कस्मिन्विभागे कति मंत्रा इति मंत्रसंख्याः
तथा मंत्रविच्छेदश्चैतन्न प्रदर्श्यते तथादर्शाशाहोमादिप्रकल्प्या
इतयश्चैतदभिधास्यते न च कृत्यात्रेधा बोधा विभागो दर्शितः
श्रौते त्रेधा विभागं मन्वानितिनिधाय बोधायनोप्याह नमस्ते रुद्रम

न्यवश्यैतानऽनुवाकांस्त्रेधं विभजेदिति अत्राविच्छिन्नानामनुवा
कानांत्रेधाकरणप्रसङ्गाद्याश्चत्वारोऽनुवाकाः प्रथमोंऽशः ततश्चत्वा
रोऽनुवाका अपरोंऽशः एवमष्टावनुवाका गताः अवशिष्टानुवा
कत्रयं तृतीयोंऽशः एवं चानुवाकमध्ये विच्छेदमन्तरेणात्रैविध्यं
घटते यथा गवां शतं दक्षिणा त्वत्र षोडशर्त्विजां दक्षिणावि
भागः तद्यथा प्रधानभूतश्चत्वार ऋत्विजस्तद्द्वयस्य प्रथमार्धिनः द्विती
यार्धिन इति द्वौ समुदायौ इति संज्ञा प्रथमार्धिनः ततश्चतुर्णां
द्वितीयार्धिन इति तदनन्तराणां चतुर्णां तृतीयिन इति ततोऽव
शिष्टानां चतुर्णां पादिन इति एषां शतं गवां विभज्य दानं त
त्राप्ययं नियमः अर्धिनामर्धं तृतीयिनां तृतीयोंऽशः पादिनां
चतुर्थोंऽश इत्यर्धिनां च द्वौ समुदायौ तत्र प्रथमार्धिनां गोशता
दर्धं पञ्चाशद्गावो भवन्ति एवं च क्रियमाणे द्वितीयार्धिनां पञ्चाश
तोऽर्धं पञ्चविंशतिः तृतीयिनः पञ्चाशतस्तृतीयांशो क्रियमाणे
षोडश षोडश भवन्ति गोद्वयमवशिष्यते तत्र त्रिभुस्यानेषु वि
भज्यस्यापादयितुमशक्यं इष्टद्वाराचाविभागो निषिद्धः तस्मा
दर्धिनामष्टाचत्वारिंशत् द्वितीयार्धिनां चतुर्विंशतिः तृतीयि
नां षोडश पादिनां द्वादशेति गवां स्वरूपाविच्छेदाय शतं गावो
विभक्ताः अनेन न्यायेनैकादशानामनुवाकानामनुवाकस्वरू
पाविच्छेदाय पर्वैकरीत्याचरमानुवाकत्रयस्यैकमन्त्रत्वमङ्गी
कार्यमेव चरमानुवाकानामेकानुत्याजयाने यदि होमे कर्तव्ये वि

म॰
क॰
५१

51

कीर्षति होममात्रमेव वा तदा तस्मिन्पक्षे त्रयो मंत्रा इति तिस्र आ
हुतयो भवंति एवं च नमकानुवाकानामेव जपो न होमं चिकीर्षा
यां केवलहोममात्रेच्छायां वा चमके प्रथमादेको मंत्रः शिष्टा
एकादशानुवाकाः एकादश मंत्रा इति द्वादशभिर्मंत्रैस्तावंत्य
आहुतयो वसोर्धारान्तः पूर्वोक्तरीत्यैव इत्येकः प्रकारः अथाप
रस्त्रेधाविभागो नमके प्रथमे च मूले त्रेधा विभक्तं त्रिधा विभक्तं
जुहोतीत्येतदेव श्रुतिवाक्यम् अत्र च नमस्ते रुद्र मन्यव इत्या
रभ्य सभापतिभ्यश्च नमो नम इत्यंत एको भागः नमो श्वेभ्य इ
त्यारभ्य वार्याय चेत्यंतो द्वितीयः नमः प्रतरणाय चेत्यारभ्यास
माप्तेस्तृतीयः एवं त्रयो मंत्राः इति जपांगहोमेष्वनंगभूतस्वतं
त्रे होमे वा तिस्र आहुतय इति द्वितीयः प्रकारः अथान्यः प्रकारः
षोढाविभागात्मकस्तत्र समनंतरपूर्वोक्तविभागप्रकारेणैव
प्रथमद्वितीयौ भागौ तृतीयविभागे तु नमः प्रतरणाय चेत्या
रभ्य य एतावंतश्चासहित एको मंत्रः एवं त्रयो मंत्राः नमो
रुद्रेभ्यो ये पृथिव्यामित्यारभ्य त्रीणि यजूंषि अत्र च नमस्ते रुद्रे
भ्य इति च येषामित्यंतस्य देव इषवस्तेभ्य इत्यारभ्यासमाप्तेर्वा
वाक्यशेषः सर्वमेतत्त्रितयं त्रिषु पिविभज्यानुषजति तथा च
नमो रुद्रेभ्यो ये पृथिव्यां येषामन्नमिषवस्तेभ्य इत्युपक्रम्यास
माप्तिपर्यंतमेको मंत्रः नमो रुद्रेभ्यो येंतरिक्षे येषां वात इषव
इत्यादि द्वितीयः नमो रुद्रेभ्यो ये दिवि येषां वर्षमिषवस्तेभ्य

इत्यादिस्तृतीयः एवं सर्वैर्मिलितैर्मंत्रैस्त्रिभिः सहस्रमंत्राः अस्मिंश्च
विभागेत्रेधाविभक्तंज्ञेत्रोतीत्युपक्रम्यषड्संपद्यंते इत्यंताम्
तिःप्रमाणत्वेनसर्वंप्रदर्शिताः अधुनाविनियोगसंग्रहवाक्ये
प्रमाणीक्रियते अश्मेतपंचमेप्रोक्तःशतरुद्रीयहोमकः सभा
पतिभ्यइत्यंतएकोमंत्रःप्रकीर्तितः वार्यायचेत्यंतएकस्तेषांस
हस्रयोजनेवधन्वानितन्मसीत्यंतउत्तरः नमोरुद्रेभ्यइत्येष
पृथिव्यादिविभेदतः त्रिधाभिन्नस्ततोहोमषण्मंत्राइहकीर्तिताः
इत्यस्मिन्विभागेषडाहुतयोभवंति जपांगहोमेस्वतंत्रहोमेवे
तितृतीयःप्रकारः अथषोडशविभागवानन्यतरःप्रकारः तत्र
नमस्तेरुद्रइत्यारभ्यनमस्तेभ्योइत्यंतः प्रथमोविभागः रथ
कारेभ्यश्चेत्युपक्रम्यनमःसायुधायेत्यंतोद्वितीयोविभागः स
धन्वनेचेत्यारभ्यसहस्राणिसहस्रशेत्यंतपर्यंतंतृतीयोविभा
गइतित्रयोमंत्राः सहस्राणिसहस्रशइत्यारभ्यदशप्राचीर्दश
मंत्राः एतेचसर्वैःसहत्रयोदशनमोरुद्रेभ्योयेपृथिव्यामिति
अवशिष्टंवाक्यंसर्वांकरीत्यात्रीणियजूंषित्रयोमंत्राः एवंसर्वो
मैःसहषोडशमंत्रविभागेबौधायनवचनंप्रमाणेनचापिवा
रंप्रथमादुपक्रम्यस्वतंत्रहोमेनमस्तेभ्यइत्यादिप्रथममेवद
र्शितम् इत्येवंजपांगहोमेवाषोडशाहुतयोभवंति इतिचतुर्थः
प्रकारः अष्टाचत्वारिंशन्मंत्रविभागात्मकःप्रकारःतत्रप्रथमानु
वाकेपंचदशर्चेपंचदशमंत्राः ततोद्वितीयानुवाकायजूंषिदशमेत

म०
क०
५२

वाकेद्वादशर्चैर्द्वादशपतेच शर्वैः सह पंचत्रिंशत् ३५ प्रकाद
शानुवाके ऽर्चो दशत्रीणि यजूंषीति त्रयोदशपर्वं शर्वैः सह
श्चत्वारिंशत् अत्र जपांगहोमेस्वतंत्रहोमे च त्वावत्यप्रवाहुत
यः इति पंचमः प्रकारः अथैकोनसमत्स्वरशतमंत्रविभागरु
क्रमअन्यतमः प्रकारः स च विनियोगप्रकारांतरमेव तत्र प्रथमा
नुवाके पंचदशर्चैरित्यादिना ग्रंथेन निदर्शितः अत्र जपांग
होमे स्वतंत्रहोमे ऽप्येकोनसमस्तुनरंशतमाहुतयः अथ षष्ठप्र
कारः इत्येकवारं नमकाहुतौ मंत्रविभागभेदेन षट्प्रकाराः प्रद
र्शिताः अथ रुद्रस्यैकादशिन्यादिषु शर्वोक्तपक्षेनमः संख्याना
माहुतिभेदात्संख्याभेदः प्रदर्श्यते नमकानामेकवारमाहुतौ
दशांशहोमप्राप्तिरेव नास्ति प्रकादशधाहृत्यात्मको रुद्रादन्यो
विद्यते तत्र दशांशहोमे कर्तव्ये त्रेधा विभागपक्षद्वयाश्रयणेन
तिस्र आहुतयः तत्र वसोर्धारासंख्यहोमपक्षे प्रतिरूपकं तिस्र
स्तिस्र आहुतयः इति त्रयस्त्रिंशद्रूपकं ते च नमकानुवाकैरेकैका
हुतिरित्येता एकादश शर्वाभिः सहेत्येताभिश्चतस्त्रश्चत्वारिंशत्
अंते च वसोर्धाराषोडशविभागपक्षाश्रयणेन दशांशहोमेषडा
हुतयः ततो वसोर्धारासमग्रहोमेन प्रतिरूपकं षट्षडितिषडु
त्तराषष्टिः शर्वोक्तरीत्या च नमकानुवाका हुतय एकादशेति सप्त
सप्तत्याहुतयः अंते वसोर्धाराषोडशधा विभागपक्षांगीकारे दशां
शहोमे षोडशाहुतयो वसोर्धाराच संख्याहोमप्रतिवारं षोडश

52

षोडशेति षट्सप्तत्युत्तरशतमाहुतयः सर्वच्चमकस्यैवै ।
कादशेति षड्भिः सप्ताशीत्युत्तरं शतं ततो वसुधारायामष्ट
चत्वारिंशन्मंत्रविभागपक्षांगीकारो दशांशहोमेष्टचत्वा
रिंशदेव तदनंतरं वसुधारासमग्रहोमे प्रतिरूपकमष्टच
त्वारिंशादित्यष्टाविंशत्युत्तराः पंचाशतीर्भवंती आहुतीनां ष
ण्वं चमकानुवाकानामेकादशेति मिलित्वैकोनचत्वारिंश
दुत्तराणि पंचशतानि ततो वसुधारा चैकोनसप्तत्युत्तरश
तमंत्रविभागपक्षाश्रयेण दशांशहोमे एकोनसप्तत्युत्तर
शतं आहुतयः समग्रहोमे प्रतिरूपकमेकोनसप्तत्युत्तरं शत
मित्येकसहस्रमेकोनषष्टिः चेत्याहुतयो भवंति सर्वच्चम
कानुवाकानामेकादशेति मिलित्वा एकसहस्रमष्टौ शता
नि सप्ततिश्च ततो वसोर्धाराश्रुति रुद्रे आहुतिसंख्या अथ रुद्रै
कादशिन्यामाहुतिसंख्या अथैकविंशत्युत्तरं शतं रूपकाः भ
वंति अतः शतांशहोमोऽप्यत्रावतिष्टते अवकाशसंभावात् य
दा च शतांशहोमस्तदा शतरूपकाणामेकरूपकाहुत्या होमः
तत्रापि त्रेधा षोढेत्यादि मंत्रविभागभेदेनानेकपक्षाः संभवेयु
स्तत्र त्रेधा विभागे शतरूपकाणामेकरूपताहुत्यातिस्र आहुत
यः रूपकाणामेकविंशतिरवशिष्यते तद्यथा नमस्ते रुद्र मन्य
व इत्यनयर्चा प्रकाहुतिः नमो रुद्रेभ्यो ये दिवि येषां वर्षमिषव
स्तेभ्य इत्यादिनां त्रयजपा पंचाहुतयश्चमकानुवाकैः एकाद

म॰
क॰
५३

शेतिषोडशाहुतयः अतोर्वसोर्धाराच शतांशहोमपक्षपर्वषो
डविभागाश्रयणेशतरूपकाणामेकरूपकाहुत्याषडाहुतयः
अवशिष्टैकविंशतिरूपकाणांकृतेनमस्तेरुद्रेत्यादिभिःस्तिसृभि
र्ऋग्भिः प्रत्येकैकाहुतिरितितिस्रः नमोरुद्रेभ्योयेपृथिव्यामि
त्यादिभिः सर्वाङ्कप्रकारसूक्तैस्त्रिभिर्यजुर्भिस्तिस्र आहुतयः इति
सर्वाङ्काभिः सहद्वादशचमकानुवाकैरेकादशेतिमिलित्वाच
योविंशतिः अतोर्वसोर्धाराचशतांशहोमपक्षपर्वषोडशधा
विभागेगीकारेरूपकशतस्यैकरूपकाहुत्याषोडशाहुतयः
अवशिष्टरूपकाणामेकविंशतिः प्रथमयाचैकाहुतिः सर्वाङ्क
रीत्यान्ययजुषाचैकाहुतिः पुनः प्रथमाभिस्तिसृभिर्ऋग्भिः प्र
त्येकमेकैकेतितिस्रः सर्वाङ्कप्रकारैर्यजुर्भिः प्रत्येकमेकैकेति
तिस्रइतिमिलित्वा चतुर्विंशतिः चमकानुवाकैकादशेतिसर्वा
ङ्काभिः सहपंचत्रिंशत् ततोवसुधाराहोमपक्षपर्वाशचत्वारिं
शद्रूपमंत्रविभागाश्रयणेतिस्रः आहुतयः रूपकाणामेकरूप
काहुत्याचत्वारिंशदाहुतयः त्रिधाविभागमाश्रित्यपुनरेकरूप
काहुत्यातिस्रआहुतयः अवशिष्टरूपकाणांकृतेप्रथमयाचैका
हुतिः अंत्ययजुषासर्वाङ्कप्रकारेणसर्वाङ्काचैकाहुतिरित्येवंत्रि
पंचाशत् चमकानुवाकैरेकादशेतिमिलित्वाचतुःषष्टिः अंते
वसुधाराचशतांशहोमपक्षे एकोनसप्ततिसहस्रशतमंत्रविभा
गाश्रयणेशतरूपकाणामेकरूपकाहुत्याएकोनसप्ततिर

शतमाहुतयः त्रेधाविभागमाश्रित्य पुनरेकरूपकाहुत्यास्ति
स्त्रय्याहुतयः अवशिष्टरूपकाणां कृते प्रथमाभिः तिसृभिः ऋ
ग्भिः प्रत्येकमेकैकेति तिस्रः अंते सर्वोक्तप्रकारयुक्तैः त्रिभिर्य
जुभिः प्रत्येकं एकैकेति तिस्रः एवं सर्वोक्ताभिः सहाशापिकस
प्तत्युत्तरशतमाहुतयः चमकानुवाकैरेकादशेति मिलित्वान
वत्युत्तरंशतम् अथरुद्रैकदशिन्यामेव दशांशहोमपक्षा अय
णे तत्रापि त्रेधा मंत्रविभागांगीकारेप एकविंशत्युत्तरशतरूप
काणां द्वादशरूपको दशमो भागः द्वादशस्वपि प्रत्येकं तिस्र
स्तिस्र इति षट्त्रिंशदाहुतयः प्रथमर्चैकान्त्ययजुषा चैकेति
मिलित्वा अष्टात्रिंशत् चमकानुवाकैरेकादशेति सर्वाभिः सहै
कोनपंचाशत् अंते वसोर्धाराच दशांशहोमे षोढा मंत्रविभा
गे दशमांशो द्वादशरूपकः तेषु प्रत्यावृत्तिः षट्षडिति द्वासप्त
तिराहुतयः प्रथमर्चैकान्त्ययजुषा चैकेति चतुःसप्ततिः च
मकानुवाकैरेकादशेति मिलित्वा पंचाशीतिः ततो वसोर्धारा द
शांशहोमपक्ष षोडशधा मंत्रविभागे द्वादशरूपकाणां प्रत्यावृ
त्तिः षोडश षोडशेति द्व्याधिकनवत्युत्तरशतमाहुतयः प्रथ
मर्चयैकोन्त्ययजुषा चैका चमकानुवाकैरेकादशेति मिलित्वा
पंचोत्तरंशतद्वयमाहुतयः अंते वसोर्धारा च दशांशहोमपक्षा
ष्टचत्वारिंशन्मंत्रविभागे द्वादशरूपकाणां प्रत्यावृत्तिः अष्टच
त्वारिंशत् षट्सप्तत्युत्तरपंचशततम् भवन्त्याहुतीनां प्रथमय

म० क ५८

54

चैकाग्रेत्ययज्ञधाचापरा चमकानुवाकैरेकादशेति मिलित्वा
एकोननवत्युत्तरपंचशतीं तेव मम्थाराचदशांशहोमे एवैको
नसप्तत्युत्तरपंचशतमंत्रविभागे द्वादशरूपकाणां प्रत्यावृत्ति
रेकोनसप्तत्युत्तरशतमिति द्वे सहस्रे एकचत्वारिंशच्च प्रथमेको
न्येकचमकैकादशयोजनं इथं संख्यास्सर्ववत् व्यस्तारुद्रैकादशि
न्यामेव समग्रहोमपक्षे तत्रापि त्रेधा मंत्रविभाग एकविंशत्युत्त
रशतरूपकाणां प्रतिरूपकं तिस्रस्तिस्र इति त्रीणि शतानि त्रिष
ष्ट्याहुतयो भवंति समग्रहोमपक्षे एव षोढा मंत्रविभाग ए
कविंशत्युत्तरशतरूपकाणां प्रतिरूपकं षट् षडिति सप्तशता
नि षड्विंशतिश्चाहुतयः संपूर्णपक्षे एव षोडशधा मंत्रविभा
ग एकविंशत्युत्तरशतरूपकाणां प्रतिरूपके षोडश षोडशेति
चैकसहस्रं नवशतानि षड्विंशच्चाहुतयः संपूर्णहोमपक्षे एवा
ष्टचत्वारिंशन्मंत्रविभागे एकविंशत्युत्तरशतरूपकाणां प्रतिरू
पकमष्टचत्वारिंशदिति पंचसहस्राणि अष्टौ शतान्यष्टचाहुतयः
समग्रहोमपक्षे एवैकोनसप्तत्युत्तरशतमंत्रविभागे एकविंश
त्युत्तरशतरूपकाणां प्रतिरूपकमेकोनसप्तत्युत्तरशतं मंत्रा इ
ति विंशति सहस्राणि चत्वारिंशच्छतानि एकोनपंचाशदाहुत
यः समग्रहोमपक्षेषु सर्वेष्वप्येकादशरूपकाख्यचमकस्य भवं
ति तत्र प्रतिरूपकमेकादशानुवाकैरेकादशैकादशाहुतयः
प्रतिचमकाहुतयश्चैकविंशत्युत्तरशतं भवंति सर्वत्रवांते वसो

धारा इति रुद्रैकादशिन्यामाहुतिसंख्या अथ महारुद्राहुति
संख्या तत्र चैकविंशत्पुनरस्यैकादशभिर्गुणने पंचसहस्रं द्वे
णि शतान्येकविंशच्च रूपका भवंति तत्र शतांशस्त्रयोदश
रूपकाः रूपकाणामेकविंशदवशिष्यते एतच्च शतांशहो
मपक्षांगीकारे तत्रापि त्रेधा मंत्रविभागे शतांशस्य त्रयोदश
रूपकाणां प्रतिरूपकं तिस्रस्तिस्र इति एकोनचत्वारिंशदाहु
तयः अवशिष्टानामेकविंशती रूपकाणां कृते आद्याभिस्ति
सृभिर्ऋग्भिः प्रत्येकमेकैकेनाहुतिस्तिस्रः सर्वाक्ष्मकारद्वेभ्यस्ति
भिर्यजुर्भिः प्रत्येकमेकैकेनाहुतिस्त्र इति मिलित्वा पंचचत्वारिं
शदाहुतयः चमकानुवाकैरेकादशभिः प्रत्यनुवाकमेकैक
स्यैकादश इति सर्वाभिः सह षट्पंचाशत् अनेन तथा रा
च शतांशहोमपक्षे पर्वषोढा मंत्रविभागे त्रयोदशरूपका
णां प्रतिरूपकं षड्आहुतिरिति सप्तसप्ततिराहुतयः अवशिष्टैक
त्रिंशद्रूपकाणां कृते आद्याभिस्तिसृभिर्ऋग्भिः प्रत्येकमेकैके
नाहुतिस्त्रो न्यास्तिसृभिर्यजुर्भिः प्रत्येकमेकैकेनाहुतिस्त्रः एवं मिलि
त्वा चतुरशीतिः पूर्ववच्चमकानुवाकैरेकादशेति सर्वाभिः
सह पंचनवतिः ततो वसोर्धारा शतांशहोमपक्षे पर्वषोडशा
धा मंत्रविभागे त्रयोदशरूपकाणां प्रतिरूपकं षोडश षोडशे
ति द्वे शते अष्टचेत्याहुतयः अवशिष्टैकत्रिंशतो रूपकाणां कृ
ते सर्ववत्पूर्वमार्भिस्तिस्रो न्यैर्यजुर्भिस्तिस्र इति षट् सर्ववदेवच

म॰
क
५५

भकात्रवाकैरेकादशेतिमिलित्वाद्वेशतेपंचविंशतिरेतेवसो
र्धाराच शतांशहोमपक्षपक्षाष्टचत्वारिंशन्मंत्रविभागेत्रयो
दशरूपकाणांप्रतिरूपकमष्टचत्वारिंशादितिषड्शतानिच
त्वविंशतिश्चाहुतयोभवंति अवशिष्टैकत्रिंशद्रूपकानांकृते
प्रथमाभिस्तिसृभिर्ऋग्भिः प्रत्येकमेकैकेतितिसृः सर्वोंकार
कारभ्रुकैरेत्ययजुर्भिस्तिसृभिस्तिसृः सर्वत्रभकात्रवाकैरि
तिचैकादशेतिसर्वैर्मिकाभिःसहैकचत्वारिंशदुत्तरषट्शत्या
हुतीनांतभोवसोर्धाराच शतांशहोमपक्षपकोनसप्तत्युत्त
रशतमंत्रविभागेत्रयोदशरूपकाणांप्रतिरूपमेकोनसप्त
त्युत्तरशतानीतिद्वेसहस्रेपकशतंसप्तनवतिश्चाहुतयः
अवशिष्टैकत्रिंशद्रूपकाणांकृतेसर्वत्रप्रथमाभिर्ऋग्भिःति
सृः अंत्ययजुर्भिस्तिसृभिःसर्वत्रभिः सर्वत्रदेवचभकात्रवाकै
कादशेतिमिलित्वाद्वेसहस्रेशतेचद्वेचत्वारिंशच अथमहारु
द्रपक्षदशांशहोमपक्षपकसहस्रंत्रीणिशतान्येकत्रिंश
च्चेतित्रयकाणांदशमेंशकेशानंत्रयस्त्रिंशच्चेतिभवंति पक
पक्षरूपकोवशिष्यते अत्रत्रेधामंत्रविभागेत्रयस्त्रिंशदधिक
सै १३३ कशतस्यरूपकाणांप्रतिरूपकंतिस्रःतिस्रश्चाहुत
यः इत्येकोनचतुःशत्याहुतीनां अत्रचभकानांचदशांशोषो
दशरूपकाभवंतितत्रप्रतिरूपकमेकादशात्रवाकैरेकाद
शैकादशेतिमिलित्वाद्वात्रिंशदुत्तरमेवशतमाहुतयःपता

स्यसर्वाभिः सहस्रपंचशतानिएकत्रिंशत् अंतेवसोर्धाराच
दशांशहोमपक्षेषोडशमंत्रविभागेत्रयस्त्रिंशदुत्तरशतरूप
काणांप्रतिरूपकंषट्षष्ठिरितिसप्तशतानि अष्टनवतिश्चाहु
तयः चमकद्वादशरूपकाणांसर्वत्रप्रतिरूपकमेकादशैका
दशेतिद्वात्रिंशदुत्तरमेकशतंएताभिश्चसर्वाभिःसहस्रनव
शतानित्रिंशदाहुतयः ततोवसोर्धाराच दशांशहोमपक्षे
एवषोडशधामंत्रविभागेत्रयस्त्रिंशदुत्तरशतरूपकाणांप्र
तिरूपकंषोडशषोडशेतिद्वेसहस्रेएकशतमष्टाविंशतिरा
हुतयः सर्वत्रचमकद्वादशरूपकाणांप्रतिरूपकमेकादशै
कादशेति एकशतंद्वात्रिंशच्चसर्वाभिःसहद्वेसहस्रेद्वेशते
षष्टिश्चाहुतयः अंतेवसोर्धाराच दशांशहोमपक्षेएवाष्टा
चत्वारिंशन्मंत्रविभागेत्रयस्त्रिंशदुत्तरशतरूपकाणांप्रतिरू
पकमष्टाचत्वारिंशदितिषट्सहस्राणित्रीणिशतानिचतुर
शीतिश्चेत्याहुतयः सर्वत्रचमकद्वादशरूपकाणांप्रतिरूप
कमेकादशैकादशेतिद्वात्रिंशदधिकमेकशतंताभिश्चसर्वा
भिःसहषट्सहस्राणिपंचशतानिषोडशचभवंति अंते
वसुधाराच दशांशहोमपक्षएवैकोनसप्ततत्वत्रशतमंत्रवि
भागेत्रयस्त्रिंशोत्तरशतरूपकाणांप्रतिरूपकमेकोनसप्ततिः
चाहुतयः सर्वत्रचमकद्वादशरूपकाणांप्रतिरूपकमेकैका
दशेतिएकशतंद्वाविंशच्चेतिसर्वाभिःसहैताद्वाविंशतिसह

स्राणिशतानि सप्तसप्ततिश्चाहुतयो भवंति अंते वसोर्धाराच
अथ महारुद्रएवसमप्रहोमपक्षे तत्रापि त्रेधा मंत्रविभागे एक
कसहस्रं त्रीणिशतानि एकत्रिंशच्चेति रूपकाणां प्रतिरूपके
तिस्रालित्वाहुतयः त्रीणि सहस्राणि नवशतानि त्रिनवत
श्चाहुतयो भवंति चमकस्यैकत्रिंशदुत्तरशतरूपकाणां प्रति
रूपकं एकादशैकादशेति मिलित्वैकसहस्रं त्रीणिशतानि एक
त्रिंशच्चाहुतयः एताश्च सर्वाभिः सह पंचसहस्राणि त्रीणि
शतानि चतुर्विंशतिश्चाहुतयः ततो वसोर्धाराच अत्रैव सम
प्रहोमपक्षे तत्रापि षोढा मंत्रविभागे एकसहस्रं त्रीणिशता
नि एकत्रिंशच्चेति रूपकाणां प्रतिरूपकं षट्षडाहुतयश्चेति स
प्तसहस्राणि नवशतानि षडशीतिश्चाहुतयो भवंति चमक
स्यैकत्रिंशदुत्तरैकशतरूपकाणां प्रतिरूपकमेकादशेति ए
कसहस्रं त्रीणिशतानि एकत्रिंशच्चेति सर्वाभिः सह नवसह
स्राणि त्रीणिशतानि सप्तदशचाहुतयः अंते वसोर्धाराच
अत्रैव सप्तप्रहोमपक्षे षोडशधा मंत्रविभागे एकसहस्रं त्री
णिशतान्येकत्रिंशच्चेति रूपकाणां प्रतिरूपकं षोडशषोडशे
ति एकविंशतिसहस्रं द्वे शते षण्णवतिश्चाहुतयः चमकस्य
एकविंशत्युत्तरशतरूपकाणां प्रतिरूपकं एकादशैकाद
शेति मिलित्वा एकसहस्रं त्रीणिशतानि एकत्रिंशत् सर्वा
भिः सहैतास्त्राविंशतिसहस्राणि षट्शतानि सप्तविंश

तिस्त्राहुतयः ततोवसोर्धाराच अत्रैवसमग्रहोमपक्षेतत्रा
ष्टचत्वारिंशन्मंत्रविभागेएकसहस्रंत्रीणिशतानिएकत्रिं
शच्चेतिरूपकाणांप्रतिरूपकेअष्टचत्वारिंशदष्टचत्वारिंशद्
तित्रिषष्टिसहस्राणिअष्टौशतान्यष्टाशीतिस्त्राहुतयः चमक
स्यैकविंशत्युत्तरशतरूपकाणांप्रतिरूपकमेकादशेतिएक
सहस्रंत्रीणिशतान्येकत्रिंशच्चाहुतयः एताःसर्वाःकाभि
र्मिलित्वापंचषष्टिसहस्राणिद्वेशतेएकोनविंशतिराहुतयः
अंतेवसोर्धाराच अत्रैवसमग्रहोमपक्षेएकोनविंशत्युत्तर
शतमंत्रविभागेएकसहस्रंत्रीणिशतानिएकत्रिंशच्चेतिरूप
काणांप्रतिरूपकंएकोनसप्तत्युत्तरशतमितिहेलसेचतुर्विं
शतिसहस्राणिनवशतानिचएकोनचत्वारिंशच्चाहुतयः च
मकस्यैकविंशत्युत्तरशतरूपकाणांप्रतिरूपकमेकादशैका
दशेतिसर्वाःकाभिः सहैताहेलसेषड्विंशतिसहस्राणिद्वे
शतेसप्ततिस्त्राहुतयः अंतेवसोर्धाराच इतिमहारुद्रेयाहु
तिसंख्याः अथातिरुद्राहुतिसंख्या तत्रचतुर्दशसहस्राणि
षट्शतानिएकचत्वारिंशच्चरूपकाः एकचत्वारिंशद्रूपका
अवशिष्यंत अतिरुद्रेचमकस्यैकसहस्रंत्रीणिशतानिएक
त्रिंशच्चरूपकाभवंति अत्रचशतांशः त्रयोदशरूपकाएकत्रिं
शद्रूपकाअवशिष्यंते एवंस्थितेशतांशपक्षेयथाचमंत्रविभा
गेषट्चत्वारिंशदुत्तरशतरूपकाणांप्रतिरूपकंतिस्रासिस्र

57

श्चाइत्तयइति अष्टात्रिंशदुत्तरषेतः शत्याहुतीनां अवशिष्टैक
चत्वारिंशद्रूपकाणां कृते आद्याभिस्तिसृभिर्ऋग्भिः प्रत्येकमेकै
केति तिस्रः अंत्ययजुर्भिः शर्वान्क प्रकारद्वाभ्यां तिसृभिः प्रत्येक
मेकैकेति तिस्रः चमकस्य त्रयोदशरूपकाणां प्रतिरूपकमेका
दशैकादशेति त्रिचत्वारिंशदुत्तरमेकशतमाहुतयः अवशि
ष्टैकत्रिंशद्रूपकाणां कृते अग्नाविष्णू सजोषसेत्यनयैवैका
हुतिः इत्येवं मिलित्वा अष्टाशीत्युत्तरा पंचाशत्याहुतीनाम्
अंते वसोर्धारा च शतांशपक्षपवषोडशमंत्र विभागे षट्चत्वा
रिंशदपि कैकशतरूपकाणां प्रतिरूपकं षट्षडिति अष्टैश
तानि षट्सप्ततिश्चाहुतयः अवशिष्टैकचत्वारिंशद्रूपकाणां
प्रतिरूपकं कृते सर्ववदाद्याभिस्तिसृभिर्ऋग्भिः तिस्रः सर्ववदे
वांत्ययजुर्भिस्तिस्र इति षडाहुतयः चमकस्य त्रयोदशरूप
काणां प्रतिरूपकमेकादशैकादशेति त्रिंशच्चत्वारिंशदुत्तरं श
तमेकम् अवशिष्टैकत्रिंशद्रूपकाणां कृते अग्नाविष्णू सजोष
सेत्यनयैवैकाहुतिरिति सर्वाभिः सहैता एकसहस्रं षड्विंशति
श्चाहुतयः अंते वसोर्धारा च शतांशहोमपक्षे षोडशहोमप
क्षे षोडशधा मंत्र विभागे षट्चत्वारिंशदुत्तरैकशतरूपकाणां
प्रतिरूपकं षोडश षोडशेति द्वे सहस्रे त्रीणि शतानि षट्त्रिंश
च्चाहुतयः अवशिष्टैकचत्वारिंशद्रूपकाणां सर्ववत् षट् चम
कस्य त्रयोदशरूपकाणां कृते प्रतिरूपकमेकादशपकादशे

तिप्रकशतंत्रिचत्वारिंशच्चाहुतयः अवशिष्टैकत्रिंशद्रूपका
णांकृतेप्रथमाविस्त्वस्त्वत्यनयैवैकाहुतिरितिमिलित्वाद्वेसहस्रे
चत्वारिंशच्छतानिषडशीतिश्चाहुतयः अतेर्वसोर्धारा शतं
शतहोमपक्षेप्रवाहेचत्वारिंशन्मंत्रविभागेषट्चत्वारिंशदुत्तरै
कशतरूपकाणांप्रतिरूपकमष्टाचत्वारिंशदितिसप्तसहस्रा
णिअष्टौचाहुतयः अवशिष्टैकचत्वारिंशद्रूपकाणांकृतेपूर्व
वत्प्रथमाभिस्त्रिसप्तभिर्ऋग्भिस्त्रिस्त्रिः पूर्वोक्तगणविशिष्टाभिरभि
रन्त्ययजुर्भिस्त्रिस्त्रिरितिषट्चमकस्यत्रयोदशरूपकाणांपूर्वव
त्प्रतिरूपकमेकादशैकादशेतिद्विचत्वारिंशदुत्तरमेकशतमा
हुतयः अवशिष्टैकत्रिंशद्रूपकाणांकृतेप्रथमाविस्त्वस्त्वत्यनयैका
हुतिरितिमिलित्वासप्तसहस्राणिएकशतमष्टपंचाशच्चेत्याहु
तयः ततोवसोर्धाराच शतंशतहोमपक्षेएकोनसप्तत्युत्तर
शतमंत्रविभागेषट्चत्वारिंशदुत्तरैकशतरूपकाणांप्रति
रूपकंएकोनसप्तत्युत्तरशतमेकोनसप्तत्युत्तरशतमितिचतु
र्विंशतिसहस्राणिषट्शतानिचतुःसप्ततिश्चाहुतयः अव
शिष्टैकचत्वारिंशद्रूपकाणांकृतेप्रथमाभिस्त्रिसप्तभिर्ऋग्भिः प्र
त्यचमेकैकेतितिस्रः पूर्वोक्तगणयुक्तैरंत्ययजुर्भिस्त्रिभिः प्रत्ये
कमेकैकेतितिस्रः चमकस्यत्रयोदशरूपकाणांप्रत्येकमेका
दशैकादशैकशतंचत्वारिंशच्चाहुतयः अवशिष्टैकत्रिंशद्रूप
काणांकृतेप्रथमाविस्त्वसहोजघसेत्यनयैवैकाहुतिरितिमिलि

म॰
क॰
५८

58

त्वाचतुर्विंशतिसहस्राण्यष्टौशतानिचतुर्विंशतिश्चाहुतयः
अंतेचवसोर्धारा अथातिरुद्रपक्षेदशांशहोमपक्षेचतुर्दशस
हस्राणिषट्शतान्येकचत्वारिंशच्चेतिरूपकाणांदशमांशए
कसहस्रंचत्वारिशतानिचतुःषष्टिश्चभवंतिएकएकएवरूप
कश्चावशिष्यते तथाचमकस्यैकसहस्रंत्रीणिशतानिचैक
त्रिंशच्चेतिरूपकाणांदशमांशएकशतंत्रयस्त्रिंशाश्चरूपका
भवंति एकएवरूपकोवशिष्यते अत्रचत्रेधामंत्रविभागेए
कसहस्रंचत्वारिंशच्छतानिचतुःषष्टिश्चेतिरूपकाणांप्रतिरू
पकंतिस्रस्तिस्रश्चाहुतयः इतिमिलित्वाचत्वारिसहस्राणित्री
णिशतानिद्वानवतिश्चाहुतयः चमकस्यचत्रयस्त्रिंशदुत्तरै
कशतरूपकाणांप्रतिरूपकमेकादशैकादशेतिमिलित्वाए
कसहस्रंचत्वारिशतानित्रिषष्टिश्चाहुतयएतच्चशर्वीकाभिः
सहपंचसहस्राण्यष्टशतानिपंचाशच्चाहुतयः अंतेवसो
र्धारा दशांशहोमपक्षेषोढामंत्रविभागेएकसहस्रंचत्वारि
शतानिचतुःषष्टिश्चेतिरूपकाणांप्रतिरूपकंषडितिमिलि
त्वाष्टौसहस्राणिसप्तशतानिचतुरशीतिश्चाहुतयः चमक
स्यैकशतस्यत्रयस्त्रिंशद्रूपकाणांचप्रतिरूपकमेकादशैका
दशेतिएकसहस्रंचत्वारिशतानित्रिषष्टिश्चाहुतयः एताश्च
शर्वीकाभिःसहदशसहस्राणिद्वेशतेसप्तचत्वारिंशच्चाहुत
यः अंतेचवसोर्धारा दशांशहोमपक्षएवषोडशधामंत्रवि

भागेएकसहस्रेचत्वारिशतानिचचतुःषष्टिश्चेतिरूपकाणांप्र
तिरूपकंषोडशेतिमिलित्वात्रयोविंशतिसहस्राणिचत्वारि
शतानिचत्वारिंशतिश्चाहुतयः चमकस्यत्रयस्त्रिंशदुत्तरैक
शतरूपकाणांप्रतिरूपकमेवैकादशैकादशेतिमिलित्वा
चैकसहस्रंचत्वारिशतानित्रिषष्टिश्चाहुतयः एताश्चसर्वा
स्ताभिः सहचतुर्विंशतिसहस्राण्यष्टौशतानिसप्ताशी
तिश्चाहुतयः अष्टचत्वारिंशन्मंत्रविभागेएकसहस्रंचत्वारि
शतानिचतुःषष्टिश्चरूपकाणामिति प्रतिरूपकमष्टचत्वा
रिंशदितिसप्ततिसहस्राणिद्वेशतेद्वासप्ततिश्चाहुतयः चम
कस्यत्रयस्त्रिंशदुत्तरैकशतरूपकाणांप्रतिरूपकमेकाद
शैकादशेतिगुणनेएकसहस्रंचत्वारिशतानित्रिषष्टिश्चाहु
तयःएताःसर्वास्ताभिःसहएकसप्ततिसहस्राणिसप्तश
तानिपंचत्रिंशच्चाहुतयः दशांशहोमपक्षेएवैकोनसप्तत्यु
त्तरशतमंत्रविभागेएकसहस्रंचत्वारिशतानिचतुःषष्टि
श्चेतिरूपकाणांप्रतिरूपकमेकोनसप्तत्युत्तरशतमितिगु
णयित्वाद्वेलक्षेसप्तचत्वारिंशत्सहस्राणिचत्वारिशतानिषो
डशचमकस्यत्रयस्त्रिंशदुत्तरशतरूपकाणांप्रतिरूपकमे
कादशैकादशेतिएकसहस्रंचत्वारिशतानित्रिषष्टिःद्वेल
क्षेअष्टचत्वारिंशत्सहस्राण्यष्टौशतान्येकोनाशीतिश्चाहु
तयः अंतेचवसोर्धारा अथाग्निरुद्रपक्षसमग्रहोमपक्षेच

म·
क·
५९

59

तुर्दशसहस्राणिषट्शतानिएकचत्वारिंशच्चेतिरूपकाणांचे
थामेत्रविभागेप्रतिरूपकंतिस्रास्तिस्रआहुतयः इतिमिलित्वा
त्रिचत्वारिंशत्सहस्राणिनवशतानित्रयोविंशतिश्चाहुतयः च
मकस्यैकसहस्रंत्रीणिशतान्येकविंशच्चेतिरूपकाणांप्रतिरू
पकमेकादशभिरनुवाकैरेकादशाहुतयइतिमिलित्वाचतुर्दश
सहस्राणिषट्शतानिचत्वारिंशच्चाहुतयः ॥ एतेवसोर्धाराच
समग्रहोमपक्षेषोढामेत्रविभागेचतुर्दशसहस्राणिषट्शता
निषट्चत्वारिंशच्चेतिरूपकाणांप्रतिरूपकंषट्षडितिमिलि
त्वासप्ताशीतिसहस्राण्यष्टौशतानिषट्चत्वारिंशच्चाहुतयः
चमकस्यैकसहस्रंत्रीणिशतान्येकविंशच्चेतिरूपकाणांप्रति
रूपकमेकादशैकादशेतिमिलित्वाचतुर्दशसहस्राणिषट्
शतान्येकचत्वारिंशच्चाहुतयः एताश्चसर्वाःकामिभिःसहैवलक्षे
द्वेसहस्रेचत्वारिशतानिसप्ताशीतिश्चाहुतयः ॥ एतेवसोर्धारा
समग्रहोमपक्षेषोडशधामेत्रविभागेचतुर्दशसहस्राणिषट्
शतानिएकचत्वारिंशच्चेतिरूपकाणांप्रतिरूपकंषोडशषो
डशेतिमिलित्वाद्वेलक्षेचतुस्त्रिंशत्सहस्राणिद्वेशतेषट्पंचा
शच्चाहुतयः चमकस्यत्रयस्त्रिंशदुत्तरैकशतरूपकाणांप्रति
रूपकमेकादशैकादशेतिमिलित्वाएकसहस्रंचत्वारिशतानि
त्रिषष्टिश्चाहुतयः सर्वाःकामिभिःसहएताद्वेलक्षेत्रिंशत्सहस्राणि
सप्तशतानिएकोनविंशतिश्चाहुतयः ततश्चवसोर्धाराच स

मग्रहोमपक्षेवाष्टचत्वारिंशन्मंत्रविभागेचतुर्दशसहस्राणि
षट्शतानिएकचत्वारिंशच्चेतिरूपकाणांप्रतिरूपकमष्टचत्वा
रिंशादितिमिलित्वासप्तलक्षाणिद्वेसहस्रेसप्तशतान्यष्टषष्टि
श्चाहुतयः चमकस्यैकसहस्रंत्रीणिशतान्येकत्रिंशदेकत्रिंश
च्चेतिरूपकाणांप्रतिरूपकमेकादशैकादशेतिमिलित्वाचतुर्द
शसहस्राणिषट्शतान्येकचत्वारिंशच्चाहुतयः सर्वैकाभिःस
हैताःसप्तलक्षाणिसप्तादशसहस्राणिचत्वारिशतानिनवचा
हुतयः अंतेवसुधारा सप्तग्रहोमपक्षेएकोनसप्तत्युत्तरशतमं
त्रविभागेचतुर्दशसहस्राणिषट्शतानिएकचत्वारिंशच्चेतिरू
पकाणांप्रतिरूपकंएकोनसप्तत्युत्तरशतमितिमिलित्वाचतु
र्विंशतिलक्षाणिचतुःसप्ततिसहस्राणित्रीणिशतानिएकत्रिं
शच्चेतिरूपकाणांप्रतिरूपकमेकादशैकादशेतिमिलित्वाच
तुर्दशसहस्राणिषट्शतानिएकचत्वारिंशच्चाहुतयः सर्वैका
भिःसहैताःचतुर्विंशतिलक्षाणिअष्टाशीतिसहस्राणिनवश
तानिसप्ततिश्चाहुतयः ततश्चवसुधारा इत्यतिरुद्रेश्वाहुतिसं
ख्या नमकादिभेदेनजपहोमविधौविधिः गुरुर्लघुश्चरुद्रशोयं
योजपःशास्त्रायपेक्षया इतिनमकरुद्रकरुद्रैकादशिनीमहारुद्रा
तिरुद्रेषुमंत्रविच्छेदप्रकारश्चाहुतिसंख्याविशेषश्च अथहोम
स्थंडिलकुंडनिर्माणादिः तत्रस्वल्पसंख्याकहोमेस्थंडिलंसमंत
तोहस्तमात्रंद्विहस्तपरिमितंवाहोमानुसारेणकल्पयेत् अपि

म॰ क॰ ९॰

कस्येत्योकहोमेतत्कुंडंप्रकल्पयेत् तत्रनवग्रहोक्तप्रकारेण
स्तत्प्रमाणे नवग्रहमखेकुंडंहस्तमात्रंसमंभवेत् चतुरस्रम
योहस्तंयोनिचक्रंसमेखलम् चतुरंगुलविस्तारामेखलातदु
च्छ्रिता हस्तमात्रसमंचतसृष्वपिदिक्षुहस्तप्रमाणेचतुरस्रं
चतुःकोणंप्रयोहस्तमधःखातमपिहस्तपरिमितंयस्यतत्तत्त
योक्तंयोनिचक्रंवक्ष्यमाणलक्षणलक्षितं योनिचक्रंतमाद
क्रमेखलापरिमाणमाह चतुरंगुलविस्तारेत्यादि तदुच्छ्रि
ताचतुरंगुलोन्नतापत्नच्चकुंडंउमग्रतद्धोमानुसारियोनिलक्षणे
नचिंतामणौ वितस्तिमात्रःयोनिःस्यात्षट्सप्तांगुलिविस्त
ता कूर्मपृष्ठोन्नतामध्येपार्श्वयोश्चांगुलोच्छ्रिताः गजोष्ठसदृ
शीतद्वदायताछिद्रसंयुता एतत्सर्वेषुकुंडेषुयोनिलक्षणमु
च्यते मेखलोपरिसर्वत्राश्वत्थदलसंयुता वितस्तिमात्रमित्य
त्रयोनेर्दैर्घ्यंषडंगुलिविस्तृता षट्सप्तविस्तृतावेतिव्याया
मेपिविकल्पः तद्वदायतेतिप्रनेनदैर्घ्यप्रमाणोत्तरमाह उक्तल
क्षणलक्षितागजोष्ठसदृशीप्रत्यस्यपत्रसदृशीवायोनिर्भवती
त्यर्थः इयंचयोनिःकुंडस्यपश्चिमदिग्भागेमेखलोपरिकार्या
मंडललक्षणंस्कंदपुराणे शरस्योपरिपूर्वेणमंडलंकारयेद्बुधः
रुद्रायतनभूमौवाचतुरस्रमुदक्प्लवम् दशहस्तमथाष्टौवा
हस्तान्कुर्याद्विधानतः यस्यद्वाराणिचत्वारिकर्तव्यानिविच
क्षणैः प्रागुदक्प्रवणांभूमिंकारयेद्यत्ततोनरः प्रागुत्तरंसमा

साग्रप्रदेशं मंडपस्य तु शोभनं कारयेत् कुंडं यथावल्लक्षणान्वि
तम् ॥ अथ प्रकारांतरेण कुंडनिर्माणविधिः ॥ तत्रैव द्विहस्तविस्त
तं दक्षिणोत्तरयोर्हस्तायते चतुर्हस्तखाते चतुरस्रं कुंडं विधेय
मित्यर्थः ॥ योनिलक्षणं प्राग्वत् ॥ द्व्यंगुलोच्छ्रिता कार्या प्रथमा मे
खला बुधैः ॥ त्र्यंगुलोन्नता तद्वद्विधेया सा द्वितीयका ॥ उच्छ्रायविस्त
राभ्यां च तृतीया चतुरंगुला ॥ अंगुलस्तु विस्तारः पूर्वयोरपि शस्य
ते ॥ पूर्वयोः द्वितीयतृतीयमेखलयोः चतुर्हस्ते कुंडे मंडपप्रमाण
माह ॥ तथा षोडशहस्तः स्यान्मंडपश्चतुर्मुखः ॥ नदीनां संगमे चैव
सराणामग्रतस्तथा ॥ समे भूमिभागे च देवताधिष्ठितेऽप ऋ
त्विग्भिर्ब्रह्मणा चैव सार्धं भूमिं परीक्षयेत् ॥ एवं द्वितत्रकुंडे च हस्त
मे हस्तमात्रे द्विगुणे लक्षहोमे च कोटिहोमे चतुर्गुणम् ॥ युग्मश
ऋत्विजः प्रज्ञाः श्रेष्ठास्ते वेदपारगाः ॥ कंदमूलफलाहारा दधिक्षी
राशिनोऽपि वा ॥ अष्टौ ऋत्विज इत्युपलक्षणम् ॥ यतो यत्र शांतिकर्म
द्वेगेन निर्वाहं भवति तत्र यावद्भिरृत्विग्भिः कर्म वेगेन निर्व
हति तावंतो ऋत्विजो वृणीत यद्यपि स्वत्वत्यागो यजमानेनैव
कार्यस्तथापि बहुकर्तृकहोमे त्यागस्याभिन्नकालत्वेन त्यागका
लस्य ज्ञातुमशक्यत्वात् होमोपक्रम एव यष्टव्यदेवताः स्मृत्वा
यजनीयद्रव्यं मनसि विधायेदं यथादैवतमस्त्विति त्यागः कार्यो
यजमानेन ॥ अथ वसोर्धाराप्रकारः ॥ चिंतामणौ ॥ घृतकुंभात्तु व
सोर्धारां पातयेदनलोपरि ॥ औदुम्बरीमथार्द्रां च ऋज्वीं कोटरव

म॰
क॰
६१

जितम् वक्ष्माणांस्त्रुचं कृत्वा ततः कुंडद्वयोपरि घृतधारां तथा
सम्यगग्नेरुपरि पातयेत् मंत्रवत्तथा धारायां मंत्राश्चमकानुवाकाः
मंत्रांतराण्यपि स्मर्यंते श्रावयेत्स्वकमाग्नेयं वैश्वदेवं रौद्रमैंधवम्
महावैश्वानरं सम्यग्ज्येष्ठमासे प्रपातयेत् इति स्थंडिलकुंडनिर्मा
णादिविधिः पंचांगरुद्रशब्दस्य षडंगरुद्रशब्दस्य चायं प्रयोगे समा
म्नायः पंचप्रकारा अंगन्यासा यस्मिन्स पंचांगरुद्रः एवं षडंगरुद्रो
पि तत्र पंचांगन्यासेषु शिखाया स्थानमेकत्रिंशदंगन्यासः प्रथमः
मूर्धादिपदांते पंचांगन्यासः तृतीयः गुह्यादिमस्तकांते पंचांगन्या
सश्चतुर्थः हृदयाद्यस्त्रांते पंचांगन्यासः पंचमः एवं पंचांगन्यासः
मज्जनादि सर्वांगपर्यंते षोडशांगन्यासः अयं च षष्ठो न्यासः एवं च
पंचप्रकारन्याससहितः षट्प्रकारन्याससहितः षडंगरुद्रः अ
थानः पंचांगरुद्राणां न्यासपूर्वकं जपहोमार्चनविधिं व्याख्यास्या
मः यातेरुद्रेति शिखायाम् येस्मिन्महत्यर्णव इति शिरसि सह
स्राणि ललाटे हंसः शुचिषदिति भ्रुवोर्मध्ये त्र्यम्बकं यजामहे इ
ति नेत्रयोः नमः स्रुत्यायेति कर्णयोः मानः स्तोक इति नासिका
याम् अवतत्येति मुखे यातेहेतिरित्युपबाह्वोः योतीर्थानीति
हस्तयोः सद्योजातमिति पंचानुवाकान्पंचस्वंगुलीषु नमो वः
किरिकेभ्यो इति हृदये नमो गणेभ्य इति पृष्ठे नमो हिरण्यबा
हवे इति पार्श्वयो हिरण्यगर्भ इति नाभौ मीढुष्टमेति कट्याम्
ये भूतानामधिपतय इति गुह्ये शिरा जातवेद इत्यपाने मा

नोमहंतामितरवौः पृशातइतिजान्वोः येपथीनामितिपादयोः
अध्यवोचदितिकवचे नमोबिल्मिनश्चेत्युपकवचे नमोअस्तु
नीलग्रीवायइतितृतीयनेत्रे प्रमुंचधन्वनस्त्वमित्यस्त्रम् यएतावदि
तिदिग्बंधनम् ॐनमोभगवतेरुद्रायेतिनमस्कारंन्यसेत ॐ
कारंमूर्ध्निविन्यस्यनकारंनासिकाग्रतः मकारंतुललाटेवैभका
रंमुखमध्यतः गकारंकंठदेशेतुवकारंहृदिविन्यसेत तेकारं
दक्षिणेहस्तेरुकारंवामतोन्यसेत द्राकारंनाभिदेशेतुयकारं
पादयोर्न्यसेत सद्योजातंपादयोश्चवामनंमध्यतोन्यसेत ई
शानंमूर्ध्निविन्यस्यहंसहंसेतिचब्रुवन् ईशानंमूर्ध्निविन्यस्यैतस्य
स्यायमर्थः स्वकृतेसतिहंसनामहंसइतिप्रसिद्धःसदाशिवो
भवेत् अन्नमेवार्थमत्रवदति हंसहंसेतियोब्रूयाद्धंसोनामस
दाशिवः इति एवंन्यासविधिंकृत्वाततःसंपुटमाचरेत् ज्ञातार
मिंद्रंवज्रोअग्रेस्वगात्रःपश्यामतस्यतंत्वायाम्यान्नेनिऋतिः व
यंसोमोमममीशानमस्मेरुद्रस्योनापृथिवीत्येतत्संपुटमिंद्रादी
न्दिक्षुविन्यस्यैवमात्मानिरोद्धीकरणंकृत्वावगास्थिगतैःपापैःप्र
मुच्यते सर्वभूतेष्वपराजितोभवति यक्षगंधर्वभूतप्रेतपिशाच
ब्रह्मराक्षसयक्षशाकिनीडाकिनीसर्पश्वापदतस्करायुपद्रवाः
सर्वेज्वलंतंपश्यंतुमांरक्षंतुमनोज्योतिरवोध्याग्निर्हडोनंवर्णाणि
तेजातवेदइतिगुह्यादिहृदयान्तमभिमंत्र्यात्मरक्षाकर्तव्याशिव
संकल्पंहृदयेपुरुषसूक्तंशिरउत्तरनारायणंशिखायामप्रतिरथं

कवचं शतरुद्रीयमस्त्रंपंचांगेसकृज्जपेद्दशांगंप्रतिपत्त्याथ्या
नानंरुद्ररूपंध्यायेत् शुद्धस्फटिकसंकाशंत्रिनेत्रंपंचवक्त्रकं
गंगाधरंदशभुजंसर्वाभरणभूषितम् नीलग्रीवंशशांकांकंना
गयज्ञोपवीतिनम् व्याघ्रचर्मोत्तरीयंचवरेण्यमभयप्रदं कमं
डलाक्षसूत्राभ्यामन्वितंशूलपाणिकम् ज्वलंतंपिंगलजटाशि
खाद्योतकारिणम् अमृतेनाप्लुतंहृष्टमुमादेहार्धधारिणम्
दिव्यसिंहासनासीनंदिव्यभोगसमन्वितम् दिग्देवतासमायु
क्तंसुरासुरनमस्कृतम् नित्यंचशाश्वतंशुद्धंध्रुवमक्षरमव्ययं
सर्वव्यापिनमीशानंरुद्रंवैविश्वरूपिणम् एवंध्यात्वाद्विजःसम्य
क्ततोयजनमारभेत् इतिपंचांगरुद्रन्यासविधिः अथाभिषेकेरु
द्रीकन्यासाश्चपिसशुद्धीयंते अथातोरुद्रस्नानार्चनविधिंव्या
ख्यास्यामः आदित्यपवमीर्थेस्नात्वोदेत्यशुचिः प्रयतोब्रह्मचारी
शुक्लवासास्तस्यदाहिणप्रत्यग्देशेउदङ्मुखः स्थित्वात्मनिदेव
तास्थापयेत् अजनेब्रह्मातिष्ठतुपादयोर्विष्णुस्तिष्ठतुहस्तयोर्ह
रस्तिष्ठतुबाह्वोरिंद्रस्तिष्ठतुजठरेग्निस्तिष्ठतुहृदयेशिवस्तिष्ठतु
कंठेवसवस्तिष्ठंतुवक्त्रेसरस्वतीनासिकायांवायुःनयनयोःसू
र्याचंद्रमसौकर्णयोरश्विनौललाटेरुद्रास्तिष्ठंतुमूर्ध्न्यादित्यास्ति
ष्ठंतुशिरसिपिनाकीतिष्ठतुपृष्ठतःशूलीतिष्ठतुपार्श्वयोःशिवशंकरौ
तिष्ठतांसर्वतोवायुस्तिष्ठतुततोबहिःसर्वतोग्निज्वालामालापरि
वृतास्तिष्ठतु सर्वेष्वंगेषुसर्वदेवताःतिष्ठंतुमांरक्षंतुअग्निर्देवादि

श्रितइति यथालिंगमंगानिसंस्पृश्याथैनंगंधपुष्पाक्षतदीपधू
पैरात्मानंप्रत्याराधयेत् आराधितोमनुष्यैस्त्वंसिद्धैर्देवासुरादि
भिः आवाहयामिभक्त्यात्वांमांरक्षाणमहेश्वर त्र्यम्बकंयजामहे
इत्यथैनमाराधयेत् अग्निर्देवादिश्रित इत्यादेरयमर्थः अग्निर्दे
वाइत्यादिभिर्वक्ष्यमाणैर्मंत्रैर्यथालिंगमंगानिसंस्पृशेत् तत्रमं
त्राः अग्निर्देवादिश्रितोवाग्हृदयेहृदयंमयिअहममृतेअमृतं
ब्रह्मणीतिप्राणस्थानेहृदये सूर्योमेचक्षुषिश्रितः चक्षुर्हृद
येहृदयंमयिअहममृतेअमृतंब्रह्मणिइतिचक्षुषिचंद्रमामे
मनसिश्रितःमनोहृदयेहृदयंमयिअहममृतेअमृतंब्रह्मणि
इतिमनसःस्थानंचक्षुःदिशोमेश्रोत्रेश्रिताःश्रोत्रंहृदयेहृदयं
मयिअहममृतेअमृतंब्रह्मणिइतिश्रोत्रम् आपोमेरेतसिश्रितः
रेतोहृदयेहृदयंमयिअहममृतेअमृतंब्रह्मणिइतिगुह्यस्था
नम् पृथिवीमेशरीरेश्रिताशरीरंहृदयेहृदयंमयिअहमम
तेअमृतंब्रह्मणीतिशरीरस्थाने ओषधिवनस्पतयोमेलोमसु
श्रिताः लोमानिहृदयेहृदयंमयिअहममृतेअमृतंब्रह्मणी
तिरोमकूपान् इंद्रोमेबलेश्रितःबलंहृदयेहृदयंमयिअहम
मृतेअमृतंब्रह्मणीतिसर्वांगम् पर्जन्योमेमूर्ध्निश्रितः मूर्धाहृद
येहृदयंमयिअहममृतेअमृतंब्रह्मणीतिमस्तकम् ईशानोमे
मन्यौश्रितः मन्युर्हृदयेहृदयंमयिअहममृतेअमृतंब्रह्मणी
तिक्रोधस्थानम् आत्मामेआत्मनिश्रितःआत्माहृदयेहृदयंम

म·
क·
६३

63

चित्रहमम्रतेत्रमृतंब्रह्मणीतिविज्ञस्यानम् वदः पुनर्मआत्मा
पुनरायुरागात् पुनः प्राणः पुनराकूतमआगात् वैश्वानरो
रश्मिभिर्वावृधानश्चंतास्तिष्ठत्वमृतस्यगोपाः इतिसर्वंशरीरं
स्पृशेत् एवमंगानिसंस्पृश्याथैनंगंधपुष्पादिभिरात्मानमारा
धयेत् एवंरुद्रमात्मानमाराधयेत् रुद्ररूपिणोजीवात्मानेश
रीरंपूजयेदित्यर्थः तत्रावाहनमंत्रमाराधितइति आवाहन
व्यतिरिक्तोपचारेषुपंचसप्तदशवात्र्यम्बकंयजामहइत्ययंमं
त्रः अत्रनैवेद्यमपिमानसंकल्पयेत् एवमात्मपूजानंतरंशि
वपूजाप्रकारमाह आत्वावहंतुहरयः सचेतसः श्वेतैरश्वैरिह
केतुमद्भिर्वाताजवेनबलमद्भिर्मनोजवायाहिशीघ्रंममह
व्यंशर्वेमित्यावाहयामीत्यावाह्यसंस्थापितेत्वावाहनंददाति
सद्योजातायवैनमः इत्यासनंददाति भवेभवेनातिभवेभज
स्वमांभवोद्भवइतिपाद्यंददाति भवोद्भवायनमः इत्यर्घलिं
गाभिषेकस्नानंददाति अङ्गिराआपोहिष्ठेत्याद्याः ऋचाद्भिस्तर्प
यति भवंदेवंतर्पयामि शर्वंदेवंतर्पयामि ईशानंत· पशु
पतिंदेवंत· रुद्रंदेवंत· उग्रंदेवंत· भीमंदेवंत· महान्तंदेवंत
र्पयामीतितर्पयित्वाज्येष्ठायनमइत्याचमनीयंददाति श्रेष्ठा
यनमइतिमधुपर्कंददातिकालायनमइतिगंधंददातिका
लविकरणायनमइतिपुष्पंददातिसर्वभूतदमनायेतिधूपं
ददाति मनोन्मनायनमइतिदीपंददाति भवोद्भवायनमइ

तिकालेनैवेद्यंददाति अथाष्टाभिर्मंत्रैरष्टौपुष्पाणिददाति
भवायनमः शर्वायनमः ईशानायनमः पशुपतयेनमः
रुद्रायनमः उग्रायनमः भीमायनमः महतेदेवायनमः अ
थास्याघोरतन्त्ररघोरेभ्यः इत्युपतिष्ठते अथास्याघोरतन्त्ररित्य
स्यायमर्थः अथपूर्वोक्तपूजानंतरमस्यरुद्रस्याघोरतन्त्रराघोरा
दिशरीराण्युपतिष्ठंतेतेनघोरेभ्यइत्यनुवाकत्रयेणानेचानुवा
काग्रेप्रदर्श्यमानाअपिसौकार्यार्थमत्रालिख्यंते ॐद्वात्रिंश
दक्षरमंत्रैः अघोरेभ्यइत्यादिनमस्तेअस्तुविश्वरूपेभ्यः ॐतत्पुरु
षायविद्महेमहादेवायधीमहितन्नोरुद्रःप्रचोदयात् ईशानः
सर्वविद्यानामीश्वरःसर्वभूतानांब्रह्माधिपतिः ब्रह्मणोऽधिपति
र्ब्रह्माशिवोमेअस्तुसदाशिवोम् अथास्याघोरतन्त्ररघोरेभ्यइ
त्युक्तंतदनंतरकृत्यमाह अथैतस्यहिरण्येनशुभ्रकलशेन
संततधारांनिषिंचेत् अथवापयसासर्पिषाचेक्षुरसेननारिकेले
नवाम्ररसेनवातदलाभेउदकेनवानमस्तेरुद्रमन्यवइत्येकादशा
नामनुवाकानांएकमेकंजपेत् सर्वैशापारैःपुनराराधयेत्
उत्तमाराधनेनतदेतद्विधानंप्रोक्तंसंततधारामितिसंततधारा
पदेसहस्रकलशाभिषेकस्याप्युपलक्षणम् एतदेवरुद्रस्नान
मित्युच्यते अत्रतत्स्नानविधावपिपूर्वोक्तपंचांगन्यासादिकं
कार्यंसर्वैषांपारिशेष्यादिसर्वेषामभिलषितनमस्कारशक्तिविशेषा
णांप्राप्तिसमाप्तोउत्तमाराधनेनपुनराराधयेत् अभिषेकानंतरं

म०
क०
९८

64

पूर्ववदेव पुनः पूजयेदित्यर्थः पुनराराधयेदन्नमाराधनामि
तिपाठे अन्नमाराधनमभिषेकानंतरं पूजां पुनः पश्चादाराधयेत्
कुर्वीतेत्यर्थः पुनःशब्दः प्रथमपूजापेक्षया नत्वभिषेकांतेद्विः पू
जापेक्षया तदेतद्विधानमिति प्रोक्तमिति आदावेव पूजाविधानं
प्रोक्तमित्यर्थः अथवा तदेतद्विधानमभिषेकादिषु प्रोक्तमित्युप
संहारः अन्नमाराधनं तदेतत्प्रोक्तमित्युक्तम् अधुना व्याधिविमो
चनार्थेभिषेककर्माणि विशेषं प्रदर्शयन् अधिकारभेदाद्भिन्ना
नि फलानि दर्शयति तेनाभिषिक्तेनोदकेन अश्वीभ्यामित्यनुवा
केनाङ्गिराभिश्चापरान्तं संस्न्यात् पापक्षयार्थी व्याधिविमोचना
र्थी जीवनार्थी व्याधिविमोचनार्थी श्रीकामः शांतिकामः पुष्टिका
मः तुष्टिकामो मोक्षार्थी च कुर्यादेवं कुर्वन्सिद्धिं प्राप्नोति दशगा
वः सवत्साः सुवर्णभूषिताः वृषभा एकादशानद्भावे एकां गां द
द्यादित्याह भगवान्बौधायनः अश्वीभ्यामित्यनुवाको रोगप्रतिमा
दानविधाने दर्शितः आपोहिष्ठेत्यादय ऋचोऽब्लिंगाश्च स्वस्त्या
यनं चोपशांतौ प्राक्प्रदर्शितः इति रुद्राभिषेकविधिः अथां
गमंत्राणामृष्यादि अथ नमकांगन्यासमंत्राणां ऋषिदेवतछंदां
सि तत्रार्थम् यातेरुद्र नमः स्त्याय नमोवः किरिकेभ्यः स्वंतम
यजमानं मनोज्योतिर्यमाय स्वाहेत्येषामग्निरसिन्महत्यर्णवे स
हस्राणि सहस्रशो नीलग्रीवायेति द्वयोः नमो गणेभ्य इति चैषां ड
र्भिसाः हंसः शुचिषत् नमो अग्रे इत्यनयोर्वामदेव त्र्यम्बकं यजा

महःस्थानो निष्ठुर्भिरित्यनयोर्वसिष्ठो मानस्तोकेनमस्तेस्वायुधा
ययातेहेतिः नमो भिल्मिने नमो अस्तु नीलग्रीवायेत्येषां भगवा
नवतत्यधन्वः प्रमुंच धन्वन इत्यनयोः नारदो ये तीर्थानि ये भूतानां
ये पथीनां यपतावं तन्वेत्येषां देवलः सद्योजातादि पंचानुवाका
नां तथा ता मा अग्निवर्णा इत्यनाजितामिति द्वयोरग्निसंहिती देवताउ
पनिषदो नमो हिरण्यबाहव इति त्रयस्य मंत्रको हिरण्यगर्भो यः प्रा
णत इत्यनयोर्हिरण्यगर्भो मीढुष्टमा शिवतमेत्यस्या वैराजः जा
तवेदसे इत्यस्याः कश्यपो अग्ने त्वं पारया अग्ने नयेत्यनयोरगस्त्यः वि
श्वानि न इत्यस्या वसुश्रुतो मा नो महान्तमित्यस्या देवराजपथनेक
इन्द्रभागः सगरः पंथामित्यनयोरङ्गिः संभ्रान्तामित्यनुवाकस्य ब्रह्म
यज्ञाने यातेअग्न इत्यनयोरग्नि विश्वेदेवा अध्यवोचदित्यस्याः कंद
स्वातामिंद्रमुपस्थासये इत्यनयोः गर्गः नत्वायामीत्यस्याः शुनःशेपो
वयंसोमेत्यस्या वंधुः भ्रातनवंधुश्रुतमीशानमित्यस्या राहुगणः स्व
रुद्रेत्यस्याः प्रगाथः स्योनापृथिवीमही द्यौरित्यनयोर्मेधातिथिर्वो
ध्याश्रीरित्यस्या तुरगाय विश्वेरो मूर्धानमित्यस्या विरूपो ममाग्नेत्यस्या
पार्गुर्जातवेदा इत्यस्याः स्वयंभू ब्रह्मा यज्ञायज्ञेत्यस्य शिवसं
कल्पः सहस्रशीर्षेत्यष्टादशर्चस्य प्रजापतिः षोडशार्चस्य चैतस्य
नारायणः आशुः शिशान इत्यनुवाकस्य प्रतिरथः स्वामग्ने वरुणा इ
त्यनुवाकस्य हव्यवाडित्यार्षम् अथ देवतं हंसः शुचिषदित्यस्याः
सूर्यो मानः स्तोके नमस्ते अस्त्वायुधायते हेतिरित्यत्र भगवान्हिरण्य

म॰
क॰
६५

65

गर्भःयःप्राणतइतिप्रजापतिःजातवेदसेतामग्निवर्णामग्नेत्वं
पारयानविश्वानिनःइतनाजितमितिजातवेदोग्निरध्यवोचन्नमो
विल्मिनेनमोप्रस्तनीलग्रीवायेतिशंभुस्त्रातारमित्यस्याप्रभुःई
शानइत्यस्यानुवाकस्यचैंद्रमतर्षीबृहस्पतिस्त्रयोदशपावाहणा
त्वमोअग्नेअग्नेवोध्यग्नेनययातेअग्नइत्यग्निःस्वगान्नःपथ्योयमाय
स्वाहेतियमःस्वन्वंतमितिनिर्ऋतिःतंत्वायामीतिवरुणःआनो
नियुद्भिरितिवायुर्वयंसोमेतिसोमःतमीशानमितीशानोस्मेरु
द्रोब्रह्मयज्ञानमितिब्रह्मास्योनापृथिवीत्यनघंतःपृथिवीवा
मनोज्योतिरित्युद्धोनिर्हृशोसूर्यावेजातवेदइतिवैश्वानरोमर्मा
णीतइतिवर्मादयोलिंगोक्तायज्ञायतइतिसत्यकस्यमनःसहस्र
शीर्षेत्यस्यसत्यकस्यजगद्बीजंपुरुषोनारायणोवाऋषिःसत्यतर
त्यनुवाकस्यनारायणोमहीद्यौरितिद्यावापृथिव्यावुपशान्तयेति
रपोर्द्धंतुभयस्मावशीशानांरुद्राःत्र्यंबकमितिमृत्युंजयरुद्रस्य
मग्नेरुद्रइत्यनुवाकस्याध्यात्मकोरुद्रइतिदेवतम् अथछंदःहं
सःशुचिषदितिनेत्रीरीयकेत्रिजगतीवरूचानांजगतीमानस्तो
केमानोमहांतमीशानंत्वमग्नेरुद्रइतिजगत्यःसद्योजातमितिह
हतीहिरण्यगर्भोजातवेदसेतामग्निवर्णामग्नेत्वंपारयविश्वानिनः
इतनाजितंत्रातारंत्वमःस्वगान्नःस्वन्वंतंयस्यानोनियुद्भिरस्मेरुद्रे
मनोज्योतिरवोपिसूर्यावे मर्माणिजातवेदादियज्ञायतइतिस
मम् सहस्रशीर्षेत्यजास्वला यनानामर्त्यैर्वापसंमानामर्त्यैरस्त्रो

ज्ञः संभृतः इति देवः आशुः।शिशान इति स्कन्धमाश्वलायन पादे
न्यपास्यापस्तंभपादे द्वादशपादिदेत्यांच वर्जयित्वा ब्रह्मजज्ञानमु
पन्यासयाग्नेनयेत्येताभिस्त्रिष्टुभो मीढुष्टमेति पंचपदा त्रिष्टुप्
प्रजापतिश्चरतीशितित्रिष्टुप्जगतीईशानः सर्वविद्यानामित्यनु
वाके वयं सोमस्येना पृथिवीमहीद्यौरिति गायत्र्यो या ते अग्न इति
शक्वर्यर्वाशिष्टाश्चैवोऽनुष्टुभो या ते रुद्राघोरेभ्य इति स्वराडनुष्टुप्
शिष्टानि यजूंषि इति पादः इति नमकांगन्यासमंत्राणामृष्यादिदेव
तछंदांसि अथ नमोंगन्यासमंत्राः प्रदर्श्यंते या ते रुद्र शिवा त
नूरघोरापापकाशिनी तया नस्तन्वा शंतमया गिरिशंताभिचा
कशीहि शिखायां यस्मिन्महत्यर्णवेऽन्तरिक्षे भवाअधि ते षां सह
स्रयोजनेवधन्वानितन्मसि इति ललाटे हंसः शुचिषद्वसुरंतरिक्ष
सद्धोता वेदिषदतिथिर्दुरोणसत् नृषद्वरसदृतसद्व्योमसदब्जा
गोजा ऋतजा अद्रिजा ऋतम् बृहत् इति भ्रुवोर्मध्ये त्र्यम्बकं यजा
महे सुगंधिं पुष्टिवर्धनम् उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मा
मृतात् इति नेत्रयोः नमः स्रुत्याय च पथ्याय च नमः काट्याय च
तस्य प्रयोगः अथ नमो वः किरिकेभ्य इत्यस्य प्रयोगस्यानुवाको
त्तमेको मंत्रः परा कं प्रथमं कृत्वा जपेत्पश्चात्परं मनुम् चत्वारिंशत्स
हस्राणि पुरश्चरणसिद्धये मंत्रसंशोधनार्थं तु ततः परिसरोत्त
रेः जपेद्वेवाष्टसाहस्रीं प्रयोगार्हस्ततो भवेत् मंत्रेणानेन दुःसा
ध्यं न किंचिदपि विद्यते देवस्य दक्षिणामूर्तेः सन्निधौ सत्कृताश
ने जुहुयात्स्थितो मौचलं तैराजतिलैः पृथक् एवमुत्पद्यते
तस्य सुवर्णं तदनुग्रहात् अथान्यदुच्यते कर्म तत्र स्याद्धुतं ह
विः अपामार्गाणि बीजानि वैणवानि तथा यवाः दधिमध्वाज्य
संसृष्टं हविरुक्तं ततो भवेत् सुवर्णानां सहस्रं तु होमेनोत्पद्यते ध्रु
वम् कन्याकामो गृहीत्वा नाम्नेष्टकन्यासमाकृतिम् कृत्वा ताम्

म॰
क॰
८१

पलम्ध्येवजपेत्पंचसहस्रकम् छित्वाथतोसहस्राणिपंचैवजुहु
याच्छुचिः लभतेकन्यकामिष्टांसर्वाभरणभूषिताम् राज्यश्रीका
मनायस्यतस्यलक्ष्मीर्भवेत् होमद्रव्यंतपद्मानिकुमुदान्युत्प
लानिच एवंकृतेराज्यलक्ष्मीःप्रत्यक्षाजायतेचिरात् वश्यमिच्छ
न्पिशाचादेःपलाशानांशुभंकरैः लक्षमेकंप्रजुहुयात्पिशाचय
क्षराक्षसः दृष्टादृश्याश्चजायंतेदेवदेवप्रसादतः अथापरःप्र
योगोयंमहाकांताभूतले आत्मप्रमाणकुंडेतुसंस्थाप्यप्र
ज्वलितानलम् घृतंजुहुयाद्बिल्वैस्ततःपंचसहस्रकम् पुष्टिमा
न्बिल्वपत्रैर्होमकर्मसमाचरेत् तत्रबिल्वफलाकारंस्वर्णंतुप्र
जायते स्पर्शवेधीभवेद्धेमपिंडोबिल्वफलाकृतिः सार्वभौमस्य
त्वार्थीनराजैतत्कर्मकारयेत् देवस्योपरिपुष्पाणिगन्धेनाक्तानि
सर्पिषा कमलानिप्रजुहुयाल्लक्षसाहस्रसंख्यया उत्पद्यतेसार्व
भौमःस्वतोदेवप्रसादतः अथान्यत्तत्रकर्मस्याद्घृतंहवनक्रिया
शमीसमिद्भिरक्ताभिर्दधिक्षौद्रहुतैःशुभैः एवंकृतेसतस्तस्याशि
वभक्तोभिजायते कविर्नेत्रैरौप्यपात्रेस्थितवर्णंवचोद्भवम् चू
र्णमर्धपलंतिम्नाकपिलाज्येनलोडयेत् ततस्तदाघृतंकृत्वाच
र्णीकृत्वाभिमंत्रितम् सेवेतस्वयमित्येवंकृतेसंजायतेकविः
भोगकामस्तुजुहुयादुडुम्बरतरूद्भवाः समिधोदधिमध्वाज्यप्र
क्ताःसंख्यायचायुतम् देवदेवप्रसादेनमहाभोगोभिजायते यो
मनोभवकामःस्याद्धत्यमाणंसमाचरेत् पुरश्चरणमत्रस्याद्धि

शेषेणतदुच्यते कृच्छ्रंसंवत्सरंकृत्वाततश्चांद्रायणंचरेत्
इत्थंसंशोध्यचात्मानमथाष्टादशवासरान् चरुशाकफलैर्मू
लैराचरेद्देहधारणाम् निरंतरंजपेद्बुद्धिपूर्वंनिद्राभवेद्यत
अबुद्धिपूर्वकेस्वप्नेस्नात्वापश्चाज्जपेन्मनुम् जपांतेगुरवेदद्यान्नि
ष्कपंचककांचनम् ततोगुरोर्वादेवस्यसन्निधौजपमाचरेत्
संख्याचात्रसहस्राद्विशलक्षस्यार्धंततःपुनः साक्षादुमापतीरुद्रः
प्रत्यक्षस्तस्यजायते तत्प्रसादान्मनोवेगगमनोभवतिमानवः
यंयंदेशंकामयतेतंतंदेशंव्रजेत्तथा स्मृत्वामंत्रंजपेदष्टश
तंतद्देशागमभवेत् अथादृश्यत्वकरणमत्रपूर्ववदाचरेत् पु
रश्चरणकर्माथकालेयस्मिन्नदर्शनम् अपेक्षतेनदातस्मिंलो
हितेचंदनेशुभम् कपिलापयसासम्यक्संघृष्याश्वत्थपत्रके
तोदंनिधायतंस्पृष्ट्वासहस्राणिपञ्चसंजपेत् तेनोपलिप्यचा
त्मानंस्पृष्ट्वास्मृत्वाचशंकरम् प्राणायामान्प्रकुर्वीतततोदृश्यो
भवेन्नरः अथान्यदुच्यतेकर्मराजवश्यकरंपरम् तोदंकृत्वा
लोहितस्यचंदनस्याथतेपुनः अभिमंत्र्याथतांकृत्वातिलकं
तेनकारयेत् ललाटेधारयन्नित्यमभिगच्छेन्महीपतिम् एवं
वश्याभवेयुस्तेराजानोराजपूरुषाः देवस्यदक्षिणामूर्तेःसन्नि
धौनित्यवन्मनुम् जपेदष्टशतंराजपुरुषेभ्योभयंनहि यस्ये
च्छेन्नाशमस्यासौनामग्रहणपूर्वकम् मंत्रंजपेदेकपादेस्थित्वै
वायुतसंख्यया देवस्यसन्निधावेववत्सरादाशुनश्यति विप्र

स·
क·
८८

तः पाणिपादान्तं विसृतो ऽतिशिरोमुखम् ज्वलन्तं विश्वमाहृत्य
तेजोराशिं शिवं स्मरेत् इति नमकेषु नमो वः किरिकेभ्य इत्य
स्य मंत्रस्य प्रयोगः अथ नमकेषु द्रापेऽन्धसस्पते इत्यस्य प्रयो
गः कृत्वोपवासमेकाहं जपेन्मंत्रमथायुतम् पुरश्चरणमेवं
स्यादथ चेद्युतकामना आर्द्रायां जुहुयाद्राज्यं कापिले प्रयुतो
युतम् धनं बहु भवेत्तस्य महेशस्य प्रसादतः ज्वरे जाते तस्य शान्त्य
र्थं ज्वरे यत्तस्य रोगिणः जुहुयात्पंचसाहस्रीं दूर्वाणां ज्वरशान्त
ये अभिचारस्य शान्त्यर्थं पैकैकंन्ततत्रहुत्वाः समिधो जुहुयाद्धो
मसंख्यान्वायुतं भवेत् महाजनकृतद्रोहशान्त्यर्थं होममाच
रेत् लघमाज्येन संसिक्तं हविः संख्यापि चायुतम् सर्वभूतसमु
त्थभयशान्त्यर्थमाचरेत् होमं तत्रायुतं संख्या होमद्रव्यमथो
च्यते ओं उम्बर्यश्च समिधः तिलाश्चैव तथा यवाः अनेन सर्वभू
तेभ्यो भयमाशु विनश्यति अथापरः प्रयोगो ग्रामस्य नगर
स्य वा मध्ये वह्निं समाधाय हुतेऽपि हैंत तिलांस्तथा अयुतं जुहु
याच्चैवं बलिमस्य पत्रके विलिपेच्च उदारोऽमः सहस्राष्टक
संख्यया एवं कृते भैरवात्महूतो भूतेभ्यः संयुतः दृश्यो जायते तत
स्याथ महासिद्धिः प्रजायते तद्रूपं संस्मरेद्रूपमापच्चमस्य प्रयुच्य
ते आकुल्केसितकंचुकीउमरुकीत्रिगोलसल्लंकेउल्लः शूली
डुंउत्सितश्चवाः सतिलकोमंजुक्वणन्नूपुरः श्रीमान्निर्मलदन्त
पंक्तिकिरणैर्ध्वनायमानाननो देवो भैरववेशभूषितनतुर्ध्ये

योमृडानीपतिः इतिनमकेषुडापेप्रन्यसस्पतइत्यस्यप्रयोगः
अथयातेरुद्रइत्यस्यप्रयोगः अष्टौशतानिकुर्वीतप्राणायामांस्त
तःपरम् सहस्राणिजपेत्तंचतुरक्षराणिसिद्धये कन्यार्थीलभते
कन्यांहुत्वालाजान्हुतास्ततान् अपामार्गसमिद्धोमैरलक्ष्मींना
शयेद्बुधः सर्वकल्मषनाशायजुहुयाच्चतिलाहुतीः ब्राह्मणादी
न्वशीकुर्यात्बुधःखदिरसंभवान् सितरक्तैर्नीलपीतैःसुमैःसंवेष्टि
तान्क्रमात् लतांहुत्वाहुतंसर्वान्कामानाप्नोतिसाधकः जुहुयाद्र
त्नकामस्तुकुसुमैःकुमुदादिभिः यद्वर्णंजुहुयात्पुष्पंतद्वर्णंवस्त्र
माप्नुयात् पुष्टिकामःशुचौदेशेगोमयेनोपलेपिते रक्तद्रव्येणत
चैवमंडलंपरिमेलयेत् मंडलस्यपुरस्तात्तुनवकुंभंनिधापयेत्
सूत्रेणवेष्टितंसम्यक्पूरितंगंधवारिणा आवाहयेत्ततःकुंभेसूर्यमे
काग्रमानसः तत्रस्थमर्चयेद्देवंसंयतःसाधकोत्तमः पायसंजुहु
यान्नवशतमष्टोत्तरंबुधः ध्यायन्नेकाग्रधीःसूर्यंजपेन्मंत्रंसहस्रकं
एवंकुर्वीतसप्ताहंद्वादशाहमथापिवा ततःप्रसन्नोभगवान्म
हावर्षंप्रमुंचति अहोरात्रमुपोष्यैवपुत्रकामःशुचिव्रतः पाय
संजुहुयादग्नौअष्टोत्तरशताहुतीः अन्तस्नातांततोभार्यांशुचि
वस्त्रामलंकृताम् भोजयेत्तुतच्छेषंतज्जपन्नष्टशतंबुधः ब्राह्मणा
न्भोजयेच्चैवधारयेत्स्वस्तिवाचनम् ततःपुत्रमवाप्नोतितेजस्विन
मनामयम् अरिष्टदर्शनेचैवतथादुःस्वप्नदर्शने अभिचारकृ
तेदोषेरलक्ष्म्याचसमाहते विघ्नाद्युपसर्गेचभयेचसमुपस्थि

म॰
क॰
८९

८९

ते तथाच ग्रहपीडायां सतावेशकृतेषु च एवमादिषु चान्येषु
दोषेषूपहितेषु च शर्वार्कमंडले कृत्वा नवकुंभं तथैव च गंधोद
केन संपूर्णं सर्वमंगलसंयुतम् एलालवंगकर्पूरनिंबजातीफ
लैर्युतम् देवमावाह्य कलशे तर्चयेन्नरहोमवत् मंत्रेणानेन
तं देवमष्टोत्तरसहस्रकम् शरीरारोग्यतेजश्च वर्धते तस्य सर्वदा
संवत्सरं जपेद्यस्तु तीव्राहारो जितेंद्रियः अर्चनेन च यथाशक्तिकृतं
नियुतमन्वहम् संसिद्धिमन्त्रलोकं गच्छेद्दाणिमादिगुणैर्युताम् किं
तस्य मानुषैर्भोगैः प्रसन्ने वै जगत्पतौ बहुना किमिहोक्तेन मडाख्ये
नस्तत्परायणः तद्भावभावितो मंत्री जपन्मुक्तो भवेन्मुनिः कुंतचा
मीकरप्रख्यशक्तिपाणिं षडाननम् मयूरवाहनारूढं स्कंदरूपं
शिवं स्मरेत् इति नमकेषु यातेरुद्रस्य प्रयोगः अथेमारुद्रा
यमडानोरुद्रेत्यनयोः प्रयोगः अयं तृचपंचको मंत्रः आदौ कृत्वाच
रित्वैकं जपेन्नवसहस्रकम् पुरश्चरणमेवं स्याद्दशांशं च तथैव
अग्निमादाय जुहुयाद्दधिसारामिषाद्युतम् गवादीनां भवेच्छांति
रथान्यकर्मचोच्यते राजवाहनशांत्यर्थं जलं स्पृष्ट्वा युतं जपेत्
जप्तेन पाथसा तेन वाहनानां महीक्षितः शांतां संप्रोक्षयेत्पश्चा
तज्जलेन विमिश्रितम् कृत्वोपयोगं यत्किंचिद्वाहनेभ्यः प्रदापयेत्
एवं वाहनशांतिः स्यान्निरक्षां शांतये पुनः आज्यमिश्रतिलानांत्व
जुहुयाद्युताहुतीः अन्येषां शांतये होमो दूर्वाणां मधुतं भवेत्
दिव्यसिंहासनासीनं स्तूयमानं महर्षिभिः प्रसन्नवदनं ध्यायेत्सो

मंस्रोमार्थधारिणं इत्येमारुद्रायेमरुद्रानोरुद्रेत्यनयोःप्रयोगः
अथमानोमहान्तमित्यस्यप्रयोगः उपवासत्रयंकृत्वाजपेत्तंचसह
स्रकं पुरश्चरणसिद्धिःस्यात्प्रयुंजीताथकर्माणि क्षीयमाणोवालस्य
ज्ञानांशांतिमिच्छन्निवेदयेत् प्रतिसंवत्सरंत्वाद्रीनक्षत्रेस्याद्युपक्र
मः यवानांतिलमिश्राणांजुहुयादयुताहुतीः अश्वत्थस्यसमिधांहो
मश्चायुतंसर्पिषाघृते एवंकृतेसदारागद्विजनरस्साप्रजायते किंचा
न्यत्रापिशांत्यादावयुतंजपमाचरेत् राज्ञातुसर्वशांत्यर्थमार्द्रीया
मयुताहुतीः होमयेत्प्रतिमासंतुकृतश्चायंमहीपतेः अंतःपुराद
यःसम्यग्वर्धंतेनात्रसंशयः वालेंदुमुकुटंदेवंतरुणादित्यविग्र
हम् ध्यायेन्नंदीश्वराकारंगणेश्वरसमाहृतम् इतिमानोमहान्त
मित्यस्यप्रयोगः अथमानस्तोकेइत्यस्यप्रयोगः कृष्णमेकंचरि
त्वादौपात्रमौदुम्बरेघृतम् निधायकपिलायास्तुकर्यासेवाभिमंत्र
णम् सहस्रसंख्ययातेनस्रग्गैवामाषिजेयथवा जुहुयादष्टसाह
स्रीमहाव्याहृतिभिःशतम् हुत्वाशेषमशित्वाचत्रिरात्रेणव्रती
भवेत् ततस्तचरुषष्ठपंचाशे शतानिसहस्राणिचवैजपेत् शरवेदं
चनिष्कान्दद्यादेवंकृतेपुनः पुरश्चरणसिद्धिःस्यात्प्रयोगार्ह
स्ततोभवेत् आयुष्कामोमहीपालोनित्यंवत्सरीयपातके माधिते
वानलेहोमंकुर्यादयुतसंख्यया होमद्रव्यंतिलाःसिक्ताःसर्पिषै
वात्रकर्माणि स्वस्त्येतुर्महीपालोब्राह्मणैःकर्मकारयेत् अष्टा
शत्यातिलकाह्वत्याभस्मकृत्वाभिमंत्रितम् ललाटादायाष्टकाशस्त

म॰ क॰ ९॰

राजानमभितास्थितैः ब्राह्मणैर्नित्यवत्कार्यं रक्षाकर्ममहीपतेः
किरणेचात्ररक्षास्यादित्यशास्त्रापिभस्मनः राज्यश्रीवृद्धिकामस्तु
मंत्रसिद्धैर्द्विजैर्नृपः कारयेदथवाकर्मस्वयंसिद्धैर्द्विजैर्भवेत् स
यःसिद्धिप्रकारस्तु लक्ष्म्यावापीदत्तंमंत्रं एकरात्रमुपोष्याथविरा
वंसततोजपेत् साध्यसिद्धोभवेदेवंकर्मादौप्रजायते एकाद
शाहजन्मानोरुद्रंकृत्वाश्रुताहुतीः दधिमध्वाज्यसंश्लेषैर्जुहुयुःक
मलैःसितैः एवंकृतेराज्यलक्ष्मीर्वर्धतेनात्रसंशयः आयुष्कामो
महीपालःकारयेदयुतंहुतिम् दूर्वाणामाज्यसिक्तानामेवंजीवे
च्चिरंनृपः अथराज्ञोजन्मदिनेराजतान्कलशाञ्शुभान् ताम्रेण
निर्मितान्वापिसहस्राष्टकसंमितान् अष्टोशतानिवापाथःप
रिपूर्णान्विनिक्षिपेत् नववस्त्रेणतान्सर्वान्वेष्टयेच्चइष्टवरयुक्
देवंतेषुसमाराध्यशान्तकृत्तोभिमंत्र्यच आचार्यःस्नपयेद्भूपंकुं
भांभोभिःइष्टवरयुक् एवंकृतेमहीपालोमुच्यतेसर्वकिल्बिषैः
अथराज्ञोभिषेकार्थंसहस्राष्टकसंख्यया कारयेज्जपमेकेनविप्र
वर्येणनित्यशः शांतिवृद्धिर्भवेदेवमनेनजपकर्मणा शांति
सिद्ध्यैमहीपालोरत्नागारादिमध्यतः वाहनाश्वशालासुका
रयेन्मासिमासिच शांत्यर्थमयुतान्यत्याज्यहोमंचकारयेत् आ
युष्कामोमहीपालोऽप्ययुतंहोममाचरेत् अश्वत्थसमिधस्तद्द
पामार्गैद्वावापि दधिमध्वाज्यसंश्लिष्टाहोमद्रव्यमितिस्मृतम्
गतायुषोप्यनेनायुर्वर्धतेहोमकर्मणा एतेचव्यवहारेचमंत्र

मेतंजपेन्नरः एवंकृतेप्रजायेत कर्मण्यत्रापराजितः सुवर्ण
कामनायस्य सत्रिरात्रमुपावसेत् निरंतरंजपंकृत्वा चरुभोजी
ततोघृतम् जुहुयान्मधुरक्तानिविल्वान्येवंकृतेततः सुवर्ण
नांसहस्राणिलभतेनात्रसंशयः कन्याकामस्तुजुहुयादष्ट
तंकुसुमान्यसौ दधिमध्वाज्ययुक्तानिविन्दतेकन्यकांशुभां
अथान्यदुच्यतेचात्रचरुभोजीतवत्सरम् नित्यमष्टसहस्रा
णिजुहुयात्तीयपावके अष्टौशतानिवाद्रव्यंकापिलंघृतमु
च्यते एवंकृतेप्रमुच्येतमहतःपातकादपि वश्यकामोमन्त्र
यजमभिमंत्र्यललाटके धारयेच्चंदनस्तेदंसर्वेवश्याभवंतिहि
प्रतिसृजन्मभेहोमंकुर्यादष्टसहस्रकम् होमद्रव्यमपामार्ग
समिधोनेनकर्मणा अपमृत्युंनविंदेतदेवदेवप्रसादतः वृ
ष्टिकामःसूर्यवारेमंत्रेणानेनभास्करं आराधयेज्जपाद्यैश्चरत्न
नैरत्रकर्माणि रक्तोसीरोरक्तवासारक्तगंधानुलेपनः भूत्वाएव
यंकृतेसूर्योमहावृष्टिंप्रमुंचति योदूरमार्गगामीस्यादृहीत्वाद
शशार्करा अष्टसाहस्रिकातुम्यातमभिमंत्र्यचताःपुनः विन्य
स्यदिक्षुदशास्वगच्छेत्क्षेमीततोभवेत् सत्कर्मणासमारंभे
सर्वविघ्नजिघृत्या अयुतंतंजपेदेवमतंगच्छेत्तत्कर्मणाम्
पुत्रकामस्तुजुहुयाल्लक्षमाज्येनसंयुतम् ततोवंशकरंपुत्रंगु
णिनंलभतेध्रुवम् यंयंजनंछेन्तुमिच्छेत्तंतं तंवेसिकताकृतिम्
विधायतत्प्रतिकृतिंशिरसिस्थितायुतंजपेत् अवश्यंकर्मणाते

म॰
क॰
९१

९१

नेसर्वत्रविजयीभवेत् दशाननमेकादशधाविभक्तं देहंविशुद्ध
स्फटिकप्रकाशम् तेजोनिधिंज्वलिनमिंदुमौलिंविचिंतयेद
त्रसदेवरुद्रम् इतिनमकेष्वानन्तोकेइत्यस्यप्रयोगः अथा
वांतइत्यस्यप्रयोगः दिनत्रयमुपोष्याथत्रिरात्रंसततंजपेत्
पुरश्चरणमेवंस्यात्प्रयुंजीताथकर्मसु आयुष्कामःस्वकीया
न्नैनित्यवज्जुहुयाद्धुतम् अष्टोत्तरसहस्राणिपिवातथैवाष्टशता
निवा दधिमध्वाज्यष्टकानांदूर्वाणामयुताहुतीः दूर्वांकानीत्या
जुहुयादेवमायुःप्रवर्धते अथापरःप्रयोगोयंप्रतिजन्मदिनमा
त्मनः प्रत्याद्रीभंचकुर्वीतजपमष्टसहस्रकम् प्रत्याद्रीभंप्रति
द्रव्यंजुहुयादयुताहुतीः होमद्रव्याणिदूर्वाश्चतथापामार्ग
संभवाः शमीतरुसमुद्भूताःसमिधश्चतिलास्तथा एतान्या
ज्यानिदध्याज्यमधुभिःस्वगृहेनिशि यावत्संचसहस्राणिजपे
द्यावत्प्रदक्षिणम् कुर्यादेवंकृतेदीर्घमायुःप्राप्नोत्यसंशयम्
चिरंजीवनकामस्तुराजाजन्मदिनेव्रतम् जुहुयाद्वक्ष्यमाणै
स्तद्रव्यैःप्रत्येकमादरात् दधिमध्वाज्यसंसृष्टकाश्चापामार्गश
मीतिलाः दूर्वाश्चापिचहोमांतेद्रव्याण्येतोदितानिवै अनेन
कर्मणाराजादीर्घमायुःप्रविंदति वह्निहोमेष्वशक्तानांहो
मःस्तोत्रसिजायते होममात्रेष्वशक्तानांजपएवेष्टसाधनम्
लक्ष्म्यायुष्कामनायस्तुजुहुयादयुताहुतीः मध्वाक्तैस्तंदुलैः
सुष्कैर्वर्धतेतेजआयुषी श्रीकामोर्कस्यकुसुमैराप्लुतैःपूजयेच्छि

वम् उच्चारयन्नमुंमंत्रमेकैकंजुह्मंत्रयेत् अनेनकर्मणा
लक्ष्मीवर्धतेनात्रसंशयः आलयेपश्चिमद्वारि देवस्याचाल
येपिवा मत्याईमं ब्रह्मचारीभूयात्संयतेंद्रियः विगतक्षार
लवणंचरुभोजीजपेन्मंत्रं अमितस्तमहेशानमेकमेकंस
हस्रकम् एवंकृतेशताब्दस्तुभवेत्समहाजन्मस्य सर्वेकाहा
रनियमेलक्ष्मीकोभेत्समाचरेत् कुर्वाणः सन्निधौदेव्यानित्य
मानंदतांडवम् हुताशनपरंध्यायेत्तमकांचनसन्निभम् इ
तिनमकेशवांतस्यप्रयोगः अथस्तादिप्रोक्तमित्यस्यप्र
योगः एकरात्रमुपोष्यायविरात्रंसततंजपेत् कुसुमस्मरणमे
वंस्यात्प्रयोगस्ततोभवेत् विद्विष्टनाशकामस्तुजुहुया
त्सहस्राहुतीः विषतैलसमाक्तास्तुविकंकततरूद्भवाः सन्नि
धौद्वयमत्रस्यात्श्मशानाग्नेर्द्वतिर्भवेत् शत्रवोनाशमायां
तिवेगेनानेनकर्मणा अथान्यदुच्यतेकर्मतत्रदेवस्यसन्निधौ
भस्मपाणिःसपत्नस्यनाममयहृतणश्चवकम् अविर्धजेदमुंमंत्रं
संख्यातुत्र्यायुतंभवेत् एवंकृतेरिपोर्देहेज्वरोवैजायतेमहान्
सेतसिद्धार्थकैःस्नुहीन्जुहुयादयुताहुतीः मसूरिकाख्योजाये
तरोगःशात्रवगात्रके शत्रोर्गृहेथवातस्यदेशादिष्वपिवापठ
न् ख्यापयित्वातत्तन्निवेनेदमुंमंत्रमुदीरयेत् शर्कराचतथा
कल्याणीमास्याद्विकलितम् एवंकृतेसपत्नस्यनाशोवं
शेभिजायते उद्यद्भास्करकोटिप्रकाशमाकाशानिलयमाति

भीतम् भीतिहरमभयवरदं ध्यायेद्रुद्रं स्वशरीरेऽच्युतम् इति स्व
हिक्रतमित्यस्य प्रयोगः शरभात्मा महेशानो ध्यातव्य इति च
अथ परिणो रुद्रस्येत्यस्य प्रयोगः कृच्छ्रमेकं चरित्वाथ जपे
त्त नववासरान् तत्र प्रतिदिनं पंच सहस्राणि जपो भवेत्
पुरश्चरणमेव स्यादथ चेत्तत्र कामना देवानलसमालीढ
पालाशखदिरोद्भवाः समिधो दधि मध्वाज्य हुत्वा वैश्वानरे घृ
तम् जुहुयात्साग्निमहारे महेशस्यालये शुभे एतत्कर्म सहस्र
संख्याकर्मणानेन वै ध्रुवम् लभेत रुद्रसदृशं पुत्रं वंशकरं
परम् अथापरः प्रयोगोऽत्र प्रारंभः स्यादमादिने कृत्वाष्टम्या
मुत सौम्यमार्द्रायामपि भेतथा भवेतां दम्पती तत्र हविष्य
भक्ष भोजिनौ स्वगृहे वाथवा गोष्ठे छायायां पिप्पलस्य वा
कर्मैतदाचरेत्तस्य प्रक्रियैषा प्रकीर्तिता मंत्राक्षराणि यावं
ति तावतः कलशान्शुभान् मंत्रभिर्वेष्टितांस्तीर्थपाथसाप
रिपूरितान् वर्त्तलं स्थापयेन्मध्ये तेष्वेवैकं महद्दृढम् अथैर
लं निधायात्र सोममावाहयेद्बुधम् आयातु भगवान्देवः
कैलासादिति चाध्रुवम् आवाह्य गंधपुष्पाद्यैरभ्यर्च्य च ततः
परम् आरभ्य मध्यकलशं कलशे कलशे पुनः मंत्राद्दिनोऽविं
डयुतं न्यसेदक्षरमक्षरम् ततो नवसहस्राणि जुहुयाद्दृष्ट
संख्यया ततः प्रकाशने जायापती संस्थाप्य संयतौ मध्या
दिक्रमतः कुंभगंधांभोभिः सविष्टैः तत्र दत्तारूपेण संस्न

रन्यार्वतीपतिम् स्नापयेत्तीर्थदंभोभिर्ब्राह्मणानथभोज
येत् अष्टौसहस्राणि अथवा तावंत्येव शतानि च एकादशां
तादहानि स्नापयेच्छक्तितो द्विजान् तत्कुंभवस्त्रभोगादीना
चार्याय समर्पयेत् कृत्वंते भोजयित्वास्मै दद्याद्दक्षिणां निष्कपं
चकम् दद्यान्निष्कत्रयं वाथ भुंजीयातां तद्दंपती एतयोस्त
भवत्पुत्रो दीर्घायुः सद्गुणालयः पूर्वोक्तकर्माशक्तश्चेत्पश्चि
महाद्वारसंयुते महेशस्यालये मंत्रं जपेदयुतसंख्यया ततो
जपेद्गुरुं मंत्रमहोरात्रं प्रदक्षिणम् कुर्यात्तत्रोदयादस्तमय
मस्तादथोदयम् तत्र विघ्नाः प्रजायंते तेन स्याद्विघ्नेशमर्चयेत्
पुरश्चरणसिद्ध्यर्थं कर्मैतत्सर्वकामदम् अन्यथाविपरीतं
स्यात्कुर्वंयत्नेन पूजयेत् तथापरः प्रकारोत्र दीक्षायादिवसा
न्नित्य अष्टौशतानि वाथैकं चत्वारिंशद्दिनानि वा किंवैकविं
शतिस्तत्र पश्चिमद्वारसंयुते देवालये प्रतिदिनं चरुभोजी ज
पेन्मंत्रं अष्टौशतानि तावत्यः प्रदक्षिणक्रमात्क्रियाः अश्वत्थ
द्रुममूलानि द्वाविंशद्गम्यानि यानि वै तान्यवेत्य जपेन्मंत्रं साय
कोष्टसहस्रकं तेषु सर्वेषु तन्मूलादारभ्याष्टसहस्रकम् ज
पेद्यावंति मूलानि तत्र तत्र पृथक् पृथक् अथाश्वत्थं च तद्दि
नसहस्राण्यष्टसंख्यया दिने दिने जपेन्मंत्रमेवं कर्म समाप
येत् दीक्षितो ब्राह्मणांस्तावद्भोजयेत्तर्पयेदपि एवं कृते वंश
करं पुत्रमिष्टं लभते सुतम् गजचर्मावृतनंतं सस्फुरत्प्रहरणोज्ज

म॰ क॰ ९३

93

ले सर्वपापहरं देवं ध्यायेत्कंजारभेदिनम् इति परिणो रुद्र
स्येत्यस्य प्रयोगः अथ मीढुष्टमेत्यस्य प्रयोगः एकरात्रं जपे
त्पंचसहस्राणि समंततः पुरश्चरणसिद्धिः स्यात्प्रयोगार्हस्त
तो भवेत् अर्थनाशभये प्राप्ते तथैव प्राणसंशये तस्करादि
भये चैव जुहुयात्सर्पिषाहुतीः पंचैव तु सहस्राणि भयेभ्यो मु
च्यते भृशम् मंगलायतने देवं युवानमतिसुन्दरम् ध्याये
द्वनचराकारमागच्छंतं पिनाकिनम् इति नमके मीढुष्ट
मेत्यस्य प्रयोगः अथ विकिरिदेत्यस्य प्रयोगः त्रिरात्रं चरु
भोजी सन्सहस्राणि दशैव तु जपेन्नरं नेकवीतसहस्राणि
दशैव तु प्रदक्षिणान्यघ्रं मंत्रं जपन्नेव शिवालये पुरश्चर
णसिद्धिः स्यान्मुंजीताथ कर्मसु महाजनविरोधेन विरो
धस्योपशांतये दधिमध्वाज्यसंसृक्ता यज्ञांगसमिधो विल्वाः
अग्नौ जुहुयाद्देवं भयं तेभ्यो न जायते जेतुकामस्य सर्वान्वै
अपामार्गसमिद्धुतिम् शतसाहस्रिकं कुर्यात्समिधस्तास्तु
सर्पिषा कापिलेन समाक्ताः स्युरेवं सर्वजयो भवेत् तिरस्का
जेतुकामस्य समिधो विल्वभूरुहात् दधिमध्वाज्यसक्तानां जु
हुयाल्लक्षमाहुतीः एवं कृतावराहादिवश्यमाप्नोत्यसंशयं
सलिलं जेतुकामस्तु जलमध्ये तु पावकम् स्थापयित्वा का
पिलेन सर्पिषा लक्षमाहुतीः जुहुयात्कर्मणानेन भयमेभ्यो न
जायते यद्यजेतुमतिस्तत्र नामग्रहणपूर्वकम् कापिलाज्येन

जुहुयाल्लक्षमेकमतंद्रितः यस्तु हि स्यभवेद्धोमो भयं तस्मान्न
विद्यति प्रसन्नवदनं शंभुं ध्यात्वा तोहाङ्कमंडलम् उमयासहि
तं ध्यायेत्सुरसंघैरभिष्टुतम् इति नमकेषु विकरणोत्यस्यप्र
योगः अथ सहस्राणि सहस्रशेत्यस्य प्रयोगः कुंभमेकं च
रित्वादौ जपेत्तं च सहस्रकम् भूयस्करणमेवं स्यात्पुत्रजीनाथ
कर्मस्य सविवादिप्रथानानां पुरुषाणामुपद्रवे तच्छांतये
महीपालः कारयेदयुतं हुतिम् समिधस्तत्र शाल्मल्यो विकं
कतभवास्तथा व्रीहयश्च यवाश्चापि होमद्रव्ये तिलाश्चापि
सर्वमेतद्धुताकं स्यात्स्थान्त्येवमुपद्रवाः अथो मारणकामस्य
स्थानपुरुषस्य समीपे दक्षिणामूर्तेर्जपेच्छतसहस्र
कम् ततो वल्मीकसंभूतं मृदा लिंगं प्रकल्प्य च मंत्रेणाने
नाभिषिंचेद्यावच्छीर्णं भवेद्धि तत् एवं कृते भवेन्मृत्युः प्रथा
नपुरुषस्य तु यदि वा मरणादेनं रक्षितुं कांक्षिते तदा आद
यतां मृद्देशीर्णामापगायां विनिक्षिपेत् तत्तीरेऽथ स्वको वाग्नौ
जुहुयादयुताहुतीः होमद्रव्यं भवेदत्र चूतकाः शुक्लतंडुलाः
मरणोपशमस्तस्य जायते तेन कर्मणा महाकांतारगामी
तत्कृतामंत्राभिभाषणम् अष्टसाहस्रिकाहुत्या तेन गात्रा
लेपनम् कृत्वा गच्छेत्ततस्तस्य भीतिरपि न जायते रक्षोभ्यो भ
यकामस्तु संध्यावेडालमामिषम् बलिं हरेच्चतुर्दश्यां कृष्णायां
निशि संयतः बलिदेशः श्मशानं स्याद्देवं रक्षोभयं न हि उग्र

शान्तकरपालकोपे महतिशांतये सौवर्णं शासनं कृत्वा जुहु-
यात्तत्समित्रिधौ अष्टौ सहस्राण्याज्येन जुहुयात्स्याभिवेणात व
लिं हरेत्कृते चेत्थं शासकादिः प्रमुच्यते दक्षिणासम्प्रदायेन देया
स्यादत्र कर्मणि अजाविभिः साविभज्यास्यात्तत्तत्कर्मानुसारतः
निष्कत्रयमुतैकं वा निष्कं हैमं तु दक्षिणा वसनाद्यपि देयं स्या
द्दक्षिणा तु स्वशक्तितः अथवोपद्रवाविष्टौ जुहुयात्तस्य शांतये
सर्पिषाष्टसहस्राणि नश्येयुस्ते उपद्रवाः सर्वपापहरं देवं स
र्वाभरणभूषितम् सर्वोपद्रवसंध्यायेत्सर्वलोकमहेश्वरम्
इति सहस्राणि सहस्रयेत्यस्य प्रयोगः नमकेषु दशमोनुवाकः
अथ सहस्राणि सहस्रश इत्यास्य च तस्याणि प्रयोगः अत्र
अरुकृत्वष्टयमप्येककर्मसाधनम् चान्द्रायणं चरित्वादौ जपे
त्संवत्सरसकम् पुरश्चरणसिद्धिः स्यात्सर्वं जीनाथ कर्म तु
आभिचारिककामस्तु राजा होमं प्रकारयेत् स्वदेशजाते विप्रै
स्तत्तत्संख्याहुतिर्भवेत् शाल्मलीशालवेणूनां वेत्रस्य च रस
स्य च समिधस्तर्कमूलेन वेष्टिताः शशकस्य च रक्तेनाक्ता र
हुयात्ता होमद्रव्यं तथा पुनः किंचसिक्तेन सक्तेणा पिष्टेन दधि
पद्माकृतिः कृत्वा क्रमेणानाच्छिन्नासहस्राष्टकसंख्यया जुहु
यादित्यमाचीर्णे शत्रवो नाशमाप्नुयुः अभिचारदिनेष्वेतैर्मन्त्रैः
कृत्वा दिने दिने जुहुयात्संचसाहस्री होमद्रव्यमथोच्यते द
धिमध्वाज्यसंसृष्टा दूर्वा इत्थं कृते मति राज्ञः कार्यायिनस्तस्य

दोषाः स्युर्नाभिचारिकाः दंष्ट्राकरालवदनं ज्वलज्ज्वलनमू
र्धजम् विश्राणं त्रिशिखं देवीं ध्यायेद्भुजगभूषणाम् इति सह
स्राणि सहस्रशश्चेति चतसृणामृचां प्रयोगः अथ येह देवि
त्यारभ्य तिसृणां प्रयोगः अस्य पुरश्चरणादि सर्वं पूर्ववज्ज्ञेयम्
अथ येपथीनामिति द्वयोः प्रयोगः कृच्छ्रमेकं चरित्वादौ जपे
त्पंचसहस्रकं पुरश्चरणमेवं स्यात्प्रयोगोथाभिधीयते पुत्र
कामः स्वदाराणामृतौ गमनवासरे स्नात्वाष्टसहस्राणि जु
हुयाद्धव्यमेतत् कापिलाज्यविमिश्रं तु कापिले पयसोच्यते
हुत्वैवमृतगामी स्यात्पुत्रो वंशकरो भवेत् महातीर्थफलेप्स
र्जुहुयात्तिलतंडुलैः हुत्वा चाष्टौ सहस्राणि गच्छेत्तीर्थम
नालयम् तीर्थे स्नात्वा गृहानेत्य स्नात्वेमाराध्य वै ततः वा
ग्यमोपि सृजेत्तीर्थफलमस्त्वेव यथार्थतः ध्यानं सहस्राणि स
हस्रशः इत्यत्रोक्तं यथा स्यात् इति येपथीत्यनयोः प्रयोगः अथ
यत्तावंतेत्यस्य पुरश्चरणादि येपथीत्यत्रोक्तमनुसंधेयम्
अथो नमो रुद्रेभ्य इत्यारभ्या समाप्तेर्यजुर्मंत्रस्य प्रयोगः गृ
हीत्वा संयतो दीक्षां दिवसे चैकविंशतौ प्रथमे पंचमे तु गव्यं
द्वितीये भक्षयेत्फलं अथोपवासः पश्चाच्च पूर्ववत्पंचकद्व
यम् एवं कृत्वा ततः पश्चाद्धविष्याशी सदा जपेत् तावंति दिव
सान्येव ततः पंचदिनानि तु गलद्घ्नजले स्थित्वा जपेत्ता
श्चैकवासरम् अघमर्षणकर्मोक्तविधिना संयतो जपेत्

म॰
क
९५

९६

दद्यात्स्वर्णनिष्कांश्चाचार्याय दक्षिणाम् शुश्रूषां चापि
कुर्वीत द्रव्यलाभे न तत्समम् एवं कृते भवेत्सिद्धिः पुरश्चरणक
र्मणः अन्नकामः स्वकीयाग्नौ नित्यं जुहुयाद्धुतम् संख्यात
ष्टसहस्राणि भवेदन्नैः शतान्विता यावज्जीवं लभेतान्नं बह्वा
नेन कर्मणा अथापरः प्रयोगोत्र दर्शे स्नात्वोडुतिर्भवेत् द्रव्यं
नकापिलेसर्पिः संख्यातष्टसहस्रकम् अथर्वशिरसि प्रोक्तं वि
धानेनार्चनं भवेत् तत उत्पद्यते कन्या रक्तांगी रक्तमूर्धजाः
रक्तनेत्रत्रये सर्वैस्ताधयेत्स्वात्मसंमतम् कर्मणोस्य समारंभे
अजारुधिरसंसिक्तान् चतुरः कलशांस्तत्र स्थापयित्वाभिसंयतः
तर्पयेदन्यथात्मानं नाशयेन्नैव संशयः भवेद्यस्य कालाज्ञा
नकामना संयताहुतीः जुहुयात्सर्पिषा वह्नौ कालज्ञानं ततो
भवेत् जातिस्मरणकामस्तु जुहुयादयुताहुतीः पयसाका
पिलेनैव क्रमाज्जातिस्मरो भवेत् ध्यानप्रकारस्त्वसहस्राणि
सहस्रशश्चान्यत्रोक्तो ज्ञेयः इति नमकेषु नमो रुद्रेत्यस्य प्रयो
गः इति नमकप्रयोगे एकादशोनुवाकः अथ सर्वेष्वेषु प्र
योगेषु दक्षिणायन्नानिरूप्यते दक्षिणा तूत्तमामध्याधमा चे
ति त्रिधा मता तत्र सौवर्णनिष्काणां दशसाहस्रिकोत्तमा त
दर्धं मध्यमा प्रोक्ता तृतीया त्रिसहस्रिका उत्तमा त्रिंशती वा
स्याद्विंशती मध्यमा मता शतमात्राधमा ज्ञेया प्रकारः कीर्त्य
ते पुनः उत्तमा तु चतुःषष्टिस्तदर्धं मध्यमा स्मृता चतुर्विंशति

रन्यास्याद्यथान्योविधिरुच्यते सहस्रंदक्षिणाज्ञेयाशतंरुक
एककर्तृके शतानिपंचदेयानिऋत्विक्चककर्तृके अथैकक
र्तृकेदेयंशतत्रयमितिस्थितिः सर्वत्रदक्षिणांदद्यादाचार्या
यतद्दक्षिणाम् बहुरुद्रघनिष्ठायउत्तमाप्रतिरुद्रकम्
अथैककर्तृकेकर्तुरेकस्यैवोत्तमास्मृता राज्ञांतत्सदृशा
नांचदक्षिणाकथितात्तया अन्येषामप्यसावेवदक्षिणादा
ननिर्णयः अनुक्तदक्षिणाचैवप्रयोगेष्वेवमीरिता विभवेस
तियोमोहान्नकुर्याद्विधिविस्तरम् नैतत्फलमवाप्नोतिप्रलो
भाक्रांतमानसः इतिदक्षिणायत्ना अथन्यस्तानितिरिकोक्ति
प्रत्यवायजिहीर्षया नौमिसंभेरमाथीशचर्मनिर्मितवा
ससम् जयजयमहाभैरवमहाभीमभूतिभूषितकुंडलिक
लितकुंडलालंकृतात्रिनयनचलत्करकरवालभीषितस्मर
स्मरानिखिलनिगमोपनिषद्उपमितकरविगीयमानसव
करनिकरपरिचयविरचितचारुचरणशृंगारकरकमला
कलितकलापसरसिजासनविलासितसमस्तव्यस्तजगद्वि
लासंहारसंभारसन्नद्धनिर्गुणानिरवधिकपरिमाणानी
हारपरीवारमरीचिविरिंचिव्यापारपारीजललितजटा
जूटाभिरामहरद्दुरितहारसुपरदिगंगनासंभोगसरागप
तंगभंगपालिंगितोत्तमांगगंगमध्यनयनमदनदहनमघ
नमनमधुकरपंकारसदृशानिजशृंगसंरावकिंकिणीक

मं० क० ९९

96

णितललितपदाहतिक्लेशनमहीमंडलाधरोजयतिशल्य
यमानतांडवाडंबरफूत्कारोत्कर्षधस्तदैत्यदानवसंघात
निरन्तरान्तरितशान्तान्तःकरणानवरतधाराधरध्वान
गंभीरघर्घरगलगवयहुंकारसंभिन्नगह्वरगुहाराजीवि
राजमानधराधराधीशकन्यकाकांतिसंक्रांतनिजकले
वरैकदेशअखिलजगदाधीशमहेशानमस्तेनमस्तेनम
स्तेनमस्तेनमस्ते आदौकर्मवशाद्देवदाखिलत्रैलोक्य
मूलांकुररूपश्यात्पल्लवितोत्तरंगाविभवश्रेणीसमुन्मेषकम
श्रंतेलोचनमुद्रणाविघटनाभंगीप्रगल्भंमहो भालेलो
चनमुद्रणाविघटनाभंगीप्रगल्भंमहो भालेलोचनमावि
रस्तुपरतःसंसारसंमोहनम् आधारेष्वनुराननस्यकरका
संवड्डपाष्यःस्तेराधेयंगिरिकन्यकाकुचतटाभोगस्यभा
गप्रकृतेः आशापालकमालबालमखिलब्रह्मांडभांडस्थि
तेराशापाशविमोचनायनमतानंदप्रदंतन्महः इतिन
मकानांप्रयोगविधिः समाप्तं सकलश्रीरुद्रविधानम्
महार्णवाख्येमहितेप्रबन्धेमान्यात्तनाम्नोमदनात्मजस्य
सत्कर्मरत्नोपचितेत्रयष्ठस्तंगस्तरंगोयमगात्पगाथः ८
अथषोडशार्चस्यपुरुषस्यविधिः अगविधाने वक्ष्येपुरुष
सूक्तस्यविधानंतत्र्चनंप्रति अग्निकार्यंजपविधिंस्तोत्रंचे
वतदात्मकम् कुर्यादथोक्तविधिनाप्राङ्मुखःशुद्धमान

सः प्रथमो विन्यसेद्वामे द्वितीयं दक्षिणे करे तृतीयं वा
मपादे तु चतुर्थीं दक्षिणे तथा पंचमीं वामजानौ तु षष्ठीं वै
दक्षिणे तथा नवमीं नाभिदेशे तु दशमीं हृदये तथा ए
कादशीं स्कंधदेशे द्वादशीं वामबाहुके त्रयोदशीं दक्षिणे
चास्यदेशे चतुर्दशीं अक्ष्णोः पंचदशीं चैव षोडशीं मूर्ध्नि
विन्यसेत् एवं न्यासविधिं कृत्वा पश्चाद्धोमं समारभेत् होमं
समारभेदित्युपलक्षणम् तस्माज्जपप्रजायां होमे चायमे
व न्यासप्रकारः एवं न्यासविधिं कृत्वा पंचांगानि समाचरेत्
ब्राह्मणोस्येत्यादिकाभिः ऋग्भिः पंचांगकल्पना ब्राह्मणो
स्य मुखमासीदित्याद्याः पंच ऋचः पंचांगन्यासे ग्राह्याः ताश्चा
स्त्राय नमः शिखापादक्रमशः हृदयं शिरः शिखा कवच
मस्त्रं चेति पंचांगानि ब्राह्मणोस्य मुखमित्यृचं पठित्वा हृद
याय नम इति हृदये चंद्रमा मनस इति पठित्वा शिखायै वष
डिति शिखायां सप्तास्यासन्निति पठित्वा कवचाय हुमिति
कवचम् यज्ञेन यज्ञमयजंत देवा इति पठित्वा अस्त्राय फ
डिति चास्त्रम् एतन्न्यासद्वयं संकल्पानंतरं कर्तव्यं तद्य
था अमुकदेशे अमुककाले अमुककामनया पुरुषसूक्तस्य
जपेनामुकेन होमं विष्णोराराधनं वा करिष्य इति संकल्प्य
पूर्वोक्तं न्यासद्वयं विधाय ऋषिदैवतछंदांस्यपि विदित्वा
जपादिकर्म समारंभेत् तत्र यदा जपो होमो वा क्रियते तदा

म· क· ९०

97

दिपरमेशं संसमाराध्य जपो होमश्च कार्य इत्याराधनाप्रका
रोऽभिधीयते प्रथमयावाहयेद्देवमर्चायां तु रूपिणम् द्विती
ययासनं दद्यात्पाद्यं चैव तृतीयया अर्घ्यं चतुर्थ्या दद्यात्पं
चम्याचमनं तथा षष्ठ्यां स्नानं प्रकुर्वीत सप्तम्यां वस्त्रमेव च
यज्ञोपवीतमष्टम्यां नवम्याभरणं तथा दशम्यां गंधदानं
स्यादेकादश्यां च माल्यकम् द्वादश्यां धूपदानं स्यात्त्रयोद
श्यास्तु षोडश स्नानं वस्त्रं नैवेद्यं च दद्यादाचमनीयकम्
दद्यात्पुरुषसूक्तेन यः पुष्पाण्यपः पयो वा अर्चितं तेन वै सर्वं
त्रैलोक्यं सचराचरं दक्षिणेन यथाशक्त्या षोडशेन प्रदाप
येत् शजादि सद्गुणार्थं यादक्षिणा दीयते तां षोडशेन यज्ञे
न यज्ञमयजेतेत्यनेन मंत्रेण दद्यादित्यर्थः ततः प्रदक्षिणं
कृत्वा जपं कुर्यात्समाहितः यथाशक्ति जपित्वा च सूक्तं वा
स्मै निवेदयेत् देवस्य दक्षिणे पार्श्वे कुंडं स्थंडिलमेव वा का
रयेत्प्रथमा चीनप्रोक्षणं तु द्वितीयया तृतीययाग्निमावा
ह्य चतुर्थ्यां तु समिन्धनम् पंचम्या त्वाज्यसंस्कारश्चरोश्च प्र
पणं तथा षष्ठ्यानलस्य मध्ये तु कल्पयेत्पद्ममानसम् चिंत
येत्तत्र देवेशं ज्वालावलिसमप्रभम् विहृतास्यं बाहुशीर्षं
स्मास्यं रक्तलोचनम् बाहौ शीर्षं यस्य पवं देवं ध्यात्वा सप्तम्या
दिभिः पंचभिः ऋग्भिः क्रमेण गंधादि नैवेद्यांतां पंचोपचारां
देवस्यानुज्ञया कुर्यादित्याह ततो गंधं तु पुष्पं च धूपं दीपं

निवेदनम् अनुज्ञाप्यततःकुर्यात्समस्यादियथाक्रमम्
समिधःप्रत्यहंसर्वंजुहुयादभिचारिताः ततोहुतेनजुहुया
द्वरुणेनचततःपुनः एवंहुत्वाततस्तस्यसमीपेस्तोत्रमुच्चरेत्
जितंतेपुंडरीकाक्षनमस्तेविश्वभावन नमस्तेस्तुहृषीके
शमहापुरुषसर्वज्ञ नमोहिरण्यगर्भायप्रधानाव्यक्तरू
पिणे ॐनमोभगवतेवासुदेवायतत्वज्ञानप्रभाविणे दे
वानांदानवानांचसामान्यमधिदैवतं सर्वदाचरणद्वंद्वं
व्रजामिशरणंतव एकस्त्वमस्यलोकस्यस्रष्टासंहारकस्तथा
अध्यक्षश्चानुमंताचगुणमायासमावृतः संसारसागरंघो
रमनंतंक्लेशभाजनम् त्वामेवशरणंप्राप्यनिस्तरंतिमनी
षिणः नतेरूपंनचाकारआयुधानिनचास्पदम् तथापिपु
रुषाकारोभक्तानांत्वंप्रकाशसे नैवकिंचित्परोक्षंतेपरो
क्षोसिनकस्यचित् नैवकिंचिदसिद्धंतेनचसिद्धोसिकस्य
चित् कार्याणांकारणंपूर्वंवचसोवाच्यमुत्तमम् योगिनां
परमांसिद्धिंवदंतिपरमंविदुः अहंभीतोस्मिदेवेशसंसारेस्मि
न्भयावहे पाहिमांपुंडरीकाक्षनजानेशरणंपरम् कालेषु
पिचसर्वेषुदिक्षुसर्वासुचाच्युत शरीरेचगतौचापिवर्ततेमे
महद्भयम् त्वत्पादकमलादन्यन्नमेजन्मांतरेष्वपि निमित्तं
कुशलस्यास्तियेनगच्छामिसद्गतिम् विज्ञानंयदिदंप्राप्तं
यदिदंज्ञानमर्जितम् जन्मांतरेपिमेदेवमाभूदस्यपरिक्षयः

म॰
क॰
९८

९८

दुर्गतावपि जातायां त्वं गतिस्त्वं मतिर्मम नार्थये यदि चाविन्देयं
तावतास्मि कृते सदा अकामकलुषं चित्तं मम ते पादयोः स्थिते
कामये वैष्णवत्वं च सर्वजन्मसु केवलम् इत्येवमनया स्तुत्या स्तु
त्वा देवं दिने दिने किंकरोस्मीति चात्मानं देवायैव निवेदयेत् जि
तं ते पुंडरीकाक्षेत्यारभ्यैतावत्पर्यंतं स्तोत्रं अथ फलविशेषादि
ति कर्तव्यता विशेषप्रशंसा पुरुषसूक्तेः सूक्तं स्वर्ग्यं धन्यं यश
स्करम् आत्मज्ञानमिदं पुण्यं योगज्ञानमिदं परम् फलाहारो
जपेन्नित्यं पयपन्नात्मानमात्मवित् फलानि भुक्त्वोपवसन्मास
मद्भिश्च वर्तयेत् अरण्ये निवसन्नित्यं जपन्निममृषिं मुनिः ऋ
ग्भिस्त्रिषवणं कालो स्नायादेव समाहितः ऋषिर्मंत्रः इममृषिं
पुरुषसूक्तात्मकम् ऋग्भिस्त्रिषवणमिति पुरुषसूक्तांतर्ग
ताभिः समस्ताभिः ऋग्भिः स्नानकाले एताभिर्ऋग्भिर्मार्जनम
घमर्षणं च यथाशक्ति कुर्यादित्यर्थः आदित्यमुपतिष्ठेत सूक्ते
नानेन नित्यशः आज्याहुतीरनेनैव हुत्वेव चिंतयेद्धरिम् ऋ
षिः सूक्तद्रष्टा नारायण एव तं चिंतयेदित्यर्थः एवं मासं फला
हारं कृत्वा त्रीणि वर्षाणि फलाहारः सम्यो हर्षः सूक्तं जपेत् शाक
श्चेद्द्वादशवर्षाण्येवं कृते साक्षाद्देवो द्रष्टव्य इत्याह ऊर्ध्वं मासात्
फलाहारास्त्रिभिर्वर्षैर्जपेदिदम् तद्भक्तस्तन्मना युक्तो दशव
र्षाणि तन्मयभाक् साक्षात्पश्यति तं देवं नारायणमनामयम्
ज्ञानसत्यं परं सूक्ष्मं व्याप्य सर्वमवस्थितम् आत्मस्थं नयत्नेन

स्रष्टारं जगतोव्ययम् अथवासाध्यमानोपिभक्तिंतुपरिर
रयेत् भक्त्यातुकंपीभगवाञ्जायतेतुरुचोनमः येनयेनच
कामेनजपेत्प्रयतःसदा ससकामःसमृद्धःस्यात्तुदध्यान
स्यकुर्वतः होमंवाप्यथवाजप्यमुपहारमथोचरुम् कुर्वीत
येनकामेनतत्सिद्धिमुपधारयेत् जानितिश्रेयसंमहद्दिव्यंयशो
लोकेपरांगतिम् पापेनविप्रमोक्षश्चभवेत्सर्वेनसंशयः अ
थाभिधीयतेकर्मपुत्रकामस्यवैस्नवम् शुक्लपक्षेशुभेवारे
सनक्षत्रेसुगोचरे द्वादश्यांपुत्रकामस्तुचरुंकुर्वीतवैस्नवम्
दंपत्योरुपवासःस्यादेकादश्यांसुरालये ऋग्भिःषोडशभिः
सम्यगर्चयित्वाजनार्दनम् चरुंपुरुषसूक्तेनश्रपयेत्पुत्रका
म्यया प्राप्नुयाद्देसवंपुत्रमाचिरात्संततिंतमम् चरुंपुरुषसू
क्तेनसहस्रलोकविधिनापायसचरुंश्रपयित्वापश्चात्पुरुषसू
क्तेनचरुंजुहुयात् सूक्तेनेत्येकवचनात्सकलमपिसूक्तम
विछिन्नंहोमसाधनंनप्रत्येकमृचोहोमसंख्याचसहस्रमेतद
ष्टशतमितोजपः अयमर्थः शुक्लैकादश्यामुपक्रम्याष्टोत्तरंज
पित्वाशुक्लैकादश्यांदम्पतीउपोष्यद्वादश्यांचरुंश्रपयित्वास
हस्राहुतीर्जुहुयादिति अथापरःप्रकारोयमेकादश्यामभो
जनं दम्पत्योःपौरुषंसूक्तंनित्यकर्माविरोधिनि कालेजपे
दिदंसूक्तमेकादश्यांनिरंतरम् द्वादश्यांप्रयतोश्नीत्वापयसा
निर्वपेच्चरुम् एवमित्येकादश्यामुपवासादिकंकर्तव्यमित्यर्थः

म॰
क
९९

99

हुत्वाज्यंविधिवच्चात्रऋग्भिःषोडशभिर्नृपः उपस्थानंकृत्वा
शास्येतिवाक्यशेषः अग्न्युपस्थानेचाग्नेयैर्मंत्रैर्हविर्होमंततः
कुर्यात्सत्वचंवाग्यतःशुचिः हविःशेषंनमस्कृत्वानारीनारा
यणंपतिम् भक्षयित्वाहविःशेषंलब्ध्वाशीःसंविशेत्क्षणम्
हविःशेषंभक्षयित्वेत्यनेनैववक्ष्यवाक्यविशिष्टप्रतिपत्तिक
र्मणःसिद्धेलब्ध्वाशीति अनेनैनयोनयति द्वादश्यांभोजनप
रित्यागेनपत्नीहविःशेषमेव लब्ध्वयथातथांभुंक्तेइति संवि
शेत्क्षणमितित्क्षणंवामशायिनीभूयादित्यर्थः ततःकृत्वादि
कंकर्मकर्तव्यंद्विजतर्पणम् द्वितीयोस्त्रीनगच्छेत्यावद्गर्भे
नविंदति अनेकभार्याभिःसहकर्तृत्वेनदोषोन्यभार्यासंगमे
पियदात्वस्मिन्कर्मण्यत्रप्रविष्टाभार्याचरतुमतीस्यात्तदापिक
र्मण्यत्रप्रविष्टायावद्गर्भंनविन्दति तावदन्यांनोपेयात्मंत्रव
तःशुक्रस्यान्यत्रगर्भाधानासमर्थत्वात् मंत्रसंभृतवीर्यस्यान्यत्र
निषेकेमहाननधिकारित्वात् गर्भाग्रदयाच्चएवंदृष्टेत्वनिमि
त्तादन्यस्त्रीगमननिषेधस्यचरितोभार्यामुपेयादितिनिय
मातिक्रमदोषोस्त्येव किंचस्मृतिपुराणादिषुस्मृतेः प्रागल्भ्या
दस्येवनियमातिक्रमदोषः तथाहि वर्णिनांहिवधोयत्रतत्र
स्नात्स्नंतंवदेदित्यनेनन्यायेनस्वल्पप्रायश्चित्तीभवति कु
तःउक्तार्थमेवान्यभार्यागमननिषेधात् भ्रूणहत्यामवाप्नुया
दितिभ्रूणहत्याप्रायश्चित्तस्यनातिमितीश्रापित्वनियमातिक्र

ममात्रजन्मदुरितयोगात्स्वल्पप्रायश्चित्तनिमित्तीभूतः पा
षष्ठेके एवमेकं प्रजापत्यं कल्पयेत् शक्तस्य अशक्तस्य त्रिरात्र
द्विरात्रादि प्रकृतमनुसरामः अथवाम्रतउच्चावच्यावत्कन्यां
प्रसूयते द्विप्रंमाजनयेत्स्वअमरव्यंगोयथाब्रवीत् इत्या
दिऋषिविधानप्रोक्तः पुरुषसूक्तविधिः अथार्घादिषोडश
पुरुषसूक्तस्य नारायण ऋषिः पुरुषो देवता अनुष्टुप्
छंदः अंत्यात्रिष्टुप् जपे होमे अभिषेके चार्चाविनियोगः अथ सू
क्तम् सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् स भूमिं वि
श्वतो वृत्वात्यतिष्ठद्दशांगुलम् १ पुरुष एवेदं सर्वं यद्भूतं यच्च
भव्यम् उतामृतत्वस्येशानो यदन्नेनातिरोहति २ एतावा
नस्य महिमातो ज्यायांश्च पुरुषः पादोस्य विश्वा भूतानि त्रिपाद
स्यामृतं दिवि ३ त्रिपादूर्ध्व उदैत्पुरुषः पादोस्येहाभवत्पुनः त
तो विष्वं व्यक्रामत्साशनानशने अभि ४ तस्माद्विराडजायत
विराजो अधिपूरुषः सजातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ५
यत्पुरुषेण हविषा देवा यज्ञमतन्वत वसंतो अस्यासीदाज्यं
ग्रीष्म इध्मः शरद्धविः ६ तं यज्ञं बर्हिषि प्रौक्षन्पुरुषं जातमग्र
तः तेन देवा अयजंत साध्या ऋषयश्च ये ७ तस्माद्यज्ञात्सर्व
हुतः संभृतं पृषदाज्यम् पशूंस्तांश्चक्रे वायव्यानारण्यान्ग्रा
म्याश्च ये ८ तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे छंदां
सि जज्ञिरे तस्माद्यजुस्तस्मादजायत ९ तस्मादश्वा अजायत

म०
क०
१००

100

ये केचोभयादतः गावोह जज्ञिरे तस्मात्तस्माज्जाता अजावयः
१० यत्पुरुषं व्यदधुः कतिधा व्यकल्पयत् मुखं किमस्य कौ बा
हू का ऊरू पादा उच्यते ११ ब्राह्मणोस्य मुखमासीद्बाहू राजन्यः
कृतः ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत १२ चंद्रमा म
नसो जातश्चक्षोः सूर्यो अजायत मुखादिंद्रश्चाग्निश्च प्राणाद्वा
युरजायत १३ नाभ्या आसीदंतरिक्षं शीर्ष्णो द्यौः समवर्तत
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकमकल्पयत् १४ सप्तास्या
सन्परिधयस्त्रिसप्त समिधः कृताः देवा यद्यज्ञं तन्वाना अब
ध्नन्पुरुषं पशुम् १५ यज्ञेन यज्ञमयजंत देवास्तानि धर्माणि प्र
थमान्यासन् ते ह नाकं महिमानः सचंत यत्र पूर्वे साध्याः सं
ति देवाः १६ इत्याश्वलायनपाठानुसारेण पुरुषसूक्तम्
अथ विष्णुसहस्रनामानि वैशंपायन उवाच ॐ श्रुत्वा धर्मा
न्यशेषेण पावनानि च सर्वशः युधिष्ठिरः शांतनवं पुनरेवा
भ्यभाषत किमेकं दैवतं लोके किं वाप्येकं परायणम् स्तुवं
तः कं कमर्चंतः प्राप्नुयुर्मानवाः शुभम् को धर्मः सर्वधर्माणां
भवतः परमो मतः किं जपन्मुच्यते जंतुर्जन्मसंसारबंधनात्
ॐ विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः भूतकृद्भूतभृद्भा
वो भूतात्मा भूतभावनः १ पूतात्मा परमात्मा च मुक्तानां परमा
गतिः अव्ययः पुरुषः साक्षी क्षेत्रज्ञोक्षर एव च २ योगो योग
विदां नेता प्रधानपुरुषेश्वरः नारसिंहवपुः श्रीमान्केशवः पु

ष्णोनमः ३ सर्वः शर्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः
संभवो भावनो भर्ता प्रभवः प्रभुरीश्वरः ४ स्वयंभूः शंभुरादि
त्यः पुष्कराक्षो महास्वनः अनादिनिधनो धाता विधाता धातुरु
त्तमः ५ अप्रमेयो हृषीकेशः पद्मनाभोमरप्रभुः विश्वकर्मा
मनुस्त्वष्टा स्थविष्टः स्थविरो ध्रुवः ६ अग्राह्यः शाश्वतः कृष्णो
लोहिताक्षः प्रतर्दनः प्रभूतस्त्रिककुब्धाम पवित्रं मंगलं परं ७
ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः हिरण्यगर्भो भूग
र्भो माधवो मधुसूदनः ८ ईश्वरो विक्रमी धन्वी मेधावी विक्रमः
क्रमः अनुत्तमो दुराधर्षः कृतज्ञः कृतिरात्मवान् ९ सुरेशः
शरणं शर्म विश्वरेताः प्रजाभवः अहः संवत्सरो व्यालः प्रत्ययः
सर्वदर्शनः १० अजः सर्वेश्वरः सिद्धः सिद्धिः सर्वादिरच्युतः
वृषाकपिरमेयात्मा सर्वयोगविनिःसृतः ११ वसुर्वसुमनाः
सत्यः समात्मा सम्मितः समः अमोघः पुंडरीकाक्षो वृषकर्मा
वृषाकृतिः १२ रुद्रो बहुशिरा बभ्रुर्विश्वयोनिः शुचिश्रवाः
अमृतः शाश्वतः स्थाणुर्वरारोहो महातपाः १३ सर्वगः सर्व
विद्भानुर्विष्वक्सेनो जनार्दनः वेदो वेदविदव्यंगो वेदांगो वे
दवित्कविः १४ लोकाध्यक्षः सुराध्यक्षो धर्माध्यक्षः कृताकृ
तः चतुरात्मा चतुर्व्यूहश्चतुर्दंष्ट्रश्चतुर्भुजः १५ भ्राजिष्णुर्भोज
नं भोक्ता सहिष्णुर्जगदादिजः अनघो विजयो जेता विश्वयो
निः पुनर्वसुः १६ उपेंद्रो वामनः प्रांशुरमोघः शुचिरूर्जितः

म॰
क॰
१९२

अतींद्रःसंग्रहःसर्गोधृतात्मानियमोयमः १७ वेद्योवैद्यःसदा
योगीवीरहामाधवोमधुः अतींद्रियोमहामायोमहोत्साहोमहा
बलः १८ महाबुद्धिर्महावीर्योमहाशक्तिर्महाद्युतिः अनिर्देश्य
वपुःश्रीमानमेयात्मामहाद्रिधृक् १९ महेष्वासोमहीभर्ताश्री
निवासःसतांगतिः अनिरुद्धःसुरानंदोगोविन्दोगोविदांपतिः २०
मरीचिर्दमनोहंसःसुपर्णोभुजगोत्तमः हिरण्यनाभःसुतपाः
पद्मनाभःप्रजापतिः २१ अमृत्युःसर्वदृक्सिंहःसन्धातासंधि
मान्स्थिरः अजोदुर्मर्षणःशास्ताविश्रुतात्मासुरारिहा २२
गुरुर्गुरुतमोधामसत्यःसत्यपराक्रमः निमिषोनिमिषःस्रग्वी
वाचस्पतिरुदारधीः २३ अग्रणीर्ग्रामणीःश्रीमान्न्यायोनेतास
मीरणः सहस्रमूर्धाविश्वात्मासहस्राक्षःसहस्रपात् २४ आव
र्तनोनिवृत्तात्मासंवृतःसंप्रमर्दनः अहःसंवर्तकोवह्निरनिलो
धरणीधरः २५ सुप्रसादःप्रसन्नात्माविश्वधृग्विश्वभुग्विभुः
सत्कर्तासत्कृतःसाधुर्जह्नुर्नारायणोनरः २६ असंख्येयोप्रमे
यात्माविशिष्टःशिष्टकृच्छुचिः सिद्धार्थःसिद्धसंकल्पःसिद्धिदःसि
द्धिसाधनः २७ वृषाहीवृषभोविष्णुर्वृषपर्वावृषोदरः वर्धनो
वर्धमानश्चविविक्तःश्रुतिसागरः २८ सुभुजोदुर्धरोवाग्मीमहें
द्रोवसुदोवसुः नैकरूपोबृहद्रूपःशिपिविष्टःप्रकाशनः २९
ओजस्तेजोद्युतिधरःप्रकाशात्माप्रतापनः ऋद्धःस्पष्टाक्षरोमं
त्रःचंद्रांशुर्भास्करद्युतिः ३॰ अमृतांशूद्भवोभानुःशशिबिंदुःसुरेश्वरः

ओैषधं जगतः सेतुः सत्यधर्मपराक्रमः ३१ भूतभव्यभवन्ना
थः पवनः पावनोनलः कामहा कामकृत्कांतः कामः कामप्रदः
प्रभुः ३२ युगादिकृद्युगावर्तो नैकमायो महाशनः अदृश्यो
व्यक्तरूपश्च सहस्रजिदनंतजित् ३३ इष्टोविशिष्टः शिष्टेष्टः
शिखंडी नहुषो वृषः क्रोधहा क्रोधकृत्कर्ता विश्वबाहुर्महीधरः
अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः अपांनिधिरधिष्ठा
नमप्रमत्तः प्रतिष्ठितः ३५ स्कंदः स्कंदधरो धुर्यो वरदो वायुवाह
नः वासुदेवो बृहद्भानुरादिदेवः पुरंदरः ३६ अशोकस्तारण
स्तारः शूरः शौरिर्जनेश्वरः अनुकूलः शतावर्तः पद्मी पद्मनिभेक्षणः
पद्मनाभोरविंदाक्षः पद्मगर्भः शरीरभृत् महर्द्धिः ऋद्धो वृद्धात्मा
महाक्षो गरुडध्वजः ३८ अतुलः शरभो भीमः समयज्ञो हविर्हरिः
सर्वलक्षणलक्षण्यो लक्ष्मीवान्समितिंजयः ३९ विक्षरो रोहितो
मार्गो हेतुर्दामोदरः सहः महीधरो महाभागो वेगवानमिताश
नः ४० उद्भवः क्षोभणो देवः श्रीगर्भः परमेश्वरः करणं कारणं कर्ता
विकर्ता गहनो गुहः ४१ व्यवसायो व्यवस्थानः संस्थानः स्थान
दो ध्रुवः परर्द्धिः परमस्पष्टस्तुष्टः पुष्टः शुभेक्षणः ४२ रामो विरामो
विरजो मार्गो नेयो नयोनयः वीरः शक्तिमतां श्रेष्ठो धर्मो धर्मविदु
त्तमः ४३ वैकुंठः पुरुषः प्राणः प्राणदः प्रणवः पृथुः हिरण्यगर्भः
शत्रुघ्नो व्याप्तो वायुरधोक्षजः ४४ ऋतुः सुदर्शनः कालः परमे
ष्ठी परिग्रहः उग्रः संवत्सरो दक्षो विश्रामो विश्वदक्षिणः ४५ वि

म॰
क॰
१२

10

स्तारःस्थावरःस्थाणुःप्रमाणोबीजमव्ययम् अर्थोनर्थोमहा
कोशोमहाभोगोमहाधनः ४६ अनिर्विण्णःस्थविष्ठोभूर्धर्मयू
पोमहामखः नक्षत्रनेमिर्नक्षत्रीक्षमःक्षामःसमीहनः ४७
यज्ञइज्योमहेज्यश्चक्रतुःसत्रंसतांगतिः सर्वदर्शीविमुक्तात्मा
सर्वज्ञोज्ञानमुत्तमम् ४८ सुव्रतःसुमुखःसूक्ष्मःसुघोषःसुख
दःसुहृत् मनोहरोजितक्रोधोवीरबाहुर्विदारणः ४९ स्वापनः
स्ववशोव्यापीनैकात्मानैककर्मकृत् वत्सरोवत्सलोवत्सीरत्न
गर्भोधनेश्वरः ५० धर्मगुब्धर्मकृद्धर्मीसदसत्क्षरमक्षरम् अ
विज्ञातासहस्रांशुर्विधाताकृतलक्षणः ५१ गभस्तिनेमिःसत्व
स्थःसिंहभूतमहेश्वरः आदिदेवोमहादेवोदेवेशोदेवभृद्गुरुः
उत्तरोगोपतिर्गोप्ताज्ञानगम्यःपुरातनः शरीरभूतभृद्भोक्ताक
पीन्द्रोभूरिदक्षिणः ५२ सोमपोमृतपःसोमःपुरुजित्पुरुसत्त
मः विनयोजयःसत्यसंधोदाशार्हःसात्वतांपतिः ५४ जीवोवि
नयितासाक्षीमुकुंदोमितविक्रमः अंभोनिधिरनंतात्मामहो
दधिशयोंतकः ५५ अजोमहार्हःस्वाभाव्योजितामित्रःप्रमोद
नः आनंदोनंदनोनंदःसत्यधर्मात्रिविक्रमः ५६ महर्षिःकपि
लाचार्यःकृतज्ञोमेदिनीपतिः त्रिपदस्त्रिदशाध्यक्षोमहाशृंगः
कृतांतकृत् ५७ महावराहोगोविन्दःसुषेणःकनकांगदी
गुह्योगंभीरोगहनोगुप्तश्चक्रगदाधरः ५८ वेधाःस्वांगोजितः
कृष्णोदृढःसंकर्षणोच्युतः वरुणोवारुणोवृक्षःपुष्कराक्षोम

हामनाः ५९ भगवान्भगहानंदी वनमाली हलायुधः आदित्यो
ज्योतिरादित्यः सहिष्णुर्गतिसत्तमः ६० सुधन्वा खंडपरशुर्दारुणो
द्रविणप्रदः दिवस्पृक्सर्वदृग्व्यासो वाचस्पतिरयोनिजः ६१ त्रि
सामा सामगः साम निर्वाणं भेषजं भिषक् संन्यासकृच्छमः शांतो
निष्ठा शांतिः परायणं ६२ शुभांगः शांतिदः स्रष्टा कुमुदः कुवलेश
यः गोहितो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः ६३ अनिवर्ती नि
वृत्तात्मा संक्षेप्ता क्षेमकृत् शिवः श्रीवत्सवक्षाः श्रीवासः श्रीपतिः
श्रीमतांवरः ६४ श्रीदः श्रीशः श्रीनिवासः श्रीनिधिः श्रीविभावनः
श्रीधरः श्रीकरः श्रेयः श्रीमान् लोकत्रयाश्रयः ६५ स्वक्षः स्वंगः श
तानंदो नंदिर्ज्योतिर्गणेश्वरः विजितात्मा विधेयात्मा सत्कीर्तिश्छिन्न
संशयः उदीर्णः सर्वतश्चक्षुरनीशः शाश्वतस्थिरः भूशयो भूषणो
भूतिर्विशोकः शोकनाशनः ६७ अर्चिष्मानर्चितः कुंभो विशुद्धात्मा
विशोधनः अनिरुद्धोऽप्रतिरथः प्रद्युम्नोऽमितविक्रमः ६८ कालने
मिनिहा वीरः शौरिः शूरजनेश्वरः त्रिलोकात्मा त्रिलोकेशः केशवः
केशिहा हरिः ६९ कामदेवः कामपालः कामी कांतः कृतागमः अ
निर्देश्यवपुर्विष्णुर्वीरोऽनंतो धनंजयः ७० ब्रह्मण्यो ब्रह्मकृद्ब्रह्मा
ब्रह्म ब्रह्मविवर्धनः ब्रह्मविद्ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः ७१
महाक्रमो महाकर्मा महातेजा महोरगः महाक्रतुर्महायज्वा महा
यज्ञो महाहविः ७२ स्तव्यः स्तवप्रियः स्तोत्रं स्तुतिः स्तोता रणप्रियः
पूर्णः पूरयिता पुण्यः पुण्यकीर्तिरनामयः ७३ मनोजवस्तीर्थकरो

म॰
क
१०३

103

वसुरेता वसुप्रदः वसुप्रदो वासुदेवो वसुर्वसुमना हविः सद्गतिः
सत्कृतिः सत्ता सद्भूतिः सत्परायणः शूरसेनो यदुश्रेष्ठः सन्निवा
सः सुयामुनः भूतावासो वासुदेवः सर्वासुनिलयो नयः दर्पहा
दर्पदो दृप्तो दुर्धरो वापराजितः विश्वमूर्तिर्महामूर्तिर्दीप्तमूर्तिर
मूर्तिमान् अनेकमूर्तिरव्यक्तः शतमूर्तिः शताननः एको नैकः
सवः कः किं यत्तत्पदमनुत्तमम् लोकबंधुर्लोकनाथो माधवो भ
क्तवत्सलः सुवर्णवर्णो हेमांगो वरांगश्चंदनांगदी वीरहा विष
मः शून्यो घृताशीरचलश्चलः अमान्य मानदो मान्यो लोकस्वामी
त्रिलोकधृक् सुमेधा मेधजो धन्यः सत्यमेधा धराधरः ८ तेजोवृ
षो द्युतिधरः सर्वशस्त्रभृतां वरः प्रग्रहो निग्रहो व्यग्रो नैकशृंगो
गदाग्रजः चतुर्मूर्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः चतुरात्मा
चतुर्भावश्चतुर्वेदविदेकपात् समावर्तो निवृत्तात्मा दुर्जयो दुर
तिक्रमः दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा शुभांगो लोक
सारंगः सुतंतुस्तंतुवर्धनः इंद्रकर्मा महाकर्मा कृतकर्मा कृता
गमः उद्भवः सुंदरः सुंदो रत्ननाभः सुलोचनः अर्को वाजसनः
शृंगी जयंतः सर्वविज्जयी सुवर्णबिंदुरक्षोभ्यः सर्ववागीश्वरे
श्वरः महाह्रदो महागर्तो महाभूतो महानिधिः कुमुदः कुंदरः
कुंदः पर्जन्यः पवनो निलः अमृतांशो मृतवपुः सर्वज्ञः सर्वतो
मुखः सुलभः सुव्रतः सिद्धः शत्रुजिच्छत्रुतापनः न्यग्रोधो दुंब
रो श्वत्थश्चाणूरांध्रनिषूदनः सहस्रार्चिः सप्तजिह्वः सप्तैधास

मवाहनः अमूर्तिरनघोचिंत्योभयकृद्भयनाशनः अणुर्बृहत्कृ
शः स्थूलोगुणभृन्निर्गुणोमहान् अधृतः स्वधृतः स्वास्यः प्राग्वंशो
वंशवर्धनः ९ भारभृत्कथितोयोगीयोगीशः सर्वकामदः आ
श्रमः श्रमणः क्षामः सुपर्णोवायुवाहनः धनुर्धरोधनुर्वेदोदंडो
दमयितादमः अपराजितः सर्वसहोनियंतानियमोयमः स
त्ववान्सात्विकः सत्यः सत्यधर्मपरायणः अभिप्रायः प्रियार्होर्हः
प्रियकृत्प्रीतिवर्धनः विहायसगतिर्ज्योतिः सुरुचिर्हुतभुग्विभुः
रविर्विरोचनः सूर्यः सवितारविलोचनः अनंतोहुतभुग्भोक्ता सु
खदोनैकदोग्रजः अनिर्विण्णः सदामर्षीलोकाधिष्ठानमद्भुतः
सनात्सनातनतमः कपिलः कपिरव्ययः स्वस्तिदः स्वस्तिकृत्स्व
स्तिः स्वस्तिभुक्स्वस्तिदक्षिणः अरौद्रः कुंडलीचक्रीविक्रम्यू
र्जितशासनः शब्दातिगः शब्दसहः शिशिरः शर्वरीकरः अ
क्रूरः पेशलोदक्षोदक्षिणः क्षमिणांवरः विद्वत्तमोवीतभयः
पुण्यश्रवणकीर्तनः उत्तारणोदुष्कृतिहापुण्योदुःस्वप्ननाशनः
वीरहारक्षणः संतोजीवनः पर्यवस्थितः अनंतरूपोनंतश्रीर्जि
तमन्युर्भयापहः चतुरस्रोगभीरात्माविदिशोव्यादिशोदिशः
अनादिर्भूर्भुवोलक्ष्मीः सुवीरोरुचिरांगदः जननोजनजन्मादि
र्भीमभीमपराक्रमः आधारनिलयोधाताप्रुष्पहासः प्रजागरः
ऊर्ध्वगः सत्पथाचारः प्राणदः प्रणवः पणः प्रमाणंप्राणनिल
यः प्राणभृत्प्राणजीवनः तत्वंतत्वविदेकात्माजन्ममृत्युजरा

स·
क·
१०४

तिगः भूर्भुवः स्वस्तरुस्तारः सविता प्रपितामहः यज्ञो यज्ञपति
र्यज्वा यज्ञांगो यज्ञवाहनः यज्ञभृद्यज्ञकृद्यज्ञी यज्ञभुग्यज्ञसाध
नः यज्ञांतकृद्यज्ञगुह्यमन्नमन्नाद एव च आत्मयोनिः स्वयंजातो
वैखानः सामगायनः देवकीनंदनः स्रष्टा क्षितीशः पापनाशनः
शंखभृन्नंदकी चक्री शार्ङ्गधन्वा गदाधरः रथांगपाणिरक्षोभ्यः
सर्वप्रहरणायुधः नम इति १०० ॥ ॐ इतीदं कीर्तनीयस्य केश
वस्य महात्मनः नाम्नां सहस्रं दिव्यानामशेषेण प्रकीर्तितम्
य इदं शृणुयान्नित्यं यश्चापि परिकीर्तयेत् नाशुभं प्राप्नुया
त्किंचित्सोमुत्रेह च मानवः वेदांतगो ब्राह्मणः स्यात्क्षत्रियो विज
यी भवेत् वैश्यो धनसमृद्धः स्याच्छूद्रः सुखमवाप्नुयात् धर्मा
र्थी प्राप्नुयाद्धर्ममर्थार्थी चार्थमाप्नुयात् कामानवाप्नुयात्का
मी प्रजार्थी प्राप्नुयात्प्रजाम् भक्तिमान्यः सदोत्थाय शुचिस्तद्
तमानसः सहस्रं वासुदेवस्य नाम्नामेतत्प्रकीर्तयेत् यशः प्रा
प्नोति विपुलं ज्ञातिप्राधान्यमेव च अचलां श्रियमाप्नोति श्रे
यः प्राप्नोत्यनुत्तमम् न भयं क्वचिदाप्नोति वीर्यं तेजश्च विन्द
ति भवत्यरोगी धनवान्बलरूपगुणान्वितः रोगार्तो मुच्यते रो
गाद्बद्धो मुच्येत बंधनात् भयान्मुच्येत भीतस्तु मुच्येदापन्न आ
पदः दुर्गाण्यतितरत्याशु पुरुषः पुरुषोत्तमम् स्तुवन्नामसह
स्रेण नित्यं भक्तिसमन्वितः वासुदेवाश्रयो मर्त्यो वासुदेवप
रायणः सर्वपापविशुद्धात्मा याति ब्रह्म सनातनम् न वासु

देवभक्तानामशुभंजायतेक्वचित् जन्ममृत्युजराव्याधिभ
यंनैवोपजायते इमंस्तवमधीयानःश्रद्धाभक्तिसमन्विताः
युज्येतात्मासुखक्षान्तिश्रीधृतिस्मृतिकीर्तिभिः नक्रोधोनच
मात्सर्यंनलोभोनाशुभामतिः भवंतिकृतपुण्यानांभक्तानांपु
रुषोत्तमे द्यौःसचंद्रार्कनक्षत्राखंदिशोभूर्महोदधिः वासु
देवस्यवीर्येणविधृतानिमहात्मनः ससुरासुरगंधर्वसयक्षो
रगराक्षसं जगद्वशेवर्ततेदंकृष्णस्यसचराचरम् इंद्रियाणि
मनोबुद्धिःसत्वंतेजोबलंधृतिः वासुदेवात्मकान्याहुःक्षेत्रं
क्षेत्रज्ञमेवच सर्वागमानामाचारःप्रथमंपरिकल्पते आचा
रप्रभवोधर्मोधर्मस्यप्रभुरच्युतः ऋषयःपितरोदेवाःमहाभू
तानिधातवः जंगमाजंगमंचेदंजगन्नारायणोद्भवम् योगो
ज्ञानंतथासांख्यंविद्याशिल्पादिकर्मच वेदाःशास्त्राणिविज्ञा
नमेतत्सर्वंजनार्दनम् एकोविष्णुर्महद्भूतंपृथग्भूतान्यनेक
शः त्रींल्लोकान्व्याप्यभूतात्माभुंक्तेविश्वभुगव्ययः इमंस्तवंभ
गवतोविष्णोर्व्यासेनकीर्तितम् पठेद्यइच्छेत्पुरुषःश्रेयः
प्राप्नोत्यसंशयः विश्वेश्वरमजंदेवंजगतःप्रभुमव्ययं भजं
तियेपुष्कराक्षंनतेयांतिपराभवम् इतिश्रीमहाभारतेश
तसाहस्र्यांसंहितायांवैयासिक्यांशांतिपर्वणिउत्तमानुशा
सनिकेभगवतोवासुदेवस्यनाम्नांसहस्रंसमाप्तम् ॥
ॐनमोभगवतेवासुदेवाय ॐनमोभगवतेनरसिंहाय

म॰ क॰ १०५ 105

दाल्भ्य उवाच भगवन्प्राणिनः सर्वे विषरोगाद्युपद्रवैः दुष्टग्रहो
पघातैश्च सर्वकालमुपद्रुताः आभिचारिककृत्याभिः सर्वरोगैश्च
दारुणैः सदा संपीड्यमानाश्च तिष्ठंति मुनिसत्तम केन कर्मविपा
केन विषयोगाद्युपद्रवाः न भवंति नृणां तन्मे यथावद्वक्तुमर्हसि
पुलस्त्य उवाच व्रतोपवासैर्यैर्विष्णुर्नान्यजन्मनि तोषिताः ते नरा
मुनिशार्दूल ग्रहरोगादिभागिनः आरोग्यं परमामृद्धिं मनसा यद्यदि
च्छति तत्तदाप्नोति सन्दिग्धं परत्राप्युत तोषकृत् नाधीन्प्राप्नोति
नो व्याधीन्न विषग्रहबन्धनम् कृत्यास्पर्शभवं वापि तोषिते मधु
सूदने सर्वदोषप्रशमनस्य सौम्याः सर्वे सदा ग्रहाः देवानामप्यधृ
ष्योसौ यस्य तुष्टो जनार्दनः यः समः सर्वभूतेषु यथात्मनि तथाप
रे उपवासादिना तेन तोषिते मधुसूदने तोषिते तत्र जायन्ते नराः
पूर्णमनोरथाः अरोगाः सुखिनो भोगभोक्तारो मुनिसत्तम न ते
षां शत्रवो नैव स्पर्शो रोगाभिचारिकाः ग्रहरोगादिकं चापि पाप
कार्यं न जायते अव्याहतानि कृष्णस्य चक्रादीन्यायुधानि तम् र
क्षंति सकलापद्भ्यो येन विष्णुरुपासितः दाल्भ्य उवाच अनारा
धितगोविन्दा ये नरा दुःखभागिनः तेषां दुःखाभिभूतानां यत्कर्त
व्यं दयालुभिः पश्यद्भिः सर्वभूतस्थं वासुदेवं महामुने समदृ
ष्टिभिरीशेशं तन्ममाख्याह्यशेषतः पुलस्त्य उवाच श्रुतीनां दशशास्त्र
लाग्रान्तकशास्त्रज्ञोथ रोगिणः मार्जयेत्सर्वगात्राणि कुशाग्रैर्दी
ल्यशान्तिकृत् रोगग्रहविषार्तानां कुर्यात्कान्तिमिमां शुभाम्

विस्तम्भको विशेषेण शुचिस्तद्गतमानसः ध्यात्वाथनामसदावि
स्तनामान्यंगेन विन्यसेत् ॐ पूर्वे नारायणः पातु वारिजाक्षस्तु द
क्षिणे प्रद्युम्नः पश्चिमे पातु वासुदेवस्तथोत्तरे ऐशान्यां रक्षको वि
ष्णुराग्नेय्यां तु जनार्दनः नैरृत्यां पद्मनाभस्तु वायव्यां मधुसूदनः
ऊर्ध्वं गोवर्धनो देवो ह्यधस्ताच्च त्रिविक्रमः एताभ्यो दशदिग्भ्यश्च
सर्वतः पातु केशवः अंगुष्ठाग्रे तु गोविन्दं तर्जन्यां तु महीधरम्
मध्यमायां हृषीकेशमनामायां त्रिविक्रमम् कनिष्ठायां न्य
सेद्विष्णुं वर्णो मधुसूदनम् त्रिविक्रमं कपोले तु वामनं कर्ण
मूलयोः दामोदरं दंतपंक्त्यां वराहं चिबुके तथा जिह्वायां वाम
देवं तु वाक्स्थितं गरुडध्वजम् हृषीकेशञ्चरोष्ठे पद्मनाभं तथा
परे वैकुंठकं ठमध्ये तु अनंतं तु नासिकोपरि दक्षिणे तु भुजे विप्र
विन्यसेत्पुरुषोत्तमम् वामके तु महायोगं राघवं हृदि विन्य
सेत् पीतवस्त्रं सर्वजनोहरिं नाभौ तु विन्यसेत् करे तु दक्षिणे
विप्र ततः संकर्षणं न्यसेत् वामेरिपुहरोवियात्कटिमध्ये जनार्द
नम् पृष्ठे लक्ष्मीधरं विद्यात् दक्षिणे स्कन्धमूलयोः वक्षःस्थले माध
वं तु कक्ष्ययोर्भोगशायिनं स्वयंभुवं मेढ्रमध्ये ऊर्वोश्चैव गदाध
रं यज्ञाध्यक्षं जानुमध्ये जंघयोरच्युतं तथा गुल्फयोर्नरसिंहं तु
पादपृष्ठे मितौजसम् अंगुल्यां श्रीधरं न्यस्य पंकजाक्षं हि संपिषु
रोमकूपेषु केशं त्वक्संरक्तास्थिमज्जसु नखेषु माधवं चैव न्यसे
त्पादतलेऽच्युतम् मनोबुद्ध्योरहंकारे न्यसेच्चैव जनार्दनम् एवं

म०
कृ०
१०९

न्यासविधिं कृत्वा यत्कार्यं पुरुषेण तु द्विज वैष्णवेन तु कर्तव्यं सर्वसि
द्धिप्रदायिनी पूजाकाले तु देवस्य स्नानकाले तथैव च होमारंभे
च कर्तव्यं त्रिसंध्यासु च नित्यशः अभयं सर्वभूतेभ्यो विष्णुलोकं
च गच्छति ॐ नमः परमार्थायेत्यपामार्जनमंत्रस्य पुलस्त्य ऋषिः
श्रीनरसिंहो देवता हराशुभकस्येति बीजं अच्युतानंतगोविंदेति
शक्तिः नमो हाटककेशांतेति कीलकं समस्ताभिलाषार्थे विनि
योगः ॐ नमः परमार्थाय पुरुषाय महात्मने निष्कल्मषाय शु
द्धाय ध्यानयोगरताय च नमस्कृत्य प्रवक्ष्यामि यत्तत्सिद्ध्यतु
मे वचः वराहनरसिंहाय वामनाय महात्मने नमस्कृत्य प्रवक्ष्या
मि यत्तत्सिद्ध्यतु मे वचः त्रिविक्रमाय रामाय वैकुंठाय नराय च न
मस्कृत्य प्रवक्ष्यामि यत्तत्सिद्ध्यतु मे वचः वराहनरसिंहेश वामने
श त्रिविक्रम हयग्रीवेश सर्वेश हृषीकेश हराशुभम् अपरा
जितचक्राद्यैश्चतुर्भिः परमायुधैः अखंडितानुभावैस्त्वं सर्वदुष्ट
हरो भव हरामुकस्य दुरितं दुष्कृतं दुरुपासितम् मृत्युबंधार्ति
भयदं अरिष्टस्य च यत्फलम् पराभिध्यानसहितैः प्रयुक्तं चाभिचा
रिकम् गरस्पर्शमहारोगप्रयोगं जरया जर हरये वासुदेवाय न
मः कृष्णाय खड्गिने नमः पुष्करनेत्राय केशवायादिचक्रिणे न
मः कमलकिंजल्कपीतनिर्मलवाससे महाहवरिपुस्कंधघृ
ष्टचक्राय चक्रिणे दंष्ट्रोद्धृतक्षितिभृते त्रयीमूर्तिमते नमः महा
यज्ञवराहाय शेषभोगोरुभागिने नमो हाटककेशांतज्वलत्पाव

कलौ च न वज्राथिकानत्वेस्पर्श्तश्चि(?)सिंह न मोक्तते काश्यपाया

तिरूपाय ऋग्यजुःसामरूपिणे नमः वराहरूपाय सर्जनते गां न मो

नमः वाराह शेषदुःखानि सर्वपापफलानि च महामर्म महादं

ष्ट्रमर्द मर्दय तत्फलम् नरसिंहकरालास्यदंतप्रोतनलोज्ज्वल

भंजभंज महादुःखमार्ति मस्य विनाशाय ऋग्यजुःसामगर्भाभिर्वा

ग्भिर्वामनरूपधृक् प्रशमं सर्वदुःखानि नयत्वस्य जनार्दनः ए

काह्निकं द्व्याह्निकं च तथा त्रिदिवसज्वरम् शमं नयतु गोविंदो भि

त्वा छित्वास्य वेदनाम् चातुर्थिकं तथात्युग्रं तथा वै संततज्वरम्

दोषोत्थं सन्निपातोत्थं तथैवागंतकज्वरम् शमं नयतु गोविंदो भि

त्वा छित्वास्य वेदनां नेत्रदुःखं शिरोदुःखं दुःखं तूदरसंभवम् अ

(?)श्वासमतिश्वासं परितापं सवेपथुम् गुदघ्राणांघ्रिरोगांश्च कु

ष्ठरोगं तथा क्षयम् कामलादींस्तथा रोगान्प्रमेहादींश्च दारुणान्

भगंदरातिसारांश्च मुखरोगान्सवल्गुलान् अश्मरी मूत्रकृच्छ्रांश्च रो

गानन्यांश्च दारुणान् ये वातप्रभवा रोगा ये च पित्तसमुद्भवाः

कफोद्भवास्तथा ये च ये चान्ये सान्निपातिकाः आगंतवश्च ये रोगा

लूताविस्फोटकादयः ते सर्वे विलयं यांतु वासुदेवापमार्जिताः

विलयं यांतु ते सर्वे विष्णोरुच्चारणेन तु क्षयं गच्छंतु चाशेषास्ते

चक्राभिहता हरेः अच्युतानंतगोविन्दनामोच्चारणभीषिताः नश्यं

तु सकला रोगाः सत्यं सत्यं वदाम्यहम् सत्यं सत्यं पुनः सत्यं सत्य

मुद्धृत्य भाषितम् वेदशास्त्रात्परं नास्ति न देवः केशवात्परः स्या

म॰
क॰
१०२

वरं जंगमं चैव कृत्रिमं चापि यद्विषम् लूतादिप्रभवं यच्च विषम
न्यं तद्दुःखदम् शमनं यतु तत्सर्वं कीर्तितो ऽस्य जनार्दनः ग्रहान्प्रेत
ग्रहांश्चैव तथा वै डाकिनीग्रहान् ममाण्डकांस्तथा क्रूरां रेवतीं च
वृद्धरेवतीम् वृद्धिकाख्यान्ग्रहांश्चोग्रांस्तथा मातृग्रहानपि बालानां
ये ग्रहाः केचिद्ये च मातृग्रहाः क्वचित् नरसिंहस्य ते दृष्ट्वा दग्धा ये
चापि यौवने सटाकरालवदनो नरसिंहो महारवः ग्रहानशे
षान्निःशेषान्करोतु जगतो हितः नरसिंह महासिंह ज्वालामा
लोज्ज्वलानन ग्रहानशेषान्सर्वेश खाद खाद अग्निलोचन ये रो
गा ये महोत्पाता यद्विषं ये महाग्रहाः यानि च क्रूरभूतानि ग्रहपी
डाश्च दारुणाः शस्त्रक्षतेषु ये दोषा ज्वालागर्दभकादयः ता
नि सर्वाणि सर्वात्मा परमात्मा जनार्दनः किंचिद्रूपं समास्थाय
वासुदेवाशु नाशय क्षिप्त्वा सुदर्शनं चक्रं ज्वालामालाविभीषणं
सर्वदुष्टप्रशमनं कुरु देववराच्युत सुदर्शन महाज्वाल छिंदि
छिंदि विमारय सर्वदुष्टानि रक्षांसि क्षिप याशु जनार्दन प्राच्यां प्र
तीच्यां च दिशि दक्षिणोत्तरतस्तथा रक्षां करोतु सर्वात्मा नरसिंहः
स्वगर्जितः भुव्यंतरिक्षे च तथा पृष्ठतः पार्श्वतो ऽग्रतः रक्षां करोतु
भगवान्बहुरूपी जनार्दनः यथा विष्णुर्जगत्सर्वं सदेवासुरमानुषं
तेन सत्येन सकलं दुष्टमस्य प्रशाम्यतु परमात्मा यथा विष्णुर्वेदांते
ष्वपि गीयते तेन सत्येन सकलं यन्मयोक्तं तथास्तु तत् शांति
रस्तु शिवं चास्तु दुष्टमस्य प्रशाम्यतु वासुदेवशरीरोत्थैः कुशैर्नि

नाशितं मया अपामार्जनगोविंदो नरो नारायणस्तथा तथास्तु
सर्वदुःखानां प्रशमो वचनाद्धरेः शांतिः समस्तरोगास्ते ग्रहाः सर्वे वि
षाणि च भूतानि च प्रयान्तीशे वासुदेवे प्रकीर्तिते एतत्समस्तरो
गेषु भूतग्रहभयेषु च अपामार्जनकं शस्त्रं विष्णुनामाभिमंत्रितं
एते कुशा विष्णुशरीरसंभवा जनार्दनोऽहं स्वयमेव चागतः हतं म
या दुष्टमशेषमस्य स्वस्थो भवत्वेष वचो यथा हरेः शांतिरस्त्वशिवं
चास्तु दुष्टमस्य प्रशाम्यतु यदस्य दुरितं किंचित्तत्क्षिप्तं लवणां
भसि स्वास्थ्यमस्तु शिवं चास्तु हृषीकेशस्य चिंतनात् यतपवा
गतं पापं तत्तैव प्रतिगच्छतु एतद्रोगादिपीडासु जंतूनां हितमि
च्छता विष्णुभक्तेन कर्तव्यमपामार्जनकं परम् अनेन सर्वदु
ष्टानि प्रशमं यान्त्यसंशयम् सर्वभूतहितार्थाय तस्मात्कुर्यात्सदै
व हि नाथेनवंतःकवचः प्राणाणः स्वस्ताहहेनोपद्रवशासितारः
सर्वज्वराग्रं तन्त्र वानिरुद्ध प्रद्युम्नसंकर्षणवासुदेवाः इत्यपामा
र्जनस्तोत्रं समाप्तम् अस्य श्रीविष्णुहृदयस्तोत्रमंत्रस्य संकर्षण
ऋषिः अनुष्टुप्त्रिष्टुब्गायत्रीच्छन्दांसि श्रीविष्णुः परमात्मा देव
ता अभीष्टप्राप्त्यर्थे विष्णुहृदयपाठे विनियोगः संकर्षणउवा
च ममाग्रतः सदा विष्णुः पृष्ठतश्चापि केशवः गोविन्दो दक्षिणेपा
र्श्वे वामे तु मधुसूदनः उपरिष्टात्तु वैकुंठो वराहः पृथिवीतले अ
वांतरदिशो यास्तु तासु सर्वासु माधवः गच्छतस्तिष्ठतो वापि जा
ग्रतः स्वपतोऽपि वा नरसिंहकृता गुप्तिर्वासुदेवमयो ह्ययम् अ

म॰
क॰
१८

108

व्यक्तं चैवास्य योनिं वदंति व्यक्तं देहं दीर्घमायुर्गतिं च वह्निं वक्त्रं
चंद्रसूर्यौ च नेत्रे दिशः श्रोत्रे घ्राणमाहुश्च वायुं वाचं वेदान्हृदयं श्री
नं भग्रस्पष्टयीपादौ तारकाद्येमकूपान् सांगोपांगान्हृदि देवाश्च स
र्वे उपासितं यस्य तथा समुद्रं तं देवदेवं शरणं प्रजानां यज्ञात्मकं स
र्वलोकप्रतिष्ठम् अजं वरेण्यं वरदं वरिष्ठं ब्रह्माणमीशं पुरुषं नतो
स्मि आद्यं पुरुषमीशानं पुरुहूतं पुरुष्टुतं ऋतमेकाक्षरं ब्रह्म व्यक्ता
व्यक्तं सनातनम् महाभारतमाख्यानं कुरुक्षेत्रं सरस्वती केश
वं गां च गंगां च कीर्तयन्नावसीदति ॐ भूः पुरुषाय पुरुषरूपाय
वासुदेवाय वै नमः ॐ भुवः पुरुषाय पुरु॰ ॐ स्वः पुरुषाय पुरुष॰
ॐ भूर्भुवः स्वः पुरुषाय पुरु॰ ॐ वासुदेवाय पुरुषाय पुरु॰ ॐ संकर्ष
णाय पुरुषाय पुरु॰ ॐ प्रद्युम्नाय पुरुषाय॰ ॐ अनिरुद्धाय पुरुषा॰
ॐ भवोद्भवाय पुरुषाय पुरु॰ ॐ केशवाय पुरुषाय॰ ॐ नारायणा
य पुरुषाय॰ ॐ माधवाय पुरुषाय॰ ॐ गोविन्दाय पुरुषाय॰ ॐ लो
कनाथाय॰ ॐ विष्णवे पुरुषाय॰ ॐ मधुसूदनाय पुरुषाय॰ ॐ कृ
ष्णाय पुरु॰ ॐ चतुर्भुजाय पुरुषाय॰ ॐ त्रिविक्रमाय पुरुषाय॰
ॐ वामनाय पुरुषाय॰ ॐ श्रीधराय पुरुषाय॰ ॐ हृषीकेशाय पु
रुषाय॰ ॐ पद्मनाभाय पुरुषाय॰ ॐ दामोदराय पुरुषाय॰ ॐ स
त्याय॰ ॐ अच्युता॰ ॐ रामाय॰ ॐ ईश्वराय पुरुषाय पु॰ ॐ तत्पुरुषा
य पुरु॰ ॐ सत्पुरुषाय पुरुष॰ ॐ प्रणवैकविश्वप्राणसहस्रनेत्राय पु
रुषाय पुरुषरूपाय वासुदेवाय वै नमः २४ यद्दंविस्त्हृदयम

धीते ब्रह्महत्यायाः पूतो भवति सुरापानात्पूतो भवति सुवर्ण
स्तेयात्पूतो भवति पतितसंभाषणात्पूतो भवति असत्यसत्या
त्पूतो भवति अगमगमनात्पूतो भवति अभक्ष्यभक्षणात्पूतो भ
वति वृषलीगमनात्पूतो भवति अपेयपानात्पूतो भवति अ
ब्रह्मचारी ब्रह्मचारी भवति अनेकक्रतुशतसहस्रेणेष्टं भवति
गायत्र्याः षष्टिशतसहस्राणि जप्तानि भवंति चत्वारो वेदा अधी
ता भवंति सर्वेषु वेदेषु ज्ञातो भवति सर्वेषु तीर्थेषु स्नातो भवति
यदि कस्यचिन्न ब्रूयाच्छुची भवति अष्टौ ब्राह्मणान्ग्राहयित्वा
विष्णुलोकं समाप्नोति यदि मासेन मर्त्यो भवति तदा न पतति मं
त्रोयं यत्र यत्रैव तिष्ठेत् तत्र तत्रोपजायते स्मरति चात्मानं भगवान्महा
विष्णुरित्याह इति बिल्वहृदयस्तोत्रं समाप्तम् भीष्म उवाच जग
त्प्रभुं देवदेवमनंतं पुरुषोत्तमम् स्तुवन्नामसहस्रेण पुरुषः स
ततोत्थितः तमेव चार्चयन्नित्यं भक्त्या पुरुषमव्ययं ध्यायंस्तुव
न्नमस्यंश्च यजमानस्तमेव च अनादिनिधनं विष्णुं सर्वलोकम
हेश्वरम् लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःखातिगो भवेत् ब्रह्मण्यं
सर्वधर्मज्ञं लोकानां कीर्तिवर्धनम् लोकनाथं महद्भूतं सर्वभूत
भवोद्भवम् एष मे सर्वधर्माणां धर्मोधिकतमो मतः यद्भक्त्या पुंड
रीकाक्षं स्तवैरर्चेन्नरः सदा परमं यो महत्तेजः परमं यो महत्तपः
परमं यो महद्ब्रह्म परमं यः परायणम् पवित्राणां पवित्रं यो मंगला
नां च मंगलं दैवतं देवतानां च भूतानां योव्ययः पिता यतः सर्वा

णिभूतानिभवंत्यादियुगागमे यस्मिंश्चप्रलयंयांतिपुनरेवयु
गक्षये तस्यलोकप्रधानस्यजगन्नाथस्यभूपतेः विष्णोर्नामस
हस्रंमेशृणुपापभयापहम् यानिनामानिगौणानिविख्याता
निमहात्मनः ऋषिभिःपरिगीतानितानिवक्ष्यामिभूतये श्रीकृ
ष्णदिव्यसहस्रनाम्नामनुष्टुप्छंदः श्रीभगवान्वेदव्यासऋषिः
श्रीकृष्णःपरमात्मादेवता अमृतांशूद्भवोभानुरितिबीजं देवकी
नंदनःस्रष्टेतिशक्तिः उद्भवःक्षोभणोदेवइतिपरमोमंत्रः शंखभृ
नंदकीचक्रीतिकीलकम् शार्ङ्गधन्वागदाधरइत्यस्त्रम् श्रीकृ
ष्णप्रीत्यर्थंसमस्तपापक्षयार्थमखिलवांछितकामनासिद्ध्यर्थंवावि
नियोगः विश्वंविष्णुर्वषट्कारोभूतभव्यभवत्प्रभुरित्यादि ॥
ॐअथश्रीविनायकशांतिः शांतानुपीयकर्मविपाकपरिभा
षायांश्लोकद्वयेनप्रदर्शितम् तद्यथा रुद्रजाप्येलक्षसंख्यैः प्र
जपित्वात्र्यम्बकं एकादशजपेतुह्रान्दशांशेनगुग्गुलेनच
हुत्वाभिषेचनंकुर्यान्मंत्रैर्वारुणदैवतैः शांतिकेगणशांतिश्चत
थैवग्रहशांतिकमिति तथारोगप्रतिमादानविधानानन्तरम
परःश्लोकःप्रतिपादितः दानैर्दयादिभिश्चापिद्विजदेवतागोदेवा
र्चनप्रणतिभिश्चजपैस्तपोभिः इत्युक्तपुण्यनिचयैरुपचीयमा
नाःप्रागाप्यजातमशुभंप्रशमंनयंति इतिश्लोकत्रव्याख्यानप्र
संगेनवेदपारायणविध्यादयोविष्णुहृदयस्तोत्रपर्यंताःप्रदर्शि
ताःशांतिकेगणशांतिश्चग्रहशांतिकसर्वकामित्यनेनाविना

यकशांतिर्नवग्रहशांतिश्चेत्युभयमुपदिशन्गणपतिशांति
रभिधीयते याज्ञवल्क्यः विनायकः कर्मविघ्नसिद्ध्यर्थं विनि
योजितः गणानामाधिपत्ये च रुद्रेण ब्रह्मणा तथा एवंविना
यकस्याधिकारिकंव्यापारमभिधायतेनगृहीतस्यस्वप्नदर्श
नानिमित्तदर्शनानि चाह तेनोपसृष्टो यस्तस्य लक्षणानि
निबोधत स्वप्नेवगाहतेत्यर्थंजलंमुंडांश्चपश्यति काषायव
सनांश्चैवक्रव्यादानधिरोहति अंत्यजैर्गर्दभैरुष्ट्रैःसहैकत्रा
वतिष्ठति व्रजन्नपितथात्मानंमन्यतेनुगतंपरैः विमनावि
फलारंभःसंसीदत्यनिमित्ततः तेनोपसृष्टोलभतेनराज्यंराज
नंदनः कुमारीनचभर्तारंनापत्यंगर्भमंगनाः आचार्यत्वंश्रो
त्रियश्चनशिष्योध्ययनंतथा नचाप्नोतिवणिग्लाभंकृषिंचैव
कृषीबलः इत्येवंविनायकगृहीतस्यचिह्नान्युक्त्वाविनाय
कोपसर्गपरिहारार्थंकर्माह स्नापनंतस्यकर्तव्यंपुण्येह्निवि
धिपूर्वकम् गौरसर्षपकल्केनसाज्येनोत्सादितस्यच सर्वौष
धैःसर्वगंधैःविलिप्तशिरसस्तथा भद्रासनोपविष्टस्यस्वस्ति
वाच्याद्विजाःशुभाः अश्वस्थानाद्गजस्थानाद्वल्मीकात्संगमाद्ध्रदा
त् मृत्तिकांरोचनांगंधान्गुग्गुलंचाप्सुनिक्षिपेत् याआहृताए
कवर्णैश्चतुर्भिःकलशैर्ह्रदात् चर्मण्यानडुहेरक्तेस्थाप्यंभद्रा
सनंततः सहस्राक्षंशतधारमृषिभिःपावनंकृतम् तेनत्वाम
भिषिंचामिपावमान्यःपुनंतुते भगंतेवरुणोराजाभगंसूर्यो

म॰
क॰
११॰

बृहस्पतिः भगमिंद्रश्च वायुश्च भगं सप्तर्षयो ददुः यत्ते केशेषु
दौर्भाग्यं सीमंते यच्च मूर्धनि ललाटे कर्णयोरक्ष्णोरापस्तद्घ्नंतु स
र्वदा स्नातस्य सार्षपं तैलं स्रुवेणौदुम्बरेण तु जुहुयान्मूर्धनि कु
शान्सव्ये परिगृह्य तु मितश्च संमितश्चैव तथा शालकटंकटौ कूष्मां
डो राजपुत्रश्चेत्यंतैः स्वाहासमन्वितैः नामभिर्बलिमंत्रैश्च नमस्का
रसमन्वितैः अंते स्वाहासमन्वितैर्मूर्धनि जुहुयादित्यन्वयः तथा
विधैर्बलिमंत्रैर्बलिं दद्यादित्यध्याहृत्य योज्यं बहिर्बलिप्रकारमा
ह दद्याच्चतुष्पथे शूर्पे कुशानास्तीर्य सर्वतः कृताकृतांस्तंडुलां
श्च पललौदनमेव च मत्स्यान्पक्वांस्तथैवामान्मांसमेतावदेव तु
पुष्पं चित्रं सुगंधं च सुरां च त्रिविधामपि मूलकं पूरिकापूपांस्तथै
वौंडेरकस्रजम् दध्यन्नं पायसं चैव गुडपिष्टं समोदकम् एता
न्सर्वानुपाहृत्य भूमौ कृत्वा ततः शिरः विनायकस्य जननीमुपति
ष्ठेत्ततोऽम्बिकाम् दूर्वासर्षपपुष्पाणां दत्वार्घ्यं पूर्णमंजलिम् कृ
ताकृताः सकृदवहतनपललौदनं तिलपिष्टौदनः आमाश्च प
क्वाः एतावदेव तु पक्वमपक्वं च मांसमित्यर्थः पुष्पं चित्रं रक्तपी
तादि सुगंधि द्रव्यं त्रिविधा सुरा गौडी पैष्टी च माध्वी च मूलकं दाका
रोभद्रविशेषो मूलकं च उंडेरकस्रजः उंडेरकाः पिष्टविका
रा नानाविधाः तेषां तासु स्रजः इत्युच्यंते गुडपिष्टं गुडमिश्रं शाल्या
दिपिष्टमन्यत्सिद्धमुपस्थानमंत्रमाह रूपं देहि यशो देहि भाग्यं
भवति देहि मे पुत्रं देहि धनं देहि सर्वकामांश्च देहि मे ततः शुक्ला

स्वरधरःशुक्लमाल्यानुलेपनः ब्राह्मणान्भोजयेद्दद्यादवस्त्रयु
ग्मंगुरोरपि असमर्थश्चेद्गुरवेआचार्यायवस्त्रयुग्ममात्रादपि
दक्षिणांदद्यात्समर्थश्चेत् स्वसामर्थ्यानुसारेणविघ्नशांतंन
कारयेदितिस्मरणात् इतियाज्ञवल्क्यप्रोक्ताविनायकशांतिः
अथास्यैवप्रयोगः अथोच्यतेत्रसंभारोरोचनापंचमृत्तिकाः
अश्वस्थानाद्गजस्थानाद्वल्मीकसंगमाद्ध्रदात् चंदनागुरुक
स्तूरीकर्पूराद्याःसुगंधयः गौरसर्षपकल्कश्चगवाज्येनविमि
श्रितः गुग्गुलुश्चापिसंयुक्तःसर्वौषधिगणस्तथा मुरामांसीव
चाकुष्टशैलेयंरजनीद्वयम् शटीचंपकमुस्ताचसर्वौषधिगणः
स्मृतः चत्वारःकलशाःकाकवर्णाश्चास्फुटितव्रणाः ह्रदोदक
मितापिसप्तानिश्रृंगासंगमोदकम् सग्रीवाघ्रुक्रमारक्तंचर्मवानु
डुहंतथा श्रीपर्णीकाष्पीदंचसहकारस्यपल्लवाः अश्वत्थपल्ल
वाश्चस्तुःसुगंधिसुमनांस्यपि स्रजःशोभनगंधाश्चविचित्रकु
सुमानिच कलशावेष्टनार्थंचनववस्त्रचतुष्टयम् पीठस्याच्छाद
नार्थंतुशुभवस्त्रमथापरम् गणेशांबिकयोरर्थेवस्त्रयुग्मंसु
शोभनम् आचार्यदक्षिणार्थंतुमहार्हंवसनद्वयम् पंचवर्णानि
पिष्टानिस्वस्तिकस्यविनिर्मिते तैलंचसार्षपंतद्वदुदुम्बरविनिर्मि
तः स्रुवःकुशाश्चस्थालीचस्थालीपाकार्थंतंडुलाः किंचिदूनंतिलाक्रि
यात्कृसरान्तुलाश्चापरेनया तिलपिष्टेनसंयुक्तओदनःशीर्षमे
वच पक्वांश्चमत्स्यांश्चपक्वमांसपक्वमपक्वमं गौडीपिष्टेच

माषीचरुस्तथैवंविविधास्तरा मत्स्यादिकस्वरांतेचानिषिद्धंयस्य
यस्ययत् तथान्तेतद्विशेषेण।द्विजेस्त्याज्यास्तरासदा यजमान
स्यस्वदेशेतद्दिनस्तांनियोजयेत् मत्स्यन्मूलकंवास्यान्हतन्तद
त्तदाकृतिः सुखपाकरिकाश्चैवतथैवोडोरकस्रजः वर्तिलैश्च
न्तरश्चैस्वदीर्घैःपिष्टविकारकैः निर्मितास्रजउच्यंतेउडीरकस
माख्यया दध्यन्नंपायसंचैवपिष्टंचगुडमिश्रितम् लड्डुकाश्च
तथाद्दूर्वासर्षपागौरमृत्तिकाः गणेशप्रतिमाचैवगोर्याश्चप्र
तिमातथा एवंसंभृतसंभारःशांतिंकुर्याच्छुभेदिने विनाय
कशांतिंकर्तुकामस्यचंदताराक्लोमतेशुभेदिनेकृतवास्या
भ्यंतरशौचोनित्यकर्मानंतरममुकप्रयोजनार्थमेतत्कर्मकरि
ष्यइतिसंकल्प्यकृताध्ययनसंपन्नंब्राह्मणमस्मिन्कार्मणित्व
माचार्यंकुर्विति गंधपुष्पादत्तनादिभिर्वृणीततथान्यांश्चतर
ऋत्विजोवृणीत अथर्त्विग्भिःसहितःआचार्यःकर्मकरोतिगो
मयेनोपलिप्तेस्वलंकृतेदेशेपंचवर्णैःपिष्टैर्भद्रासनार्थमेकंस्व
स्तिकंकारयेत् तस्यस्वस्तिकस्यपूर्वादिदिक्षुचतुरःस्वस्तिका
न्कारयेत् कलशस्थापनार्थंतत्रमध्येस्वस्तिकोपरिरक्तमानडु
हंचर्मोत्तमंप्राचीनग्रीवंसंस्थाप्यतस्योपरिश्रीपर्णीकाष्ठनिर्मि
तपीठंसंस्थाप्यतत्पीठंश्वेतवस्त्रेणप्रच्छादयेत् ततश्चतुर्दिक्
स्वस्तिकेषुश्चवर्णास्फटिकाकालकानेकवर्णान् चतुरश्चन्दनच
र्चितान्स्रग्दामवेष्टितकंठान्नानाबाहनवस्त्रयुग्मवितान् कलशा

स्यान्यराशौ विधाय पद्मोदकेन नदीसंगमोदकेन वा कलशा
न्पूरयित्वा तत्र उत्तुतासि वराहेण कृष्णेन शतबाहुना मृत्तिके
हरमेणापंयन्मयाऽदुष्कृतं कृतमित्यनेन कलशेषु पंचामृदः सं
स्थाप्य गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ईश्वरीं सर्वभू
तानां तामिहोपह्वये श्रियमित्यनेन चंदनागुरुकस्तूरीकर्पूरा
दीन् गंधान् गोरोचनं गुग्गुलं च निक्षिप्य सहकारादिप्रशस्तप
ल्लवैः अन्यतमानि पल्लवानि कलशमुखेषु यथाशोभं निक्षिपेत्
ततस्त्वा ऋत्विजः पूर्वादिदिग्व्यवस्थितेषु कलशेषु त्वं नो
अग्ने वरुणस्य विद्वान्देवस्य हेडोऽवयासीसीष्ठाः यजिष्ठो वह्नितमः
शोशुचानो विश्वा द्वेषांसि प्रमुमुग्ध्यस्मदित्यनेन मंत्रेण वा स्व
स्वशाखोपनिषत्पठितैर्वरुणप्रकाशकैर्मंत्रैर्ऋग्वा ॐ भूर्भुवः स्व
रिति व्याहृतिभिर्वरुणाय नम इति नाममंत्रेण वरुणमावाह्य षो
डशोपचारैः पूजां निर्वर्त्य पूर्वोक्तमानेन भद्रो कृत्वा येन विधिना इ
त्यादिकां वा शन्नो वातः पवतां इत्यादिकामन्यां वा स्वस्वशाखोप
निषद्दितां वा शांतिं पठेयुः एतस्मिन्नेव समये आचार्यो भद्रासन
स्योत्तरभागे पैशान्यां वा विनायकं तज्जननीमंबिकां च पीठादि
षु प्रतिष्ठाप्य वक्ष्यमाणमंत्रेण आवाहनप्रभृति निवेद्य पर्यंतां पू
जां कुर्यात् मंत्रौ तु ॐ तत्पुरुषाय विद्महे वक्रतुंडाय धीमहि
तन्नो दंती प्रचोदयात् विनायकमंत्रः ॐ सुभगायै विद्महे का
ममालिन्यै धीमहि तन्नो गौरी प्रचोदयात् अंबिकामंत्रः अथ

म॰
क॰
११२

112

गृह्योक्तविधिनाग्निं प्रतिष्ठाप्य चरुं श्रपयित्वा ततो गव्याज्यलोली
कृतेन गौरसर्षपकल्केनोद्वर्तितांगं सर्वौषधैस्तथा चंदनागुरु
कस्तूरिकादिभिश्चाविलिप्तशिरसं यजमानं भद्रासन उपविश्य
गृह्योक्तमार्गेण स्वस्तिवाचनं कुर्वीत ऋत्विगादिब्राह्मणसहित
आचार्यः स्वस्तिवचनानंतरं च जीवत्पतिपुत्रादिरूपगुणशालि
नीभिः सुवेशाभिः स्त्रीभिः कृतमंगलं यजमानमभिषिंचेत् आचा
र्यस्तत्र पूर्वदेशावस्थितम् कलशमादाय सहस्राक्षं शतधारम्
षिभिः पावनं कृतम् तेन त्वामभिषिंचामि पावमान्यः पुनंतु ते
इत्यनेन मंत्रेणाभिषिंचेत् एवमभिषिच्य ततो दक्षिणादिगवस्थि
तं कलशमादाय पूर्वोक्तैः सहस्राक्षमित्यादिभिर्द्विभिर्मंत्रैरभि
षिंचेत् एवमभिषिच्य सव्यपाणिगृहीतकुशांतरितयजमान
स्य मूर्धनि सार्षपतैलमौडुम्बरेण स्रुवेणादाय वक्ष्यमाणमंत्रैर्जु
हुयात् एवं मिताय स्वाहा संमिताय स्वाहा शालाय स्वाहा क
टंकटाय स्वाहा कूष्मांडाय स्वाहा राजपुत्राय स्वाहा एवं षड्भि
र्मंत्रैर्मूर्धनि हुत्वा तदनंतरं पूर्वोक्तैः षड्भिर्मंत्रैः स्वास्मिन्नेवाग्नौ चरुं
हुत्वा अग्नेरिंद्रादिदिक्ष्वभिषेकशालायां वेंद्रादिलोकपालेभ्यस्त
न्नाममंत्रैर्बलिं दद्यात् नाममंत्रास्तु इंद्राय नमः अग्नये नमः यमा
य निर्ऋतये वरुणाय वायवे सोमाय ईशानाय ब्रह्मणे अनंता
य नमः अथ यजमानः स्नात्वा शुक्लमाल्यांबरधरो गुरुणा सहि
तो विनायकायांबिकायै च कृताकृतांस्तंडुलांश्च पलालौदनमि

वचेत्यादिनाविनिर्दिष्टं कृत्वा कृतद्रव्यजातमुपहारं दत्वा ततः शि
रसा भूमिं गत्वा कुसुमसहितेनोदकेन प्रत्येकं सर्वोक्तविनायका
म्बिकागायत्रीभ्यां मंत्राभ्यामर्घ्यं दत्वा तथा दूर्वासर्षपपुष्पांज
लिं च दत्वा विनायकमाम्बिकां चोपतिष्ठेत उपस्थानमंत्रस्तु रूपं
देहि यशो देहि भगं भगवति देहि मे पुत्रान्देहि धनं देहि सर्वका
मांश्च देहि मे इत्ययं मंत्रं भगवन्देहि मे भगमित्यूहं कृत्वा प्रथ
मतो विनायकमुपस्थाय पश्चाद्यथापठितेन मंत्रेणाम्बिकामु
पतिष्ठेतेति ततश्चाचार्यः शूर्पे कुशानास्तीर्योपहारशेषं तत्र नि
धाय चतुष्पथं गत्वा तत्र वक्ष्यमाणमंत्रैर्बलिं निदध्यात् मंत्रास्तु
बलिं गृह्णं त्विमं देवा आदित्या वसवस्तथा मरुतो वाश्विनौ रुद्राः
सुपर्णाः पन्नगा ग्रहाः असुरा यातुधानाश्च पिशाचा मातरोरगाः
शाकिन्यो यक्षवेताला योगिन्यः पूतनाः शिवाः जगतां शांतिक
र्तारो ब्रह्माद्याश्च महर्षयः मा विघ्नं मा च मे पापं मा संतु परिपंथि
नः सौम्या भवंतु तृप्ताश्च भूताः प्रेताः सुखावहाः इति चतुष्पथ
बलिदानमंत्रः अनंतरमाचार्याय वस्त्रद्वयसहितां दक्षिणां स्व
शक्त्यनुसारेण दत्वा विभवानुसारेण भूरिदक्षिणामपि ग्रहाविगा
दिभ्योन्येभ्यो ब्राह्मणेभ्यः प्रतिपाद्य ब्राह्मणान्भोजयेत् इति विना
यकशांतिः अथ नवग्रहयज्ञः याज्ञवल्क्यः श्रीकामः शांतिका
मो वा ग्रहयज्ञं समाचरेत् वृष्ट्यायुः पुष्टिकामो वा तथैवाभिचरन्न
पि ग्रहानाह सूर्यः सोमो महीपुत्रः सोमपुत्रो बृहस्पतिः शुक्रः श

मं॰
क
११३

113

नैऋरो राहुः केतवश्चेति ग्रहाः स्मृताः ग्रहप्रतिमानिर्माण द्रव्या
नाह ताम्रकात्स्फटिकाद्रक्तचंदनात्स्वर्णकादुभौ रजतादयसः
सीसात्कांस्यात्कार्या ग्रहाः क्रमात् स्ववर्णैर्वा पटे लेख्या गंधैर्मंडल
केषु वा पूजाविधिमाह यथावर्णं प्रदेयानि वासांसि कुसुमा
नि च गंधाश्च बलयश्चैव धूपो देयश्च गुग्गुलुः कर्तव्या मंत्रवंतश्च
चरवः प्रतिदैवतम् ग्रहमंत्रानाह आकृष्णेन इमं देवा अग्निर्मूर्धा
दिवः ककुत् उद्बुध्यस्वेति च ऋचो यथासंख्यं प्रकीर्तिताः बृहस्प
ते अति यदर्यस्तथैवान्नात्परिस्रुतः शन्नो देवीस्तथा कांडात्के
तुं कृण्वन्निमांस्तथा होमीयसमिध आह अर्कः पलाशः खदिरस्त्व
पामार्गोथ पिप्पलः उदुम्बरः शमी दूर्वा कुशाश्च समिधः क्रमात्
होमसंख्यामाह एकैकस्यात्र अष्टशतमष्टाविंशतिरेव वा होतव्या
मधुसर्पिर्भ्यां दध्ना क्षीरेण वा युतः नैवेद्यार्थं ब्राह्मणभोजनार्थं च द्र
व्याण्याह गुडौदनं पायसं च हविष्यं क्षीरषाष्टिकम् दध्योदनं ह
विश्चूर्णं मांसं चित्रान्नमेव च दद्याद्ग्रहक्रमादेव द्विजेभ्यो भोजनं
बुधः शक्तितो वा यथालाभं सत्कृत्य विधिपूर्वकम् गुडमिश्र ओ
दनः गुडौदनः हविष्यं मुन्यन्नादि क्षीरषाष्टिकं क्षीरमिश्रः षाष्टि
कोदनः हविः चूर्णौदनः चूर्णं तिलचूर्णं मिश्र ओदनः मांसं मांस
मिश्र ओदनः चित्रं नानावर्ण ओदनः गुडौदनादीनामभावे यथा
लाभमोदनादि संमानपूर्वकं नैवेद्यार्थं ब्राह्मणभोजनार्थं च द
द्यादित्यर्थः दक्षिणामाह धेनुः शंखस्तथानड्वान्हेम वासो हयः

क्रमात् कृत्वा गोरोचनसंख्या गणपतौ वेददक्षिणाः स्मृताः यश्च यस्य
यदा दुःस्थः स तं यत्नेन पूजयेत् ब्रह्मणैषां वरो दत्तः पूजिताः पूजयि
ष्यथ ग्रहाधीना नरेन्द्राणामुच्छ्रायाः पतनानि च भावाभावौ च जग
तस्तस्मात्पूज्यतमा ग्रहाः इति याज्ञवल्क्योक्तग्रहशान्तिः अ
थ नवग्रहयज्ञप्रयोगः शुभे दिने नित्यकर्मानन्तरममुकप्रयोज
नार्थं नवग्रहमखं कुर्यात् ऋत्विजस्त्ववरः शुभान् अथवा एकमभ्य
र्चैद्विधिना ब्राह्मणेन सहेति एतस्योपलक्षणं अन्तश्चाशेनास्य सह
स्रसंख्यया होमं कर्तुं यदि विचिकीर्षति तर्हि कर्मणो निर्वाहाय ग्र
हसंख्यकान्नृत्विजो वृणीत सर्वत्राचार्यब्रह्माणौ नियतौ अथाचा
र्यवरणप्रयोगः वरणकाले एकर्त्विग्देववस्त्रालंकारादिद्रव्येण
उदङ्मुखोपवेशिताय शुभाय समायैकस्मै ब्राह्मणाय दत्वा स्वयं
पूर्वाभिमुखः सन्नहं ग्रहयज्ञेन यक्ष्ये तत्रैभिर्गन्धपुष्पताम्बूल
हेमालंकारवासोभिराचार्यत्वेन त्वां वृणोमीति ततो वृतोस्मीत्याचा
र्यो ब्रूयात् एवं तदर्थामलंकारादीन् तेभ्यो दत्वास्मिन्कर्मणि ऋ
त्विक्त्वेन त्वामहं वृण इति वृणीत ततश्चाचार्यादयो वृताः कर्म कु
र्युः कुण्डादिनिर्माणप्रकारस्तु स्कान्दे नवग्रहमखे कुण्डं हस्तमात्रं
समं भवेत् चतुरस्रमथो हस्तयोनिवक्त्रं समेखलम् चतुरंगुल
विस्तारा मेखला तद्वदुच्छ्रिता मानहीनाधिकं कुण्डमनेन भयदं
भवेत् चतुरस्रमपि दिक्षु कुण्डं स्याद्धस्तमात्रं प्रमाणं भवतीत्यर्थः
अथो हस्तं खातमपि हस्तमात्रं भवतीति यावत् योनिवक्त्रं कुण्ड

स्य पश्चिमदिग्भागे उपरितनमेखलामध्ये वक्ष्यमाणलक्षणो वे
तायां योनिः सैव वक्त्रं यस्य तत्तादृक् गजोष्ठसन्निभयोनिवक्त्रं
वाश्वत्थपत्राकृतियोनिवक्त्रं कुंडं भवति तद्वर्द्धिता विस्ता
रवदेव चतुरंगुलसमुच्छ्रिता अथमेकामेखलापक्षः मेखलावि
नयं कुर्वीत तथा च चिंतामणौ द्व्यंगुलोच्छ्रिता कार्या मेखला
प्रथमा मेखलाबुधैः मेखला त्र्यंगुला तद्वत् द्वितीया समुदाहृ
ता उच्छ्रायविस्तराभ्यां तत्तृतीया चतुरंगुला द्व्यंगुलसमविस्ता
रः पूर्वयोरपि शस्यते पूर्वयोः प्रथमद्वितीययोः योनिलक्षण
मपि तत्रैव विस्तारमात्रे योनिः स्यात्षडुसमांगुलविस्तृता ष
ड्समवाश्रतिविकल्पः कूर्मपृष्ठोन्नता मध्ये पार्श्वयोश्चांगुलो
च्छ्रिताः गजोष्ठसदृशी तद्वदायता च्छिद्रसंयुता एतत्सर्वेषु कुं
डेषु योनिलक्षणमुच्यते मेखलोपरि सर्वत्र अश्वत्थदलसन्निभा
अश्वत्थदलसदृशा वा योनिर्भवतीत्यर्थः एवं लक्षणलक्षित
कुंडकरणाशक्तौ स्थंडिलं चतुरस्रं हस्तपरिमितं प्रकल्पयेत्
स्थंडिलं वा प्रकल्पयेदिति स्थाण्डिलस्याप्यग्न्यधिष्ठानत्वेन विधा
नात् एवं कुंडं स्थंडिलं वा कृत्वा तस्योत्तरपूर्वभागे ग्रहादिस्थाप
नं स्थंडिलं वेदिं वा विदधीत तथा च स्कन्दपुराणे तस्योत्तरपू
र्वेण स्थंडिलं हस्तमात्रकम् द्विवंशं चतुरस्रं च वितस्त्युच्छ्रायसं
मितम् द्विवप्रमित्यनेन वेदिकानिर्माणमुच्यते अत एव मत्स्य
पुराणे गर्तस्योत्तरपूर्वेण वितस्तिद्वयविस्तृतं वप्रद्वयवृतां वे

दिं वितस्त्युच्छ्रायसम्मितम् स्थापनाय च देवानां चतुरस्रमाक्षुद
कर्वाम् गर्तस्य कुंडस्योत्तरस्यां वैशान्यामीशानभागे वप्रद्वयं मेखला
द्वयम् तत्र द्व्यंगुलोच्छ्रायः प्रथमवप्रः अंगुलोच्छ्रायो द्वितीयोव
प्रः विस्तारस्तद्वयोरप्यंगुलपरिमितः उदक्प्रवां प्रुदङ्. निम्नां प
वं स्थंडिलं वेदिकां निर्माय फलपुष्पादियुतं वितानं तत्रोपरि कु
र्वीत अथ गृह्योक्तविधिनाग्न्यधिष्ठानेग्निं प्रणीय ग्रहादीन्देवा
न्स्थापयेत् तथा च मत्स्यपुराणे अग्निप्रणयनं कृत्वा तस्यामावा
हयेत्सुरान् देवतानां ततः संस्थाप्या विंशतिर्द्वादशाधिकाः तस्यां
वेदिकायां तत्र शुक्लतंडुलैः समंततः शोधितानां ततो मध्ये ता
म्रवर्णैस्तंडुलैः सूर्यस्य मंडलाकारमधिष्ठानं कुर्वीत अ
स्मान्मंडलादाग्नेयदिग्भागे शुक्लतमैस्तंडुलैश्चतुरस्रमधिष्ठा
नं सोमाय सूर्यस्य मंडलाद्दक्षिणतो रक्तचंदनालिप्तैरक्तैस्त्रि
कोणाकारमधिष्ठानं मंगलाय सूर्यमंडलादैशान्यां सुवर्ण
वर्णैरक्तैर्वाणाकृतिरधिष्ठानं बुधाय मध्यमंडलादुत्तरतः
सुवर्णवर्णैरेवाक्तैर्दीर्घचतुष्कोणमधिष्ठानं गुरवे मध्यमं
डलात्पूर्वतः शुक्लतमैस्तंडुलैः पंचकोणमधिष्ठानम् भार्ग
वाय मध्यमंडलात्पश्चिमतः कृष्णवर्णैस्तंडुलैर्धनुराकृत्य
धिष्ठानं शनैश्चराय मध्यमंडलान्नैर्ऋतिकोणे सीसात्मकद
धूम्रवर्णैरक्तैः कृष्णवर्णैर्वा शूर्पाकृत्यधिष्ठानं राहवे मध्यमं
डलाद्वायव्यदिग्भागे धूम्रैस्तंडुलैर्धूम्रवर्णैश्च वा ध्वजाका

म॰
क॰
११५

115

रमधिष्ठानं केतवे कुर्वीत तत्र मंडलाकारं चतुरस्रं त्रिको
णं बाणाकृति दीर्घचतुरस्रं पंचकोणं चापाकृति शूर्पाकृति
ध्वजाकारं तेषु ताम्र स्फटिक रक्तचंदन स्वर्ण रजत लोह सीस
कांस्यमयेषु मध्यमांगुलि मध्यपर्वप्रमाणेन तेषु सूर्यादिप्र
तिमा निर्माण द्रव्येषु वक्ष्यमाणप्रकारेण लिखित सूर्यादीन्म
ध्यमाग्निदक्षिणेशानोत्तर पूर्व पश्चिम नैर्ऋति वायु दिग्भागे
षु निदधीत तत्रापरो विशेषः स्कन्दपुराणोक्तः शुक्रार्कौ प्रा
ङ्मुखौ ज्ञेयौ गुरुसौम्यावुदङ्मुखौ प्रत्यङ्मुखः शनिः सो
मः शेषा दक्षिणतो मुखा इति अथादित्याभिमुखानेवेतरग्र
हादीन्स्थापयेत् तथाच चिंतामणौ आदित्याभिमुखाः स
र्वे सोपि प्रत्यधिदेवताः इत्युच्यते नामोत्तरेण नित्यमादित्यस्या
न्यस्य च स्यापि तद्ग्रहस्य मध्ये अन्यो ग्रहो न स्थापनीय इत्यर्थः
न च पराङ्मुखा स्थापनीयाः स्कन्दपुराणे भानुर्मंडलाका
रे सोमे तु चतुरस्रकम् अंगारकं त्रिकोणं च बुधं बाणाकृतिं
तथा ध्वजाकाराः केतवश्चेति भानुर्मंडलाकारे इत्यादि भा
न्वादिशब्देन ग्रहजात ग्रहकृतत्वा यतना निवर्तते चतुरस्रा
दीनि पि स्थानिलक्ष्यंते तथाच सूर्यादिमंडलेष्वनाधिकर
णानि ताम्रादिरचितानि वर्तुल चतुरस्रादीनि वा स्वल्पानि
दीर्घशुरुं चतुरस्रमिति शुक्रं तु डोलेवनाधिकरणेन दाय
नं दीर्घचतुष्कोणं च कुर्वीत पंचास्रं पंचकोणं च याज्ञवल्क्यः

ताम्रकांस्फटिकाद्रक्तचंदनात्स्वर्णकाद्रुमौ रजतादयसः
सीसात्कांस्यात्कार्याग्रहाः क्रमात् स्ववर्णैर्वा पटे लेख्या गंधै
र्मंडलके ऽथवा स्ववर्णैस्ताम्रादिवर्णैर्वर्णकैः ताम्रवर्णा वर्णा
भावेन रक्तवर्णवर्णकेन वा सूर्यमूर्तिरालेख्या गंधस्तत्र तद्व
त्स्ववर्णैर्मंडले तन्नत्र ग्रहस्थापनाय मासेन मध्ये तु भास्करं वि
द्यात्सोमं दक्षिणपूर्वके पश्चिमोत्तरे शनिं विद्याद्राहुं दक्षिण
पश्चिमे पश्चिमोत्तरतः केतुं स्थापयेच्छुक्लतंडुलैः दक्षिण
त्तिपन्नप्रत्ययः प्रतिपादितो येति सूत्रेण भास्करमित्यत्र द्वि
तीया भास्करं दक्षिणेन भास्करस्य दक्षिणभागे लोहितमंगार
कं विद्याज्जानीयात् अथवा सप्तमस्यार्थे पत्रप्रत्यय भास्करं
मध्ये विद्यात् तस्य दक्षिणे लोहितं विद्यात् दक्षिणप्रदेशा
त्यर्थः एवमुत्तरत्रापि पूर्वेणोत्तरेण ईशानदिग्भागे दक्षिणपूर्वे
आग्नेयां दक्षिणपश्चिमे नैर्ऋते पश्चिमोत्तरतः वायव्ये शुक्ल
तंडुलैः ग्रहस्थापनदेशं स्थंडिलवेदिकापरि पूर्यशुक्लतंडुला
नामुपरि तद्वत्तंडुलैरुपलक्षितेषु प्रदेशेषु आदित्यादीन् ग्र
हांस्वस्वायतनानतिक्रमेण स्थापयेन्निदध्यात् अथवा तत्त
द्वर्णतंडुलोपलक्षितेषु प्रदेशेषु प्रतिमा निधाय पश्चाच्छुक्ल
तंडुलैः कृत्वा स्थापयेत् प्रतिष्ठां कुर्यात् ग्रहलक्षणान्यपि म
त्स्यपुराणे पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः सप्ताश्व
रथसंस्थश्च द्विभुजः स्यात्सदा रविः श्वेतः श्वेताम्बरधरो दशा

म·
क·
११८

116

षः श्वेतभूषणः गदापाणिर्द्विबाहुश्च कर्तव्यो वरदः शशी र
क्तमाल्याम्बरधरः शक्तिशूलगदाधरः चतुर्भुजो मेषगमो व
रदः स्याद्धरासुतः पीतमाल्याम्बरधरः कर्णिकारदलद्युतिः
खड्गचर्मगदापाणिः सिंहस्थो वरदो बुधः गुरुशुक्रयोर्लक्षण
माह देवदैत्यगुरू तद्वत्पीतश्वेतौ चतुर्भुजौ दंडिनौ वरदौ कु
र्यात्साक्षसूत्रकमंडलू इंद्रनीलद्युतिः शूली वरदो गृध्रवाहनः
बाणबाणासनधरः कर्तव्योर्कसुतः सदा करालवदनो खड्ग
चर्मशूली वरप्रदः नीलः सिंहासनस्थश्च राहुरत्र प्रशस्यते धू
म्रा द्विबाहवः सर्वे गदिनो विकृताननाः गृध्रासनगता नित्यं
केतवः स्युर्वरप्रदाः नवग्रहसाधारणधर्मान्पदत्रयेण
चतुर्थचरणेन च केतुसंख्यां चाह सर्वे किरीटिनः कार्या ग्रहा
लोकहितावहाः अंगुलेनोच्छ्रिताः सर्वे शतमष्टोत्तरं सदा शत
मिति केतुनामानंत्यप्रदर्शनार्थं न तु नियमार्थं पूजायां तु केव
मूर्तिः शिष्टाचारत्वात् गोभिलीयनवग्रहे द्वादशांगुलं लिखेद
र्कं सोमं तु द्विगुणं लिखेत् भौमं नवांगुलं चैव चतुरं चैव षडंगुलं
बुधं शशिसुतं सौरिं चत्वारिंशांगुलं लिखेत् सोमार्द्धांगुलं राहुं
केतुमप्यर्धमंगुलम् बुधं शशिसुतं सौरिं चत्वारिंशांगुलं लिखे
त् सोमार्द्धांगुलं राहुं केतुमप्यर्धमंगुलम् एवमग्निप्रणय
नानंतरं ग्रहवेदिकायां शुक्लस्थलेषु सूर्यादिप्रतिमा निधाय
ध्याद. तिमिरावाहनस्थापयेत् अथायं प्रयोगः प्रणवस्य ब्र

लोकऋषिः देवीगायत्रीछन्दः परमात्माग्निर्देवता व्याहृती
नां क्रमेण जमदग्निभरद्वाजभृगवऋषयः अग्निवायुसूर्या
देवताः सूर्याद्यावाहनार्थे विनियोगः ॐ भूर्भुवः स्वः कलिंग
देशोद्भव काश्यपगोत्र सूर्य इहागच्छेत्यावाह्य रक्तपुष्पाक्षतै
रिह तिष्ठेति स्थापयेत् ॐ भूर्भुवः स्वः यमुनोद्भवात्रेयसगोत्र
चंद्र इहागच्छेत्यावाह्य श्वेतपुष्पाक्षतैरिह तिष्ठेति स्थापयेत्
ॐ भूर्भुवः स्वः अवंतीदेशोद्भव भारद्वाजसगोत्र भौम इहागच्छेत्या
वाह्य रक्तपुष्पाक्षतैरिह तिष्ठेति स्थापयेत् ॐ भूर्भुवः स्वः मा
गधदेशोद्भवात्रेयसगोत्र बुध इहागच्छेत्यावाह्य पीतपुष्पाक्ष
तैरिह तिष्ठेति स्थापयेत् ॐ भूर्भुवः स्वः सिंधुदेशोद्भवांगिरस
सगोत्र बृहस्पत इहागच्छेत्यावाह्य पीतपुष्पाक्षतैरिह तिष्ठे
ति स्थापयेत् ॐ भूर्भुवः स्वः भोजदेशोद्भव भार्गवसगोत्र शु
क्र इहागच्छेत्यावाह्य शुक्लपुष्पाक्षतैरिह तिष्ठेति स्थापयेत्
ॐ भूर्भुवः स्वः महाराष्ट्रदेशोद्भव काश्यपसगोत्र शनैश्चर इहाग
च्छेत्यावाह्य कृष्णपुष्पाक्षतैरिह तिष्ठेति स्थापयेत् ॐ भूर्भुवः
स्वः राठिनापुरोद्भव पैठीनसिसगोत्र राहु इहागच्छेत्यावाह्य
धूम्रपुष्पाक्षतैरिह तिष्ठेति स्थापयेत् ॐ भूर्भुवः स्वः अंतर्वेदिस
मुद्भव जैमिनिगोत्र केतो इहागच्छेत्यावाह्य धूम्रपुष्पाक्षतैरि
ह तिष्ठेति स्थापयेत् यथोक्तकुसुमतंडुलालाभे यथालाभो
पनीतैः कुसुमतंडुलैः स्थापयेत् स्कन्दपुराणे जन्मभूमिक्रमे

तेषांवर्णस्थानमुखोदिच योक्तास्ताक्रुतेशांतिंग्रहास्तेना
वमानिताः उत्पन्नोर्कः कलिंगेषु यमुनायांच चंद्रमाः अंगारक
स्त्ववंत्यांतु मगधेषु हिमांशुजः सैंधवेषु गुरुः कांतः शुक्रोभो
जकटे तथा शनैश्चरस्तु सौराष्ट्रे राहुर्वैराधिनापुरे अंतर्वेद्यां
तथा केतुरित्येता ग्रहभूमयः आदित्ये काश्यपं गोत्रमात्रेय
श्चंद्रमा भवेत् भारद्वाजो भवेद्भौमस्तथात्रेयश्च सोमजः श
क्रश्च्यांगिरोगोत्रः शुक्रो वै भार्गवस्तथा शनिः काश्यपगो
त्रोथ राहुः पैठीनसिस्तथा केतवो जैमिनीयाश्च ग्रहालोक
हितावहाः भास्करांगारकौ रक्तौ श्वेतौ शुक्रनिशाकरौ सोम
पुत्रो गुरुश्चैव पीतवर्णावुदाहृतौ कृष्णं शनैश्चरं विद्याद्राहु
श्चित्रास्तु केतवः वर्णरूपगुणैर्युक्तान्यादत्या वाहयेत्ततः
एवं सूर्यादीनावाहस्य स्थापाधिदेवतास्थापयेत् ओंभूर्भुवः
स्वः ईश्वरेहागच्छेहतिष्ठेति श्वेततंडुलैः सूर्यस्य दक्षिणपार्श्वे
ईश्वरम् ओंभूर्भुवःस्वः उमेहागच्छेहतिष्ठेति सोमस्य दक्षिणपा
र्श्वे उमाम् ओंभूर्भुवःस्वः स्कन्देहागच्छेहतिष्ठेति भौमस्य द
क्षिणपार्श्वे स्कन्दम् ओंभूर्भुवःस्वः विष्णोइहागच्छेहतिष्ठेति
बुधस्य दक्षिणपार्श्वे विष्णुम् ओंभूर्भुवःस्वः ब्रह्मन्निहागच्छेह
तिष्ठेति गुरोर्दक्षिणपार्श्वे ब्रह्माणम् ओंभूर्भुवःस्वः इंद्रेहाग
च्छेहतिष्ठेति शुक्रस्य दक्षिणपार्श्वे इंद्रम् ओंभूर्भुवःस्वः यमे
हागच्छेहतिष्ठेति शुक्लकृष्णतंडुलैः सूर्यस्य वामपार्श्वे यमम्

एवं सोमस्य वामभागेऽप्यापः भौमस्य वामपार्श्वे भूमिं बुधस्य
वामपार्श्वे विष्णुम् गुरोर्वामपार्श्वे इंद्रं शुक्रस्य वामपार्श्वे इंद्रा
णीं शनैश्चरस्य वामपार्श्वे प्रजापतिं राहोर्वामभागे सर्पान् के
तोर्वामभागे ब्रह्माणं श्वेतकुसुमाक्षतैः स्थापयेत् अधिदेवता
दक्षिणतो वामे प्रत्यधिदेवताः स्थापनीया प्रयत्नेन व्याहृति
भिरिति संग्रहकारः चिंतामणौ त्वधिदेवतास्थापनादेशाः
प्रकारांतरेण प्रदर्शिताः सूर्यस्येशानरेशं शंभुमुमां सोमस्य दक्षि
णे स्कंदमंगारकस्यैव दक्षिणस्यां निवेशयेत् सौम्यात्याग्नि
मतो विष्णुं ब्रह्माजीवस्य सर्वतः इंद्रमैंद्रां सिताद्दिशि मंदाद
नैयततो यमम् राहोः शर्वांतरे कालं सर्वसत्त्वभयावहम् के
तोर्नैर्ऋतदिग्भागे चित्रगुप्तं निधापयेत् एवं ग्रहाधिदेवता
प्रत्यधिदेवतास्थापनानंतरं विनायकादींश्च देवान्स्थापये
त् ॐ भूर्भुवः स्वः विनायकेहागच्छेह तिष्ठेति शनैश्चरस्योत्तर
भागे दुर्गां स्थापयेत् एवं सूर्यस्योत्तरभागे वायुं राहोर्दक्षिण
भाग आकाशं ॐ भूर्भुवः स्वः अश्विनीकुमाराविहागच्छेतां
मिह तिष्ठतामिति केतोर्दक्षिणभागे श्वेतकुसुमतंदुलैः अ
श्विनीकुमारौ स्थापयेत् मत्स्यपुराणे विनायकं तथा दुर्गां
वायुमाकाशमेव च आवाहयेद्व्याहृतिभिस्तथैवाश्विकुमा
रकौ संग्रहकारः राहुमंददिनेशानामुत्तरस्यां यथाक्रमात्
गणेशदुर्गावायूंश्च राहुकेत्वोस्तु दक्षिणे आकाशमश्विनौ चे

म·
क·
११८

118

तिपंचैतास्थापयेत्ततः अथ पंचैतानंतरन्तः स्थापयेत् एवं
द्वात्रिंशद्देवताआवाह्यस्थापयित्वानाममंत्रैः पूजयेत् तद्यथा
ॐ सूर्यायनमः इदमासनम् ॐ सूर्यायनमः इदंपाद्यं ॐ सूर्या
यनमः एषोर्घः ॐ सूर्यायनमः इदंपुनराचमनीयंनमः ॐ सूर्या
यनमः इदंस्नानम् ॐ सूर्यायनमः इदंवस्त्रम् ॐ सूर्यायनमः इद
मनुलेपनम् ॐ सूर्यायनमः एतानिपुष्पाणि ॐ सूर्यायनमः ए
षतेदीपः ॐ सूर्यायनमः एषतेधूपः ॐ सूर्यायनमः नैवेद्यं
एवंसूर्यंपूजयित्वा ॐ सोमायनमः इत्यादिप्रणवाद्यैर्नमोंतै
मंत्रैः सर्वान्द्वात्रिंशद्देवताआवाहनक्रमेणपूजयेत् अथवा
वक्ष्यमाणैस्तत्तद्देवताप्रकाशकैर्वैदिकमंत्रैरासनाद्युपचारा
न्कुर्वीत तत्राचमनीयदानानंतरंपंचामृतैः स्नानंकारयेत्
एतच्च सर्वेष्वेनाममंत्रैः पूजाकरणेपि अतः सूर्यायनमः सूर्यं
पयसास्नापयामीत्यनेनक्रमेण पंचामृतैरभिषेकः कार्यः ॐ
सूर्यायनमः समालभनमित्ययंक्रमः दुग्धदध्याज्यशर्करम
धूनि मधुशर्करमितिवा आप्यायस्वेतिमंत्रस्यगोतमऋषिः
सोमात्मकंपयोदेवता गायत्रीछन्दः क्षीरस्नानेविनियोगः
आप्यायस्वसमेतुतेविश्वतः सोमवृष्ण्यंभवावाजस्यसंगथेइति
क्षीरेणस्नानं दधिक्राव्णइतिमंत्रस्य दधिक्रावाम ऋषिः स्वराड्वृत्य
मंदधिदेवताः त्रिष्टुप्छंदो दधिस्नानेविनियोगः दधिक्राव्णोअ
कारिषंजिष्णोरश्वस्यवाजिनः सुरभिनोमुखाकरत्प्राणआयूंषिता

रिषत् इति दध्नास्नाने शुक्रमसीति यजुषः प्रजापतिर्ऋषि
राज्यं देवता ज्यस्नाने विनियोगः ॐ शुक्रमसि ज्योतिरसि धामा
सि प्रियन्देवानामनाधृष्टं देवयजनं देवेभ्यस्त्वा यज्ञियेभ्यो गृह्णा
मि स्वादुः पवस्वेत्यस्य मंत्रस्य ऋषिः सोमात्मका शर्करा देवता
जगती छन्दः शर्करास्नाने विनियोगः ॐ स्वादुः पवस्व दिव्या
यजन्मानस्वादुरिंद्राय सुहवीतु नाम्ना तद्वान्मित्राय वरुणाय वा
यवे बृहस्पते मधुमा अदाभ्यः इति शर्करया स्नानम् मधुवात इति
मंत्रस्य गौतम ऋषिः मधु देवता गायत्री छन्दः मधुस्नाने वि
नियोगः मधुवाता ऋतायते मधु क्षरंति सिंधवः माध्वीर्नः संत्वो
षधीः इति मधुना स्नाने एवं पंचामृतस्नापनानंतरं स्नानम् शु
द्धाचमनीयं वस्त्रदानानंतरं सपर्यां विधायानंतरमिंद्रादीन् लो
कपालान् स्वयोभिरुत्वोनावा पूजयेत् शिष्टसमाचारादत्र मं
त्राः इंद्रं वो विश्वतस्परि इति मंत्रस्य मधुच्छन्द ऋषिः इंद्रो देवता गाय
त्री छन्दः इंद्रपूजायां विनियोगः इंद्रं वो विश्वतस्परि हवामहे ज
नेभ्यः अस्माकमस्तु केवलाः अग्निं दूतमित्यस्य मंत्रस्य मेधातिथि
ऋषिः अग्निर्देवता गायत्री छंदो अग्निपूजायां विनियोगः अग्निं
दूतं वृणीमहे होतारं विश्ववेदसं अस्य यज्ञस्य सुक्रतुम् यमाय
सोमामिति मंत्रस्य यम ऋषिर्यमो देवता अनुष्टुप् छंदः यमपूजायां
विनियोगः यमाय सोमं सुनुत यमाय जुहुता हविः यमं ह यज्ञो
गच्छत्यग्निदूतो अरंकृतः सैरणाइति मंत्रस्य कण्व ऋषिः निर्ऋ

म॰
क॰
११९

119

तिर्देवता गायत्रीच्छन्दः निर्ऋतिपूजायांविनियोगः एषणाः
परापरानिर्ऋतिर्ह्यणेववधीत् सदेष्टतस्मयामह तत्रोअग्नी
त्यस्य वामदेवऋषिः वरुणोदेवता त्रिष्टुप्छंदः वरुणपूजायां
विनियोगः तत्रोअग्नेवरुणस्यविद्वान्देवस्यहेडोवयासिसीष्ठाः
यजिष्ठोवह्नितमःशोशुचानोविश्वेद्वेषांसिप्रमुमुग्ध्यस्मत् तव
वायवृतस्पतइत्यस्यमंत्रस्य विश्वऋषि वायुर्देवता गायत्रीछ
न्दो वायुपूजायांविनियोगः तववायवृतस्पतेत्वष्टुर्जामातरद्
भुत शवांस्यावृणीमहि सोमोधेनोरित्यस्यमंत्रस्य गौतमऋषिः
सोमोदेवता त्रिष्टुप्छंदः सोमपूजायांविनियोगः सोमोधेनुं
सोमोअर्वन्तमाशुमितिमंत्रः तमीशानमितिमंत्रस्य गौतम
ऋषिः ईशानोदेवता गायत्रीछंदः ईशानपूजायांविनियो
गः तमीशानजगतस्तस्थुषस्पतिंधियंजिन्वावयमीशानोय
थावेदसाम वृधेरक्षितापायुरदब्धःस्वस्तये एतेचमंत्राउपल
क्षणार्थाः यतइंद्रादिप्रकाशकैर्वैदिकैर्मंत्रैरिंद्रादिपूजाका
र्या अथ इंद्रायनमइत्यादिततद्देवतानाममंत्रैर्वालोकपाला
न्पूजयेत् एवंलोकपालान्संपूज्यादित्यादीनांग्रहाणांतत्तद्वर्णा
नुरूपचंदनप्रभृतीनांधूपांस्तद्वर्णानिकुसुमानिचसमर्प्याधिदेव
तालोकपालानांश्रीचंदनंयथोपपन्नानिकुसुमानिसमर्पयेत्
अथवासर्वेषांचंदनाद्यभावे आदित्यादीनांसर्वेषामपियथा
लाभोपपन्नंपुष्पाणिचसमर्पयेत् ततोधूपदानंचिंतामण्यो

दिवाकरस्य स्रजाद्यां दापयेद्रक्तचंदनं चंद्रे च भार्गवे चैव सित
वर्णं प्रभावयेत् कुंकुमेन तु संयुक्तं चंदनं जीवसौम्ययोः अगुरु
चंदनं दद्याद्राहुकेतुशनैश्चरे ग्रहवर्णानि पुष्पाणि गन्धं धूप
माहरेत् रवेः कुंदुरुकं धूपं शशिनस्तु घृतौदनं भौमे सर्जरसं चैव
मधुरं तु बुधे स्मृतम् सिह्लकं गुरवे दद्यात् शुक्रे बिल्वागुरुं तथा
गुग्गुलं मन्दवारे तु लाक्षा राहो भवे केतवे कुंदुरुकं सह्लकीर
सः सिह्लकः पिंडकः सिह्लकरसः शल्यार्थः बिल्वागुरुं बिल्वफल
मज्जासहितमगुरु मन्दवारः शनैश्चरः राहोः केतोश्च लाक्षा
वेक्ष्या कुंदुरुकादिधूपाभावे सर्वेषां गुग्गुलरेव धूपः तथा च या
ज्ञवल्क्यः धूपो देयश्च गुग्गुलरिति आदित्यादीनां कुंदुरुकादि
धूपदानेन दायि देवताप्रत्यधिदेवतयोस्तु एव धूपः विनाय
कादीनां गुग्गुलरेव तस्य सर्वसाधारणत्वात् एवं धूपदानानं
तरं दीपं दत्वा वक्ष्यमाणं नैवेद्यं दद्यात् चिंतामणौ गुडौदनं रवे
र्दद्यात् सोमाय घृतपायसं लोहिताय हविष्यान्नं बुधाय क्षीरषा
ष्टिकम् दध्योदनं गुरोर्दद्यात् शुक्राय च घृतौदनं मिश्रितं ति
लमाषैश्च नैवेद्यं तु शनैश्चरे राहोर्मांसौदनं दद्यात् केतोश्चित्रौ
दनं तथेति हविष्यान्नं मुद्गसंमिश्रीकृतादि क्षीरषाष्टिकः क्षीरमि
श्रः षाष्टिकौदनः सर्वेषां विधिनैवेद्याभावे यथालाभोपपन्नमो
दनादि निवेदयेत् यथाह याज्ञवल्क्यः शक्तितो वा यथालाभं
सत्कृत्य विधिपूर्वकम् एवमधिदेवतादीनां तद्भक्ष्यनैवेद्यं

थालाभमोदनादि समर्पयेत् विनायकस्य तन्मोदकसहितओ
दनादिः एवं नैवेद्यं दत्वा तां बलिदानानंतरं ग्रहवेदिकायामीशा
नदिग्भागे अव्रणमकालकं वर्हिर्दध्यक्षतविभूषितं चूतादि
पल्लवसंछन्नं सूत्रावेष्टितं वटोदुंबराश्वत्थपल्लवसंयुक्तं फलवस्त्र
युग्मान्वितमन्तः प्रक्षिप्तपंचरत्नशुभं निर्मलजलपरिपूर्णंस
प्तमृत्तिकाभिः सर्वौषधीभिश्चोपेतं दृढं कलशम् तत्रोपरि
स्थापयेत् तत्र कलशे वरुणमावाहयेत् तथा गंगादितीर्था
नि च मत्स्यस्कन्दपुराणयोः प्रागुक्तेरणात्स्मात् दध्यक्षतवि
भूषितम् चूतपल्लवसंछन्नं फलवस्त्रयुग्मान्वितम् पंचरत्नस
मायुक्तं पंचभंगयुतं तथा स्थापयेदव्रणं कुंभं वरुणं तत्र वि
न्यसेत् गंगायाः सरितश्चैव समुद्रांश्च सरांसि च पंचभंगाः प्र
कीर्तिताः पंचपल्लवाः गजाश्वरथ्यावल्मीकसंगमाद्ध्रदगोकुला
त् मृदमानीय विप्रेंद्र सर्वौषधिजलान्वितम् स्नानार्थं विन्य
सेत्तत्र यजमानस्य शाश्वतीत् मुरामांसी वचा कुष्ठं शैलेयं रज
नीद्वयम् सठी चंपकमुस्ताश्च सर्वौषधिगणः स्मृतः अथ वरु
णावाहनमंत्रः तत्त्वायामीत्यस्य मंत्रस्य शुनःशेपऋषिः वरु
णो देवता त्रिष्टुप्छंदः वरुणावाहने विनियोगः तत्त्वायामि
ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः अहेडमानो
वरुणेह बोध्युरुशंस मा न आयुः प्रमोषीः एतत्सप्रदर्शनार्थं
अतोन्यैरपि वरुणप्रकाशकवेदमंत्रैः ॐ वरुणाय नमः इति

नाममंत्रेणवावरुणमावाहयेत् अथगंगाद्यावाहन
मंत्रः सर्वेसमुद्राः सरितस्तीर्थानिजलदानदाः आयांतुयज
मानस्यदुरितक्षयकारकाः एवमादित्यादिदेवतावाहनादि
वरुणस्थापनांतंकर्मनिर्वर्त्यसर्वप्रतिष्ठिताग्नौवक्ष्यमाणवि
धिनाहोमंसमारभेत् तत्रतावदानप्रयोगः अस्मिन्कर्मण्यादि
त्याद्यानवग्रहानदेवतारुद्राद्यानवाधिदेवता अग्न्याद्यानव
प्रत्यधिदेवतारुद्राद्यानवाधिदेवता अग्न्याद्यानवप्रत्यधिदे
वाः विनायकाद्याइन्द्राद्यष्टपंचदेवताः समिच्चर्वाज्यातिल
व्रीहयोहविः अथवासमिच्चर्वाज्यानिहविःहविश्चर्वाज्यमि
श्रितंतंत्रंसांगेनकर्मणासद्योयक्ष्येइति देशमित्थवग्नौनि
क्षिपेत् एवमन्वाधानंविधायनिर्वापःकार्यः तत्रायंप्रयोगः
देवस्यत्वासवितुःप्रसवेऽश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांसूर्या
यत्वाजुष्टंनिर्वपामीतिचतस्रोमुष्टीर्निरुप्य एवंसोमायत्वामं
गलायत्वेत्यादिप्रकारेणग्रहेभ्यश्चतस्रश्चतस्रोमुष्टीर्निर्वपेत्
यदातुप्रतिग्रहमष्टोत्तरशतंसहस्रंवाहोमंकर्तुमिच्छति त
दाऽष्टौचतुष्टयनिर्वापसंपादितस्यद्रव्यस्यहोमपर्याप्तत्वेन
सर्वेभ्योनिर्वापानंतरंहोमपर्याप्तद्रव्यंभूमौनिर्वपेत् एवंनि
रुप्यदेवार्थतण्डुलैःप्रत्यालेपचरुंश्रपयित्वाभिघार्य उद्वास्य
प्रत्यभिघारयेत् याज्ञवल्क्यः कर्तव्यामंत्रवंतश्चचरवःप्रति
दैवतमिति एवंचरुश्रपणानंतरंयथाप्रत्यपरिस्तरणाद्याज्य

म·
क·
१२१

संस्कारांतरकर्मकरणानंतरं यजमानो यष्टव्यदेवतोद्देशेन
होमीयद्रव्यत्यागं कुर्वीत यजमानकर्तृत्वात्त्यागस्य वक्ष्यमश
कात्वात् तत्रायं प्रयोगः सूर्यसोमभौमबुधबृहस्पतिशुक्रश
नैश्चरराहुकेतुरुद्रोमास्कंदविष्णुब्रह्मेंद्रयमकालचित्रगुप्ता
ग्निजलविष्णुशक्रेंद्राणीप्रजापतिसर्पब्रह्मगणपतिदुर्गावा
युव्योमाश्विभ्यो गृहलोकागारादिदेवताभ्यः प्रायश्चित्तादिदेव
ताभ्यः स्विष्टकृदग्नये वेदसंपादितेन समिच्चर्वाज्यव्रीहितिलय
वादिमयं त्यक्तमित्यभिलषेत् केचन गृहपाकादोदनमुद्ध
त्यग्रहादीनुद्दिश्य जुहुते तेन चाशिष्टाचारप्रप्रमाणो देशत्या
गे कृते इध्ममादायाज्यभागौ च वह्नी च जुहुता सूर्यादिग्रहानुद्दि
श्य होमार्थं संपादितेन समिच्चर्वादिद्रव्येन प्रतिग्रहं प्रतिद्रव्यं
दशादशाहुतीर्हुत्वा देवतादीनुद्दिश्य प्रत्येकं तिस्रस्तिस्र एकै
कं वाहुतीर्हुत्वा च तत्र समिधादितिमिश्रतत्स्वाहुतीर्हुत्वा प
श्चात्प्रति ग्रहं अष्टविंशतिमष्टोत्तरशतमष्टोत्तरसहस्रं वावि
हितक्रमेण होमः कार्यः तत्रापि समिच्चर्वाज्यतिलादय इति
क्रमः अधिदेवतानाम प्रधानदेवतानां होमेऽल्पसंख्यासौ
कर्याः आसां च समिधः पलाशपवमत्स्यपुराणे कथनयात्
वल्लाश्च अर्कः पलाशखदिरावपामार्गोऽथ पिप्पलः औदुम्बरः
शमी दूर्वा कुशाश्च समिधः क्रमात् एकैकस्यात्राष्टशतमष्टा
विंशतिरेव वा होतव्या मधुसर्पिभ्यां दध्ना चैव समन्विताः प

नैनमधाज्यदध्नां समिधां सत्वश्च योवगम्यते याज्ञवल्क्यस्तु
विकल्पमाह होतव्या मधुसर्पिर्भ्यां दध्ना क्षीरेण वा पुनरि
ति स्मृतिपुराणयोः स्मृतेः प्राबल्यात्पुराणवाक्यस्य शाखो
वाशहार्थत्वात् तथाच मध्वादीनि समिदं जने विकल्पिता
नि चिंतामणौ समिधश्चात्र कर्तव्या अष्टोत्तरसहस्रकाः
अष्टोत्तरसहस्रं वा अष्टाविंशतिरेव वा समिधां लक्षणं वक्ष्ये
संख्यामासां तथैव च विशीर्णा द्विदला ह्रस्वा वक्राश्च सुषिराः
कृशाः अतिस्थूलाश्च दीर्घाश्च समिधः कार्यनाशने विशीर्णा
युः क्षयं कुर्याद्द्विदला पुत्रनाशिनी सुषिरा व्याधिजननी कृ
शा च रिपुवर्धिनी दीर्घा विदेशगमनी स्थूला चात्मनिचारि
णी अकृशाः समास्थूलाः सौम्याश्च सपलाशिनी प्रादेशमात्रि
कानोनाः समिधः सर्वकर्मणि अर्को नाशयते व्याधिं पलाशः
सर्वकामदः खदिरश्चार्थलाभाय अपामार्गः सुदर्शनः अश्वत्थः
सर्वकामाय सौभाग्यो डुंबरस्तथा शमी शमयते पापं दूर्वायुः
सुतवर्धिनी कुशा धर्मार्थकामानां रक्षोभ्ये रक्षणं विदुः अष्टो
त्तरसहस्रेत शतमष्टाधिकं तथा अष्टाविंशतिरष्टौ वा पके क
स्यत होमयेत् होमांते दक्षिणां दद्याच्छांत्यर्थं पुष्टिवर्धिनीम् मा
त्स्ये देवानामपि सर्वेषां पूजायां परमार्थवित् स्वेन स्वेन मंत्रेण हो
तव्याः समिधः क्रमात् होतव्यं च हुताशे च चरुभक्ष्यादिकं पुनः
मंत्रैर्दशाहुतीर्दद्याद्धोमे व्याहृतिभिः पुनः मंत्रैर्दशाहुतीरित्या

दिहोमार्थे संपादितेत्यादिना ग्रहेभ्यः प्रत्येकं दश दश आहुतीर्दद्या
त् अधिदेवतानां प्रत्येकं तिस्रस्तिस्र एकैकं वा दद्यात् इत्यर्थः
होमं व्याहृतिभिः पुनरिति भूः स्वाहेत्यादिभिस्ततस्त्वभिध्यानतस्त्वा कृ
तय उदुत्य सुखाभाद्व सुखो वाकुर्वेर्ज्ञेतृणेऽगवाः मंत्रं वेत्तस्यक
र्त्याश्वरवः प्रतिदैवतम् हुत्वा ततोऽवशिष्टं समापत्तो होमं समा
चरेत् आकृष्णेनेति सूर्याय होमः कार्यो द्विजन्मना आप्यायस्वे
ति मंत्रेण सोमाय जुहुयात्पुनः अग्निर्मूर्धा दिव इति मंत्रो भौमाय
कीर्तयेत् उद्बुध्यस्वाग्न इत्येव मंत्रं सोमसुताय वै बृहस्पते अति
यदर्य इति चैव गुरोर्मंत्रः अन्नात्परिस्रुतो रसः शुक्रस्यापि निग
द्यते शनैश्चराय तु पुनः शन्नो देवीति होमयेत् कयानश्चित्र
आभुवेति मंत्रेण राहोरुदीरयेत् केतुः कृण्वन्निति ब्रूयात्केतुना
मपि शांतये आ वो राजेति रुद्रस्य च वायैर्होमं समारभेत् आपो हि
ष्ठेत्युपेयाच्च सोमेति स्वामिनस्तथा विष्णोरिदं विष्णुरिति तन्मित्ते
ति स्वयंभुवः इंद्रमिद्देवतातय इंद्राय जुहुयात्पुनः तथा यमस्य
चायं गौरिति होमः प्रकीर्तितः कालस्य ब्रह्मजज्ञानमिति मंत्रः
प्रशस्यते चित्रगुप्तस्य चाज्ञातमिति वेदविदो विदुः अग्निर्दूतं
वृणीमह इति वह्नेरुदाहृतः उदुत्तमं वरुणेति अपां मंत्रः प्रकी
र्तितः भूमेः पृथिव्यंतरिक्षमिति वेदेषु पाठतः सहस्रशीर्षा पुरु
ष इति विष्णोरुदाहृतः इदं इंद्र मरुत्वत इति शक्रस्य कथ्यते
उत्तानपर्णे सुभगः इति होमं समारभेत् प्रजापतेः पुनर्होमः प्रजा

पतइतिस्मृतः नमोस्तुसर्पेभ्यइतिसर्पाणांमंत्रउच्यते एष
ब्रह्मायज्ञस्त्विजइतिब्रह्मणउदाहृतः विनायकस्यचात्यतनइ
तिमंत्रउदाहृतः जातवेदसेसुनवामदुर्गामंत्रोयउच्यते आ
दित्यवचस्येतस्याकाशस्यउदाहृतः आणोशिशोर्महीनो
चतद्ब्राह्मणःप्रकीर्तितः एषउघाप्रस्त्वेतिचादित्यमंत्रउच्य
ते शर्माद्वतिंचमूर्धानंदिवइत्यभिपातयेत् अथहोममंत्रः
आकृष्णेतिसूर्यमंत्रस्यहिरण्यस्तूपऋषिःसवितादेवतात्रिष्टु
प्छंदःसूर्यप्रीतयेसमिदादिसम्पादितद्रव्यहोमेविनियोगः
आकृष्णेनरजसावर्तमानइतिमाध्यन्दिनपाठः तैत्तिरीयाणां
त्वासत्येनरजसावर्तमानोनिवेशयन्नमृतंमर्त्यंचहिरण्यये
नसवितारथेनदेवोयातिभुवनानिपश्यन्स्वाहा आप्यायस्वेति
सोममंत्रस्य गौतमऋषिःसोमोदेवता गायत्रीछन्दःसमिदा
दिसम्पादितद्रव्यहोमेविनियोगः आप्यायस्वसमेतुतेवि
श्वतःसोमवृष्ण्यंभवावाजस्यसंगथेस्वाहा इदंदेवेतिमाध्यन्दि
निशाखापठितस्यसोममंत्रस्यगौतमऋषिःसोमोदेवतात्रि
ष्टुप्छंदः अग्निर्मूर्धेत्यंगारकमंत्रस्य विरूपऋषिःअंगारको
देवता गायत्रीछंदः अंगारकप्रीतयेसमिदादिसंपादितद्रव्य
होमेविनियोगः अग्निर्मूर्धादिवःककुत्पतिःपृथिव्याअयंअपां
रेतांसिजिन्वतिस्वाहा उद्बुध्यस्वेतिबुधमंत्रस्याग्निर्ऋषिः बुधोदे
वतात्रिष्टुप्छंदःबुधप्रीतयेसमिदादिसंपादितद्रव्यहोमेविनि

म॰
क॰
१२३

योगः उद्बुध्यस्वाग्ने प्रतिजागृहेनमिष्टापूर्ते संसृजेथामयं च पु
नः कृण्वंस्त्वा पितरं युवानमन्वातांसीनयितं तं सेये स्वाहा उद्बुध
ध्यमिति मंत्रस्य बुधऋषिः बुधो देवता बृहतीछन्दः बृहस्पते
अति यदर्य इति बृहस्पतिमंत्रस्य गृत्समदऋषिः बृहस्पतिर्देवता
त्रिष्टुप्छंदः बृहस्पतिप्रीतये समिदादिसम्पादितद्रव्यहोमे वि
नियोगः बृहस्पते अति यदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु
यदीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम् स्वाहा
अन्नात्परिस्रुतो रस इति तैत्तिरीयशाखोपदिष्टस्य वैश्वदेवकां
डान्तःपातित्वाद्विश्वेदेवा ऋषयः शुक्रो देवता षट्पदा जग
तीछन्दः शुक्रप्रीतये समिदादिसम्पादितद्रव्यहोमे विनियोगः
अन्नात्परिस्रुतो रसं ब्रह्मणा व्यपिबत्क्षत्रं ऋतेन सत्यमिंद्रियं
विपानं शुक्रमन्धस इंद्रस्येंद्रियमिदं पयोमृतं मधु स्वाहा अयं तै
त्तिरीयमंत्रस्तैत्तिरीयब्राह्मणे द्वितीयकांडे षष्ठप्रपाठके द्वि
तीयानुवाके समाम्नातः इति नास्मिन्ननुवाके प्राप्तं तयोः ऋते
न सत्यमिंद्रियमित्यादिवाक्यचतुष्टयं समाम्नातं मध्ये पितत्र
ऋतेन सत्यमिंद्रियमित्येकं वाक्यं पठितमयं च मध्यपाठ ऋ
तेनेति वाक्यचतुष्टयस्यानुषंगद्योतनार्थः अनयवायंतयोर्वा
ऋचतुष्टयस्य समाम्नातमन्नात्परिस्रुत इत्यस्यैव माध्यंदिनशा
खोक्तमारेणाश्विसरस्वतीइंद्रा ऋषयः शुक्रो देवता अतिजगती
छन्दः चिंतामणौ च प्रजापतिर्ऋषिः जगतीछंदः इत्युक्तंत ।

च्छावानंतराभिप्रायेणशुक्रांतेअन्यदितिशुक्रमंत्रस्य भा
रद्वाजऋषिः शुक्रोदेवता त्रिष्टुपछंदः शन्नोदेवीरिति शनैश्च
रमंत्रस्य सिंधुद्वीपऋषिः शनैश्चरोदेवता गायत्रीछंदः श
निप्रीतयेसमिदादिसम्पादितद्रव्यहोमेविनियोगः शन्नोदे
वीरभिष्टयआपोभवंतुपीतयेशंयोरभिस्रवंतुनः स्वाहा श
मग्निरितिशनैश्चरमंत्रस्य हिरण्यऋषिःशान्तिर्देवता उष्णिकछं
दः कयानश्चित्रइति राहुमंत्रस्य वामदेवऋषिः राहुर्देवता
गायत्रीछन्दः राहुप्रीतये समिदादिसम्पादितद्रव्यहोमेवि
नियोगः कयानश्चित्रआभुवदूतीसदावृधःसखाकयाशचि
ष्ठयावृतास्वाहा कांडात्कांडादिति राहुमंत्रस्य प्रजापतिऋ
षि राहुर्देवता अनुष्टुपछंदः केतुंकृण्वन्निति केतुमंत्रस्य मधु
च्छन्दऋषिः केतवोदेवता गायत्रीछंदः केतुप्रीतयेसमिदा
दिसम्पादितद्रव्यहोमेविनियोगः केतुंकृण्वन्नकेतवेपेशो
मर्याअपेशसेसमुषद्भिरजायथाःस्वाहा इतिग्रहमंत्राः अथा
धिदेवतामंत्राः आवोराजानमितिसूर्याधिदेवता भूतरुद्रमं
त्रस्य वामदेवऋषिः रुद्रोदेवता त्रिष्टुपछंदः रुद्रप्रीतयेस
मिदादिसम्पादितद्रव्यहोमेविनियोगः आवोराजानमध्वरस्य
रुद्रंहोतारंसत्ययजंरोदस्योः अग्निंपुरातनयित्नोरचित्ताद्धि
रण्यरूपमवसेकृणुध्वंस्वाहा त्र्यम्बकमितिरुद्रमंत्रस्य वसि
ष्ठऋषिः रुद्रोदेवताः अनुष्टुपछंदः कद्रुद्रायेति रुद्रमंत्रस्य

कण्वऋषिः रुद्रोदेवता गायत्रीछन्दः आपोहिष्ठेति सोमाधि
देवता अथोमामंत्रस्य सिंधुद्वीपऋषिरुमादेवता गायत्रीछन्द
आपोहिष्ठामयोभुवस्तानऊर्जेदधातनमहेरणायचक्षसेस्वाहा
गौरीर्मिमायेत्युमामंत्रस्य दीर्घतमपाऋषिरुमातिकागौरीदेव
ता जगतीछन्दः श्रीश्चतइत्युमामंत्रस्य प्रजापतिर्ऋषिरुमादे
वताःनुष्टुश्छंदः श्रीश्चेतितैत्तिरीयपाठः स्योनापृथिवीति मंग
लाधिदेवताअथस्कंदमंत्रस्य मेधातिथिर्ऋषिः स्कंदोदेवता गा
यत्रीछंदः स्कन्दप्रीतयेसमिदादिसम्पादितद्रव्यहोमेविनियो
गः स्योनापृथिवीभवानृक्षरानिवेशिनीयच्छानः शर्मसप्रथः
स्वाहा यदक्रन्दइति स्कन्दमंत्रस्य मेधातिथिःऋषिः स्कन्दोदे
वतात्रिष्टुश्छंदः इत्युक्तंतन्मेत्रोनरामिदंविष्णुरितिप्रथादिदेव
ता अथविष्णुमंत्रस्य मेधातिथिःऋषिः विष्णुर्देवता गायत्रीछ
न्दः विष्णुप्रीतयेसमिदादिसम्पादितद्रव्यहोमेविनियोगः इदं
विष्णुर्विचक्रमेत्रेधानिदधेपदंसमूढमस्यपांसुरेस्वाहा सह
स्रशीर्षेति विष्णुमंत्रेनारायणऋषिः पुरुषोदेवताःनुष्टुश्छं
दः त्वामित्सप्रथाअसीतिबृहस्पतिप्रत्याधिदेवताअथब्रह्ममंत्रस्य
भार्गवऋषिर्ब्रह्मादेवता बृहस्पतीछन्दः ब्रह्मप्रीतयेसमिदादि
सम्पादितद्रव्यहोमेविनियोगः त्वामित्सप्रथाअस्यग्रेत्राताः
ऋतस्कविः त्वांविप्रः सामिधानमीदिवश्राविवसंनिवेधसः स्वाहा
ब्रह्मजांनेब्रह्मप्रजेतिब्रह्ममंत्रस्य विश्वामित्रऋषिः ब्रह्मादे

वता त्रिष्टुप्छंदः इंद्राग्निर्देवता नय इति शुक्राधिदेवता श्रुतं
इमं मंत्रस्य मेधातिथिः ऋषिः इंद्रो देवता बृहस्पती छन्दः इंद्रप्री
तये समिदादि सम्पादित द्रव्य होमे विनियोगः इंद्राग्निर्देवता न
य इंद्रं प्रत्ययध्येरे इंद्रं समीके वनिनो हवामहे इंद्रं धनस्य सातये
स्वाहा इंद्राग्नेयेंद्रो मरुत्वत इतीद्रस्य मंत्रस्य कश्यप ऋषिः इंद्रं
वो विश्वतस्पतीदं मंत्रस्य मधुच्छन्द ऋषिः हयोरपीद्रो देवता
गायत्री छन्दः अयंगौरिति शन्यधिदेवता अतयम मंत्रस्य
सर्पराज्ञी ऋषिः अयंगौरिति शन्यधिदेवयमो देवता गायत्री
छन्दः यमप्रीतये समिदादि सम्पादित द्रव्य होमे विनियोगः
अयं गौः पृश्निरक्रमीदसदन्मातरं पुरः पितरं च प्रयन्त्स्वः स्वाहा
इमं यमेति यम मंत्रस्य यम ऋषिः यमो देवता त्रिष्टुप्छंदः ब्र
ह्मजज्ञानमिति राह्वधिदेवता अत काल मंत्रस्य विश्वामित्र ऋ
षिः कालो देवता त्रिष्टुप्छंदः कालप्रीतये समिदादि सम्पादि
त द्रव्य होमे विनियोगः ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतः
सुरुचो वेन आवः स बुध्निया उपमा अस्य विष्ठाः सतश्च योनिमस
तश्च विवः स्वाहा कार्षिरसीति काल मंत्रस्य यज्ञवः सोम ऋषिः
कालो देवता अथवा कार्षिरसीत्यस्य मघवा ऋषिः कालो देव
ता अनुष्टुप्छंदः अज्ञातमिति केत्वधि देवता अत चित्रगुप्त मं
त्रस्य वैश्वदेवकांड समाम्नाया हि से देवा ऋषयः चित्रगुप्तो दे
वता अनुष्टुप्छंदः चित्रगुप्त प्रीतये समिदादि सम्पादित द्रव्य हो

म·
क·
१२५

मेविनियोगः अज्ञातमनाज्ञातममतेचमतंचयत् जातवे
धः संधेहितं वेत्थयथातथंस्वाहा चिंतामणौतु अज्ञातमिति
सोमऋषिः चित्रगुप्तोदेवता जगतीछंदः इत्युक्तंतथायमभि
प्रायः सौम्यकांडेपिसमाम्नायात्सोमऋषित्वं शाखांतराभिप्रा
येण चित्रावसोःस्वस्तितेइतिचित्रगुप्तमंत्रस्य यज्ञपार्श्वाग्नेयकां
डेनःपातित्वादग्निर्ऋषिः चित्रगुप्तोदेवता चिंतामणौतु चि
त्रावसः स्वस्तिनइति प्रजापतिर्ऋषिः चित्रगुप्तोदेवता अनुष्टु
प्छंदः इत्युक्तंतथापिद्वैलक्षण्याभिप्रायः सचित्रचित्रमिति
चित्रगुप्तमंत्रस्य भारद्वाजऋषिः चित्रगुप्तोदेवता त्रिष्टुप्छंदः
इत्यधिदेवतामंत्राः अथप्रत्यधिदेवतामंत्राः अग्निंदूतमिति
सूर्यप्रत्यधिदेवता भूताग्निमंत्रस्य मेधातिथिःऋषिः अग्नि
र्देवता गायत्रीछंदः अग्निप्रीतयेसमिदादिसंपादितद्रव्य
होमेविनियोगः अग्निंदूतंवृणीमहेहोतारंविश्ववेदसमस्य
यज्ञस्यसुक्रतुंस्वाहा उदुत्तममितिसोमप्रत्यधिदेवताभूता
नामपांमंत्रस्यशुनःशेपऋषिः आपोदेवता त्रिष्टुप्छंदः अ
पांप्रीतयेसमिदादिसंपादितद्रव्यहोमेविनियोगः उदुत्तमंव
रुणपाशमस्मदवाधमंविमध्यमंश्रथायअथावयमादित्य
व्रतेतवानागसो अदितयेस्यामस्वाहा पृथिव्यंतरिक्षमितिमंग
लप्रत्यधिदेवताभूतस्य पृथ्वीमंत्रस्य प्रजापतिर्ऋषिः पृथिवी
देवता त्रिष्टुप्छंदः अनुष्टुब्वा पृथिवीप्रीतयेसमिदादिसम्पा

125

दितद्रव्यहोमेविनियोगः पृथिव्यंतरिक्षंद्यौरापः कानिक्रयात्रि
षुः आपोमरुतोमादयंतेचमेज्योतिःस्वाहा सहस्रशीर्षापुरु
षइतित्रुपप्रत्यधिदेवता भूतविष्णुमंत्रस्य नारायणऋषिः वि
ष्णुर्देवता॰त्रुष्टुप्छंदः विष्णुप्रीतयेसमिदादिसंपादितद्रव्यहो
मेविनियोगः सहस्रशीर्षापुरुषः सहस्राक्षः सहस्रपात् स
भूमिंविश्वतोवृत्वात्यतिष्ठद्दशांगुलंस्वाहा इंद्रायइंद्रोमरुत्वत
इति बृहस्पतिप्रत्यधिदेवता भूतेंद्रमंत्रस्य काश्यपऋषिः इं
द्रोदेवता गायत्रीछंदः इंद्रप्रीतयेसमिदादिसंपादितद्रव्यहो
मेविनियोगः इंद्रायेंद्रोमरुत्वतेपवस्वामधुमत्तमऋतस्ययो
निमासदत्स्वाहा अमानपर्णोसिभगइतिशुक्रप्रत्यधिदेवता
भूतशचीमंत्रस्य इंद्राणीऋषिः इंद्राणीदेवता अनुष्टुप्छंदः
इंद्राणीप्रीतयेसमिदादिसम्पादितद्रव्यहोमेविनियोगः अमा
नपर्णोसिभगेदेवजूतेमहस्वतिस्वधाजीमेमराधमपतिमकेव
लंकुरुस्वाहा चिंतामणौतु प्रजापतिऋषिरित्युक्तंतच्छाखां
तरपाठानुसारेण प्रजापतेनहित्वदेतिशनिप्रत्यधिदेवता
भूतप्रजापतिमंत्रस्य हिरण्यगर्भऋषिः प्रजापतिर्देवता त्रि
ष्टुप्छंदः प्रजापतिप्रीतयेसमिदादिसम्पादितद्रव्यहोमेविनि
योगः प्रजापतेनहित्वदन्यएताविश्वाजातानिपरिताबभूव
यत्कामास्तेजुहोमस्तन्नोअस्तुवयंस्यामपतयोरयीणांस्वाहा अ
स्मिन्सर्पमंत्रस्य यमराजऋषिः अनुष्टुप्छंदः सर्पोदेवता

म॰ नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु ये अन्तरिक्षे ये दिवि ते
क॰ भ्यः सर्पेभ्यो नमः स्वाहा एष ब्रह्मेति केतन प्रत्यधिदेवता भूत
१२८ ब्रह्ममंत्रस्य वैश्वदेवकां उत्तानःपातित्वेन विश्वेदेवा ऋषयः
ब्रह्मादेवता द्विपदागायत्री ब्रह्मप्रीतये समिदादि सम्पादित
द्रव्यहोमे विनियोगः एष ब्रह्मा य ऋत्विज इन्द्रो नाम श्रुतो गृणे
स्वाहा चित्ता मनोऽनेन कश्यप ऋषिरिल्वकं नवशाखोत्तरपादे
हेतरिति प्रत्यधिदेवतामंत्राः अथ विनायकादिपंचदेवतामं
त्राः आतूनइति विनायकमंत्रस्य कुसीद ऋषिः विनायको दे
वता गायत्रीछंदः विनायकप्रीतये समिदादिसम्पादितद्रव्य
होमे विनियोगः आतून इन्द्र क्षुमंतं चित्रं ग्राभं संगृभाय महा
हस्तीदक्षिणेन स्वाहा जातवेदसे इति दुर्गामंत्रस्य कश्यपऋ
षिः दुर्गादेवता त्रिष्टुप्छंदः दुर्गाप्रीतये समिदादिसम्पादि
तद्रव्यहोमे विनियोगः जातवेदसे सुनवाम सोममरातीय
तो निदहाति वेदः स नः पर्षदति दुर्गाणि विश्वा नावेव सिंधुं
दुरितात्यग्निः स्वाहा कराशिष्विति वायुमंत्रस्य त्रित ऋषिः
वायुर्देवता उष्णिक्छंदः वायुप्रीतये समिदादिसम्पादितद्र
व्यहोमे विनियोगः कराशिष्मंहीणां हिन्वन्नृतस्य दीधि
तिं विश्वा परि प्रिया भुवदध द्विता स्वाहा आदित्प्रत्नस्येत्याकाश
मंत्रस्य वत्सऋषिः आकाशो देवता गायत्रीछन्दः आका
शप्रीतये समिदादिसम्पादितद्रव्यहोमे विनियोगः आदि

त्वत्रस्यरेतसोज्योतिःपश्यतिवासरे पयोयदिव्यतेदिस्वाहा
एषोउषेत्यश्विमंत्रस्य प्रस्कण्वऋषिः अश्विनौदेवता गायत्री
छन्दः अश्विनीप्रीतयेसमिदादिसम्पादितद्रव्यहोमे विनि
योगः एषोउषाअपूर्व्याव्युच्छतिप्रियादिवः स्तुषेवामश्विना
बृहत्स्वाहा एभिर्मंत्रैःसूर्याद्यावाहितदेवतानांपूर्वोक्त
प्रकारेणहोमंकृत्वाजयादिहोमकरणपक्षेजयादीन्हुत्वा
प्रायश्चित्ताहुतीर्हुत्वा मूर्धानंदिवइत्यनेनपूर्णाहुतिंजुहुया
दिति मूर्धानंदिवइत्यस्य पूर्णाहुतिमंत्रस्य भारद्वाजऋ
षिः वैश्वानरोदेवता त्रिष्टुप्छंदः पूर्णाहुतिहोमेविनियोगः
मूर्धानंदिवोअरतिंपृथिव्यावैश्वानरमृतआजातमग्निंकविंस
म्राजमतिथिंजनानामासन्नपात्रंजनयंतदेवाःस्वाहा इयंच
पूर्णाहुतिःफलसहिताभवतिकेचनस्विष्टकृद्धोममिच्छंति
अतःस्विष्टकृद्धोमपक्षेप्रायश्चित्ताहुतिभ्यःपूर्वंजयादिहोमा
नंतरंस्विष्टकृद्धोमःजयादिहोमकरणपक्षेप्रायश्चित्ताहुति
भ्यःपूर्वमेवाहुतिभ्यःपूर्वमेवस्विष्टकृत् यथाहगोभिलः
प्राक्स्विष्टकृतआवापइति अस्यार्थः आवापःप्रक्षेपःगृह्य
लेचसमिदादिहोमविहिताः जयादयोहिकर्मसमृद्धिकामे
नहूयंते अतःसमृद्धिकामेनात्रप्रक्षिप्यंतेइत्यावापाजयादयः
एवमन्यत्राप्यावापशब्दस्यार्थोनेयआवापःस्विष्टकृतःस्विष्टकृ
द्धोमात्प्राग्भवतीति अग्नयेस्विष्टकृतेस्वाहेति स्विष्टकृद्धोम

स० क० १२२

मंत्रः अथवाकूष्मांडहोमप्रकरणोक्तमंत्रोग्राह्यः अतस्व
स्विष्टकृद्धोमात्प्राक्सप्तशालोक्तप्रकारेणजयादिहोमप्रभृती
नुपहोमान्हुत्वा ततःस्विष्टकृतंचहुत्वाथबर्हिरंजनपरिधि
प्रहरणप्रायश्चित्तहोमांतंकर्मनिर्वर्त्य पूर्णाहुतिंहुत्वा अथ
सकामोवसोर्धारांपातयेदनलोपरि उदुम्बरीमथार्द्रांचअ
जीकोटरवर्जितांबाहुमात्रांस्रुचंकृत्वा ततःस्तम्भद्वयोपरि
घृतधारांतथासम्यगग्नेरुपरिपातयेत् श्रावयेत्स्रुकमाग्रे
यंवैसर्वैरौद्रमैन्द्रवं महावैश्वानरंसम्यग्ज्येष्ठसामचपाठ
येत् अत्रायंप्रकारः वह्नेरुपरिस्तम्भाविरत्नामौदुम्बरीस्रुक
प्रमाणांस्रुचंविधाय उपरिष्टंबिलाविधतेननिर्मलघृतपूरि
तेनकुंभेनाधोपवमारश्छिद्रेणाज्यप्रक्षेपंचवह्नेरुपरिवसोर्धारां
पातयेत् तस्यांचघृतधारायांस्रुकप्रणालिकयाग्नौपतंत्यामा
ग्नेयादीनिसूक्तानिश्रावयेत् तत्राग्नेयम् अग्निमीडेपुरोहितमि
त्यादि मधुच्छन्दसआर्षंगायत्रीच्छन्दस्कं वैश्वदेवंताविसोदुक
मित्यादि षड्ऋचंदीर्घतपसआर्षमनुष्टुप्छन्दस्कं रौद्रं ...
वेदाश्चानेपितरीतिपंचदशर्चंगृत्समदार्षत्रिष्टुभमैन्द्रवंसादि
ष्ठयेतिदशर्चंगायत्रंमहावैश्वानरंदैवतंत्रैष्टुभंवसुधारायांवि
हितास्यप्रकारःरुद्रविधानप्रकरणेदर्शितं एतेषामाग्नेयादि
सूक्तानामनेकत्वात् गीतात्मकस्यसाम्नोलिखितमशक्यत्वा
त्रैतान्याग्नेयादिसूक्तानिपावतोनप्रदर्शितानि यानिचाग्निमी

उे विसोर्त्तुक मातेपितः स्वादिष्ट येतिप्रत्येकसूक्तानि दर्शि
तानितानि प्रदर्शनार्थानि अतोमान्यपि अग्न्यादिदेवतावि
स्वस्वशाखासमाम्नातानि यथाभ्यासं पठेत् येच सोमसूर्यादि
प्रकाशका आकृष्णेनेत्येवमादयो मंत्राः पूर्वं प्रदर्शिताः तेऽप्युपल
क्षणार्थाः तस्मात्स्वस्वशाखोपरिपठिताः सूर्यसोमादिप्रकाश
का यथासंमोक्तादिकर्मसु ग्राह्याः तथा तत्तदारोग्याय पित्र्येयम्
अथ प्रकृतोपयुक्तमीमांसा प्रदर्श्यते तद्यथा चतुर्विधोवि
धिः उत्पत्तिविधिः विनियोगविधिः प्रयोगविधिरधिकारवि
धिरिति अज्ञातज्ञापने उत्पत्तिविधिः एतच्चमीमांसायां द्वितीया
ध्यायप्रतिपाद्यं शेषत्वज्ञापने विनियोगविधिः एतच्चमीमां
सायां द्वितीयाध्यायप्रतिपाद्यं शेषत्वज्ञापने विनियोगविधिः
एतच्चतृतीयाध्यायप्रतिपाद्यं प्रयोगविधिरितिकर्तव्यता
विधिः अंगानां क्रमादिविधिरित्यर्थः एतच्चचतुर्थपंचमा
ध्याययोः प्रमेयं अधिकारविधिः कर्मफलसंबंधबोधनं कर्तृ
विशेषविधिरिति यावत् अयं चाधिविधिः षष्ठाध्यायप्रमेयमे
वास्थिते यत्र पृथग्वाक्यानि तत्र यथायोगं त्रिभिरेव वाक्यैर्वि
धिचतुष्टयनिर्वाहः यत्रद्वे तत्र द्वाभ्यां विधिचतुष्टयनिष्पत्तिः
यत्रचैकं तत्रैकवाक्ये विधिव्यवस्था च तच्चतुष्टयमत्र भवतीत्येवमी
मांसकनिर्णयः एवमेव प्रकृते आवाहनार्घ्यप्रभृतिविसर्ज
नांते षोडशोपचारेषु यत्र यत्र पृथङ्मंत्राविहितास्तत्र तत्रैते मंत्रे

ले उपचाराः कर्तव्याः येऽप्युपचारेषु विशेषणेन विनियुक्ताः प
वमंत्राः तेऽप्यायाशेषतां भजंते यथाग्निर्मूर्धा दिव इत्यादयो
मंत्रा अग्न्यादिप्रकाशकत्वेनाग्न्यादिदैवत्या न साताङ्गोमादि
प्रकाशका तथाप्यैन्द्र्या गार्हपत्यमुपतिष्ठत इतीन्द्रप्रकाशिक
यर्चा श्रुत्या गार्हपत्योपस्थाने शेषत्वबोधनाय यथाकथंचिदिंद्रादि
पदानामिंद्रपरमेश्वर्य इत्यादि अर्थचिंतनेन योगवृत्त्या गार्हप
त्येन्द्रत्वमिवाग्निः मूर्धा दिव इति मंत्रे भौमाय कीर्तयेदित्यादिभिः
पूर्वप्रदर्शितवाक्यैरग्निर्मूर्धेत्यादिमंत्राणां भौमादिशेषबोधनाद
ग्न्यादिपदानां भौमादिषु यथाकथंचिद्वृत्तिरवगंतव्या सा च वृत्ति
रेवं गत्यर्थादगिधातोरग्निशब्द उत्पन्नः भौमोऽपि गमनशीलः अथवा
ऽग्निवर्णत्वाद्भौमस्याग्निशब्दवाच्यत्वं उद्बुध्यस्वाग्न इत्यत्राप्यग्निशब्दः
पूर्ववद्बुधे वर्तते तेजोऽभ्यधिकत्वाद्वा उद्बुध्यस्वेत्यस्मिन्नपि बुधपवर्ण
श्रुतेर्वा पदसमासस्यानित्यत्वादिति श्रुतेः यथा कश्यपः कश्यपो भ
वतीति श्रुतिः अन्यान्यपि ह्युतन्यायास्मिन्मंत्रे विधानैः शुक्रमंदस्त इ
ति शुक्रपदेनामसाम्याच्छुक्रे वर्तते शन्नो देवीति मंत्रे शनिनाम
स्मारकस्य शन्न इति वर्णद्वयस्य विद्यमानत्वान्मंत्रः शनियोजकः
कयान इति चेत्यत्रापि चित्रपदं श्रूयते लक्ष्यते अनयैव दिशान्यत्राप्यूह
नीयं एवं तन्मंत्रदेवताप्रकाशकत्वमूहनीयं यद्दिनोच्यते सा देवतेति
सर्वानुक्रमिकापरिभाषायामभिधानात् अन्यथान्याश्रयाः न्या
मंत्राभिधेयेति विरोधः स्यात् अथ प्रकृतमनुसरामः एवं ग्रहाणां

न्यनेंतरेव स्थापयां विधाय गृह्योक्तप्रकारेण गणपत्यविमोकाद
कर्म कृत्वा पूर्वस्थापितवारुणकलशमादाय वक्ष्यमाणमंत्रैर्वक्ष्यमा
णलक्षणोपेतैः द्विजैः पत्नीपुत्रादिसहितस्य यजमानस्याभिषेकः का
र्यः तथाच मत्स्यपुराणे अथाभिषेकमंत्रेण वाद्यमंगलगीतकैः
पूर्णकुंभेन तेनैव होमांते प्रागुदङ्मुखैः अव्यंगावयवैर्ब्रह्मन्हेम
स्रग्दामभूषितैः यजमानस्य कर्तव्यं चतुर्भिः स्नपनं द्विजैः अभिषे
कमंत्रेणेत्येकवचनं मंत्रत्वोपाध्यभिप्रायेण वाद्यमंगलगीतकैरि
ति सहार्थे तृतीया कुंभेन तेनैवेति तेन पूर्वमीशानदिग्भागस्था
पितेनैव प्रकारेणैककलशांतरेणेत्युदकं नीत्वाभिषेको प्रागुदङ्मु
खैरिति स्नपनकर्तृद्विजविशेषणमयमभिप्रायः यदि यजमानः
पूर्वाभिमुखस्तर्हि तदग्रितः पराभिमुखैरीशानदिगभिमुखैर्वा अ
थ यजमान उत्तराभिमुखस्तदा दक्षिणपूर्वाभिमुखैरेवेति दिक्त
त्रयस्यापि मांगलिकत्वात् चतुर्भिरिति पदं स्नपनविशेषणलक्ष
णार्थम् अथाभिषेकमंत्राः तत्र वैदिकाः स्वशाखोक्तायास्ताः स्मा
र्तमंत्रास्तु सुरास्त्वामभिषिंचंतु ब्रह्माविष्णुमहेश्वराः वासुदेवो ज
गन्नाथस्तथा संकर्षणो विभुः प्रद्युम्नश्चानिरुद्धश्च भवंतु विजयाय
ते आखंडलोऽग्निर्भगवान्यमो वै निर्ऋतिस्तथा वरुणः पवनश्चै
व धनाध्यक्षस्तथा शिवः ब्रह्मणा सहिताः सर्वे दिक्पालाः पांतु ते
सदा कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः बुद्धिर्लज्जा
वपुः शांतिः तुष्टिः कांतिश्च मातरः एतास्त्वामभिषिंचंतु देवप

म
क॰
१२९

त्वाः समागताः आदित्यश्चंद्रमा भौमो बुधजीवसितार्कजाः ग्रहा
स्त्वामभिषिंचंतु राहुः केतुश्च तर्पिताः देवदानवगंधर्वा यक्षराक्ष
सपन्नगाः ऋषयो मानवो गावो देवमातर एव च देवपत्न्यो द्रुमा ना
गा दैत्याश्चाप्सरसां गणाः अस्त्राणि सर्वशास्त्राणि राजानो वाहनानि
च औषधानि च रत्नानि कालस्यावयवाश्च ये सरितः सागराः शैला
स्तीर्थानि जलदा नदाः एते त्वामभिषिंचंतु सर्वकामार्थसिद्धये ए
वं स्नापयित्वा सर्वौषधकल्कैः सर्वौषधिगंधादिभिः सपत्नीकं यजमा
नं स्नापयेत् सर्वौषधिगंधादिभिः स्नानं नाम तैर्मस्तकप्रभृतिगात्राणि पा
द्वलिप्य पश्चान्निर्मलोदकेन स्नानं कार्यं ततः शुद्धाम्बरधरः समग्रैः प
श्चाद्वा स्थितश्चर्त्विग्भ्यो दक्षिणां दद्यात् मात्स्ये ततः शुद्धाम्बरधरः
शुक्लमाल्यानुलेपनः सर्वौषधैः सर्वगंधैः स्नापितो देवपुंगवैः यजमा
नः सपत्नीकश्चर्त्विजश्च समाहितः दक्षिणाभिः प्रयत्नेन पूजयेद्गत
विस्मयः अथायं दक्षिणादानप्रकारः वरक्रमेणोदङ्मुखोपविष्टो
यजमानः कुशाक्षतजलपाणिः मन्त्रसमाप्तौ तत्तद्देवतामंत्रं पठित्वा
कृतस्यैतत्कर्मणः सगुणार्थममुकायामुकशर्मणे अमुकवेदाध्याय
नेऽमुकद्रव्यं दक्षिणात्वेन संप्रददे इति वा दक्षिणात्वेन दातुमुत्सृ
जामीति वा वदेदिति दक्षिणा विमत्स्यपुराणे सूर्याय कपिलां धेनुं
दद्याच्छंखं तथेंदवे रक्तं धुरंधरं दद्याद्भौमाय ककुदादिकम् बुधा
य जातरूपं तु गुरवे पीतवाससी श्वेताश्वं दैत्यगुरवे कृष्णां गामर्कसू
नवे आयसं राहवे दद्यात् केतवे छागमुत्तमम् सुवर्णेन समाः कार्या

यजमानेन दक्षिणाः धुरंधरीनह्यातजातरूपं सुवर्णं सुवर्णेन स
माधेनुर्मितिया वत्सामूल्येन यायादक्षिणान्यूनाभवति तावन्मात्र
मूल्यं सुवर्णं तस्यास्तस्या दक्षिणायाः स्मरणायतत्समकालमेवदा
तव्यं न च सुवर्णमंत्रः पृथक्कल्पनीयः सुवर्णमर्थवादयाद्रूपवा
पेन तस्यातिसर्मंत्रेण प्रदातव्याः सर्वा सर्वत्र दक्षिणाः इति चिंता
मणौ प्रदर्शनात् एतच्चाल्पधनविषयं प्रभूतधनेन तत्तस्य मूल्य
समं सुवर्णं दातव्यं गवाद्यभावे तत्तन्मूल्यं सुवर्णं दातव्यं तत्रा
प्यल्पधनेन प्रथमोपात्तगोमूल्यं तत्राप्यशक्तस्य तद्भावमभावे नि
ष्कं स्यात् तदर्थं पादमेव चेति दिशा सर्वत्र परिकल्पनीयं तत्र क्रमे
ण मंत्राः आपिमत्स्यपुराणे कपिलादानमंत्रः कपिले सर्वदेवा
नां पूजनीयासि रोहिणि तीर्थदेवमयी यस्मादतः शांतिं प्रय
च्छ मे शंखदानमंत्रः पुण्यस्त्वं शंख पुण्यानां मंगलानां च मंगले
विष्णुना विधृतो नित्यमतः शांतिं प्रयच्छ मे वृषभदानमंत्रः
धर्मस्त्वं वृषरूपेण जगदानन्दकारकः अष्टमूर्तेरधिष्ठानमतः
शांतिं प्रयच्छ मे हिरण्यदानमंत्रः हिरण्यगर्भगर्भस्त्वं हेमबीजं
विभावसोः अनंतपुण्यफलदमतः शांतिं प्रयच्छ मे पीतवस्त्रदा
नमंत्रः पीतवस्त्रयुगं यस्माद्वासुदेवस्य वल्लभं प्रदानात्तुष्यते
विष्णुरतः शांतिं प्रयच्छ मे अश्वदानमंत्रः विष्णुस्त्वमश्वरूपेण
यस्मादमृतसंभवः चंद्रार्कवाहनो नित्यमतः शांतिं प्रयच्छ मे
धेनुदानमंत्रः धेनुस्त्वं पृथिवी सर्वा यस्मात्केशवसन्निभा सर्वपाप

म॰ क॰ १३॰

130

हरानित्यमतः शांतिं प्रयच्छ मे लोहदानमंत्रः यस्मादायसक
र्माणि तदाधाराणि सर्वदा हे लोह लांगलादीनि तस्माच्छांतिं प्र
यच्छ मे छागदानमंत्रः यस्मात्वंछागयज्ञानामाङ्गतित्वेव्यवस्थितः
यानं विभावसो र्नित्यमतः शांतिं प्रयच्छ मे ततस्तु स्तोकमारभ्य द
क्षिणाभावेप्यथवादित्यादिभ्यो यथाशक्तिलेकृत्वामेकैकां गां दद्या
त् तथा गोदानमंत्रः गवामंगेषु तिष्ठंति भुवनानि चतुर्दश य
स्मात्तस्माच्छुभं मे स्यादिह लोके परत्र च सर्वेष्वपि दक्षिणापक्षेषु
पूर्वोक्तदक्षिणाव्यतिरिकेण शय्यां रत्नानि भूमिं चाचार्यायर्त्विग्भ्यो चान्ये
भ्यो वा ब्राह्मणेभ्यो दक्षिणा देया एतत्सति विभवे तत्र शय्यादा
नमंत्रः यस्मादशून्यं शयनं केशवस्य शिवस्य च शय्या ममाप्य
शून्यास्तु तस्माज्जन्मनि जन्मनि रत्नदानमंत्रः यथा रत्नेषु सर्वेषु
देवाः सर्वे प्रतिष्ठिताः तथा शांतिं प्रयच्छंतु रत्नदानेन मे सुराः
भूदानमंत्रः दानानि भूमिदानेस्य कलां नार्हंति षोडशीं गवाय
न्यानि मे शांतिं भूमिदानाद्भवत्विह एवं संपूज्य येद्ग्रहान्वित्तशा
ठ्यविवर्जितः वस्त्रकांचनरत्नाद्यैर्माल्यगंधानुलेपनैः एवं ग्रहा
दीन् संपूज्य दक्षिणादानांतं कृत्वा वह्निं प्रदक्षिणीकृत्य ग्रहवेदि
समीपं गत्वा सूर्यादीन् प्रदक्षिणीकृत्य नमस्कृत्य तेभ्यः पुष्पांज
लिं दत्वा विसर्जयेत् अथ विसर्जनमंत्रः यांतु देवगणाः सर्वे पू
जामादाय पार्थिवान् इष्टकर्मप्रदानार्थं पुनरागमनाय च पा
र्थिवप्रदेशाद्यांतित्यर्थः अनेन विधिना यस्तु ग्रहपूजां समा

च्चरेत् सर्वान्कामानवाप्नोति प्रेत्यस्वर्गे महीयते यस्य पीडा
करो नित्यमल्पवित्तस्य वा ग्रहः तेन यत्नेन संपूज्यः शेषानप्यर्च
येद्बुधः तेन यत्नेनेति तं पीडाकारं ग्रहं यत्नेन सर्वैरुक्तनीत्याधि
देवताप्रत्यधिदेवतासहितं पूजयित्वा शेषानपि ग्रहान्स्वल्पो
पचारादिभिर्यथाशक्ति पूजयेत् अयं च प्रतिकूलग्रहपूजान
वसरे कर्तव्या राहुकेत्वोः पृथग्वाराभावान्मन्दवारोक्ता
स्याः शन्यादीन्मंदवारेण पूजयेत्स यतो नर इति बोधायनकारिका
तः ग्रहा गावो नरेंद्राश्च ब्राह्मणाश्च विशेषतः पूजिताः पूजयंत्ये
ते प्रदहंत्यवमानिताः तस्मान्न दक्षिणाहीनं कर्तव्यं भूतिमि
च्छता विवाहोत्सवयज्ञेषु प्रतिष्ठादिषु कर्मसु निर्विघ्नार्थं मु
निश्रेष्ठ सर्वोद्वेगाद्भुतेषु चेति नवग्रहयज्ञः अथ कर्मविपाक
प्रकरणोक्तनिष्कादिपरिमाणं याज्ञवल्क्यः जालसूर्यमरीचि
स्थं त्रसरेणू रजः स्मृतम् तेऽष्टौ लिक्षा तु तास्तिस्रो राजसर्षप उच्य
ते गौरास्तु ते त्रयः षट् ते यवो मध्यस्तु ते त्रयः कृष्णलः पंच ते मा
षास्ते सुवर्णस्तु षोडश कृष्णलो गुंजाः ते कृष्णलाः पंच माषाः
ते माषाः षोडश सुवर्णः चत्वारः सुवर्णाः पलम् अगस्त्यप्रोक्तेप
यवः स्यात्सर्षपैः षड्भिः गुंजा तस्यास्त्रिभिर्यवैः गुंजाभिः पंचभि
स्त्वेकमाषकः परिकीर्तितः भवेत्षोडशभिर्माषैः सुवर्णस्तैः पु
नः स्मृतः चतुर्भिः पलमेतस्य दशांशो धरणं विदुः एतस्य पल
स्य दशांशो धरणं विदुः दशपला धरणमित्यर्थः तथा च मनुः

म॰
क॰
१३।

131

पले सुवर्णाश्चत्वारः पलानि धरणं दशेति इति हेमप्रकरणम्
अथ रौप्यपरिमाणम् याज्ञवल्क्यः द्वे कृष्णले रौप्यमाषो धर
णं षोडशैव ते शतमानं तु दशभिर्धरणैः पलमेव तु निष्कं सु
वर्णाश्चत्वार इति कृष्णले द्वे गुंजे सर्वौ ताभ्यां रौप्यमाषो भवति मध्य
मयवषट्कपरिमितपर्कौ रौप्यमाषो भवतीत्यर्थः ते माषाः षो
डश धरणं दशभिर्धरणैः शतमानमुच्यते तदेव पलमभिधी
यते चत्वारः सुवर्णा निष्कः अत्र रजतप्रकरणे हेमप्रकरणो
क्तसुवर्णशब्दोपादनं हेमप्रकरणोक्तमाषप्राप्त्यर्थमतः पंच
कृष्णलको माषः कृष्णलद्वयपरिमितैस्तैः षोडशभिरेकः सुव
र्णस्तैश्च सुवर्णाश्चत्वारो निष्कः हेमप्रकरणाभिहितचतुःसुवर्णमा
नानिर्मितं रजतं निष्क इत्यर्थः मनुः द्वे कृष्णले समधृते विज्ञे
यो रौप्यमाषकः ते षोडश स्याद्धरणं पुराणश्चैव राजतः धरणा
नि दश ज्ञेयः शतमानस्तु राजतः चतुःसौवर्णिको निष्को वि
ज्ञेयस्तु प्रमाणतः समधृतान इति मध्यमयवप्रमाणधृते इत्यर्थः
यत्र सौवर्णिको निष्क इत्यभिधीयते सावर्णिकं निष्कं दद्यादि
त्यादिषु तत्र हेमप्रकरणोक्तसुवर्णचतुष्टयमितं हेमद्रव्यमेव
निष्कशब्दवाच्यं रजतद्रव्यम् अथ धान्यादिपरिमाणम् स्कन्द
पुराणे यवगोधूमधान्यानि तिलाः कंगुकुलत्थकाः माषा मु
द्गा मसूराश्च निष्पावाः श्यामसर्षपाः गवेधुकाश्च नीवारा आ
ढक्योऽथ सतीनकः शणका श्रीणकाश्चैव धान्यान्यष्टादशैव

वतः मार्कंडेयजग्निरेतानि बीजानि ग्राम्यारण्यानि यानि च
ओषध्यः फलपाकांता गणाः सप्तदश स्मृताः व्रीहयश्च यवाश्चै
व गोधूमाः कंगवस्तिलाः प्रियंगवः कोविदाराः करदूषाः सती
नकाः माषा मुद्गा मसूराश्च निष्पावः सकुलत्थकः आढक्य
णकश्चैव गणाः सप्तदश स्मृताः इत्येता ओषधीनां तु ग्राम्याणां
जातयः स्मृताः ओषध्यो याज्ञियाश्चैव ग्राम्यारण्याश्चतुर्दश
व्रीहयश्च यवाश्चैव गोधूमाः कंगुसर्षपाः माषा मुद्गाः सप्तमाः स्या
दष्टमश्च कुलत्थकः श्यामाकाश्चैव नीवारा जर्तिलाः सगवेधु
काः कोविदास्समायुक्तास्तथा वेणुयवाश्च ये ग्रामारण्याः स्मृता
ह्येता ओषध्यश्च चतुर्दशेति वराहपुराणे पलद्वयं तु प्रसृतिं
मुष्टिरेकः पलं स्मृतम् अष्टमुष्टि भवेत्किंचित्किंचिदष्टौ तु पुष्क
लम् पुष्कलानि तु चत्वारि आढकः परिकीर्तितः चतुराढको भ
वेद्द्रोण इत्येतन्मानलक्षणम् भविष्यपुराणे पलद्वयं तु प्रसृति
द्विगुणं कुडवं मतम् चतुर्भिः कुडवैः प्रस्थः प्रस्थाश्चत्वार आढकं
आढकैस्तैश्चतुर्भिश्च द्रोणस्तु कथितो बुधैः कुंभो द्रोणद्वयेः शू
र्पः खारी द्रोणास्तु षोडश पलैस्तु कुडवः प्रस्थः आढको द्रोण एव
वा धान्यमानेषु बोद्धव्याः क्रमशोमी चतुर्गुणाः द्रोणैः षोडशभिः
खारी विंशत्या कुंभ उच्यते कुंभैस्तु दशभिर्वाहो धान्यसंख्या प्रकी
र्तिता विंशत्या कुंभ इति विंशत्या द्रोणैः कुंभ इत्यर्थः अथ वा धा
न्यसंख्येयपलत्वाणाम् अतएवान्यद्रव्यविषये स्कंदपुराणे पल

म०
क०
१३२

द्वयेन प्रसृतिर्द्विगुणोंकुडवं स्मृतं चतुर्भिः कुडवैः प्रस्थः प्रस्थाढक
स्तु चतुर्गुणैः भवेच्चतुर्गुणो द्रोण इत्येतद्द्व्यमानकं इति द्रोण
द्वयं कुंभ इत्येकः पक्षः कुंभश्चैवस्रूपेति संज्ञा विंशत्या द्रोणैः कुं
भ इत्यन्यः पक्षः पलसहस्रपरिमाणः कुंभ इति मानविवेकः
पंचशतपलपरिमाण इति चापरे एते च पक्षा देशकालशक्त्या
द्यपेक्षया योज्याः त्रिकांडो निर्देशे च मानं तुलांगुलिप्रस्थैर्गु
जाः पंचाद्यमाषकः तेषां षोडशात्तः कर्षस्तु पलं कर्षचतुष्टयं
सुवर्णो विस्तो हेम्नो देक्रुरुविन्दुस्तत्पल तुलाक्षियां पलश
ते भारः स्याद्विंशतिस्तुलाः आचितो दशभाराः स्युः शाकटो भा
रे व्यादितः इति धान्यादिमानं अथ भूमिमानं मार्कंडेयः परमा
णुः परं सूक्ष्मं त्रसरेणुर्महीरजः वालाग्रं चाथ लिक्षा च यूका
चाथ यवोंगुलम् क्रमादष्टगुणान्याहुर्यवानष्ट तथांगुलम्
षडंगुलं पदमाहुर्वितस्तिं द्विगुणं तथा द्वे वितस्ती ततो हस्तो
ब्रह्मतीर्थादिवेष्टनात् चतुर्हस्तो धनुर्दंडो नालिका तद्युगे
न तु क्रोशो धनुःसहस्रे द्वे गव्यूतिस्तच्चतुर्गुणः द्विगुणो
योजनं तत्र प्रोक्तं संख्यानकोविदैः वसिष्ठः दशहस्तेन
वंशेन दशहस्तान्समंततः पंच चाभ्यधिकान्दद्यादेतद्गोच
र्म कथ्यते बृहस्पतिः दशदंडेन हस्तेन त्रिंशद्दंडा निवर्त
नम् त्रिभागहीनं गोचर्ममानमाह प्रजापतिः ॥
इति परिमाणप्रकरणं समाप्तम् ॥

अथ विपाकप्रकरणोपयुक्तकृच्छ्रादिलक्षणानि
अथ पादकृच्छ्रस्वरूपपरिज्ञाने प्राजापत्यस्वरूपस्य ज्ञा
तमशक्यत्वात्प्रथमं पादकृच्छ्रलक्षणमभिधीयते याज्ञ
वल्क्यः एकभक्तेन नक्तेन तथैवायाचितेन च उपवासे
न चैवायं पादकृच्छ्रः प्रकीर्तितः एकभक्तं नाम दिवो
दितमध्याह्नकालेऽन्यानियमैरेककालकृतभोजनं
नक्तं तु सूर्यास्तमयानन्तरं प्रदोषकाले सकृत्कृतभोज
नं दिवा वा रात्रौ वा प्रार्थितोपनतस्य सकृद्भोजनमया
चितम् दिवैवाप्रार्थितोपनतमित्यपरे स्वकीयस्य परकी
यस्यान्नस्य याचनं यत्र न विद्यते तत्र तद्भुक्तमयाचितं
दिवा रात्रावप्यभोजनमुपवासः एवं चतुरहः साध्यः
पादकृच्छ्रः एकभक्तादौ च ग्राससंख्यानियमः पराश
रेणोक्तः सायं तु द्वादश ग्रासाः प्रातः पञ्चदश स्मृताः
चतुर्विंशतिरयाच्यः परं निरशनं स्मृतमिति सायंन
क्ते प्रातरेकभक्ते आपस्तम्भः प्रकारान्तरेणाह सायं
द्वाविंशतिर्ग्रासाः प्रातः षड्विंशतिः स्मृताः चतुर्विं
शतिरयाच्याः परे निरशनास्त्रयः कुक्कुटाण्डप्रमा
णाः स्युर्यथा वास्यं विशेत्सुखमिति अनयोश्च पक्षयोः
शक्त्यपेक्षया विकल्पः आपस्तम्भस्तु चतुर्धा प्राजाप
त्यं कृच्छ्रं विभज्य वर्णानुक्रमेण पादकृच्छ्रव्यवस्था

माह त्र्यहं निरशनः पादः पादश्चायाचितं त्र्यहम् सायं त्र्य
हं तथा पादः पादश्चायाचितं त्र्यहः प्रातस्तथाप्यहम् प्रा
तः पादं चरेत्कृच्छ्रः सायं वैश्यस्य हापयेत् अयाचिते तु रा
जन्ये त्रिरात्रं ब्राह्मणोऽश्नतम् प्रातः पाद एकभक्तत्रयं सायं
पादो नक्तत्रयम् अयाचितमयाचितत्रयम् त्रिरात्रमुपवा
सत्रयम् अयाचितपाद उपवासपादश्चेति पादद्वयं मि
लितार्धकृच्छ्रः नक्तपादवर्जितमवशिष्टं पादत्रयं पादोन
कृच्छ्रः अत एवाहापस्तम्बः सायंप्रातर्विनार्धस्यात्पादो
नेन नक्तवर्जितम् अर्धकृच्छ्रस्य प्रकारान्तरमप्याह स एव
सायंप्रातस्तथैकैकं दिनद्वयमयाचितम् दिनद्वयं च ना
श्नीयात्कृच्छ्रार्धं तद्विधीयते इति पादकृच्छ्रादिलक्षणम्
अथ प्राजापत्यकृच्छ्रलक्षणम् याज्ञवल्क्यः यथाक
थंचित्त्रिगुणं प्राजापत्योऽयमुच्यते अयमिति सर्वनाम्ने
कभक्तेन नक्तेन तथैवायाचितेन उपवासेन चैवायं पाद
कृच्छ्रः प्रकीर्तितः इति श्लोकः पादकृच्छ्रः परामृश्यते य
थाकथंचिदित्यनेन चत्वारः पादा उक्ताः एकभक्तादीनामा
नुलोम्येन स्वस्थानविवृद्धिरित्येकः पक्षः तद्यथा एकभक्त
त्रयं नक्तमयाचितत्रयमुपवासत्रयं चेति क्रमेणैकभक्ता
दीनां त्रयाणां करणमानुलोम्येन स्वस्थानविवृद्धिरित्युच्य
ते यथाह मनुः त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचितं

त्र्यहं परं च नाश्नीयात् प्राजापत्यं चरन् द्विजः प्रातिलोम्येन
स्वस्थानाविहद्धिरिति द्वितीयः पक्षः उपवासत्रयमयाचि
तत्रयं नक्तत्रयमेकभक्तत्रयमिति प्रातिलोम्येन स्वस्था
नाविहृद्धिः अन्यं पक्षमाह वसिष्ठः प्रातिलोम्यं चरेच्छ्री
निर्दंडकालिनवदाहृतिरिति तृतीयः पक्षः एकभ
क्तायाचितोपवासान् क्रमेणैकैकं कृत्वा पुनरेकभक्ता
दीन् क्रमेणावर्तयेत् इयमाहृतिर्दंडकालिनवदाहृति
रित्युच्यते एवं विराहृतो प्राजापत्यं कृच्छ्रं भवति अन्य
मपि पक्षं वसिष्ठ एवाह अहः प्रातरहर्नक्तमहरेकम
याचितम् अहः पराकं तथैकमेवं चतुरहोपरौ परा
कशाहु उपवासपरः तथा अनुग्रहार्थं विप्राणां मनुर्ध
र्मभृतां वरः बालवृद्धातुरेष्वेवं शिशुकृच्छ्रमुवाच हेति
सर्वोक्तपक्षत्रयमध्ये अन्यतमपक्षस्वीकरेणावश्यमा
णजपहोमविवर्जनेनाचरणं चतुर्थः पक्षः एवं पक्षमे
गिराः तस्माच्छ्रद्धं समासाद्य तस्माद्धर्मपथे स्थितं प्रा
प्रायश्चित्तं सदा सम्यक् जपहोमविवर्जितमिति इति प्रा
जापत्यलक्षणं अथ कृच्छ्रलक्षणम् मनुः एकैकं ग्रा
समश्नीयात् त्र्यहाणि त्रीणि पूर्ववत् त्र्यहं चोपवसेदत्य
मतिकृच्छ्रं चरेद्द्विजः त्रीणि त्र्यहाणि नवदिनानि पूर्व
वदेकभक्तादिकालेनानियमग्रासः सन्नित्यर्थः यास्त

म०
क०

(134)

वल्क्यः अयमेवातिकृच्छ्रः स्यात्पाणिपूरान्नभोजनः
अयमेव शर्वोक्तप्राजापत्यधर्मएव अयं तु विशेषः एकभ
क्तनक्तायाचितदिनेषु पाणिपूरमात्रं प्रसृतिपूरणमात्रम
न्नं भुञ्जीत न तु शर्वोक्तद्वाविंशत्यादिग्रासानिति अन्ये च पा
णिपूरणान्नमात्रमेव विधेयं न तु भोजनमतो येषु दिनेषु
प्राजापत्यभोजनं ग्रासैर्न तद्वदेव पाणिपूरान्नता विधी
यते इति नोपवासदिनेषु पाणिपूरणान्नभोजनप्राप्तिर्म
तयाज्ञवल्क्योक्तपाणिपूरणान्नग्राससमात्रभोजनयोस्तु
शक्त्यपेक्षो विकल्पः पापापेक्षो वा अतः कृच्छ्रपादादिव्य
वस्था प्राजापत्यवदेव द्रष्टव्या इति कृच्छ्रे अथ कृच्छ्रा
तिकृच्छ्रं तत्र गौतमः अब्भक्षस्तृतीयः स कृच्छ्राति
कृच्छ्र इति द्वादशरात्रमित्यनुवर्तते अतो द्वादशरात्र
मुदकेनैव वर्तनेनायमेवेत्युक्तं भवति यमः एकैकं पिण्ड
मश्नीयात्त्र्यहं कल्ये त्र्यहं निशि अयाचितं त्र्यहं पिण्डं वा
युभक्षं परं त्र्यहं अतिकृच्छ्रं चरेदेतत्पवित्रं पापनाशनं
वत्सविंशतिरात्रं तु नियतात्माजितेन्द्रियः कृच्छ्रातिकृ
च्छ्रं कुर्वीत एकस्थाने द्विजोत्तमः कल्ये प्रातरेकभक्तका
ल इति यावत् एकस्थाने इति एकयत्नेन शर्वोक्तद्वाद
शग्राससाध्यातिकृच्छ्रद्वयेनैकः कृच्छ्रातिकृच्छ्रो भव
तीत्यर्थः याज्ञवल्क्यः कृच्छ्रातिकृच्छ्रः पयसा दिवसा

नेकविंशतिम् यमेन च त्रिंशतिरात्रिसाध्ये कृच्छ्रा
तिकृच्छ्रे भोजनदिनेष्वेकैकग्राससमात्रविधानात् अस्य भो
जने पिपत्रपुटकादिभिर्ग्रासपरिमाणं हस्तैकग्रासपर्या
प्तं क्षीरमश्नीयात् एवं कर्त्तुमशक्तेन कृच्छ्रप्रतिनिध
ना प्राजापत्योक्तरीत्या सायं द्वादशग्रासा इत्यादिग्रास
संख्यया तावद्दुग्धं पातव्यं भोजनदिनेषु गोतमाद्युक्तकृ
च्छ्रातिकृच्छ्रपक्षेषु शक्त्यपेक्षया विकल्पः इति कृच्छ्रा
तिकृच्छ्रलक्षणम् अथ तप्तकृच्छ्रः याज्ञवल्क्यः त
प्तक्षीरघृताम्बूनामेकैकं प्रत्यहं पिबेत् एकरात्रोपवा
सश्च तप्तकृच्छ्रः प्रकीर्त्तितः अयं च दिनचतुष्टयसा
ध्यः कृच्छ्रः मिताक्षरायां त्वयं महातप्तकृच्छ्र इत्युक्तं
तप्तकृच्छ्रस्तु द्विरात्रसाध्य इत्युदीरितम् तप्तक्षीरघृता
म्बुभिः समस्तैरेकदिनं वर्त्तनप्रकारस्तूपवास इति य
हसाध्यत्वं तप्तकृच्छ्रस्येति मनुः तप्तकृच्छ्रं चरन्विप्रो ज
लक्षीरघृतानिलान् प्रतित्र्यहं पिबेदुष्णान् सकृत्स्नायी
समाहितः प्रतित्र्यहं पिबेदिति जलादीनामेकैकं त्र्यहं
पिबेदित्यर्थः अयं द्वादशाहः साध्यः कृच्छ्रो जलादि
परिमाणमाह पराशरः अपां पिबेत्तु त्रिपलं द्विपलं तु
पयः पिबेत् पलमेकं पिबेत्सर्पिस्त्रिरात्रं चोष्णमारुत
मिति त्रिरात्रमुष्णोदकस्य वाष्पं पिबेदित्यर्थः त्रिरात्र

म· क·

135

मिति सर्वस्याप्यन्वेत्यतोयं त्रिपलं त्रिरात्रं पिबेदित्येवं यो
ज्यम् प्रकारांतरेणाप्याह तप्तकृच्छ्रे पराशरः षट्पलं तु पि
बेदंभस्त्रिपलं तु पयः पिबेत् पलमेकं पिबेत्सर्पिस्तप्तकृच्छ्रे
विधीयते अत्र जलादिकमुष्णमेव ग्राह्यम् इति तप्तकृच्छ्र
लक्षणं अथ सांतपनलक्षणं याज्ञवल्क्यः कुशोदकं तु गो
क्षीरं दधि मूत्रं शकृद्घृतम् प्राश्यापरेऽह्नुपवसेत् कृच्छ्रं सां
तपनं चरेदित्यपरार्कपाठः मिताक्षरापाठस्तु गोमूत्रं गो
मयं क्षीरं दधि सर्पिः कुशोदकं गोमूत्रादीनि षडप्येकीकृ
त्याहारांतररहितः संतिष्ठन्परेऽह्नुपवसेदिति दिनद्वयसाध्यः
कृच्छ्रः याज्ञवल्क्येन तु तत्र श्लोके गोमयादीनां पृथक्पृथक्
षट्सु दिनेषु प्राशनविधानमत्र मिलितानामेकदिन एव
प्राशनं गम्यते पराशरः गोमूत्रं गोमयं क्षीरं दधि सर्पिः कु
शोदकं निर्दिष्टं पंचगव्यं तु पवित्रं कायशोधनं गोमूत्रं
ताम्रवर्णायाः श्वेतायाश्चापि गोमयम् पयः कांचनवर्णा
याः सर्वं कापिलमेव वा अलाभे सर्ववर्णानां पंचगव्येष्व
यं विधिः गोमूत्रं माषकास्त्वष्टौ गोमयस्य तु षोडश क्षीरस्य
द्वादश प्रोक्ता दध्नस्तु दश कीर्तिताः गोमूत्रवद्घृतस्याष्टौ त
दर्धं तु कुशोदकं गायत्र्यादाय गोमूत्रं गंधद्वारेति गोमयं
आप्यायस्वेति च क्षीरं दधिक्राव्णेति वै दधि तेजोसि शुक्र
मित्याज्यं देवस्य त्वा कुशोदकं पंचगव्यमृचा पूतं होमये

दग्निसन्निधाविति समपद्यास्त्रयेदर्भैस्त्रिभिन्नाग्राः शुक
त्विषः पत्रैरुद्धृत्यहोतव्यं पंचगव्यं यथाविधिः इरावती
इदं विष्णुर्मानस्तोकेनशंवती एताभिश्चैवहोतव्यं हुत
शेषं पिबेद्द्विजः प्रणवेन समालोड्य प्रणवेनाभिमंत्र्य
च प्रणवेन समुद्धृत्य पिबेत्प्रणवेन तु मध्यमेन प
लाशस्य पद्मपत्रेण वा पिबेत् स्वर्णपात्रेण ताम्रेण ब्रह्म
तीर्थेन वा पुनः यत्त्वगस्थिगतं पापं देहे तिष्ठति मानवे
ब्रह्मकूर्चोपवासश्च दहत्यग्निरिवेन्धनमिति याज्ञव
ल्क्योक्त दिनद्वयसाध्यसांतपनमेव ब्रह्मकूर्च इति ब्रह्म
कूर्चोपवास इति चाभिधीयते विज्ञानेश्वरस्त्वेवं गुरु
पौष्यापरेतु रुद्रकारीत्या पंचगव्यप्राशने ब्रह्मकूर्च इति
मन्यते मरीचिः देवताः संप्रवक्ष्यामि प्राज्ञ सर्वेण यस्य
वा वरुणो देवता मूत्रे गोमये हव्यवाहनः सोमः क्षीरे
दध्नि वायुर्घृते रविरुदाहृतः गोमूत्रं ताम्रवर्णायाः श्वे
ताया स्वच्छ गोमयं पयः कांचनवर्णाया नीलायास्तथ
वा दधिः घृतं तु कृष्णवर्णाया इत्युक्तं वर्णाचोदनं उदकं
सर्ववर्णं तु तस्य वर्णो न दृश्यते गोमूत्रस्य पलं ग्राह्यं म
ङ्गुष्ठार्धं तु गोमयं क्षीरस्य त्रिपलं ग्राह्यं पलमेकं कुशोद
कम् आपो हि ष्ठेत्यृचालोड्य तु यम्य प्रणवेन तु अग्नये
स्वाहा सोमाय इंद्राय इदं विष्णुर्मानस्तोके गायत्र्या प्राजा

म: क

130

पत्येनहिरिवदेतानीतथैवोज्जहयात् नदीप्रस्रवणेतीरेसर
सोनिर्जनेतथा शुक्लवासाःपवित्रात्माअहोरात्रोषितः
पिबेत् पलाशेनचपत्रेणबिल्वपत्रेणवापिबेत् तृतीयं
ताम्रवर्णेवाब्रह्मपात्राणितानिवैः प्रतिमासेपौर्णमास्या
ममावस्यायांचपिबेत् ब्रह्महापरदारीचयेचामेस्थिगता
मलाः ब्रह्मकूर्चोदहेत्सर्वंयथाग्निस्तृणमेवतु गोवालिः
गोमूत्रंगोमयंक्षीरंदधिसर्पिःकुशोदकं एकैकंप्रत्यहं
पीत्वात्वहोरात्रमभोजनम् कृच्छ्रःसान्तपनोनामसर्व
पापप्रणाशनः इत्येतज्जाबालिश्लोकेसमाहृतसाध्यंसान्तप
नम् इतिसान्तपनम् अथयतिसान्तपनम् शंखः पत
देवत्र्यहाभ्यस्तंयतिसान्तपनंस्मृतं पतदेवेत्यनेनमिश्रिते
पंचगव्यंपरामृश्यते तत्पंचगव्यंदिनत्रयमाहारान्तरनि
पेक्षंपिबेदित्यर्थः इतिसान्तपनलक्षणम् अथमहासां
तपनम् याज्ञवल्क्यः पृथक्सान्तपनद्रव्यैः षडहःसोप
वासकः सप्ताहेनतुकृच्छ्रोयंमहासान्तपनःस्मृतः गोमू
त्रंगोमयक्षीरदधिसर्पिःकुशोदकानिसंतापनद्रव्याणे
कैकस्मिन्दिनएकैकंपिबेत्सप्तमदिनउपवासः एतानि
कुशोदकप्राशनादीनिआहारान्तरनिर्वर्तकान्येवमन्य
त्रापि यमः त्र्यहंपिबेत्तुगोमूत्रंत्र्यहंवैगोमयंपिबेत् त्र्य
हंदधित्र्यहंसर्पिस्त्र्यहंक्षीरंततःशुचिः महासान्तपनेह्ये

तत्सर्वपापप्रणाशनम् एतत्संच दशाहसाध्यम् जाबा
लः तालमेकैकमेतेषां त्रिरात्रमुपयोजयेत् त्र्यहं चोपव
सेदन्त्यं महासान्तपनं विदुरिति एषां षड्वर्गोक्तगोमूत्रादीना
मयमेकविंशतिरात्रसाध्यो महासान्तपनः कृच्छ्रः इति म
हासान्तपनलक्षणम् अथ पराकः याज्ञवल्क्यः द्वादशा
होपवासेन पराकः परिकीर्तितः इति पराकलक्षणम् ।
अथ यावकव्रतम् शंखः गोपुरीषाद्यवान्संचमासं नित्यं स
माहितः व्रतं तु यावकं कुर्यात्सर्वपापापनुत्तये गोर्भक्ष
णार्थं यवान्दत्वा तद्दिनान्तरे गोमयमध्यनिसृतान्यवान् गृ
हीत्वा तैर्यवैः कृत्यक्तान्नेनात्मनैकभक्तनक्तादि कुर्वन्
मासं नयेदेतद्यावकव्रतमित्युच्यते एवमेव यवाना
दाय गोमूत्रे पाकं विधाय एवमेव मासवर्तनेन गोमू
त्रयावकव्रतमित्युच्यते अत एवाह योगयाज्ञवल्क्यः
यानमेकं चारयित्वा गां गोभ्यस्तान्यवमिश्रितान् गोमयोत्थां
श्च संगृह्य पचेद्गोमूत्रयावकमिति यावकव्रतगोमूत्रया
वकव्रतयोर्लक्षणम् अथ पयोव्रतम् तत्र कृच्छ्रातिकृ
च्छ्रः पयसा दिवसान्येकविंशतिमिति याज्ञवल्क्योक्तप्र
कारेण मासमेकं यावन्मात्रपरिमाणपयसा वर्तनं पयोव्र
तमित्युच्यते यस्मिन् व्रते येन द्रव्येण शरीरवर्तनं क्रिय
ते तद्व्रतं तेन व्यपदिश्यते अत एव मार्कण्डेयः पत्रैर्मतः

म॰
क

137

पत्रकृच्छ्रः उष्णैस्तप्तकृच्छ्रः उच्यते मूलकृच्छ्रः स्मृतो मूलै
स्तोयकृच्छ्रो जलेन तु इति पयोव्रतं अथ चान्द्रायणम् गौ
तमः अथातश्चान्द्रायणानस्योक्तविधिः कृच्छ्रातिकृच्छ्रे
प्राजापतिकृच्छ्रे विधिरुक्त इत्यर्थः तद्यथा तिष्ठेदहनि
रात्रावासीत क्षिप्रकामः सत्यं वदेदनार्यैर्न संभाषेत रौरव
यौधाजये नित्यप्रयुञ्जीतानुसवनमुदकोपस्पर्शनमापो
हि ष्ठेति च तिसृभिः पवित्रवतीभिर्मार्जयेत् हिरण्यवर्णाः
शुचयः इत्यष्टाभिः अथोदकतर्पणम् नमो हमाय मोहना
य मंहमाय धन्वते तापसाय पुनर्वसवे नमो मौञ्ज्यायो
र्म्याय वसुविन्दाय सर्वविन्दाय नमः पाराय सुपाराय महा
पाराय पारयिष्णवे नमो रुद्राय पशुपतये महते देवाय
त्र्यम्बकायैकचराधिपतये हराय शिवाय ईशानाय
उग्राय वज्रिणे घृणिने कपर्दिने नमः सूर्यायादित्याय
नमो नीलग्रीवाय शितिकण्ठाय नमः कृष्णाय पिङ्गलाय
नमो ज्येष्ठाय श्रेष्ठाय वृद्धायेन्द्राय हरिकेशाय ऊर्ध्वरे
तसे नमः सत्याय पावकाय पावकवर्णाय कामाय का
मरूपिणे नमो दीप्ताय दीप्तिरूपिणे नमस्तीक्ष्णाय
तीक्ष्णरूपिणे नमः सौम्याय पुरुषाय महापुरुषाय
मध्यमपुरुषाय उत्तमपुरुषाय ब्रह्मचारिणे नमश्च
न्द्रललाटाय कृत्तिवाससे नम इत्येतदेवादित्योपस्थान

मेता एवाम्याद्गतय इति अस्यैवार्थः तिष्ठेदहनि रात्रौ वा
सीत तिप्रकाम इति यस्तु प्राजापत्यादिकृच्छ्रद्वयादनोप
यातायत्तिप्रमेके नैव कृच्छ्रेण विशुद्धो भविष्यामीत्येवं
भौमायते सोहमावश्यककर्मा विहितेषु कालेषु तिष्ठेत्
रात्रौ वासीत तथा रौरवयौधाजये सामनी नित्यं कर्मा
विरोधिकालेषु प्रयुंजीत पदेन पुनानः सोमधारयेत्य
स्यामृचि उह्यानडुथरित्यस्यामृचि च सामत्वेन गीयमाने
सामनी रौरवयौधाजये अभिधीयेते अत्र सवनमुद
कोपस्पर्शनं संध्यात्रये स्नानं त्रिषवणमित्यर्थः हिरण्य
वर्णीत्यचाभिमार्जनम् एतच्च मार्जनं स्नानानंतरमघोद
कतर्पणमित्येनेनात्र जलएव तर्पणं न स्थल इति गम्यते
तत्र मंत्राः नमो हमायेत्येवमादयः कृत्तिवाससे नम इत्य
तदंताः अत्र मन्त्रसन्दर्भस्यादावंते च नमः शब्दश्रवणा
न्मंत्रादौ मंत्रांते च नमः शब्दो भवति तथा तैरेव मंत्रप्रयो
गः नमो हमाय मोहनाय महामायो धन्यतेनापसायपु
नर्वसुसेनम इति एवं नमो मौंज्यायेत्याद्यभ्यस्तविन्दाय
नम इत्येको मंत्रः एवमुत्तरत्रापि द्रष्टव्यम् एभिस्तु यो
दशमंत्रैस्तर्पणं कुर्यात् ततस्तैरेवादित्योपस्थानमि
त्येतदेव मंत्रजातमादित्योपस्थानसाधनं कार्यकारणा
योरभेदोपचारात्तर्पणानंतरमेतैरेव मंत्रैरादित्योपस्था

म· क

136

नेकुर्यादित्यर्थः एतापवाज्याहुतयइत्येतैरेवमंत्रैराज्य
होमः कर्तव्यः अयंचहोमोलौकिकाग्निंप्रतिष्ठाप्यका
र्यः एवंप्रयातश्चांद्रायणंतस्योक्तोविधिःकृच्छ्रइत्यनेन
साधारणधर्मानतिदिश्यचांद्रायणेविशेषधर्मानाह
तपनंव्रतंचरेत्कृष्णेपौर्णमासीमुपवसेदाप्यायस्व
संतेपयांसिनवोनवइत्येताभिस्तर्पणमाज्यहोमोह
विष्यानुमंत्रणमुपस्थानंचंद्रमसोयद्देवादेवहेडनमि
तिचतसृभिर्जुहुयाद्देवकृतस्यचांतेसमिद्भिः ॐभूर्भुवः
स्वःमहःजनःतपःसत्यंयशःश्रीरूर्क्ईडोजःपुरुषोध
र्मःशिवइत्येतैर्ग्रासानुमंत्रणम् प्रतिमंत्रंनमःस्वाहेति
वासर्वाग्रासप्रमाणमास्याविकारेणभैक्ष्यसक्तुकणया
वकशाकपयोदधिघृतमूलफलोदकानिहवींषि उत्तरो
त्तरप्रशस्तानिपौर्णमास्यांपंचदशग्रासान्भुक्त्वैकापचा
रेणापरपक्षमश्नीयात् अमावस्यामुपोष्यैकपोचयेत्पूर्व
पक्षविपरीतमेकेषामयंचांद्रायणोमासस्तमाप्त्वावि
मलोविपाप्मासर्वमेनोहंतिद्वितीयमाप्त्वादशपूर्वान्द
शावरानात्मानंचपुनाति किंचपुनाति संवत्सरंचंद्रमसः
सलोकतामाप्नोति इत्यस्यार्थः तपनंव्रतंचरेत् तापय
तिपापमितितपनंवपनंव्रतंचरेदितिपाठेव्रतंचांद्राय
णंवपनंवपनपूर्वकंचरेदित्यर्थः यदिप्रायश्चित्तेन

चांद्रायणाचरणांतदावपनेवपनश्शर्वकंचरेदिति एते
ननिमित्तमंतरेण स्नकृतार्थं चांद्रायणाचरणेवपनेना
स्तीत्युक्तं सोऽभूतां पौर्णमासीमुपवसेत् पौर्णमासीया
सोपक्रमतिथिं सोऽभूतां निरीक्ष्यशर्वाति यो चतुर्दश्यामुप
वसेदित्यर्थः आप्यायस्वेत्यादिभिर्नवोनवोऽस्येतैर्मंत्रै
श्चंद्रस्य तर्पणं कृत्वा तैरेवत्रिभिर्मंत्रैराज्यहोमं विधाय
ततो हविरतु मंत्रैरेव मंत्रैः पश्चादेतैरेव मंत्रैश्चंद्रमसे
उपस्थानं कुर्वीत ततो यद्देवा देवहेडनमिति चतसृ
भिर्दैवकृतस्येत्यनया च समिद्भिर्यज्ञियकाष्ठेध्वाभिर्जु
हुयात् कदाश्चंते सर्वोपस्थानांते अथ तत्तिथिसंख्या
कया स्नानं कृत्वा तावद्भूर्भुवः स्वरित्यादिमंत्रैरभिमंत्रयते
ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं यशः
श्रीः ऊर्क् इट् ओजः पुरुषः धर्मः शिवइतिमंत्रविभा
गः अथ प्रतिमंत्रं मंत्रांते नमः स्वाहेति वा प्रयुंजीत
प्रणवादिस्वः पर्यंतानाम व्ययत्वेन नमः स्वाहायोगेपिन
चतुर्थी विभक्तिश्रवणं भवति महसे नमः महसे स्वाहे
तिवा एवमन्यत्रापि जनाय तपसे सत्याय यशसे श्रि
यै ऊर्जे इषे ओजसे पुरुषाय धर्माय शिवायेति ग्रास
प्रमाणमास्याविकारेणास्य स्वमुखे स्वव्यादानेन यावद
न्नमुखे प्रविशति तावदन्नं ग्रासप्रमाणं भवतीत्यर्थः

म·
क.

139

चतुर्दश्यामयोवितस्यपौर्णमास्यादितिथिवृद्ध्यामसंख्यो
नियममाह पौर्णमास्यांपंचदशग्रासानित्यादिना शर्वप
क्षमित्यनेन एतच्चपिपीलिकामध्यंचान्द्रायणम् अथय
वमध्यमाह विपरीतमेकेषामिति अस्मिन्यवमध्यचां
द्रायणेमावस्यायामुपवासः प्रतिपदादिषु एकैकग्रासोप
चय अमावस्यायामुपवासइतिक्रमः अत्रग्रासग्रहणेका
लमंत्रोदयः अभिमंत्रणमेतद्विकल्पादयश्चाग्रेवक्ष्ये
माधारणेतिकर्तव्यताकथनसमयेनिरूपयिष्यन्ते या
ज्ञवल्क्यः तिथिवृद्ध्याचरेत्पिंडान्शुक्लेशिख्यंडसंमितान्
एकैकंह्रासयेत्कृष्णे पिंडंचान्द्रायणंचरेत् इंदुक्षयेनभुं
जीतएषचान्द्रायणोविधिः तिथिवृद्ध्या द्वितीयचंद्रकला
शुक्लप्रतिपद्द्वितीयादितिथिवृद्ध्याचरेद्भक्षयेत् शुक्लेप
क्षपक्षेशिख्यंडसंमितान्मयूराण्डप्रमाणान् चान्द्राय
णंकामसहद्विभ्यां चंद्रस्यायनंचरणमिवचरणंयस्मिन्क
र्मणिचान्द्रायणं संख्यायादीर्घः इतिपिपीलिकमध्यय
वमध्यचान्द्रायणद्वयम् अथयतिचान्द्रायणादीनियाज्ञ
वल्क्यः यथाकथंचित्पिंडानांचत्वारिंशच्छतद्वयम्
मासेनैवोपभुंजीतकथंचिद्धविषययथा अत्रायंक्रमः
दिनेदिनेष्टौग्रासान्भुंजीत अथवानक्तंचतुरोदिवाचत
रः इतिअथैकस्मिन्दिनेचतुरोपरस्मिन्द्वादशोभयेक

रात्रमुपोष्यापरस्मिन् षोडशाद्यह्नादिनद्वयमुपोष्यव्रती
यदिने चतुर्विंशतिदिनत्रयमुपोष्य चतुर्थदिने द्वाविंशदि
त्याप्रकाराणां मध्ये शक्त्यपेक्षया भुंजीतेति अत्र तिथ्यपे
क्षया ग्रासनियमो नास्ति उपक्रमस्तु शुक्लप्रतिपदो
रन्यत्रयस्तु नैरंतर्येणैवंविधचांद्रायणानुष्ठानं करोति
तस्य तिथिहानिवृद्धिवशेन कदाचिद्द्वितीयादिष्वारंभो
भवति तत्र न दोषः चंद्रगत्यनुसरणमंतरेण त्रिंशद्दि
नात्मकस्य सावनमासानुष्ठेयत्वात् अत्र चांद्रायणशब्दो
गौणस्तद्धर्मसाम्यार्थः कुंडपायिनामयने मासमग्निहो
त्रं जुहोतीतिवत् अस्मिंश्चांद्रायणे सर्वप्रकांतमेकाद
श्युपवासादि नत्वप्यनैतिथिनियमेन ग्रासनियमाभावा
त् यत्र तु तिथिनियमेन ग्रासनियमस्तत्र सर्वप्रकांतमु
पवासादिकमन्येन कारयेत् एषेवंप्रकारेषु कृच्छ्रवनमत्र
नाविशेषसंज्ञादर्शिना अष्टाष्टसमश्नीयात्पिंडान्मध्यं
दिने स्थिते नियतात्मा हविष्यस्य यतिचांद्रायणं चरन्
चतुरः प्रातरश्नीयात्पिंडान्विप्रः समाहितः चतुरोस्तमि
ते सूर्ये शिशुचांद्रायणं चरन् यथाकथंचित्पिंडानि ति
स्रोशीतिः समाहितः मासेनाश्नन् हविष्यस्य चंद्रस्येति स
लोकतामिति यमः त्रींस्त्रीन्पिंडान्समश्नीयान्नियतात्मा
दृढव्रतः हविष्यान्नस्यैव मासमृषिचांद्रायणं चरन्

म॰ इति पतितोद्धारणरीतिः अथ गोवधव्रतं याज्ञवल्क्यः

क॰ पंचगव्यं पिबेद्गोघ्नो मासमासीत संयतः गोष्ठेशयो गोनुगा
मी गोप्रदानेन शुध्यति कृच्छ्रं चैवातिकृच्छ्रं च चरेद्वापि समा
हितः दद्यात्त्रिरात्रं चोपोष्य वृषभैकादशास्तु गाः अत्र व्रत
चतुष्टयं विहितम् आहारेतरनिरपेक्षेण पंचगव्यं पिबे
द्गोघ्नो गोशालायां शयानः शान्तस्तु गावो गच्छन्तीरनुगच्छे
त्तिष्ठन्तीष्वनुतिष्ठन्नन्यैरपि नियमैर्युक्तश्चासीत ततो मासा
न्ते ब्राह्मणाय गां दत्वा शुध्यतीत्येकं व्रतं पंचगव्याहारव्य
तिरेकेण सर्वोक्तधर्मयुक्तो मासं प्राजापत्यकृच्छ्रं चरेदिति
द्वितीयं अत्रैव प्राजापत्यस्थानेतिकृच्छ्रं मासं चरेदिति तृ
तीयं त्रिरात्रोपवासपूर्वकमेकादशगाश्च दद्यादिति चतु
र्थः अत्रेयं व्यवस्था अज्ञानतो जातिमात्रब्राह्मणसंबंधि
गोमात्रवधे दद्यात्त्रिरात्रं चोपोष्य वृषभैकादशास्तु गा इत्ये
तत् अज्ञानतः क्षत्रियसम्बन्धिगोमात्रव्यापादने पंच
गव्यं पिबेद्गोघ्नो मासमासीत संयतः गोष्ठेशयो गोनुगा
मी गोप्रदानेन शुध्यतीत्येतत् अमत्या वैश्यसंबंधिगोमा
त्रव्यापादने मासमतिकृच्छ्रं कुर्यात् अज्ञानाच्छूद्रस्वामि
कगोमात्रव्यापादने मासं प्राजापत्यं कुर्यात् कामतस्तु
तत्रैतेष्वल्पेकल्प्यमथवामत्वाप्युक्तानि व्रतानि सर्वे
षु विषयेषु विषयान्तरेषु देशकालवचनाद्यपेक्षया यो

न्यानि तानिचव्रतानिमदनपारिजातेस्माभिः सम्यक्
प्रदर्शितानि कर्मविपाकपरिच्छेदेस्मिंस्तेषामनन्योप
योगाभावान्नात्रप्रदर्शितानि इतिगोवधव्रतम् अ
थमासोपवासव्रतम् चिंतामणौ नारदः भगवञ्छ्रो
तुमिच्छामिव्रतानामुत्तमस्यच विधिंमासोपवास
स्यफलंचास्ययथोदितम् यथाविधानैःकार्यंव्र
तचर्यायथाभवेत् आरभ्यतेयथासर्वंसमाप्यचयथा
विधिः यावत्संख्यंचकर्तव्यंतावद्ब्रूहिपितामह ब्र
तमेतत्सर्वश्रेष्ठविस्तरेणममप्रभो ब्रह्मोवाच साधु
नारदपृष्टमेतत्त्वयैवरतपोधन यादृङ्मतिमतांश्रे
ष्ठतत्कुरुष्वब्रवीमिते सुराणांचयथाविष्णुस्तपतां
चयथारविः मेरुःशिखरिणांयद्वद्वैनतेयश्चपक्षि
णां तीर्थानांतुयथागंगाप्रजानांतुयथाद्विजः श्रे
ष्ठंसर्वव्रतानांतुतद्वन्मासोपवासनम् सर्वव्रतेषुयत्पु
ण्यंसर्वतीर्थेषुयत्फलम् सर्वदानोद्भवंचापिलभेन्मा
सोपवासकृत् अग्निष्टोमादिभिर्यज्ञैर्विविधैर्भूरिदा
क्षिणैः नतत्पुण्यमवाप्नोतियन्मासपरिलंघनात्
तेनजन्मकृतंदत्तंनपरस्यसंकृतंतथा यःकरोतिविधा
नेननरोमासमुपोषणम् प्रविश्यवैष्णवंयज्ञंतेनाभ्य
र्च्यजनार्दनम् गुरोरनुज्ञांनतोलब्ध्वाकुर्यान्मासोपवा

म०
क
141

सनम् वैस्नवानियथोक्तानिकृत्वासर्वव्रतानितु द्वाद
श्यादीनिपुण्यानिततोमासमुपावसेत् प्रतिकृच्छ्रंपरा
कंचकृत्वाचांद्रायणंततः मासोपवासंकुर्वीतज्ञात्वादेह
बलाबलम् वानप्रस्थोयतिर्वापिनारीवाविधवामुने मा
सोपवासंकुर्वीतगुरुविप्राज्ञयाततः आश्विनस्यामले
पक्षेएकादश्यामुपोषितः व्रतमेतत्तुगृह्णीयाद्यावत्त्रिंश
द्दिनानितु वासुदेवंसमभ्यर्च्यकार्त्तिकेसकलेनरः मा
संचोपवसेद्यस्तुसमुक्तिफलभाग्भवेत् अच्युतेचार्चये
द्भक्त्यात्रिकालेकुसुमैःशुभैः मालतीनीलोत्पलैःपद्मैःकमले
स्तुसुगंधिभिः कुंकुमोशीरकर्पूरैर्विलिप्यवरचंदनैः नै
वेद्यधूपदीपाद्यैःरर्चयेतजनार्दनम् मनसाकर्मणावाचा
पूजयेद्गरुडध्वजम् कुर्यान्नरस्त्रिषवर्णेप्यहरहर्जिते
न्द्रियः स्नानमेवंतथालापंविष्णोःकुर्यादहर्निशम् भक्त्या
विष्णोःस्तुतिंवापिमृषावादंविवर्जयेत् सर्वसत्वदयाप्र
क्तःशांतात्मानिरहिंसकः समोवासर्वसंस्थोवावासुदेवं
प्रकीर्तयेत् स्त्रवालोचनगंधादिस्वादनेपरिकीर्तनम्
अन्नस्यवर्जयेत्सर्वंग्रासानांचाभिकांक्षणं गात्राभ्यंगं
शिरोभ्यंगंतांबूलंसविलेपनम् व्रतस्थोवर्जयेत्सर्वंयच्चा
न्यच्चनिराकृतम् नव्रतस्थःस्पृशेत्किंचिद्विकर्मस्थान्नचाल
पेत् देवतायतनेतिष्ठेद्यावद्धरस्यपारेद्युतम् कृत्वामासो

पवासं तु यथोक्तविधिना नरः नारी वा विधवा साध्वी वास
देवं समर्चयेत् अन्यूनाधिकमेवं स्याद्व्रते स्त्रीशूद्रिणेरिदं
कृत्वा मासोपवासं तु संयतात्मा जितेंद्रियः ततोर्चयेत वै
पुण्ये द्वादश्यां गरुडध्वजम् पूजयेत्पुष्पमालाभिर्गंधधू
पविलेपनैः वस्त्रालंकरणैश्चैव तोषयेदच्युतं नरः
स्नापयेत्तु हरिं भक्त्या तीर्थचंदनवारिणा चंदनेनानुलिप्तं
गंधपुष्पैरलंकृतं वस्त्रदानादिभिश्चैव भोजयेत्तु द्विजो
त्तमान् दद्याच्च दक्षिणां तेभ्यः प्रणिपत्य क्षमापयेत्
विप्रान् क्षमापयित्वा तान् विसृज्याभ्यर्च्य पूजयेत् एवं वित्ता
नुसारेण भक्तियुक्तेन शालिनः एवं मासोपवासांश्च सम्य
क्कृत्वा त्रयोदश निर्वापयेत तांस्तान्वै विधिना येन तच्छृणु
कारयेद्धेमसंवं यज्ञमेकादश्यामुपोषितः पूजयित्वा च दे
वेशमाचार्यादुक्तया हरिम् अर्चयित्वा परं भक्त्या अभिवा
द्य गुरुं तथा ततस्तु भोजयेद्विप्रान् भोजयेत यथाविधि वि
शुद्धशुक्लचारित्रान्विसृजनतत्परान् पूजयित्वा तथा
सम्यक् भोजयित्वा त्रयोदश भवंति वस्त्रयुग्मानि भाज
नच्छादनानि च योगपट्टानि शुभ्राणि ब्रह्मसूत्राणि चैव हि
दद्याच्चैव द्विजेंद्रेभ्यः पूजयित्वा प्रणम्य च ततोऽनुकल्प
येच्छय्यां शय्याभरणशोभिताम् साच्छादनां शुभां श्रेष्ठां
सोपधानामलंकृताम् कारयित्वात्मनो मूर्तिं कांचनीं तां

म॰
क॰

स्वशक्तितः स्वसेनस्यांतशय्यायामर्चयित्वास्रगादिभिः
आसनेपादुकेच्छत्रंवस्त्रयुग्मउपानहौ पवित्राणिचशुभ्राणि
शय्यायामुपकल्पयेत् एवंशय्यांतुसंकल्प्यप्रणिपत्यततो
द्विजान् प्रार्थयेच्चानुमोदार्थंविष्णुलोकंव्रजाम्यहं एवमभ्य
र्चिताविप्रावदेयुर्व्रतिनंतथा व्रजव्रजनरश्रेष्ठविष्णोःस्था
नमनुत्तमम् विमानेवैष्णवेदिव्येशय्यायांपरिकल्पितम्
तेनविष्णुपदंयाहिसदानन्दमनामयम् ततोविसर्जयेद्वि
प्रान्प्रणिपत्यानुगम्यच ततस्तुभोजयेद्भक्त्यागुरुंज्ञानप्रदा
यकम् तांशय्यांकल्पितांसम्यग्गुरुंज्ञानप्रदायकम् प्रण
म्याशिरसाशांतेगुरवेप्रतिपादयेत् एवंसंपूज्यहरिंविप्रान्
गुरुंज्ञानप्रदायकम् कृत्वामासोपवासंचविष्णुपूजनतत्प
रः नयेच्छांतमनाःकालंधर्मस्थःप्रयतेन्द्रियः कृत्वामासोप
वासंचनिवाप्याविधिवन्मुनेः कुलानांशतमुद्धृत्यविष्णुलो
कंव्रजेन्नरः अस्मिन्कृत्वामहापुण्येकलेमासोपवासकम्
सर्वपापविनिर्मुक्तोविष्णुलोकेमहीयते नरोमासोपवासा
न्तोकर्तापुण्यकृतांवरः पितृमातृकुलाभ्यांचसमंविष्णुपुरंव्र
जेत् नारीवाहमहाभागायथोक्तव्रतचारिणी कृत्वामा
सोपवासंचव्रजेद्विष्णुंसनातनम् नारदः त्वदुक्तमिदंदे
वश्रेष्ठोस्मानिकारणम् अतंमासोपवासात्वेभक्तिंजनय
तेप्युते पीडितस्यमशंदेवशुश्रूषोर्व्रतिनस्तथा त्यागोवा

त्र्यहोवाच किंतु कार्यं पितामह ब्रता व्रतस्थं कर्षितं हि
ष्ट्वा तु सर्वं वा तपोधन दृष्ट्वार्तं बालमणलस्य कर्तुं सम्यगा तु
थहम् अमृतं पाययेत् क्षीरमिच्छमानं सहसा निशि पयो हि
न विमुच्येत शास्त्रैः श्रमीडितो व्रती अतिमूर्छान्वितं क्षीरं
सुसूक्ष्मं त्वरमपीडितम् पाययित्वा हुतं क्षीरं तेष दत्वा फलानि
च अहोरात्रं वयो नित्यं व्रतस्थं परिपालयेत् पयो मूलफलं
दत्वा विष्णुलोकं व्रजेत् ततः एकान्ते चोपवासस्य मातृदंशा
णसंशये अव्रता ब्रह्मणैर्दिव्यैः परीक्षो द्विलक्षणया नैते
व्रतं विनिघ्नन्ति हविर्विप्रानुमोदने क्षीरौषधे गुरोराज्ञा आ
पो मूलफलानि वा एवं कृत्वाभिरेतस्तु तस्य गुडं पायसं तथा
पाययेद्द्वितीनो यस्मात्कस्मात्सोऽतिभुन् व्रतम् अमुं विसृज्य व्रतं
विसृजेत् न विसृजेत् तथा सर्वं विस्मयं त्यक्त्वा व्रतस्थं क्षी
णमुद्धरेत् यदा तु मूर्छितो निश्चेष्टः परिक्षीणेन तद्दिनः ततः
समुद्धरेत् क्षीणमिच्छन्तं विषमे स्थितम् परिपाल्य व्रतं देहं
व्रतशेषं समापयेत् यथोक्तं द्विगुणं तस्य फलं विप्रशुद्धो
त्तमम् इन्द्रियार्थेषु शान्ता च सदैव विमला मतिः परितोष
यते विष्णुं नोपवासो जितात्मनां किं तस्य बहुभिस्तीर्थैः स्ना
नहोमजपव्रतैः येनेन्द्रियगणो घोरो निर्जितः सर्वदैव तत्
सा जितेन्द्रियः सदा शान्तः सर्वभूतहिते रतः वासुदेवपरो
नित्यमक्केप्रोकर्तुमर्हति हुत्वान्नं यथोक्तं तु वैसवेषु

म० क०

113

रुषोव्रतम् विष्णुलोकमवाप्नोति नराह्नि दुर्लभम्
ये स्मरंति सदा विष्णुं विशुद्धेनांतरात्मना ते प्रयांति भयं त्यक्त्वा
विष्णुलोकमनामयं प्रभाते चार्धरात्रे च मध्याह्ने दिवसक्ष
ये अच्युतं येन कीर्त्यंति ते तरंति भवार्णवम् आनंदितो
यदुःखार्तः सुखः शांतोथवा हरिम् यो तु कीर्तयते भक्त्या
स गच्छेद्वै परं पदं गर्भजन्मजरारोगदुःखसंसारबंधनैः
निवार्यते नरो नित्यं वासुदेवमनुस्मरन् स्थावरे जंगमे वा
प्यस्थले सलिले शुभाशुभे विष्णुं पश्यति सर्वत्र यः स विष्णुः
स्वयं नरः सर्वं विष्णुमयं ध्यात्वा त्रैलोक्यं सचराचरम् यस्य
शांता मतिस्तेन प्रजितो गरुडध्वजः इति कल्पात्तु कल्पा
नां व्रतानां व्रतमस्य च विष्णुलोकमवाप्नोति प्रसादाच्च
क्रपाणिनः विधिर्मासोपवासस्य यथावत्परिकीर्तितः
तव स्नेहान्मुनिश्रेष्ठ सर्वलोकहिताय च कृत्वा शक्त्या तथा
भक्त्या मत्तो विष्णुपुरं व्रजेत् नाभक्ताय प्रदातव्यं न देयं दुष्ट
चेतसे इति श्रीविष्णुरहस्ये मासोपवासव्रतं समाप्त
म् अथ कृच्छ्रचांद्रायणसाधारणानि कर्तव्यतामाह
याज्ञवल्क्यः कुर्यात्त्रिषवणस्नायी कृच्छ्रं चांद्रायणं त
था पवित्राणि जपेत्पिंडान् गायत्र्याचाभिमंत्रयेत् त्रिष
वणस्नानं तप्तकृच्छ्रव्यतिरेकेण तप्तकृच्छ्रे तु मासकृत्
स्नायी समाहितः इति विशेषाभिधानात् पवित्राणि सू

क्तानि चाघमर्षणम् देवकृतः शुद्धवत्यः तरत्समन्दीत्या
दिवसिष्ठप्रदर्शितानि तानि ऋग्यजुः सामसहव्यवास्थिता
नि यथाशाक्तिजपेत् अविरुद्धेषु कालेषु पिंडान् ग्रासमा
त्रमेकैकं गायत्र्या वाभिमंत्रयेत् ग्रासानुमंत्रणे गोनमोऽक
र्भमित्यादिमंत्रैः सहगायत्र्या विकल्पः एवं जपादिष्वे
वकार्याणां मंत्राणां विकल्पः भिन्नकार्याणां समुच्चय इ
ति विवेकः मनुः महाव्याहृतिभिर्होमः कर्तव्यः स्वयम
न्वहम् अहिंसा सत्यमक्रोधमार्जवं च समाचरेत् त्रि
रह्निस्त्रिर्निशायां तु सवासा जलमाविशेत् स्त्रीशूद्रपति
तांश्चैव नाभिभाषेत कर्हिचित् स्थानासनाभ्यां विहरन्
शक्तोऽधःशयीत वा ब्रह्मचारी व्रती च स्याद् गुरुदेवद्विजा
र्चकः सावित्रीं च जपेन्नित्यं पवित्राणि च शक्तितः सर्वेष्वे
व प्रायश्चित्तार्थमाह त्रिरह्नीत्यादि दिवा रात्रिः रात्रौ त्रिः
एवं षट्सु सवनेषु स्नानं तत्र किं विपर्ययं एवं स्नानादि
कान्यन्यान्यपि शक्त्यपेक्षया योज्यानि जाबालः आरं
भे सर्वकृच्छ्राणां समाप्तौ च विशेषतः आद्येनैव हि
शालाग्नौ जुहुयाद्व्याहृतीः पृथक् श्राद्धं कुर्याद्व्रतांते
च गोहिरण्यादिदक्षिणां स्त्रीणां होमे न दातव्याः पंच
गव्यं तथैव च पराशरः स्त्रीशूद्रस्य तु शुद्ध्यर्थं प्राजाप
त्यं समादिशेत् पंचगव्यं न कुर्वीत स्नात्वा पीत्वा शुचि

म० क

र्भवेत् स्त्रीशूद्रयोः पंचगव्यस्य विहितप्रतिषिद्धत्वे विक
ल्पः जाबालेन शालाग्नौ होमं विधाय स्त्रीणां होमो न दातव्य
इति निषेधात् गृह्याग्नावेव होमनिषेधः अतः स्त्रीशूद्रयो
रपि ब्राह्मणद्वारा लौकिकाग्नौ भवत्येवायं होमः न तु कृ
च्छ्रप्रत्याम्नायप्रधानहोमः आरंभे सर्वकृच्छ्राणां समाप्तौ
च विशेषतः आज्येनैव हविषा शालाग्नौ जुहुयाद्व्याहृतीः पृथ
गिति जाबाल्येन विशेषाभिधानात् कृच्छ्रप्रत्याम्नायभू
तयोस्तु जपहोमयोः प्रधानयोः स्त्रीशूद्रानधिकारः स्मृ
तः तस्माच्छूद्रं समासाद्य सदा धर्मपथे स्थितम् प्रायश्चि
त्तं प्रदातव्यं जपहोमविवर्जितम् अत्र शूद्रशब्दस्तूपल
क्षणार्थः स्त्रीणां तयोः समानधर्मत्वात् वैशम्पायनः
स्नानं त्रिकालं वा द्विजन्मनः शंखः एकवासाश्चार्द्रवासा
स्त्वाशी स्थंडिलेशय इति हारीतः अववेस्तुडवतीभिः
स्नात्वाघमर्षणमंतर्जले जपित्वा धौतमहतं वासः परि
धाय साज्ञा सौम्येनादित्यमुपतिष्ठतीति षट्त्रिंशन्मते
जपहोमाद्यत् किंचित् कृच्छ्रोक्तं संभवेन्न चेत् सर्वव्या
हृतिभिः कुर्याद्गायत्र्या प्रणवेन वेति शंखः एकवासा
श्चार्द्रं स्नानात्रावासो न पीडयेत् गायत्र्या दशसाहस्रमा
न्हिकं जपश्रूयते बौधायनः अहतवासो वसीत सावित्री
व्याहृतीश्चैव जपेद्दशसहस्रकृत्वः ओंकारमादितः कृत्वा

द्रुपेद्रुपेतथोततः अग्नौवीरासनेषुकेजपंकुर्यात्समाहितः
आसीनःशल्यविद्धोवापिबेद्गव्यंपयःसकृत् गव्यस्यप
यसोऽलाभेगव्यमेवभवेदपि दध्नोऽलाभेपिबेत्तक्रंतक्रा
लाभेतुयावकम् एषामन्यतमंयत्तदुपायेनचतत्पिबेत्
शल्यविद्धोवेति वाशब्दउपमार्थे शल्यविद्धइवनिश्च
लमनास्सीनःपयःपिबेदित्यर्थः यमः अंगुल्याग्रस्थितं
पिंडंगायत्र्याचाभिमंत्रितम् प्राणादस्यपुनःकुर्यादन्य
स्याप्यभिमंत्रणं येनप्राणाग्निहोत्रेपिकारिणस्तेषामपो
शानकर्मानन्तरंमंत्रैःप्राणाद्युतयोपिपंचभिर्ग्रासैर्भवति
तत्रचसर्वोक्तप्राणावगायत्र्यायामतमेग्रासानभिमंत्र्यप्रा·
णायस्वाहेत्यादिमंत्रैःप्राणाग्नौहोमःकार्यःयदातेको
द्वौत्रिचतुर्ग्रासास्तत्रबौधायनोक्तोविशेषः तद्यथा अग्नौ
यात्प्राणायेतिप्रथममपानायेतिद्वितीयं व्यानायेतितृ
तीय उदानायेति समानायेति पंचमं यदाचत्वारस्तदा
द्वाभ्यां प्रथमंयदात्रयस्तदाद्वाभ्यांद्वाभ्यांपूर्वौयदाद्वौतदा
त्रिभिःपूर्वंद्वाभ्यामेव उत्तरमेकंसर्वैरिति अस्यार्थः यदा
चत्वारोग्रासाभवन्तितदाद्वितीयाभ्यांमंत्राभ्यांप्रथमो
ग्रासोऽस्यतेतृतीयेनद्वितीयंचतुर्थेन तृतीयं पंचमेन
चतुर्थं यदात्रयस्तदाद्वितीयाभ्यामाद्यं तृतीय चतुर्था
भ्यांद्वितीयंपंचमेनतृतीयंयदाद्वौतदाप्रथमतश्चारभ्य

१२ स· क 115

त्रिभिः प्रथमे द्वाभ्यां द्वितीये यदा त्वेकस्तदा सर्वैरेव ग्रसेदि
ति हारीतः चंद्रमसस्थरूपं अपयित्वा नवो नव इति हुत्वा ज्यो
त्स्नायां च तस्मै षों पिंडान्सा विद्याभिमे त्रितान्वाश्नीयादिति
ज्योत्स्नाशब्देन चंद्रोदयो लक्ष्यते तेनार्धरात्रादावपि भोजने
दोषो नास्ति शंखः आर्द्रामलकमात्रास्तु ग्रासा इंदुव्रते
स्मृताः तथैवाङ्गुलयस्तत्र शौचार्थे चैव मार्त्तिकाः इति कृ
च्छ्रचांद्रायणसाधारणेतिकर्तव्यता अथ प्राजापत्यादि
कृच्छ्रप्रत्याम्नायः तत्रश्वेंकरीत्या द्वादशदिनानि प्राजा
पत्यं कृच्छ्रं चरेत् दशक्तौ धेनुमेकां दद्यात् तदभावे निष्कं द
द्यात् निष्कलक्षणं परिमाणप्रकरणे भ्यधायि अथवा गो
रभावे देशकालोचितं मूल्यं देयं तत्राप्यशक्तौ तदर्धं पादं वा
दद्यात् तथा च मितात्तरायां गवामभावे निष्कं वा तदर्धं पा
दमेव वा तथा प्राजापत्यक्रिया शक्तौ धेनुं दद्याद्विजोत्त
मे धेनोरभावे दातव्यं मूल्यं तुल्यं न संशयः इति पाराशरः
कृच्छ्रोयुतं तु गायत्र्या उदवासस्तथैव च धेनुप्रदानं विप्रा
य सममेतच्चतुष्टयं कृच्छ्रं प्राजापत्यः अयुतं गायत्र्या उद
वास उदके वासः स चाग्निहोत्रे मितात्तरायां कृच्छ्रो वेदायु
तं चैव प्राणायामशतद्वयम् तिलहोमसहस्रं तु वेदपारा
यणं तथा स्मृत्यर्थमेतत्प्राजापत्यं कृच्छ्रप्रत्याम्नायत्वेन
द्वादशस्वदिनेषु प्रतिदिनं पंच पंच विप्रभोजनीयाः तेच

मिलित्वा षडशीर्भवति तथामितान्तरायो कृच्छ्रं पंचातिकृच्छ्रे
त्रिगुणमहरहस्त्रिंशदेवेत्यतीये चत्वारिंशत्तत्तत्रत्रिगुणित
गणिता विंशतिः स्यात्पराके कृच्छ्रे सान्तापनाख्ये भवतिष
अधिका विंशतिः सैवहीनाद्वाभ्यां चांद्रायणे स्यात्तद्दपिक्
तवस्त्रोभोजयेद्दिप्रमुख्यान् अथ कृच्छ्रे हरहः पंचेत्यत्र
यः अहरहरित्ति प्रत्येकं सम्बध्यते सत्यथा मत्स्यद्वादशत्रा
ह्मणान्भोजयेत् तथा चतुर्विंशतिमते विशवाद्वादशभो
ज्याः पावकोष्टिस्तथैवच अन्या वा पावनीकाचित्समान्या
द्गुर्मनीषिणः अत्र न प्रतिदिनं द्वादश द्वादश किं तद्द्वादशै
वगुणत्तीर्थविष्णुक्रमप्रकारेणस्नात्वा तदंगात्त्रष्टानंविधा
यकेशांशोषयित्वा पुनर्विधिवत्स्नात्वा सर्ववत्केशान्संशो
षयेत् एवं द्वादशस्नानानि प्राजापत्यकृच्छ्र प्रत्याम्नायः
तथाच पराशरः कृच्छ्रोदेव्ययुतंचैव प्राणायामशतद्वयं
पुण्यतीर्थेऽनार्द्रशिरः स्नानं द्वादशसंख्यया अनार्द्रशिरो
यस्यासावनार्द्रशिराः अनार्द्रशिरसः स्नानमनार्द्रशिरःस्ना
नम् इति प्राजापत्यप्रत्याम्नायः अथातिकृच्छ्र प्रत्याम्ना
यः तत्रातिकृच्छ्रकरणाशक्तो याज्ञवल्क्योक्तपाणिपूरा
न्नभोजनरूपमतिकृच्छ्रप्रत्याम्नायत्वेनपेत्त्रद्वयंदद्यात् तथा
च षट्त्रिंशन्मते प्राजापत्येनगामेकामतिकृच्छ्रेद्वयंस्मृ
तमिति एकैकं ग्रासमश्नीयादितिमन्त्रोक्तातिकृच्छ्रकरणा

146

शक्तौ धेनुत्रयं देयम् अत एव चतुर्विंशतिमते पराकतप्तकृ
च्छ्रेषु तिस्रस्तिस्रस्तु गास्स्युरिति गवामभावे तावंतो निष्का स्ता
वंति गोमूल्यानि वा देयानि निष्काभावे तदर्धं पादं वा अथवा
यावत्यो धेनवस्तावंति गायत्रीजपानां सहस्राणि तावंत उद
वासाः सर्वे करीत्या कार्याः तत्र तावंति प्राणायामशतद्वया
नि तावंति वा तिलहोमसहस्राणि अपि वा तावंति वेदपारा
यणानि भवंति अतोस्य धेनेन धेनुसंख्यया द्वादश विप्रा भो
जनीयाः येत्र अथ धेनेन द्वादशसु दिनेषु प्रतिदिनं पंचदश पंच
दश विप्रा भोजनीयाः प्रतिदिनं द्वादशसु दिनेष्वित्यर्थः अ
त्र च मिलित्वा शीत्युत्तरं शतं ब्राह्मणा भवंति अथवा तावंत्यो
धेनवस्तत्संख्यया स्नानानि द्वादश द्वादश कर्तव्याः प्रत्याम्ना
याः अत्र च स्नानप्रकारः प्राजापत्यकृच्छ्रप्रत्याम्नायप्रकरणे द
र्शिताः इति कृच्छ्रप्रत्याम्नायाः अथ कृच्छ्रातिकृच्छ्रप्रत्याम्ना
यः तत्र प्राजापत्यत्रयस्यानेकृच्छ्रातिकृच्छ्रस्य विहितत्वात
कृच्छ्रातिकृच्छ्रकरणाशक्तौ तिस्रो धेनवो दातव्याः तदभावे
निष्कत्रयं सार्धो निष्कः पादो देयः अथवा गायत्र्ययुतं दिनत्रयमु
दवासो वा त्रीणि प्राणायामशतद्वयानि वा तिलहोमसहस्र
त्रयाणि वा त्रीणि वेदपारायणानि वा कर्तव्यानि अपि वा स
मुद्रयामेनाहरहस्त्रिंशत्संख्याका ब्राह्मणा भोजनीयाः त
था च चतुर्विंशतिमते कृच्छ्रे पंचातिकृच्छ्रे त्रिगुणमहरहस्त्रिं

शादेवं तृतीये इति तृतीये कृच्छ्रातिकृच्छ्रे अहरहस्त्रिंशद्ब्राह्म
णा भोजनीया इत्यर्थः एतच्च त्रिंशद्ब्राह्मणभोजनं द्वादशसु दि
नेषु प्रतिदिनं कर्तव्यं मिलिता षष्ट्युत्तरं त्रिशतं ब्राह्मणा भवंति
अस्मद्रूथान्येषु त्रिगुणिता द्वादश ब्राह्मणा भोजनीयाः ते च
मिलिताः षट्त्रिंशत् स्नानप्रत्याम्नायस्तु प्राजापत्यप्रत्याम्नाये
यावंत्यो गावस्तावंत्यो ज्ञेयाः इति कृच्छ्रातिकृच्छ्रप्रत्याम्नायः
अथ तप्तकृच्छ्रप्रत्याम्नायः तत्र द्वादशाहःसाध्ये तप्तकृच्छ्रे प्र
त्याम्नाये तेन तिस्रो गावो देयाः पराकतप्तकृच्छ्रे च तिस्र एव ति
स्रस्त्रिगावस्तथेति चतुर्विंशतिमते ऽभिधानात् चतुरहःसाध्ये
तप्तकृच्छ्रे ऽनेकार्थे त्र्यहसाध्ये तु निष्कार्धं देयम् गवामभावे
निष्कमित्यादिका अन्ये प्रत्याम्नायाः कृच्छ्रातिकृच्छ्रप्रत्याम्नाय
प्रकरणोक्तरीत्या विज्ञेयाः अस्मद्रूथान्यस्य तप्तकृच्छ्रे ऽयो विशेषः द्वा
दशसु दिनेषु प्रतिदिनं चत्वारिंशच्चत्वारिंशद्ब्राह्मणा भोजनी
याः इति तथा चतुरहःसाध्ये त्र्यहसाध्ये च तप्तकृच्छ्रे प्रतिदिने
चत्वारिंशच्चत्वारिंशद्ब्राह्मणा भोजनीयाः इति तथा चतुरहः
साध्ये त्र्यहसाध्ये च तप्तकृच्छ्रे प्रतिदिनं चत्वारिंशच्चत्वारिंशदि
ति तथा चतुर्विंशतिमते कृच्छ्रे पंचातिकृच्छ्रे त्रिगुणमहरह
स्त्रिंशदेवं तृतीये चत्वारिंशच्च तप्त इति तप्तकृच्छ्रे अहरहश्चत्वा
रिंशदित्यन्वयः अथ सान्तपनयतिसान्तपनप्रत्याम्नायाः त
त्र सप्ताहसाध्यस्य सांतपनस्य सार्धप्राजापत्यस्थाने विहित

म·
क·

147

त्वादेकाधेनुर्निष्कार्धंवदेयम् तथाचषट्त्रिंशन्मतेपराकतप्त
कृच्छ्रस्थानेकृच्छ्रत्रयंचरेत्संतपनस्यचार्धमशक्तौव्रतमाचरेदि
तिदिनद्वयसाध्येसांतपनेनिष्कार्धंदेयंदिनत्रयसाध्येयति सं
तपनाख्येधेनुमेकांदद्यात् अनयैवरीत्यागायत्रीजपादिरूपप्र
त्याम्नायेष्वपिपरिमाणंकल्प्यम् यत्रैकाधेनुर्निष्कार्धंदेयंभवति
तत्रगायत्र्ययुतजपोधेनुस्थानेर्धनिष्कस्थानेपंचसहस्राणीत्य
नयारीत्याप्रत्याम्नायभेदास्तप्राजापत्याम्नायप्रकरणेद्रष्टव्याः
इतिसांतपनयतिसांतपनप्रत्याम्नायाः अथमहासांतपन
प्रत्याम्नायाः तत्रैकविंशतिदिनसाध्येमहासांतपनेप्रत्याम्ना
यत्वेनतिस्रोधेनवोर्धनिष्कंचदेयंपंचदशदिनसाध्येतुधेनुद्व
यंनिष्कार्धंचदेयंसप्ताहसाध्येत्वेकाधेनुर्निष्कार्धंचेतिदद्यादेत
त्कल्पनायांमूलंचउपवासात्मकप्राजापत्यप्रत्याम्नायत्वेनधे
नुर्विधाने सप्ताहसाध्येनसांतपनेनिष्कार्धसहितधेनुदानमु
क्तंसांतपनप्रकरणेदर्शितं सांतपनस्यचाप्यर्धमित्यनयादि
शागायत्रीजपादिरूपप्रत्याम्नायप्रकरणेद्रष्टव्याः इतिमहासां
तपनप्रत्याम्नायाः अथपराकप्रत्याम्नायाः चतुर्विंशतिमते
पराकतप्तकृच्छ्राणांस्थानेकृच्छ्रत्रयंचरेत् जपहोमादिकंवा
पिकल्पयेत्सर्वंतथेति कृच्छ्रत्रयस्थानीयत्वात्पराकस्यपराक
करणाशक्तौतिस्रोधेनवोदेयाः तथागायत्रीजपप्रत्याम्नाया
अपित्रिगुणाःकल्प्याः तेचप्राजापत्यप्रत्याम्नायप्रकरणेद्रष्टव्याः

इतिपराकप्रत्याम्नायाः अथयावकव्रत गोमूत्रयावकव्रत
पयोव्रतानांप्रत्याम्नायाः तत्रयावकव्रतेपयोव्रतेचप्रत्याम्नाय
त्वेनपंचधेनवोदेयाः षडुपवासाएकप्राजापत्यस्थानमिति
मासेपंचषट्काभवंतीतिकृत्वायद्यपियावकव्रतेप्रतिदिनं
यावकमुपभुज्यते तथापि इर्वीकयावकभोजनस्यात्यंतक्ले
शसाधनत्वादुपवाससमत्वंभवत्येवपयोव्रते पयःपानेक्ले
शाभावेपि एकग्रास मात्रपर्याप्तस्यैवपयसःपानादुपवास
कल्पत्वंगोमूत्रयावकव्रतेतत्क्लेशाधिक्यात्प्रत्याम्नायत्वेनष
ड्धेनवोदेयाः एवंगायत्रीजपादिप्रत्याम्नायाअपिकल्पनीयाः
तेचप्राक्प्राजापत्यप्रत्याम्नायप्रकरणेप्रपंचिताः इतियावक
व्रतगोमूत्रयावकव्रतपयोव्रतानांप्रत्याम्नायाः अथचांद्राय
णप्रत्याम्नायाः तत्रसमरूथनेनचांद्रायणप्रत्याम्नायत्वेनाष्टौ
गावोदेयाः तथाचतत्रविंशतिमते अष्टौचांद्रायणेदेयाः प्रत्या
म्नायविधौसदेति तत्रापिपीलिकामध्ययवमध्ययोश्चांद्रायण
योर्गौतमाद्युक्ताधिकेतिकर्तव्यतासहितयोरप्यष्टौचांद्रायणे
देया इत्येतद्योज्या अल्पधनेनतुतिस्रोगावोदेयाः तथाचपरा
शरःनिबंधे प्राजापत्येतुगामेकामतिकृच्छ्रेद्वयंस्मृतम् चां
द्रायणेपराकेचतिस्रःस्युस्तस्तदक्षिणाः इतिएतच्चधेनुत्रयदानं
स्वल्पेतिकर्तव्यतासहितयोर्यवमध्यपिपीलिकामध्यचांद्रा
यणयोः तथायतिचांद्रायणादिष्वपियोज्यंएवंशक्त्याद्यपे

म
क

लयायावल्क्येन वोदीयंते तत्र तदभावे गवामभावे निष्कं
स्यात्तदर्धपादमेव वेत्युक्तरीत्या दातव्यं अथवा प्रतिधेनोर
युतं गायत्रीजपो वा तथा धेनुसंख्यानि वेदपारायणानि वा
तत्संख्याकतिलहोमसहस्राणि प्रतिधेनु द्वादश स्नानानि
वा कार्याणि पतेच विकल्पा व्रीहियववद्वैकल्पिकाः अपि तु दि
नात्र दिनहोमवद्व्यवस्थिताः व्यवस्था च देशकालाद्यपेक्षया
तथा च बौधायनः देशं कालं तथात्मानं द्रव्यं द्रव्यप्रयोजनं
उपपत्तिमवस्थां च ज्ञात्वा शौचं प्रकल्पयेदिति शौचशब्देन
सर्वं शुद्धिकरणमभिधीयते एवमन्यत्रापि न्यूनाधिककल्पे
षु शक्त्यपेक्षो विकल्पो बोद्धव्यः अनेनैवाभिप्रायेण मिता
क्षरादित्ति वं धेनुन्यूनाधिकता व्याख्याता यथा चांद्रायणं म
गारेष्टिः पवित्रेष्टिस्तथैव च मित्रविंदा पशुश्चैव वक्ष्यत्कृच्छ्रमा
सत्रयं तथा तिलहोमायुतं चैव पराकद्वयमेव च गायत्र्या
लक्षजप्यं च समानाहरहरस्यातिरिति तत्तपस्यः समर्थेन सम्
दुष्ठान्येन मासावधिकाले प्रतिदिनं चतुर्विंशतिब्राह्मण
भोजनीयाल्पथा च चतुर्विंशतिमते कृच्छ्रे पंचातिकृच्छ्रे
त्रिगुणमहरहस्त्रिंशदेवं तप्ते चेच चत्वारिंशच्च तन्ने त्रिगुणन
शणितान विंशतिः स्यात्पराके कृच्छ्रे सांतापनाख्ये भवतिष
ड्धिका विंशतिः सैव हीना हाभ्यां चांद्रायणे स्यात्तपास्विकृ
शवलो भोजयेद्विप्रसंख्यानितिथ्यर्थः अहरहरितिस

र्वज्ञान्वेतिकृच्छ्रे प्राजापत्ये द्वादशसु दिनेषु त्र्यहस्त्र्यहः पंचविंशा
न्भोजयेदितिकृच्छ्रे सर्वैः कृत्तनण प्रोक्तसंख्याकेषु दिनेषु प्र
तिदिनं विप्राणां त्रैश संपंचपंचापेक्षया पंचदशेत्यर्थः तप्ती
येकृच्छ्रातिकृच्छ्रे सर्वैः कृच्छ्रातिकृच्छ्रदिनेषु त्र्यहस्त्र्यहस्त्रिंश
त् तप्तकृच्छ्रे सर्वाभिहिततप्तकृच्छ्रदिनेषु प्रतिदिवसं च
त्वारिंशत्पराके पराकव्रतसंख्याकदिनेषु प्रत्यहं विप्राणे
नगणिना विंशतिः षष्टिरित्यर्थः चांद्रायणे चांद्रायणचरण
संख्याकदिनेषु द्वाभ्यामूनाषडधिका विंशतिस्त्रयविंश
तिरित्यर्थः एते एताः सर्वशक्त्यापेक्षया योज्याः इति चांद्रा
यणे प्रत्याम्नायाः अथ गोवधप्रत्याम्नायाः याज्ञवल्क्यो
क्तव्रतचतुष्टयं प्राक्प्रदर्शितं तल्लक्षणप्रकरणे तत्राज्ञान
तोज्ञानमात्रब्राह्मणसंबंधि गोमात्रवधे त्रिरात्रमुपोष्य ऋ
षभैकादशागावश्च देयाः त्रिरात्रोपवासाशक्तौ सर्वोक्तागावो
वृषभश्च निष्कार्धं च देयं कामतस्तेद्विप्राणां ज्ञानतः त्वि
यसंबंधिगोमात्रव्यापादने पंचगव्यं पिबेद्गोघ्नो मासमासी
तसंयतः गोष्ठेशयो गोनुगामी गोप्रदानेन शुद्ध्यतीत्य
नेन मासं पंचगव्यव्रतं चरित्वांते गां दद्यादेतत्करणाशक्तौ
व्रतस्यास्य तत्क्लेशतुल्यव्रतप्रत्याम्नायत्वेनाष्टौ गावप्रकाच
व्रतांते इत्येवं नवधेनवो देयाः अष्टौ चांद्रायणे देयाः प्रत्या
म्नायविधौ सदेति बहुक्लेशसाध्यं चांद्रायणव्रतं तस्यास्य

म· क·

वहुक्लेशसाध्यत्वाच्च समानविषयत्वेन युक्तमष्टधेत्युपरिक
ल्पनं कामतस्तु षोडशधेन वः एकाचदक्षिणागत्वेनेति सप्तदश
गावः अज्ञानतो वैश्यसंबंधिगोमात्रव्यापादने मासमतिकृच्छ्रं
कुर्यात् एतदाचरणाशक्तौ द्वादशदिनसाध्यपाणिपूरान्नभोज
नयुक्तातिकृच्छ्रप्रत्याम्नायत्वेन गोद्वयदानस्यातिकृच्छ्रप्रत्याम्ना
यप्रकरणे दर्शितत्वादत्र मासातिकृच्छ्रे पंचगावो भवंति मन्त्रक
ग्रासमात्रभोजनयुक्तस्यातिकृच्छ्रस्य द्वादशदिनसाध्यस्य कर
णाशक्तौ तिस्रो विहिता इति प्रतिमासस्साध्येति सप्त गावो नि
ष्कार्थं च देयं उभयत्र कामतो द्वैगुण्येन क्रमेण दश पंच दश च
भवंति गवामभावे गोसंख्यातिकृच्छ्रप्रत्याम्नायप्रकरणोक्त
प्रत्याम्नायाः शक्त्याद्यपेक्षया कर्तव्याः अज्ञानतः शूद्रस्वामिक
गोमात्रव्यापादने मासप्राजापत्यविधिना तदशक्तौ गोद्वयं नि
ष्कार्थं च देयम् कामतः पंचगावस्तदशक्तौ इतरे सर्वोक्ताः प्रत्या
म्नायाः कार्याः इति गोवधव्रतस्य प्रत्याम्नायः अथ मासोपवा
सप्रत्याम्नायः तत्र षडुपवासतुल्यप्राजापत्याम्नायत्वेन तत्
प्राजापत्ये तु गामेकामिति विधानात् पंचगावः प्रभवंति मा
सव्रते जपनियमाद्यनेकेतिकर्तव्योपेतमासव्रते तु क्लेशाधि
क्येन चान्द्रायणव्रतवदष्टौ गावः कल्प्याः अथ प्रायश्चित्तोप
क्रमप्रकारः तत्र कर्मविपाकप्रायश्चित्तमात्रउपक्रमप्रीतरप्रा
यश्चित्तोपक्रमम् किंचिदुपपद्यते तद्यथा देवलः कृच्छ्राणां

दापको राजा निर्दिष्टो धर्मपालकः अपराधी प्रयोक्ता चरति
ना कृच्छ्रपालकः महापापेषु कृच्छ्राणां प्रायश्चित्तानां दाप
को राजा भवति ब्राह्मणादि प्रायश्चित्तेषु राजा आज्ञां विना
द्विजाद्यैः प्रायश्चित्तं नोपवर्णनीयमित्यर्थः प्रायश्चित्तस्यानि
ईदृशो धर्मपाठक इत्युच्यते यस्मिन्ननुवादकशाहं लोकाः प्रयुं
जते अंगिराः वेदविद्याव्रतस्नातः सत्यसंधो जितेंद्रियः अ
नेकधर्मशास्त्रज्ञः प्रोच्यते धर्मपाठकः अपराधी पापकारी कृ
च्छ्रप्रयोक्तेत्यभिधीयते रक्षिता राजपुरुषः कृत्वा कृत्यमत्यवे
क्षणेन प्रायश्चित्तपरिपालक इत्युच्यते प्रकृतमनुसरामः धर्म
विहत्यै क्षत्रियो वैश्यो वा शूद्रो वा न कथंचन प्रायश्चित्त
विधानं हि कुर्वंतीति विदुर्बुधाः अव्रतानाममंत्राणां जातिमा
त्रोपजीविनाम् सहस्रशतयुक्तानां पर्षत्त्वं नोपपद्यते पात
के च प्राप्तं पर्षत्सहस्रं महदादिषु उपपापेषु पंचाशत्स्वल्पे स्व
ल्पतरा भवेत् बहुभिर्विद्वद्भिर्विचार्य प्रायश्चित्तं विधेयमिति
शतादिशब्दानां तात्पर्यार्थः अत एव याज्ञवल्क्यः चत्वारो वेद
धर्मज्ञाः पर्षत्त्रैविद्यमेव वा सा ब्रूते यं स धर्मज्ञः स्यादेको वाध्या
त्मचिंतकः इति मनुः त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्मपाठकः
त्रयश्चाश्रमिणः पूर्वे पर्षद्देशावरेति तिस्रो विद्या ऋग्यजुः
सामात्मिका यस्यासौ त्रैविद्यः हैतुको नुमानज्ञः तर्कोऽस्यास्ती
ति तर्की संशये सत्येकस्मिन्कोटौ प्रमाणिकत्वारोपे कृते बाधका

म· क

150

दर्शनात् प्रमाणेनानुभवितव्यमितियः प्रत्ययः स तर्कः स च
वेदशास्त्राविरोधी ग्राह्यः एवंविधायाः पर्षद उपस्थानं च स्वप्रमा
णप्रकारेण कार्यमत्रायं ह्यसमाचारो व्रतग्रहणदिने तथ
था अभुंजानः स्वयं काले पर्षदं प्रदक्षिणीकृत्य स्वकीयमेनो
विज्ञापयतीति न्यायमाशयः अंगिरसादीन पापस्य पर्षदु
पस्थानात्सर्वभोजनं निषिद्धं अस्याप्ययमभिप्रायः पश्चात्ताप
वान्भवेत् अविलंबेनैव प्रायश्चित्तं गृह्णीयात् अन्यथा दीर्घ
काले भोजनपरित्यागे देहधारणाभावेन प्रायश्चित्ताचरण
मेव न स्यात् तस्माद्दैववशात्प्रायश्चित्तविलंबे मितमेध्याहारा
दिभिः शरीरधारणं कुर्वीत न स्वच्छन्दचारी स्यादिति मीमांसा
न्तास्तु किं च ह्यव्रतग्रहणदिन एवाभोजनं मन्वते कलौ दु
नरात्तनापस्यासंभवात् उपक्रमदिने शरीरशुद्धिरीप्सितत्वा
न्मतः प्रायश्चित्तीयतां प्राप्य दैवात्सर्वं कृतेन वा न संसर्गं व्र
जेत्तदुक्तं प्रायश्चित्ते कृते द्विजः अंगिराः उपस्थितस्तु न्यायेन
व्रतादेशनमर्हति कृतेति संशये पापेन भुंजीत स्तु उपस्थितः
भुंजानो वर्धयेत्पापमसत्यं पर्षदि ब्रुवन् संशये त्वन भोक्त
व्यं यावत्पापस्य निष्कृतिः प्रमादश्च न कर्तव्यो यथैवासंशय
स्तथा कृत्वा पापं न गृह्णीत गृह्यमाणस्य वर्द्धते बहु वा स्वल्प
कं वापि कर्म विख्यो निवेदयेत् प्रायश्चित्ते समुत्पन्ने ह्रीमान्स
त्यपरायणः मृदुरार्जवसंपन्नः शुद्धिमान्यतमानसः सर्वे

तेवागयतः स्नात्वा क्षिप्रवासाः समाहितः तत्रियोवापिवैश्यो
वापर्षदंसमुपतिष्ठति त्रिविधानुपादानं प्रदर्शनार्थम् उपस्था
यततः शीघ्रमार्तिमां धरणीं व्रजेत् गात्रैश्च शिरसा चैव न च
किंचिदुदाहरेत् ततस्ते प्रणिपातेन दृष्ट्वा तं समुपस्थितम्
पृष्टाः स्वच्छमिति किं कार्यमुपविश्य पुरतः स्थितम् किं ते कार्यं क
राम्नाभिः किं वा मृगयसे द्विज ततस्तो ब्रूहि तत्सर्वं सत्यं हि ग
तिरात्मनः अस्माकमेव सर्वेषां सत्यमेव परं बलम् यत्किंचिद
त्र मे सत्यं नियतं शाश्वसे शुभम् यदागतोस्य सत्येन ततं वश
ञ्जासि कर्हिचित् एवं सर्वैरनुज्ञातः सर्वं ब्रूयादशेषतः इति
ततस्त्वंजीतानुपास्थित इति अनुपस्थितः पर्षदमनुपस्थितः सं
शयो नाम पर्षदुपस्थानं स्वगतपापसन्देहः कार्यस्य निष्कृतिः
पापस्य निश्चयः अथवा कार्याकार्यस्य निष्कृतिः प्रायश्चित्तस्य नि
श्चयः संशयेन न भोक्तव्यमित्येतस्मिन् मिथ्याभियोगविषये
प्रमादश्च न कर्तव्यः पुनः पापं न कुर्यादित्यर्थः अथवा विरह
कालसंदेहादहश्चौहविषभोजनादिना शरीरमरणं प्रमा
दश्च न कर्तव्यः यथैवासंशये पापस्य निश्चयो देशान्तरादिव
वहितेषु विहतस्य पर्षदुपस्थानात् प्रागयथाहविषभोजना
दिना शरीरमरणं क्रियते तथा संशयमस्ते पीत्यर्थः पर्षदश्च
पापव्यापनं च दक्षिणादानानन्तरं कुर्यात् यथा पराशरः पा
पं प्रख्यापयेत्पापी दत्वा धेनुं तथा वृषमिति अत्रैव विस्तमाह

म० क

151

विस्रः पादव्रते वस्त्रदानं कृच्छ्रार्धे तिलकांचनम् पादहीने तु
गामेकां कृच्छ्रे गोमिथुनं स्मृतमिति अनयैव दिशा शक्त्यापेक्ष
या दक्षिणाधिक्यं कल्प्यं यत्तु वचनं विद्योपपन्नेभ्यः किं
चिद्दत्वा व्रतं चरेदिति तत्कौणिकविषयं यत्र च पर्षद्दये दक्षि
णात्वेन धेनुवृषभयोरन्यतरदुभयं वा दीयते तत्र धेनुमूल्यं
निष्को वा दातव्यो न प्रत्यक्षं गौर्वृषो वा यथाहांगिराः बहुभ्यो न
प्रदेयानि गोर्गृहं शयनं स्त्रियः विभक्तदक्षिणा हि ता दातारं
तारयंति हि एका चैकस्य दातव्या न बहुभ्यः कथंचन सा हि
विक्रयमापन्ना दहत्यासप्तमं कुलमिति एवं ह्यनेकप्रकारेण
शुद्धेवाससः पर्षदं प्रदक्षिणीकृत्य पर्षद्दक्षिणां दत्वा पापं सर्ववि
ख्यापयमानस्तु शल्यहीनेन मुक्ता पर्षदग्रे नसंनीतिष्ठेत् ततो प्रल
णालस्तु तस्यार्थं परस्परं प्रायश्चित्तस्वरूपं चिंतयेयुः तथा चांगिराः
तेषां निवेदितं कार्यं तस्यार्थो हितकार्यवान् धर्मशास्त्रेषु यत्नो
को.... सानुग्रहं भवेत् विमृश्य पर्षत्तत्सर्वं प्रायश्चित्तं प्रकल्प
येत् यथाकालं यथादेशं यश्च कार्यांतरं हृदु माता पितृ सुश्रू
षाभिश्च यस्य प्राणान्न पीडयेत् यत्र प्राणपीडाकरमरणांतिक
प्रायश्चित्तव्यतिरेकेण शास्त्रोपदिष्टं प्रायश्चित्तांतरमपि चास्ति
तत्र प्राणबाधाकरं न देयमित्यर्थः वृद्धशातातपः यद्विना धर्म
शास्त्रेण प्रायश्चित्तं विधीयते तेन शुद्धिमवाप्नोति प्रायश्चित्ते कृ
तेपि सः अदृष्ट्वा धर्मशास्त्राणि प्रायश्चित्तं वदंति ये प्रायश्चित्ती

मेवस्तेनतत्पापंपर्षदंव्रजेत् देवलः एकोनार्हतितत्कर्तुमन्न
चानोप्यनुग्रहम् धर्मज्ञायदिवालोभाद्भयादज्ञानतोपिवा कु
र्वंत्यनुग्रहंयेनतत्पापंतेषुगच्छति अंगिराः आर्तानांचैवपापा
नांप्रायश्चित्तानियेद्विजाः जानंतोनप्रयच्छंतितेतेषांसमभा
गिनः तस्माद्दानंसमासाद्यब्राह्मणांश्चविशेषतः यावद्भिर्धर्मपं
थानंनभाव्यंतुपराङ्मुखैः अनर्चितैरनाहूतैरदृष्टैश्चैवसंसदि
प्रायश्चित्तंनदातव्यंजानद्भिरपिकल्पिताः एवंधर्मशास्त्रानुसा
रेणप्रायश्चित्तमपसार्यप्रायश्चित्तस्वरूपंनिरूप्यतेनएकेन
तत्प्रायश्चित्तस्वरूपमनुवादयेत् तत्रायंप्रयोगः पर्षदुपदिष्टे
नामुकप्रायश्चित्तेनाचीर्णेनसांगोपांगेनामुकपापादिमुक्तोभ
विष्यसि तस्मात्सांगोपांगंकर्तव्यमितिएवं॰ यतिशिष्टसमा
चारादियंचप्रयोगवाक्यांतरप्रदर्शनार्थात्तस्माद्विनयथोचितं
तत्र तथाप्रयोक्तव्याः अंगिराः सर्वेषांनिश्चितंयत्तुयत्तुप्राणा
त्रपीनयेत् आहूयश्रावयेदेकःपर्षदायोनियोजितः श्रुणुभो
स्त्वमिदंविप्रैर्यत्तदादिश्यतेचतन्म् तत्तेयत्नेनकर्तव्यमन्यथात
द्भुयाभवेत् यदातथाभवेच्चीर्णव्रतंशुद्धिकरंमहत् तदाकुर्या
न्मयत्नेनशास्त्राविप्राभिसर्जनम् पर्षदायोनियोजितस्तयनेना
नुवादकस्यभृतित्वेनदाक्षिणागम्यते तथाहिनियुक्तोहिकर्म
करोभवति सचभृतिमपेक्षते किंच पापानुवादोपि पापायै
वेतिदृष्टलोभाभावेनकोपिप्रवर्तते तस्मात्पापानुसारेणानुवा

म·
क

152

दकस्यप्रतिपादयितॄणादेयावर्णक्रमेणचात्रवाकविशेषोऽपि
रसैवदर्शितः ब्राह्मणोब्राह्मणानांनक्षत्रियाणांगुरोर्हितः वै
श्यानांयाजकश्चैवप्रायश्चित्तंसमादिशेत् अब्रवगुरुः क्षत्रिया
णांचवैश्यानांशूद्राणांवापियाजकः प्रायश्चित्तंसमादिश्यत
मकृच्छ्रंसमाचरेत् तत्रैवब्राह्मणस्यापिक्षत्रियादेर्वेदाभिवः
श्रंतराब्रह्मणांकृताप्रायश्चित्तंसमादिशेत् तथाकृच्छ्रंसमास्ता
यत्तदाधर्मपूरःसरम् प्रायश्चित्तंप्रदातव्यंवेदमंत्रविवर्जितं
समेतः अथवारागद्वेषादलभ्यमानेषु प्रायश्चित्तेषुयज्ञरव
नाध्ययनब्रह्मचर्यपरोभैक्ष्याशीदंडीमेखलीस्वयमेवसंवत्सरे
णमहापातकानितत्परोव्यपोहति किल्बिषंनब्राह्मणस्यतप
नमिच्छंत्याचार्याः अस्यार्थः किल्बिषंनब्राह्मणस्यपतनमिच्छं
त्याचार्याः अस्यार्थः रागादिवशात्पर्षदः सकाशादलभमानो
ब्राह्मणश्चेत्स्वयंप्रायश्चित्तस्वरूपंजानीयात् तदाब्राह्मणगुरो
मंतरेणापियस्यपापस्ययावत्प्रायश्चित्तंतावत्समाचरेत् कथं
चेदित्याकांक्षायामाह यज्ञरवनेति तथाकालमपिनिर्दिशति
संवत्सरेणेति एतच्चोपलक्षणमतश्चयत्रयावत्कालउपयुक्तो
यावतीचेति कर्तव्यतोपयुक्तातावन्मात्रंग्राह्यंपर्षदनुपदिष्ट
प्रायश्चित्तस्यानाचरणेहेतुमाह नब्राह्मणस्यपतनमिच्छंत्या
चार्याः अन्यत्रब्राह्मणग्रहणान्नक्षत्रियादेः पर्षदनुपदिष्टप्राय
श्चित्ताचरणाधिकारः एवंपूर्वोक्तप्रकारेणपर्षदनुपस्थाय

पर्षदुपदिष्टं व्रतं मनसि निधाय यदिनां ते प्रायश्चित्तोपक्रमं कुर्वीत
न यथादिनान्तेन वरोमादीनि वापयित्वा स्नानं विधाय प्रायश्चि
त्तोपक्रमं कुर्वीत न यथादिनान्तेन वरोमादीनि वापयित्वा स्ना
नं विधाय प्रायश्चित्तसंकल्पं कृत्वा प्रायश्चित्तांगानि करिष्ये इत्यभि
लषितं ततो द्वादशांगुलप्रमाणेन निषिद्धेन क्षीरवृक्षोद्भवेन कं
टकवृक्षोद्भवेन वा काष्ठेन दंतान्विसंशोध्याचम्य भस्मगोमय
मृद्वारिपंचगव्यकुशोदकैर्दशभिर्वक्ष्यमाणप्रकारेण दश
स्नानानि कृत्वा वासः परिधायाचम्य वैस्नवं श्राद्धं विधायादिगो
दानं निर्वर्त्यानन्तरमाज्येनाष्टोत्तरशतं विंशतिरष्टोत्तरशतं वा व्या
हृतिभिर्हुत्वाथ वक्ष्यमाणलक्षणं पंचगव्यं पृथक्पृथगानी
य गायत्र्यादिमंत्रैर्वा प्रणवेन वा तानि मेलयित्वा समालोड्य प्र
णवेनैव निर्मथ्य प्रणवेनैवोद्धृत्य प्रणवेनैव पिबेत् आलोड
नं शोधनं तत्र हस्तेन निर्मथनं काष्ठेन पानं पलाशमध्यदले
न पद्मपत्रेण स्वर्णपात्रेण वा ताम्रपात्रेण वा ब्राह्मणतीर्थेन वा
भवति एवमुपक्रांतं व्रतं समाप्य व्रतांते गोहिरण्यादिदक्षिणां
दद्यात् अथात्र मंत्रसहितः प्रयोगः प्रदर्श्यते सचैलं स्नात्वा
क्लिन्नवासाः पर्षदं प्रदक्षिणीकृत्य पर्षदादिदक्षिणां दत्वा नत्वा
पापं सर्वं विख्याप्य तदुपदिष्टं व्रतं मनसि निधाय यदिनां तेन वे
रोमादीन् प्रवाप्य स्नात्वा प्रायश्चित्तसंकल्पं कृत्वा तत्र प्रायश्चित्तांगा
नि करिष्ये इत्यभिलष्य शास्त्रविहितं द्वादशांगुलपरिमाणं दं

म॰ क॰

153

तकाष्ठं गृहीत्वा शर्वाभिमुखः संमंत्रं पठेत् तत्र मंत्रः आयुर्ब
लं यशो वर्चः प्रजापशुवसूनि च ब्रह्मप्रज्ञां च मेधां च त्वं नो दे
हि वनस्पते इत्यनेन मंत्रेण काष्ठस्याग्रभागं किंचिद्दन्तैः खादित्वा ते
नैव प्रदेशेन दंतान्संशोध्य तावन्मात्रेण काष्ठेन तरेण जिह्वा
मुल्लिख्य प्रक्षाल्य काष्ठद्वयं किंचिद्दूरं कृत्वा विसृज्याचम्य भ
स्मादिभिः स्नायीत स्नानप्रकारस्तु तत्र लीभस्मना मलकायव
यवानद्गुलिप्योदकस्नायी अत्र तदेवमेव गोमयेनानुलिप्य
पुनरुदके नैवं भस्मादिभिरुदकस्पर्शितैः स्नात्वा पश्चात्केव
लेनोदकेन स्नानं ततो गोशृंगे स्नात्वा गोमयेनानंतरं क्षीरेण
पश्चाद्दध्याज्याभ्यां हुतेन तदनंतरं कुशांतरितेनोदकेनेति दशस्ना
नानि मंत्रवर्जं कुर्वीत मलापकरणं स्नानं वा स्पर्शो चोपसिद्ध
ये इति विस्पष्ट मलस्नानत्वेन निर्देशात् अथवा वा स्पर्शो चो
पसिद्धय इत्युक्तत्वात् गृहेष्वदृष्टरूपत्वेनाभिलषितत्वात्
मंत्रपाठेनादृष्टोत्पत्तेः समंत्रकमेव स्नानं भस्माद्यनुलेपनानि
दृष्टादृष्टप्रयोजनस्य उपस्नतेः तथा मंत्रेऽधिकारभावश्च लिंगे ईशानेन
शिरोदेशं मुखं तत्पुरुषेण हृदोदेशमघोरेण गुह्यं वामेन
सद्यत मध्येन पादौ सर्वांगं प्रणवेन तु शोधयेदिति अथ क्रमे
ण मंत्राः तत्र भस्मस्नानमंत्राः ईशानाय नम इति शिरसि तत्पु
रुषाय नमः इति शिरसि तत्पुरुषाय नमः इति शिरसि अघो
राय नमः हृदि वामदेवाय नमो गुह्ये सद्योजाताय नमः पा

दयोः प्रणवेन सर्वांगेषु अयमेकः प्रकारः प्रकारांतरं तु ई
शानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणो
धिपतिर्ब्रह्मा शिवो मेस्तु सदाशिव इति शिरसि तत्पुरुषाय
विद्महे इत्यादि मुखे अघोरेभ्योथ घोरेभ्यो घोरघोरतरेभ्यश्च
सर्वतः सर्व सर्वेभ्यो नमस्ते रुद्ररूपेभ्य इति हृदये वामदेवा
य नमो ज्येष्ठाय नमः श्रेष्ठाय नमः रुद्राय नमः कालाय नमः
कलविकरणाय नमः बलाय नमः बलप्रमथनाय नमः
सर्वभूतदमनाय नमः मनोन्मनाय नमः इति गुह्ये सद्यो
जातं प्रपद्यामि सद्योजाताय वै नमः भवे भवे नातिभवे भज
स्व मां भवोद्भवाय नम इति पादयोः प्रणवेन सर्वांगे अथवा
ग्निरिति भस्म जलमिति भस्म स्थलमिति भस्म सर्वं ह वा इदं
भस्मेत्येते मंत्रा आम्नाताः इति भस्मस्नाने मंत्रांतराणि भस्मस्ना
नानंतरं गोमयेन स्नायात् तत्र मंत्रः मा नस्तोके तनये मा
न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः वीरान्मा नो रुद्र भा
मितो वधीर्हविष्मंतो नमसा विधेम ते अथवा गंधमाल्यां
दुराधर्षां नित्यपुष्टां करीषिणीम् ईश्वरीं सर्वभूतानां ता
मिहोपह्वये श्रियम् अपि वा अग्रमग्रं चरंतीनामोषधीनां
रसं वने तासामृषभपत्नीनां पवित्रं कायशोधनम् तन्मे
रोगांश्च शोकांश्च पापं च हर गोमय सर्वदेति गोमयस्नाने
वैकल्पिका मंत्राः अथ मृदा स्नाने मंत्राः अश्वक्रांते रथक्रां

म॰ तेविष्णुक्रांतेवसुन्धरे उद्धृताशिरसाधारयिष्यामिरक्षमांत्वंपदे
क॰ भूमिधरणीलोकधारिणी उद्धृतासिवराहेणकृष्णेनशतबाहु
ना मृत्तिकेहरमेपापंयन्मयादुष्कृतंकृतम् मृत्तिकेब्रह्मदत्ता
सिकश्यपेनाभिमंत्रिता मृत्तिकेदेहिमेपुष्टिंत्वयिसर्वंप्रतिष्ठि
तम् मृत्तिकेप्रतितिष्ठन्तेसर्वंतन्मेनिवृद्धमृत्तिके त्वयाहतेनपा
पेनब्रह्मलोकंव्रजाम्यहम् इतिमृत्तिकास्नानमंत्रः अथकेव
लोदकस्नानम् तत्रमंत्रः ॐआपोहिष्ठामयोभुवस्तानऊर्जेद
धातन महेरणायचक्षसेयोवःशिवतमोरसः तस्यभाजयते
हनः उशतीरिवमातरः तस्मादरंगमामवोयस्यक्षयायजिन्वथ
आपोजनयथाचन अथवा इदमापःप्रवहतयत्किंचिद्दुरितंम
यि यद्वाहमभिदुद्रोहयद्वाशेपउतानृतम् इतिकेवलोदक
स्नानमंत्राः अथपंचगव्यस्नानानि गोमूत्रगोमयक्षीरदधिघृ
तानांक्रमेणमरीचिनादेवतादर्शिता देवताःसंप्रवक्ष्यामिगो
मूत्रेणायस्यया वरुणोदेवता मूत्रेगोमयेहव्यवाहनः सोमः
क्षीरेदधिवायुर्घृतेरविस्तुदाहृतइति अतस्तत्तद्देवताप्रकाश
कामंत्राःप्रदर्श्यंते तत्रगोमूत्रस्नानमंत्राः ध्रुवासुत्वासुक्षितिषु
क्षियंतोव्यस्मत्पाशंवरुणोमुमोचनम् अवोवन्वानाअदिते
रुपस्थाद्यूयंपातस्वस्तिभिःसदानः उपलक्षणमेतत् तस्माद्व
रुणप्रकाशकाःश्रौताःस्मार्तावामंत्राग्राह्याः एवंसर्वत्रापि अ
थगोमयस्नानमंत्राः पाहिनोअग्नएकयापाह्युतद्वितीययापा

हिंगीरसि हरमिव्रण्णं पवंपाहिचतस्रमिर्वसो अथक्षीरस्नानमं
त्रः अरुण्याणोरश्मिशस्ते स्तोमनियानेहस्मः शुक्रो स्रशेवपथिनः
अथदधिस्नानमंत्रः आत्मादेवानांभुवनस्यगर्भोयथावशंचरं
तिदेवएषः घोषइत्यस्यशृण्विरेनरूपंतस्मैवातायहविषाविधे
म अथघृतस्नानमंत्रः क्रसमिधानंहरयःसुपर्णा अपोवसा
नेदिवमुत्पतंतितआववृत्रन्सदनावृतस्यादिद्घृतेनपृथिवीव्यु
दते अथवा पराशरोक्तमंत्राणाहः गायत्र्यादायसूत्रंगंधद्वा
रेतिगोमयं आप्यायस्वेतिचक्षीरंदधिक्राव्णाणस्येतिदधि तेजो
सिशुक्रमित्याज्यंदेवस्यत्वाकुशोदकमिति तत्रगायत्रीप्रसिद्धा
गन्धद्वारेत्ययंमंत्रःश्राकदर्शितः आप्यायस्वसमेतुतेविश्वतःसो
मवृष्ण्यम् भवावाजस्यसंगथे दधिक्राव्णोअकारिषंजिष्णोरश्व
स्यवाजिनःसुरभिनोमुखाकरत्प्राणआयूंषितारिषत् शुक्र
मसिज्योतिरसितेजोस्यदेवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यां
पूष्णोहस्ताभ्यामन्नाभिषिंचामीतिवाक्यविशेषःपुराणीयःएवंद
शस्नानानिकृत्वावासःपरिधायआचम्य वैसवंश्राइंकुर्वीत
ततपश्चा विसृद्देशेनविभ्योधिकान्युग्मन्त्राह्मणान्भोजयेत्
भोजनासंभवेभोजनपर्याप्तमापन्नंहिरण्यंवादद्यात् एवंवैस
वंश्राद्धंनिधायादिगोदानमाचरेत् गोदानमंत्रः गवामंगेषुति
ष्ठंतिभुवनानितुसर्वशः यस्मात्तस्माच्छिवंमेस्यादिहलोकेपर
त्रचेति गोदानानंतरं आज्येनाग्नौव्याहृतिभिरष्टाविंशतिरष्टो

म· क·

155

मरशान्ते हुत्वा पंचगव्यं जुहुयात् तत्र पंचगव्यहोमप्रकारः ता
म्रवर्णाया गोर्मूत्रं श्वेतवर्णायास्तु गोमयम् कांचनवर्णायाः पयः
नीलवर्णाया दधि कृष्णवर्णायाश्च घृतम् अथवा सर्वं पंचगव्यं
कापिलं वा असंभवे यथालाभोपपन्नं वा श्यथकरथकृसंपाद्य
पलपरिमितं वा माषाष्टकं वा अंगुष्ठार्धपरिमितं गोमयद्विगुण
परिमाणं वा गोमूत्रं पलाशमध्यमपत्रनिर्मितं वा पद्मपत्रविरचि
तेवा स्वर्णमये वा पात्रे ताम्रमये वा पात्रे निक्षिपेत् गायत्र्याप्र
णवेन वा तदनंतरं अंगुष्ठार्धपरिमितं वा षोडशमाषपरिमितं
वा षोडशमाषपरिमितं गोमयं गन्धद्वारामित्यनयर्चा प्रणवेन वा
निक्षिपेद्यस्मिन्पात्रे गोमूत्रं निहितं तत्रैव ततस्सप्तपलपरिमि
तं वा द्वादशमाषपरिमितं वा अंगुष्ठपरिमाणं गोमयाष्टगु
णं वा क्षीरमाप्यायस्वेत्यनया प्रणवेन वा शर्वं द्रव्यद्वयं यत्र निक्षि
प्तं तत्रैव निक्षिपेत् अथवा सप्तपलं वा दशपलं वांगुष्ठपरिमित
गोमयापेक्षया पंचगुणं वा दधिक्राव्ण इत्यनयर्चा प्रणवेन श
र्वीकपात्रे निक्षिपेत् ततस्त्वेकपलं वा माषाष्टकमितं वांगुष्ठा
र्धपरिमितं गोमयापेक्षया चतुर्गुणं वा घृतं तेजोसीत्यनेन यजु
षा प्रणवेन वा शर्वीकपात्रएव निक्षिपेत् तदनंतरं चैकपलं वा
माषचतुष्टयपरिमितं वा कुशोदकं देवस्यत्वेत्यनेन यजुषा प्रण
वेन वा शर्वीदिनपात्रे स्थापयेत् प्रणवः प्रसिद्धः गायत्र्यादयो
मंत्राः आसिन्नेव प्रकरणे पंचगव्यस्नान प्रस्तावे प्राक्प्रदर्शि

ताः एवं गोमूत्रादीन्येकपात्रे कृत्वा प्रणवेन समुद्धार्य हस्तेन स
मालोड्य पुनः प्रणवमुच्चार्य यज्ञियकाष्ठेन निर्मथ्य प्रणवेनै
वाभिमंत्र्य सप्तमंत्रैर्हरितकुशैः पंचगव्यमुद्धृत्य इरावत्यादि
भिर्मंत्रैर्दशाहुतीर्जुहुयात् अत्र स्रुवस्थाने हरितःकुशा एव
मंत्रास्तु इरावती धेनुमती हि भूतं स्वयवसिनी मनुष्येभ्यो दश
स्यां व्यस्कभ्ना रोदसी विष्णवे ते दाधर्थ पृथिवीमभितो मयूखैः इदं विष्णु
र्विचक्रमे त्रेधा निदधे पदम् समूढमस्य पांसुरे मानस्तोके त
नये मान आयुषि मानो गोषु मानो अश्वेषु रीरिषः वीरान्मा
नो रुद्र भामितो वधीर्हविष्मंतो नमसा विधेम ते शन्न इंद्राग्नी
भवतामवोभिः शन्न इंद्रावरुणा रातहव्या शमिंद्रासोमा सु
विताय शंयोः शन्न इंद्रापूषणा वाजसातौ अग्नये स्वाहा सोमाय
स्वाहा गायत्रीप्रणवः ॐ भूर्भुवः स्वः स्वाहा अग्नये स्विष्टकृते
स्वाहा इति दशाहुतीर्हुत्वा व्रतग्रहणं करिष्ये इति ब्राह्मणा
नुज्ञां कुर्यादिति तैरनुज्ञातो हुतशेषं पंचगव्यं प्रणवेन पिबेत्
एतत्प्राशनादहिंसायां न तत्र दर्शने कर्तव्यं हुताशिष्टं सर्वं पि
बेन्मोच्छेषणीयम् अनेनैव बालवृद्धादिशक्त्यपेक्षया गो
मूत्रादीनि सर्वाणि वैकल्पिकपरिमाणापेक्षया मीलनीयानि
एवं व्रतग्रहणं कृत्वा ततः परं मौनी भूत्वा मनोऽस्तु तं मनसा चिं
तयन्निशामतिवाहयेत् एवमुपक्रांतं व्रतं सम्यक्पारं नीत्वा
नन्तु उदीच्यांगानि तत्रायं क्रमः प्रायश्चित्तस्य समापनार्थमुदी

म· क

यंगानिकरिष्य इति संकल्प्याग्नौ व्याहृतिभिराज्यं पूर्ववद्धु
त्वा पूर्ववद्देववैश्वदेवं श्राद्धं विधायान्ते गोदानमाचरेत् प्राच्यां
गकरणवेलायां वैश्वदेवश्राद्धगोदानानन्तरं होमः विधाय वै
श्वदेवश्राद्धं श्राद्धानन्तरं गोदानादेर्विहितत्वात् होमानन्तरमेव
शिष्टपंचगव्यपानेन व्रतस्य शरीरत्वादुदीच्यांगानुष्ठानस
मयेतु होमानन्तरं श्राद्धगोदानाद्युपक्रम्य होमस्य संनिहितत्वा
दवसानेपि सविधानस्योचितत्वात् एवमनन्तरदानानन्तर
मवशिष्टानि दशदानानि दद्यात् तानि च श्राद्धं कृत्वा व्रतां
ते च गोहिरण्यादिदानि मन्त्रादिशाह्नेनोपात्तानि दशदानस्व
रूपाणि च संग्रहकारेण प्रदर्शितानि गो भू तिल हिरण्याज्यवा
सोधान्यगुडानि च रौप्यं लवणमित्याहुर्दश दानानि पठितान्य
त्र क्रमेण दानमंत्राः गोदानमंत्रास्त्वादिगोदानसमये प्रदर्शि
ताः अथ भूदानमंत्रः सर्वभूताश्रया भूमिर्वराहेण समुद्धृता
अनंतसस्यफलदा अतः शांतिं प्रयच्छ मे तिलदानमंत्रः मह
र्षेर्गोत्रसंभूताः कश्यपस्य तिलाः स्मृताः तस्मादेषां प्रदानेन म
मपापं व्यपोहतु अथ हिरण्यदानमंत्रः हिरण्यगर्भस्त्वं हेमहे
मबीजं विभावसोः अनंतपुण्यफलदमतः शांतिं प्रयच्छ मे
अथाज्यदानमंत्रः कामधेनोः समुद्भूतं सर्वक्रतुषु संस्थितम्
देवानामाज्यमाहारमतः शांतिं प्रयच्छ मे अथ वस्त्रदानमंत्रः
शरणं सर्वलोकानां लज्जाया रक्षणं परम् सुवेशधारवस्त्र त्व

मतः शांतिं प्रयच्छ मे अथ धान्यदानमंत्रः सर्वदेवमयं धा
न्यं सर्वोत्पत्तिकरं महत् प्राणिनां जीवनोपायमतः शांतिं प्र
यच्छ मे अथ गुडदानमंत्रः यथा देवेषु विश्वात्मा प्रवरश्च ज
नार्दनः सामवेदस्तु वेदानां महादेवस्तु योगिनां प्रणवः सर्व
मंत्राणां नारीणां पार्वती यथा तथा रसानां प्रवरः सदा गुड
सो मतः मम तस्मात्परां लक्ष्मीं ददस्व गुड सर्वदा अथ रज
तदानमंत्रः प्रीतिर्यतः पितॄणां च विष्णुशंकरयोः सदा शि
वनेत्रोद्भवं रौप्यमतः शांतिं प्रयच्छ मे अथ लवणदानमं
त्रः यस्मादन्नरसाः सर्वे नोत्कृष्टा लवणं विना शंभोः प्रीतिक
रं नित्यमतः शांतिं प्रयच्छ मे दशधानमंत्रः पापानां परिपा
कस्य शांतिकर्म विवक्षया उक्तानि परिभाषायाश्च पद्धत्याम
नेकशः महार्णवाख्ये महिते प्रबन्धे मान्धातृनाम्नो मदना
त्मजस्य सत्कर्मरत्नप्रकरेण पूर्णे पूर्णस्तरंगः खलु सप्त
मोऽयम् ॥ अथ क्षयरोगहराणि तत्र क्षयरोगनिदानमा
ह याज्ञवल्क्यः ब्रह्महा क्षयरोगी स्यादिति तन्निवृत्त्यर्थं द्वा
दशवार्षिकं प्रायश्चित्तं विदध्यात् चरेद्द्वादशवर्षाणि ब्रह्म
हा निष्कृतिं परम् अत्रापि रोगादित्यशक्तः षडब्दं प्रायश्चित्तं
कुर्यात् प्रायश्चित्तार्धमर्हन्ति स्त्रियो रोगिण एव चेति रोगि
णोऽर्धप्रायश्चित्तस्य तेनैवाभिधानात् इति क्षयरोगहरं प्राय
श्चित्तम् अथ शातातपप्रोक्तं राजयक्ष्महरणम् राजहा

म० क

157

राजयक्ष्मी स्याद्देघातस्यापि निष्कृतिः गोभूहिरण्यमिष्टान्नज
लवस्त्रप्रदानतः घृतधेनुप्रदानेन तिलकुंभप्रदानतः इत्या
दिभिः क्रमेणैव क्षयरोगः प्रशाम्यति गवादीनि तिलकुंभान्ता
नि शक्तिरोगानुसारेण व्यस्तानि समस्तानि च दातव्यानि चआ
दिशब्देन ग्रहशांतिविनायकशांत्यादयो लक्ष्यंते घृतधेनुवि
धिस्तु मत्स्यपुराणे तत्र गुडधेनुविधानस्यैव घृतधेन्वादावतिदि
ष्टत्वाद्गुडधेनुविधिरुच्यते गुडधेनुविधानस्य यद्रूपं चैव यत्फ
लम् तदिदानीं प्रवक्ष्यामि सर्वपापप्रणाशनम् कृष्णाजिनं
चतुर्हस्तं प्राग्ग्रीवं विन्यसेद्भुवि गोमयेनोपलिप्तायां दर्भानास्ती
र्य यत्नतः अत्र हस्तो रविरिति दानकाण्डे यावद्भिरजिनैश्चत
र्हस्तमिता भूराच्छाद्यते तावन्त्यजिनानि ग्राह्याणीत्यर्थः प्रादे
शहस्तप्रादेशपर्यायत्वेनाजिनेनाच्छादने अथवा यामविस्ता
रो मिलिता चतुर्हस्तमितं ज्ञेयं लक्षणकाजिनं तदुक्तमस्य प
रिकल्पयेत् प्राङ्मुखीं कल्पयेद्धेनुमुदक्पादां सवत्सकाम् प्रा
ङ्मुखीं प्राक्शिरा वत्सोऽपि तत्रैव उत्तमा गुडधेनुः स्यात्सदाभा
रचतुष्टयम् वत्सं भारेण कुर्वीत भाराभ्यां मध्यमा स्मृता
अर्धभारेण वत्सः स्यात्कनिष्ठा भारकेण च चतुर्थांशेन वत्सः
स्याद्गृहवित्तानुसारतः श्लोको उत्तममध्यमादिकल्पना भवंती
त्यर्थः धेनुवत्सौ घृतास्यौ तौ सितसूक्ष्माम्बरावृतौ शुक्तिकर्णौ
विक्षुपादौ शुचिमुक्ताफलेक्षणौ अत्र मुक्ताफलपर्यायोऽशुक्ति

रपि शुक्ताशुक्तिकैर्वयाता सितसूत्रसिरालं वौ सितकम्बलक
म्बलौ कम्बलः सास्नाताम्रगण्डकण्ठौ तौ सितचामररोमकौ
गण्डकं कृतप्रदेशो गण्डस्थलं विद्रुमभ्रूयुगोपेतौ नवनीत
स्तनान्वितौ क्षौमपुच्छौ कांस्यदोहा विन्द्रनीलकतारकौ तारका
चन्द्रमध्यभागः सुवर्णशृङ्गाभरणौ रजतखुरसंयुतौ नाना
फलमयैर्दन्तैः घ्राणगन्धकरण्डकौ फलमयैर्दन्तैः संयुतावि
त्यर्थः अत्र च स्वशास्त्रानुसारेण सुवर्णशृङ्गादिकार्यं वित्तशाठ्यं
विवर्जयेदित्यस्य सर्वशेषित्वात् इत्येवं रचयित्वा ततो धूपदीपै
स्तथार्चयेत् अर्चनमन्त्रः धेनुस्त्वं पृथिवी सर्वा यस्मात्केशवसंनि
भा सर्वपापहरा नित्यमतः शान्तिं प्रयच्छ मे एवमनेन मन्त्रेण
सवत्सां धेनुं समर्च्य तां धेनुमामन्त्रयेत् तत्रामन्त्रणमन्त्रः या
लक्ष्मीः सर्वभूतानां या च देवेष्ववस्थिता धेनुरूपेण सा देवी मम
पापं व्यपोहतु देहिस्था या च रुद्राणी शंकरस्य सदा प्रिया धे
नुरूपेण सा देवी मम पापं व्यपोहतु देहिस्था या च रुद्राणी शं
करस्य सदा प्रिया धेनुरूपेण सा देवी मम शान्तिं प्रयच्छतु वि
ष्णोर्वक्षसि या लक्ष्मीः स्वाहा या च विभावसोः चन्द्रार्कशक्रशक्ति
र्या धेनुरूपास्तु सा श्रिये चतुर्मुखस्य या लक्ष्मीर्या लक्ष्मीर्धनद
स्य च या लक्ष्मीर्लोकपालानां सा धेनुर्वरदास्तु मे स्वधा त्वं पितृ
मुख्यानां स्वाहा यज्ञभुजां तथा सर्वपापहरा धेनुस्तस्माच्छां
तिं प्रयच्छ मे एवमामन्त्र्य तां धेनुं ब्राह्मणाय निवेदयेत् ब्रा

म. स्वर्णस्य वृक्षदेशे प्रति शुभस्थालिकां कुर्यात् एवं गुडधेनुविधिम
क. भिधाय तमेव विधिं घृतधेन्वादिष्वतिदिशति विधानमेतदेव
नोक्तं सर्वासामिह प्रकाशते सर्वासामन्यत्वधेनुव्यतिरिक्तानां प्रत्य
त्वधेनावपि सुवर्णशृंगतादि यथाविभवतः समानमेव यान्त
पापप्रशमनाः पठ्यंते दशधेनवः तासां स्वरूपं वक्ष्यामि नामा
नि च नराधिप प्रथमा गुडधेनुः स्याद्घृतधेनुस्तथापरा तिल
धेनुस्तृतीया स्याच्चतुर्थी जलधेनुका क्षीरधेनुः पंचमी तु मधु
धेनुस्तथापरा सप्तमी शर्कराधेनुर्दधिधेनुस्तथाष्टमी रस
धेनुश्च नवमी दशमी च स्वरूपतः स्वरूपतः प्रत्यक्षधेनुरित्य
र्थः कुंभाः स्युर्नवधेनूनामितरासां तु राशयः कुंभशब्दः कल
शपर्यायः अथवा परिमाणवचनः तच्च परिमाणं परिभाषा
यां परिमाणप्रकरणे द्रष्टव्यम् सुवर्णधेनुमप्यत्र केचिदिच्छं
ति मानवाः नवनीतेन रत्नैश्च तथान्येपि महर्षयः एतदेव वि
धानं स्यादेते चोपस्कराः स्मृताः मंत्रावाहनसंयुक्ताः सदा प
र्वणि पर्वणि यथाश्रद्धं प्रदातव्या भुक्तिमुक्तिफलप्रदाः गुड
धेन्वादयो देया उपरागादिपर्वसु इति गुडधेन्वादिविधिः क्षये
क्षयरोगनिवृत्तये शर्वीलंकां घृतधेनुं दद्यात् घृतधेनुविधाना
दन्यान्यपि बहूनि संति ग्रंथगौरवभयान्नात्र प्रदर्शितानि अत्र त
थ घृतधेन्वादिविधिषु विकल्पो वेदितव्यः इति शातातपोक्तं
राजयक्ष्महरणम् अथ क्षयरोगहरकदलीदानम् पद्मपु

158

राणे त्वयी स्यात्तेन्मारेण तन्मारणं तेन गतस्य मारणाद्
दकबन्धायनिश्चरणेन अथवा तेन हिरण्यगर्भप्रतिज्ञातः
बोधायनस्तेतन्निवर्तकं कदलीदानमाह कारयेत्कदलीं दिव्यां
पत्रैः सर्वत्र संयुताम् फलशृङ्गेन संयुक्तां सुवर्णस्य पलेन तु
यथाविभवतः कुर्याद्वस्त्रेणावेष्टसूत्रकैः ब्राह्मणान्भोजये
च्चापि भक्ष्यैर्नानाविधैः शुभैः होमं च कारयेत्तत्र सर्वबन्धाह्मणे
न च तस्मै तां कदलीं दद्याद्वस्त्रालंकारभूषिताम् अर्जिता यद
रिद्राय ह्नस्यायात्मवादिने धर्मज्ञायान्तिदान्ताय मंत्रेणानेन
तां त्वयी हिरण्यगर्भ उरुषपरावरजगन्मय रम्भादानेन देवे
श त्वयं तर्पय मे प्रभो पुण्याहवाचनं कार्यं ब्राह्मणैर्वेदपार
गैः शिष्टैरिष्टैश्च बन्धुभिः सह भोजनमाचरेत् फलशृङ्गेनेत्या
दि फलानां शृङ्गः समूहः पलेनेति पलस्वरूपं परिभाषायां प
रिमाणप्रकरणे द्रष्टव्यम् यथाविभवतो विभवानुसारेणास
मर्थश्चेत्पलादधिकेनापि कदलीं कारयेदित्यर्थः सूत्रकैः सू
त्रैरावेष्ट्य वस्त्रायावेष्टनेन कदली शर्जितोपपद्यते शजा मंत्रश्च
त्र्यम्बकं यजामहे इत्ययं होमं च कारयेत् सर्ववदिति सर्वव
ल्क्षेन मृत्युंजयमंत्रस्योपलक्षितत्वात् कदलीदानमंत्रेण
परमपुरुषस्वरूपं भावि देवतात्वेनोपादानात् तथा कर्मणोपि
मृत्युविरहार्थत्वात् त्र्यम्बकमंत्रस्य परिभाषायां कूष्माण्डहोम
प्रकरणे दर्शितः होमसंख्या चाष्टोत्तरशतं सहस्रमयुतं वा

म. क.

द्रव्यमाज्यं तिलाश्च कदलीस्नानेनतरंब्राह्मणान्भोजयित्वा
होमंकुर्यात् वचनपारंगमक्रमवाधेप्रमाणाभावात् एवंक
दलीदानान्तेकर्मनिर्वर्त्यस्वस्तिवाचनानंतरंशिष्टैस्सहभुं
जीत इतिक्षयरोगहरकदलीदानं अथराजयक्ष्महरव्याधि
प्रतिकृतिदानम् ब्रह्मपुराणे धर्मशास्त्राण्यविज्ञायप्राप्यास्मि
न्देदद्यतियः राजयक्ष्माभवेत्तस्यरोगपीडातिदारुणा एवंलोके
नविधानेनप्रदद्यात्प्रतिरूपकम् एवोक्तविधिरस्माभिःपरि
भाषायांदर्शितोव्याधिप्रतिपादनविधिप्रकरणे प्रतिमाल
क्षणंतुकर्मविपाकसारे राजयक्ष्माकृशात्तः शरच्चापासित
जीवोः ददद्विनेत्रोदंष्ट्राभ्यांदष्टोष्ठोहस्तयुग्मतः इतिराजय
क्ष्महरप्रतिकृतिदानम् अथासाध्यसर्वरोगहरव्याधिप्र
तिकृतिदानम् ब्रह्मांडपुराणे ब्रह्मोवाच स्वर्णरत्नस्नेतैर्य
थाशक्त्यातुरूपतः कृत्वाचप्रतिमांव्याधेर्दद्याद्विप्राययत्नतः
शतेनवातदर्द्धेनत्रिंशतानिष्कसंख्यया जातरूपमयंव्याधि
प्रतिरूपंतुकारयेत् विधायसर्वसंपात्रेतंडुलैःसितरूपकैः
अलंकृत्यतसोवर्णंरूपंतद्गुरुलेपनैः वासोयुगेनसंछाद्य
हिरण्यवस्त्रभूषणैः अलंकृत्यायविप्रायदद्यान्मंत्रमुदीरयन्
मंत्रमाह येमांरोगाःप्रबाधंतेदेहस्थाःसततंततः गृह्णीष्व
प्रतिरूपेणतान्रोगान्द्विजसत्तम प्रतिग्रहीतारितिकर्त
व्यतामाह वाढमित्येवतद्रूपंगृह्णीयाद्व्याधिभिःसह ततः

स रोगी दाता च दीर्घायुष्ट्वं प्रपद्यते सुवर्णरजतैरित्यादि सु
वर्णेन शरीरनिर्माणं रत्नेन च दृग्गी रजतेन त्वग्ः श्वेतगोल
कमेव यथाशक्ति प्रतिमामत्र रूपतः कुर्यादित्यर्थः निष्क
परिमाणं परिमाणप्रकरणे द्रष्टव्यं जातरूपं सुवर्णे पात्रे
कांस्यपात्रे कांस्ये च यस्मिन् वेद्यमिति कर्मविपाकसंग्रहद
र्शनात् इत्यसाध्यसर्वरोगहरव्याधिप्रकृतिदानम् अ
थ प्रकारान्तरेणासाध्यसर्वरोगहरणमखविधानेन असा
ध्यव्याधिनाग्रस्ताउग्रेणप्राणहारिणा आ नो रुद्रेण सूक्ते
न मन्त्रेचैवाग्यतः शुचिः सर्वमाज्याहुतीर्दत्वा उपस्थाय च शं
करम् हविःशेषेणवर्तेत सैकान्तरमतन्द्रितः षण्मासेय
जेन्मन्त्रतु रोगेभ्यश्च प्रमुच्यते होमकर्मण्यशक्तानां जपस्त
द्विगुणो भवेत् आ नो रुद्रेणेत्यादि आ ते पितरिति अनेन
रुद्रदेवत्येन सूक्तेन सर्वमाज्याहुतीरितिउपस्थानान्तं वर
विःशेषेणेति एकस्मिन्दिने उपवासोपरस्मिन् दिने हविःशे
षेण पारणम् अत्र हविश्चरुरपि नाज्यमेव तथात्वे रोगि
णो मासं शरीरनिर्वाहानुपपत्तेः अत एव प्रतिहोमानन्तरमा
ज्येन्हुताशे करोपस्थानं कार्यं होमश्च कार्यः स्वयमशक्तश्चेदा
चार्येण कारयेत् आचार्यस्याप्येकान्तरोपवासः सर्वंवदेव
मन्त्रं रुद्रं यजेत् आ नो पितरित्यस्य पञ्चदशर्चस्य गृत्सम
दऋषिः रुद्रो देवता त्रिष्टुप्छन्दः विहितार्थे विनियोगः

१८ मं॰ क

आतेपितर्मरुतांसुम्नमेतुमानःसूर्यस्यसंदृशोयुयोथाः
अभिनोवीरोअर्वतिक्षमेतप्रजायेमहिरुद्रप्रजाभिः १ त्वा
दत्तेभीरुद्रशंतमेभिःशतंहिमाअशीयभेषजेभिर्व्यस्म
द्द्वेषोवितरंव्यंहोव्यमीवाश्चातयस्वाविषूचीः २ श्रेष्ठोजा
तस्यरुद्रश्रियासितमस्तमस्तवासिवज्रबाहोपर्षिणःपारमं
हसःस्वस्तिविश्वाअभीतीरपसोयुयोधि ३ मत्वक्वंसया
मनसोभिर्माडुष्टुतीवृषभंमामहूते ननोवीरमर्पयभेष
जेभिर्भिषक्तंमन्वाभिषजांशृणोमि ४ हवीमभिर्हवतेयो
हविर्भिरवस्तोमेभीरुद्रंदिषीयरुद्धरसुहवोमानोअस्येब
भ्रुःसुशिप्रोरीरधन्मनाय ५ उन्मामसर्पवृषभोमरुत्वान्
त्वीयसावयसानाधमानं घृणीवच्छायामरपाअशीया
विवासेयंरुद्रस्यसुम्नम् ६ क्वस्यतेरुद्रमृळयाकुर्हस्तो
योअस्तिभेषजोजलाषः अपभर्ताअरपसोदैव्यस्याभीनुमावृषभ
चक्षमीथाः ७ प्रबभ्रवेवृषभायश्वितीचेमहोमहींसुष्टु
तीमीरयामि नमस्याकल्मलीकिनंनमोभिर्गृणीमसित्वे
षंरुद्रस्यनाम ८ स्थिरेभिरंगैःपुरुरूपउग्रोबभ्रुःशुक्रेभि
पिपिशेहिरण्यैः ईशानादस्यभुवनस्यभूरेर्नवाउयोषद्
रुद्रादसुर्यम् ९ अर्हन्बिभर्षिसायकानिधन्वार्हन्निष्कंयजतं
विश्वरूपम् अर्हन्निदंदयसेविश्वमभ्वंनवाओजीयोरुद्रत्व
दस्ति १० स्तुहिश्रुतंगर्तसदंयुवानंमृगंनभीममुपहत्नु

मुग्रं मत्लाजरित्रेरुद्रस्तवानोन्यंतेअस्मन्निवपंतुसेनाः ११
कुमारश्चित्पितरंवंदमानंप्रतिनानामरुद्रोपयंतंभूमिमीतारंस
त्पतिंगृणीषे ततस्त्वंभेषजरायस्मे १२ यावोभेषजामरुतःशु
चीयाशंतमावृणीयामयोभुयानि मनवृणीतापितानस्तं
शंचयोश्चरुद्रस्यवश्मि १३ परिणोहेतीरुद्रस्यवृज्यापरित्वेषस्यदुर्म
तिर्महीगात् अवस्थिरामघवद्भ्यस्तनुष्वमीढ्वस्तोकायतन
यायमृड पुवावभ्रोवृषभचेकितानयथादेवनहृणीषेनहंसि
वनम्रतोरुद्रेहबोधिबृहद्वदेमविदथेसुवीराः इतिप्रकारां
तरेणसर्वरोगहरणम् ॥ महार्णवाख्येमहितेप्रबंधेमान्धा
तनाश्रीमदनात्मजस्य सत्कर्मरत्नप्रकरेणसर्वैप्रर्णोष्टमो
येप्रथितस्तरंगः ॥ अथशूलरोगहराणि याज्ञवल्क्यः प्र
भहर्तामयावीस्यादामयोत्रशूलरोगस्तद्वान् धान्यंदशभ्यो
कुम्भेभ्यःहर्ताहिषत्वावर्तः इतितेनैवकनिष्ठसंज्ञाभिधानात्
कनिष्ठसाहस्रानामुपपातकसमतावगमउपपातकप्रायश्चि
त्तंत्रैमासिकंकर्तव्यम् शूलमात्रस्यरोगस्यतत्राप्यसाध्यत्वे
निदानभूतपापानामपरिकल्पितयाषाण्मासिकादिव्यापेरल्प
त्वेपिप्रायश्चित्तान्यत्वमितिकल्पनीयम् इतिशूलरोगहरप्रा
यश्चित्तम् अथशूलहराणिशूलदानम् मंडलेचचतुर्वर्गचिं
तामणौ शूलेनशूलीभवति मनुष्याणांचहिंसकः पलेनवा
तदर्धेनतदर्धेनाथवापुनः सौवर्णंराजतंवापिशूलंकुर्या

म·
क·

161

त्यथवा ततः ताम्रेण वायसा वा पित्तलादिरेणाथवाऽथ ततः र
क्तवस्त्रेण संवेष्ट्य तिलानामुपरि न्यसेत् तिलानां तु परी
माणं द्रोणं वापि तदर्धकम् तदर्धं च यथाशक्त्या पूजये
द्ब्राह्मणः शुचिः अर्घ्यादि मूलमन्त्रेण षोडशैर्वोपचारकान्
क्रियाविद्ब्राह्मणः पूजां कृत्वा होमं च कल्पयेत् मूलस्य द
शांशोपार्थैः स्थंडिले विप्रैः प्रनीयते सामिदाज्यतिलान्हुत्वा त
तः शान्तिं प्रकल्पयेत् तेनोदकेन चाभिषिंचेद्धूलिने रोगिणं
नरम् ततोऽक्षतवतं शूलं ध्यायित्वा स्वशक्तितः दद्यात्स द
क्षिणं तत्र प्राङ्मुखो वाप्युदङ्मुखः मन्त्रेणानेन परया भक्त्या
सर्वं परिस्मरन् त्वं शूलरूपेण रुद्रं त्रिपुराणां विनाशनं
दैत्यानां दानवानां च शंकरस्यायुधं तथा कुक्षिस्थमथ पार्श्व
स्थमथवा दृष्टसंभवम् शूलं विनाशय स्वं मे महादेवेन धारि
तम् ततः स्नात्वा च भुंजीत ब्राह्मणैः सह बन्धुभिः शूलं हरसा
समुत्पन्नं वदेनाम्ना नाशयेत् पलेनेत्यादि पलद्रोणयो
र्लक्षणं परिभाषायां प्रदर्शितम् पूजयेद्ब्राह्मणः शुचिरिति
ब्राह्मणः सर्वोक्तं शूलं पूजयेदित्यर्थः मूलमन्त्रेणार्घ्याद्युपचा
रान् कल्पयेदित्यन्वयः मूलमन्त्रः शिवपंचाक्षरो वा रुद्रप्रका
शको वैदिको मन्त्रो वा शिवपंचाक्षरस्य वामदेव ऋषिः पंक्ति
छन्दः शिवो देवता पूजायां विनियोगः मन्त्रस्तु नमः शिवाय
केचन प्रणवादिकं पठन्ति च वैदिकमन्त्रास्तु त्र्यंबकमित्याद

योवहवः परिभाषायां प्रदर्शिताः समिदाज्यतिलान्जुहुते
तिसमिदादिहोमेषु कर्मविपाकसंग्रहादौ मंत्रांतराणि प्र
दर्शितानि तद्यथा समिद्धोमे तावत् पुरुषएवेदमित्यस्य
मंत्रस्य नारायणऋषिः पुरुषोदेवता अनुष्टुप्छंदः समि
द्धोमेविनियोगः पुरुषएवेदंसर्वंयद्भूतंयच्चभव्यम् उता
मृतत्वस्येशानोयदन्नेनातिरोहति समिधश्चयज्ञियाआज्य
होमेत्र्यम्बकमंत्रः तिलहोमेतयमशंद्भयामहेइतिमंत्रद्व
यमपिकूष्मांडहोमप्रकरणेप्रदर्शितम् होमसंख्यात्वष्टो
त्तरशताद्ययुतांतव्याध्यादितरतमभावेनकल्पनीयाः ततः
शांतिंप्रकल्पयेदितिशांतिर्दोषशांतिः तत्रचानोभद्राइत्यार
भ्यास्वस्त्ययनीयः शन्नोवातपवनामितितैत्तिरीयाणामेतद्द्व
यमपिपरिभाषायांप्रतिपादनविधौद्रष्टव्यम् एतच्चोपल
क्षणं अतोयस्यांशाखायांयाशांतिस्तच्छाखीयैवग्राह्या एत
च्छांतिवचनेकलशंसंस्थाप्यतस्याग्रेकुर्यात् ततस्तेनोदके
नमूलिनंनरमाभिषिंचेत् कलशस्थापनप्रकारस्तनवग्रहय
ज्ञेस्मर्यादिप्रजानंतरंदर्शितः अभिषेकप्रकारोपितत्रैवदर्शि
तः सर्वंपरिस्मरेदितिएवंविधपापाचरणादयंरोगः संजात
एतन्निवृत्तये वक्ष्यमाणमूलदानमंत्रास्थितविशेषणाविशि
ष्टंमूलंचब्राह्मणायदद्यात् एतच्चसर्वमूलसाधारणम् ।
इतिमूलहरणविमूलदानम् अथारुचिमूलहरणं कर्मवि

म॰
क॰

162

पाकसंग्रहे श्रद्धाहीनोधनवान्दानेष्वरतिस्तामसदानो
वायः सोऽरुचिमान् शूलीजायेतैतद्व्रतस्यानिस्तारः चांद्राय
णंचातिकृच्छ्रंप्राजापत्यमथापरम् होमान्यापिचकुर्वीतव्या
ध्यादेरस्तुरूपकः चांद्रायणादीनिव्यस्तानिसमस्तानिवाय
थाशक्तिरोगाद्यपेक्षयायोज्यानीत्यर्थः होमस्तुशूलहरत्रि
शूलदानोक्तप्रकारेण आदिशब्देनविष्णुसहस्रनामापाज
नादीनिस्तोत्राणिगृह्यंते तानिचपरिभाषायांदर्शितानि त
थाचांद्रायणादीन्यपि इत्यरुचिशूलहरणम् अथप्रकारां
तरेणारुचिशूलहरणम् कर्मविपाकसंग्रहे साताहंतिग
वादीनिघः पुनर्जन्मनिनरःशिरोरोगीश्रोत्ररोगीशूलीवारुचि
मान्भवेत् एतन्निष्कृतयेवर्षंद्विवर्षंवात्रिवर्षकम् चरेदंतेत
दंतेचगोहिरण्यादिकंदिशेत् अत्रगोहननंयज्ञसाधनत्वादि
गुणविशिष्टगोहननं प्रायश्चित्तस्यागुरुत्वात् आदिशब्देनगो
विघातेभ्यन्तरंतेचव्याधिगुरुलघुभावेनैकवार्षिकादिप्राय
श्चित्तानियोज्यानि गोहिरण्यादिकमित्यादिशब्देनवासोवि
धीयते नरदंतेचेतिचकारेणाद्यत्रगतश्चः जपसंख्यावाश्रुतम्
ऽद्यत्रचगतश्चः परिभाषायांद्रष्टव्याः इतिप्रकारांतरेणारुचिशू
लहरणम् अथाजीर्णशूलहरणंकर्मविपाकसमुच्चये नि
दानमाह वृद्धशातातपः शूद्रस्यैवतुभक्तान्नंभक्षतस्यहि
जन्मन शूलव्याधिर्भवेन्नित्यमजीर्णेनातिपीडितः शूद्रस्यै

वामांसंततंभुक्त्वाजन्मांतरेयस्तन्निमित्तंप्रायश्चित्तमकुर्वन्मृतस्ते
यश्चाव्रतस्यद्विजस्यनित्यकर्मानुष्ठानरहितस्यवार्धुषिकस्या
न्नंभुक्त्वापूर्ववदास्ते सशूलव्याधिमान् भवेदित्यर्थः अत्रेयंनि
ष्कृतिः कुर्यादुपवासत्रयंतथा दद्यात्पलत्रयंत्रपंब्राह्मणाय
सकांचनं पलमितिपरिभाषायांमभिधाय रजतदानमंत्रोपि
तत्रैवप्रायश्चित्तोपक्रमपद्धतौ इत्यजीर्णशूलहरणम् अथ
प्लीहहरणं कर्मविपाकसंग्रहे विषस्त्वविषदाताचप्लीहवा
ञ्जायतेनरः चशाह्लाच्छूलीच एतन्निर्हरणार्थंतुप्रायश्चित्तंस
माचरेत् चांद्रायणंपराकश्चतयोर्लक्षजपएवच अपामार्जनक
स्यापिजपसाध्यात्रयंभवेत् उभयत्रचलक्षः परिभाषायांद्रष्टव्याः
जपसंख्योक्तत्रुतम् अपामार्जनस्तोत्रमपिपरिभाषायांद्रष्टव्यं
स्तोत्रजपस्तव्यापिविमोकार्थंत्रिसंध्यंचांद्रायणपराकयोर्लक्ष
णमपिपरिभाषायामेव इतिप्लीहहरणं अथजठरशूलहरणं
कर्मविपाकसमुच्चये कृताध्ययनसम्पन्नंयाचितारमकिंचनं
ब्राह्मणंदानमाहूयदानार्थंनददातियः सभवेज्जठरीशूलीत
थोन्मादीहिक्कारीचित् कृच्छ्रातिकृच्छ्रचांद्राणिसकृद्योद्रोगशां
तये तत्रचांद्रायणकृच्छ्रादीनिपरिभाषायांद्रष्टव्यानि एतानि
समस्तानिवारोगगुरुत्वभावात्तसारेणयोज्यानि इतिजठरशू
लहरणम् अथकटिशूलहरणम् कर्मविपाके गोगामीकटि
शूलीस्यात्तस्यचांद्रायणंतथा कृच्छ्रंचवातिकृच्छ्रंचजपंहोमंच

म॰
क॰

163

निर्दिशेत् गोवासः काञ्चनं दद्यात् सहिरण्यं च घृतं तथा सौरजप
उदुत्यमग्निस्त्रचः समस्तर्चः परिभाषायां दर्शिताः सहिरण्यं च
तदाने आज्यवीक्षणमंत्राः अलक्ष्मीर्यश्च दौर्भाग्यं मम गात्रेषु
वस्थितम् तत्सर्वं शमयाज्य त्वं लक्ष्मीं पुष्टिं च वर्धय इति कटि
शूलहरणम् अथ हस्तशूलहरणम् कर्मविपाके सर्वज्ञ
मतिनास्तिकात्संध्यादिरहितो द्विजः हस्तशूली भवति नि
ष्कद्वादशकं दिशेत् भोजयेद्ब्राह्मणान् शतं जापयेत् सौरं हिरण्य
दः सौरसूक्तं मंत्रं वा प्रात्सौरं वा उदयन्नद्यमित्योतनयोः सप्तरूपंति
कं च परिभाषायामुदीरितम् सौरसूक्तं च उदुत्यं जातवेदस इ
ति त्रयोदशर्चस्य सूक्तस्य कण्वः प्रस्कण्वऋषिः आद्या नवगाय
त्र्याः शिष्टाः अनुष्टुभः सूर्यो देवता जपे विनियोगः एतदपि सूक्तं
परिभाषायां वोदुत्यं हिरण्यदो भवेदिति शेषः इति हस्तशूलह
रम् अथ कर्णशूलहरं कर्मविपाके मैथुनं ब्राह्मण्या योत्र कर्ण
शूली भवेन्नरः स्याद्वैवबधिरः किंचित्कापाले सहिरण्यवान्
निष्कविंशतिकं दद्याद्ब्राह्मणाय कुटुम्बिने विश्वप्रकाशका
मंत्राञ्जपेद्रोगोपशान्तये अपामार्जनपाठेन मंत्रितं सजलं
पिबेत् भोजनं ब्राह्मणेभ्यश्च प्रदद्यात् दक्षिणां तथा मैथुनं ब्रा
ह्मण्यादित्यादि मैथुनशब्देन ब्राह्मण्या इत्यर्थः निष्कस्व
रूपं परिभाषायामभिहितं विश्वप्रकाशकमंत्राः पुरुषसूक्तं
तद्विस्तरितिकस्वं पुरुषसूक्तं परिभाषायां दर्शितम् तद्विसो

रितिऋचस्यऋषिर्मेधातिथिः विष्णुर्देवता गायत्रीछंदः ज
पेविनियोगः तद्विष्णोःपरमंपदंसदापश्यंतिसूरयः दिवीव
चक्षुराततं तद्विप्रासोविपण्यवोजागृवांसःसमिन्धतेविष्णो
र्यत्परमंपदम् अपामार्जनस्तोत्रमपिपरिभाषायामेव ज
लंपिबेदिति सरोगी पुरुषस्तस्मादिजपसंख्यावाच्यत्र
सारेणाष्टोत्तरशतायुतांता कल्प्या इतिकर्णशूलहरम्
अथनयनशूलहरम् नग्नांपरस्त्रियंदृष्ट्वासूर्यस्यास्तमयो
दये नेत्रशूलीभवेत्सोपिनेत्रैतिनत्तमनेदृशा वर्चोमेदेहि
मंत्रेणहोमःस्यादष्टचायुतम् वयःसुपर्णाइतिचनेत्रेसिंचे
च्चवारिणा अक्षीभ्यांतइतिजपेन्नेत्रशूलंप्रशाम्यति परस्त्रि
यंदृष्ट्वेतिकामतः तथासूर्यमपिवर्चोमे देहीत्यनेनवर्चो
दासीत्ययंदशाक्षरोमंत्रोऽस्यते होमकालेहोमःकर्तव्यः
अस्यमंत्रस्य प्रजापतिः परमेष्ठीवादेवता अग्निर्देवता अ
तिशक्करीछंदः अष्टचायुतमिति अष्टोत्तरमयुतं वयःसु
वर्णमित्यस्यावीचीनऋषिरिन्द्रोदेवताःत्रिष्टुप्छन्दो विहि
तार्थेविनियोगः वयःसुपर्णाउपसेदुरिन्द्रंप्रियमेधाऋष
योनाधमानाः अपध्वांतमूर्णुहितायोमविचक्षुमुग्ध्यस्मान्नि
धायेवबद्धान् अक्षीभ्यांतेनासिकाभ्यामित्येतत्सूक्तंपरिभा
षायांद्रष्टव्यम् यथाशक्तियथायोगंचजपसंख्याकल्प्या
इतिशातातपोक्तंशूलरोगहरम् शूलीपरोपतापेनजायते

म० क

164

बभ्रुधातनुः सोमदानंप्रकुर्वीततथारुद्रंजपेद्बुधः बभ्रुधात
नुः कृशशरीरइत्यर्थः व्याधितरतमभावेनात्रदानादेरभ्यासः
रुद्रलक्षणपरिभाषायांद्रष्टव्यम् इतिशातातपोक्तंशूलहरं
अथशूलरोगहरम् प्रतिकृतिदानम् प्रतिकृतिलक्षणंचक
र्मविपाकसारे अनंतेषुचरोगेषुरोगाग्निज्वलितेक्षणम् चतु
र्भुजंभावयेणशक्तिंशूलेपाशांकुशौदधत् चक्रंखड्गंगदांवज्रं
शरंखरथनुरेवच नासाग्रन्यस्ततर्जन्यांतर्जयितारिपार्श्वगान्
दंष्ट्रादष्टाधरपुटंक्रूराक्ष्याणिमदाकृतिम् उदग्रास्थिस्कंधावक्ष
हतंपार्श्वयोःकृशम् विशीर्णकेशरोमाणंप्रतिरूपंप्रकल्पये
त् एतंतस्यार्धमर्धंवाहेम्नोनिष्कानितत्त्वतः तदेवप्रतिमामानं
कर्मशांतिस्वपिस्वतः अतोप्यल्पेनथोद्यान्महादानेनराधमः
प्रतिष्ठाप्यानिवातस्यडुःखशोकावहंभवेत् येयेरोगाःप्रवर्धंते
देहस्थाःसततंनृणाम् गृहाणप्रतिरूपंत्वसहरोगेद्विजोत्तम
मंत्रेणानेनतंदद्यात्सर्वरीत्याकृतार्चनं वाढमित्येवगृह्णीया
त्तद्रूपंव्याधिभिःसह आचार्ययजमानस्तस्वपुण्याच्छुतंपदम्
अनुक्तेषुचरोगेषुचित्यादित्रयंरोगप्रतिमायाविशेषलक्षणं नाभि
हितम् तत्ररोगप्रतिमामेवकर्मशांतिस्वपिस्वत इतिएवमन्यत्रा
पिकर्मविधिंलक्षणोपेतंकुर्यादित्यर्थः यद्यप्येवंतथाप्यत्रचान्य
त्रचव्याधिरूपतालक्षणापेक्षयाशास्त्रानुसारेणचप्रतिमामानं
कल्प्यम् नत्वशक्तोविद्यातिशास्त्रम् एतच्चस्वतइतिपदात्

तथा देशकालेतथात्मानेद्रव्येद्रव्यप्रयोजनम् उपपत्ति
मवस्थांवाज्ञात्वाशौचंप्रकल्पयेदिति बौधायनवचनेशौचपद
स्योपलक्षणार्थत्वाच्चावगंतव्यम् येयेरोगाः इतिदानमंत्राः
पूर्वरीत्याकृतार्चनइति आतंकोदेवतानंतइत्यारभ्यपरिभाषायां
भवतीत्यर्थः शतंपदमितिशतंपदानीत्यर्थः समुदायापेक्ष
येकवचनम् इतिशूलहरप्रतिमादानम् महार्णवाख्येमहि
तेप्रबन्धेमान्धातृनाम्नोमदनात्मजस्य सत्कर्मरत्नप्रकरेण
शोणिप्रगीयमासीन्नवमस्तरंगः ९ अथज्वरहराणि तत्र
गार्ग्यः येनराःक्रूरकर्माणःपापाःपिशुनचेतसः तेभवेयुःस
दाशीतज्वरवंतस्तदेनसः शांतयेयुक्तसंख्याकंप्रकुर्यात्प्रयु
तंजपम् जातवेदसमंत्रेणब्राह्मणान्भोजयेत्ततः सुरामांसोप
हाराद्यैर्बलिःसर्वत्रशस्यते सहस्रकलशस्नानंशतभोजनमे
वच सदाशीतज्वरवतइत्यादिप्रातिदिनंशीतज्वरयुक्ताज्वरप्रा
दुर्भावेशीतपूर्वकज्वरेणयुक्ताइत्यर्थः जातवेदसमंत्रेणज
पंकुर्यादित्यन्वयः तत्राप्युक्तसंख्याकमित्युपलक्षणं रोगगुरु
लघुत्वभावेनजपेगुरुलघुभावःकल्प्यएव ब्राह्मणभोजने
पि एकंभोजनंब्राह्मणं जपांगमपरमभिषेकांगंसुरादिभिर्ब
लिरधिकारिभेदेन सहस्रकलशस्नानंतु नमकाद्युवाकैरीश्व
रस्यपुरुषसूक्तेनविष्णोः शीतज्वरेतथाकुर्यादभिषेकंहरेर्बु
धःइतिकर्मविपाकसंग्रहेभिधानात् नमकाद्युवाकानामरुषा

२ मं. क. 165

दीनि तथा रुद्राभिषेकप्रकारश्च परिभाषायां द्रष्टव्यः पुरुषसूक्त
स्यापि तत्रैव द्रष्टव्यम् जातवेदसे इत्यस्य मंत्रस्य कश्यप ऋषिः
जातवेदा अग्निर्देवता त्रिष्टुप्छंदः विहितार्थे विनियोगः ॐ जा
तवेदसे सुनवाम सोममरातीयतो निदहाति वेदः स नः पर्षद
तिदुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः इति शीतज्वरहरणे
प्रयोगः सन्निपातज्वरहरणम् कर्मविपाकसंग्रहे मंगलेषु च कार्येषु स
ततं कोपवान्नरः उग्रज्वराभिभूतः स्यात्तत्पापस्यापनुत्तये सह
स्रकलशस्नानं रुद्रेणेशस्य कारयेत् ब्राह्मणान्भोजयेच्छक्त्या
जपेद्वै जातवेदसम् तथा माहेश्वरे पितवेति उग्रज्वरे महेशस्य
प्रकुर्यादभिषेचनम् इति रुद्रेण शतरुद्रेण नमकानुवाके
इत्यर्थः अस्यार्षादि परिभाषायां द्रष्टव्यम् जातवेदस इत्यस्य
तु शीतज्वरे जातवेदस एव हरणं मृत्युंजयस्याप्युपलक्षणम् अ
स्यार्षादि तैत्तिरीयशाखानुसारेण परिभाषायां कूष्मांडहोम
प्रकरणेभ्यधायि अत्राश्वलायनशाखानुसारेणाभिधीयते त्र्य
म्बकं यजामह इत्यस्य मंत्रस्य वसिष्ठ ऋषिः मृत्युंजयो रुद्रो दे
वता अनुष्टुप्छंदः इत्युग्रज्वरहरम् अथ शान्तातपोक्तं विवि
धज्वरहरम् देवस्य हरणाच्चैव जायते विविधज्वरः ज्वरो महांश्च
रौद्रश्चैव रौद्रो वैष्णव एव च ज्वरे रुद्रजपं कुर्यात् महारुद्रं महाज्वरे
महारुद्रं जपेद्रौद्रे वैष्णवे तत्त्रयं जपेत् ज्वरे रुद्रजपमित्यादि
रुद्रमहारुद्रलक्षणानि रुद्रानुवाकानामार्षादि च परिभाषा

मुदीरितं महारुद्रं जपेद्वेदे रुद्रसमन्वान्यिति माहेश्वरज्वरेक
दिनतमे असाध्यज्वरे च महारुद्रं जपेत् वेसवेतद्वयं रुद्रजपं
महारुद्रजपं च अथवा तच्छेहे न तुडिस्यानि वेसवानि पुरुष
सूक्तादीनि जपेत् शतरुद्रादीनि च परिभाषायां दर्शितानि
इति शातातपोक्तं विविधज्वरहरम् अथ सर्वज्वरहरं कुंभदा
नम् पद्मपुराणे अगारवाहीज्वरो वा जायते तत्र निष्कृतिः न
वकुंभं समानीय मृण्मयं चाव्रणं दृढम् लोहितं काचरहितं
स्थापयेन्मंत्रतुलोपरि परिमानं तंदुलानां द्रोणपंचकमिष्यते
विशुद्धास्तंदुला ग्राह्याः श्वेतवस्त्रेण वेष्टयेत् मधुनाप्यथवाज्ये
न वं खंडेनाथ शुक्तेन वाः तैलेनाथांभसा वा तं पूरयेच्छक्तितो नरः
श्वेतपुष्पैरर्चयेत गन्धपुष्पैस्तथापरैः होमश्च शर्ववत्कार्यः सामि
दाज्यचरूत्कटः स्ववर्णेन यथाशक्त्या ब्राह्मणाय निवेदयेत्
तस्मै दद्यात् व्रतीब्रह्मन् शुद्धशीलाय संस्कृतम् मंत्रेणानेन विधिव
त्पूजयित्वा ज्वरी नरः महेश देवदेवेश वासुदेव परात्पर कुंभे
नानेन दत्तेन ज्वरः क्षिप्रं प्रशाम्यतु एकांतरं सन्निपातं तृतीयक
चतुर्थकौ पाक्षिकं मासिकं चापि सांवत्सरिकमेव वा नाशयेतो
ममाशिषं वासुदेवमहेश्वरौ द्रोणपंचकमित्यादि द्रोणस्वरूपं
परिमाणप्रकरणे द्रष्टव्यम् श्वेतवस्त्रेण वेष्टयेत् कुंभमित्यन्व
यः तत्कुंभं गंधपुष्पैस्तथापरैरिति परैरश्वेतै रक्तपीतादिभिरित्य
र्थः होमश्च शर्ववदिति शर्ववत्सर्वोक्तेन प्रकारेण सचप्रकारः

म· क

166

शूलहस्त्रिशूलदानेद्रष्टव्यः ऋग्गायत्रीतरः ॰ हरोमाम
हेश्वरदानेनवक्ष्यते अन्येच त्र्यम्बकमित्यादयः परिभाषादिष्वप्र
दर्शिताः वैष्णवाश्चापितद्विष्णोःपरममित्यादयोत्रैवदर्शिताः ना
रायणाश्वरमंत्रमस्तनकाध्यहरे स्वर्णेनयथाशक्तीतिस्व
र्णेनकृतंकुंभंनिवेशयेदित्यन्वयः महेशदेवदेवेत्यारभ्यश्लोक
द्वयंदानमंत्रः इतिसर्वज्वरहरकुंभदानम् अथज्वरतर्पणम्
तत्रायंक्रमः गोविंदसंज्ञकेकंचनतापसेतथाबुद्धेतापसेज्वरे
चतिलोदकेरंजलित्रयदानेनष्यकरष्यकुजापितापश्चाज्वरा
ऋस्मरेणाशेनरशतायकृतोते तर्पणंज्वरमुद्दिश्यकर्तव्यं ज्वरत
र्पणेरक्षाहतावारकषष्ठ्याणिवाद्यामाणि तत्रतिलतर्पणमं
त्रो व्योमैसरस्वतीतीरेकृतस्तगोत्रसमुद्भवः त्रिरात्रज्वरदाहेन
मृतोगोविन्दसंज्ञकः ज्वरापहनयेतस्मैदास्यामेतत्तिलोदकम्
तथा नद्यांचनर्मदातीरेश्रुबुद्धस्तापसोमृतः रात्रौज्वरविनाशाय
तस्मैदद्यांतिलोदकम् अथज्वरतर्पणमंत्राः त्रिपादस्मप्रहरण
स्त्रिशिरारक्तलोचनः समेप्रीतःसुखंदद्यात्सर्वामयपतिर्ज्वरः
इतिज्वरतर्पणम् अथज्वरप्रतिकृतिदानम् तद्लक्षणंचक
र्मविपाकसारे त्रिपादस्मप्रहरणोरक्ताक्षस्त्रिशिराज्वरः भस्मप्र
हरणोभस्माधुपत्यर्थः पूजादिविधानेतंतकोदेवताभ्रुतोपा
यादिपरिभाषायोव्याधिप्रतिमादानविधावुक्तम् इतिज्वरप्र
तिकृतिदानम् महार्णवाख्येमहतेप्रबन्धेमान्धातनाम्नोम

दनात्मजस्य स्वकर्मरत्नप्रकरेण शर्वो श्वासोयमासीद्श्वासर
रोगः १ अथ श्वासहराणि तत्र निदानम् उमामहेश्वरसंवादे
कृतघ्नो जायते मर्त्यः कफवान् श्वासकासवान् उरुज्वरी वा नि
त्यं हि पित्तरोगसमन्वितः एतन्निष्कृतिः कर्मविपाकसमुच्चये
चान्द्रायणत्रयं कुर्यात् पंचाशद्विप्रभोजनम् अग्निहूताख्यसूक्ते
न चरुणा सर्पिषाप्लुतम् अष्टाधिकं तज्जुहुयाड्डमरोगप्रशान्त
ये अन्यच्च वायुपुराणे तद्विष्णोरिति सूक्तेन जपं कुर्याद्विजोत्तमा
न् भजयेद्द्विजयेद्द्यात्तन्मना नान्यमानसः इति चान्द्रायणत्र
यं कृच्छ्रलक्षणप्रकरणेभ्यथाप्य चरुणा सर्पिषाप्लुतमिति
चरुणाप्लुते सर्पिषाप्लुतामिति प्रत्येकं सम्बध्यते अग्निहूताख्य
सूक्तं सकलं चाहोममंत्रः प्रत्यृचं वा अयं च व्यवस्थितो विकल्पः
व्याधिशान्त्यायापि वेत्सूक्तं सकलम् अल्पत्वे प्रत्यृचमिति एवं स
र्वत्र वेदितव्यं तद्विष्णोरिति सूक्तेन तद्विष्णोः परमं पदमित्येनय
र्चा प्रातर्युजा विबोधयेत्येतत्सूक्तं लक्ष्यते तदन्तर्गतत्वात्तस्याः
एकस्यास्तस्याश्चर्चः सूक्तत्वोपदेशाच्च द्यात्तन्मनाः इति दानं दद्या
दित्यर्थः तच्च देयं मधुसर्पिर्हिरण्यवासांसि तत्र मधुदानमंत्रः य
स्मात्पितॄणां त्वं प्राडुप्रीतिर्दं समतोद्भवं मध्योः तत्प्रदानेन पापाहि
मां दुःखसागरात् आज्यादिदानमंत्रास्तु प्रायश्चित्तोपक्रम एवेतो
प्रदर्शिताः अग्निर्हूतं वृणीमहे इत्यस्य सूक्तस्य द्वादशर्चस्य ऋषिः
मेधातिथिः अग्निर्देवता गायत्रीच्छन्दः विहितार्थे विनियोगः

म·
क

अग्निईळेतंब्रह्मणीमहेहोतारंविश्ववेदसम् अस्ययज्ञस्यसुक्रतुम्
अग्नेदेवाँनिहावहजज्ञानोवृक्तबर्हिषे असिहोतानईड्यः ता
उशतोविवोधययदग्नेयासिदूत्यम् देवैरासत्सिबर्हिषि ४
हुताहवनदीदिवःप्रतिष्मरिषतोदहअग्नेत्वंरक्षस्विनः ५ अग्नि
नाग्निःसमिध्यतेकविर्गृहपतिर्युवाहव्यवाड्जुह्वास्यः ६ कवि
मग्निमुपस्तुहिसत्यधर्माणमध्वरेदेवममीवचातनम् ७ यस्त्वाम
ग्नेहविष्पतिर्दूतंदेवसपर्यति तस्यस्मप्राविताभव ८ योअग्निंदे
ववीतयेहविष्माँआविवासति तस्मैपावकमृलय ९ सनः
पावकदीदिवोग्नेदेवानिहावहउपयज्ञंहविश्चनः १० सनस्तवान
आभरगायत्रेणनवीयसारयिंवीरवतीमिषं ११ अग्नेशुक्रेणशो
चिषाविश्वाभिर्देवहूतिभिःइमंस्तोमंजुषस्वनः १२ इत्यग्निईळेतंत्रि
तिसूक्तम् प्रातर्युजाविवोधयेत्येकविंशर्चस्यसूक्तस्य मेधातिथि
र्ऋषिः आदितश्चतसृणामश्विभ्यश्चतस्रस्सावित्र्याः द्वेअग्नेच्छेदपका
देवीतामेकेंद्राणीवरुणानीमायीणांद्वेद्यावापृथिव्यापकापार्थिव
देवत्याः गायत्रीच्छन्दःविहितार्थेविनियोगः प्रातर्युजाविवोधया
याश्विनावेहगच्छताम् अस्यसोमस्यपीतये १ यासुरथारथीतमो
भादेवादिविस्पृशा आश्विनाताहवामहे २ यावांकशामधुमत्याश्वि
नासूनृतावती तयायज्ञंमिमिक्षतम् ३ नहिवामस्तिदूरकेयत्रा
रथेनगच्छथः आश्विनासोमिनोगृहम् ४ हिरण्यपाणिमूतयेस
वितारमुपह्वये सचेत्तादेवतापदम् ५ अपांनपातमवसेसवि

तारमुपस्तुहि तस्य व्रतान्युश्मसि ६ विभक्तारं हवामहे वसो
श्चित्रस्य राधसः सवितारं नृचक्षसम् ७ सखाय आ निषीदत स
विता स्तोम्यो नु नः दाता राधांसि शुंभति ८ अग्ने पत्नीरिहा वह दे
वानामुशतीरुप त्वष्टारं सोमपीतये ९ आ ग्ना अग्न इहावसे होत्रां
यविष्ठ भारतीं वरूत्रीं धिषणां वह १० अभि नो देवीरवसा महः श
र्मणा नृपत्नीः अच्छिन्नपत्राः सचंताम् ११ इहेंद्राणीमुपह्वये व
रुणानीं स्वस्तये अग्नायीं सोमपीतये मही द्यौः पृथिवी च न इमं य
ज्ञं मिमिक्षतां पिपृतां नो भरीमभिः १३ तयोरिद्घृतवत्पयो वि
प्रा रिहंति धीतिभिः गंधर्वस्य ध्रुवे पदे १४ स्योना पृथिवी भवान्
क्षरा निवेशनी यच्छा नः शर्म सप्रथः १५ अतो देवा अवंतु नो यतो
विष्णुर्विचक्रमे पृथिव्याः सप्त धामभिः १६ इदं विष्णुर्विचक्रमे त्रे
धा निदधे पदम् समूढमस्य पांसुरे १७ त्रीणि पदा विचक्रमे
विष्णुर्गोपा अदाभ्याः अतो धर्माणि धारयन् १८ विष्णोः क
र्माणि पश्यत यतो व्रतानि पस्पशे इंद्रस्य युज्यः सखा १९ तद्वि
ष्णोः परमं पदं सदा पश्यंति सूरयः दिवीव चक्षुराततम् २ तद्वि
प्रासो विपण्यवो जागृवांसः समिंधते विष्णोर्यत्परमं पदम् २
इति प्रातर्व्रतादिबोधयेत्येतत्सूक्तम् इति कफज्वरसरितश्वा
सकासहरम् अथ प्रकारांतरेणाश्वासकासहरं कर्मविपाकसंग्र
हे कुरुक्षेत्रादिदेशेषु कालेषु ग्रहणादिषु महादानानिष्टक्ती
यानि विद्वान्यथवा स्वयम् अपात्रभूतो दानेभ्यो निषिद्धेभ्यश्च

म· क

168

मानवः सपापः श्वासकासैश्चकुष्ठादिस्यकमितिमित्तथा केऽन्या
दैश्चपीडितस्तत्तद्रोगस्य प्रशांतये महिषीं यमदेवत्यां दद्याद्विना
नुसारतः कारयेद्दीयते दानं तस्य मंत्रस्वाखोवहम् असमर्थो
न दोषाय भवतीह परत्र च जपेत्पौरुषं सूक्तं नाम्नां चैव सह
स्रकम् उयतचोतथाज्येन होमस्वाशोत्तरायुतम् हिरण्यरक्त
वासांसि पंचाशद्विप्रभोजनम् सहस्रकलशस्नानं प्रकुर्याद्रो
गशांतये निषिद्धानीत्यादि निषिद्धानि कालपुरुषादीनि स्वय
मपात्रभूतो वेदनित्यकर्मानुष्ठानरहितः पतितो वा अनिषिद्धा
निश्रदानादीनि वाप्यनापदि श्लीयात् निषिद्धेभ्यो दातृभ्यः
पतितादिभ्यः महिषीदानप्रकारः परिभाषायां देयवस्तुस्वरूप
निरूपणो द्रष्टव्यः महिषीदानमंत्रस्तु कालमस्तु सुवर्णांतां महि
षीमुक्तभूषणां सालंकारां प्रदास्यामि मम शांतिं प्रयच्छतु वि
ष्णुसहस्रनाम उयत्रयत्र चानोक्तव्यादि परिभाषायां द्रष्टव्यम्
होम उयमयत्र चैनैव हिरण्यरक्तवासांसि इत्यादि विशेषः सह
स्रकलशस्नानं नमकानुवाके रुद्रस्य हिरण्यदानमंत्रस्तथा
नमकानुवाकाश्च परिभाषायामेव निरूपिताः अत्रापि व्याधिगु
रुत्वलघुभावेन महिषीदानादीनि समस्तानि व्यस्तानि वा योज्या
नि इति प्रकारांतरेण श्वासकासहरम् अथ शातातपोक्तश्वा
सकासहरम् पिशुनो नरकस्यांते जायते श्वासकासवान् घृतं
तेन प्रदातव्यं सहस्रपलसंख्यया उयत्र च जपः कार्यो होमश्च

वाज्ययोरपि पलस्वर्णपंचयवत्रयन्तच्चपरिमाणयामभ्यथा
यि जपहोमयोः संख्यायोगानुसारेण कल्प्या इति शातातपो
क्तकासश्वासहरम् अथ श्वासकासहरध्वजदानम् पद्मपुराणे
श्वासकासयुतो मर्त्यो वंदीग्रहणतो भवेत् बोधायनः ध्वजंपा
शं पलैकेन कुर्याद्राजतेन वा पलार्द्धेनाथवा शुद्धस्फाटिकोप
ममादरात् रत्नैर्मरकतैः सम्यग्वद्धमंगेषु सर्वतः कुम्भं चास्था
पयेत्तत्र तिलानां द्रोणपंचकम् कुंभस्योपरि संस्थाप्य ध्वजंपा
शं च शोभनम् निष्कद्वययुतं तत्र ब्राह्मणाय निवेदयेत् वस्त्रे
ण वेष्टयेत्कुंभं गंधपुष्पाक्षतार्चितम् शुभचिह्नसमेताय श्रोत्रि
याय कुटुम्बिने वरुणस्य तथा वायोः प्रीत्यर्थं विनिवेदयेत्
नमः पाशभृते तुभ्यं नमो ध्वजकराय ते जलाधिपतये तुभ्यं वा
योः सर्वजनप्रिय युवयोः प्रीतये दत्तौ ध्वजपाशौ समर्चितौ
श्वासकासौ हरेतां मे प्रीतौ सर्वजनप्रियौ एवं कृत्वा श्वासका
सी नीरोगस्तत्क्षणाद्भवेत् रजतेन वेत्यादि रजतेन सुवर्णेन वे
त्यर्थः यद्वा रजतेन तदा शुद्धस्फाटिकोपमम् अंगेष्ववय
वेषु तत्तत्प्रदेशेषु मरकतरत्नैर्वद्धं युक्तं ध्वजं पाशं च कुर्यात्
कुम्भं च स्थापयेदित्यर्थः एवं कुम्भं स्थापयित्वा तत्र कुंभे पंच
द्रोणमितांस्तिलान् संस्थाप्य तस्य कुंभस्योपरि ध्वजं पाशं च निक्षिपेत्
कीदृशमित्यत आह निष्कद्वययुतमित्यादि निष्कद्वयं सौव
र्णं राजतं वापि निष्कद्वयं ध्वजं पाशं च कुम्भं स्थापयेदित्यर्थः

म॰ क

169

ब्राह्मणाय निवेदनं कुम्भादिपूजानंतरमेव पूजाप्रकारमाह
वरेणैवेश्येदिति अत्र कुम्भे वरुणं वा प्रतनप्रकाशकमंत्रा
भ्यामावाह्य षोडशोपचारैः पूजयित्वा ध्वजपाशौ च नाममंत्रैः
संपूज्य नमः पाशभृते तुभ्यमित्यादि मंत्रेण ध्वजपाशौ तु कल्प
लेन तथ ब्राह्मणाय दद्यात् द्रोणनिष्कयोः लक्षणं परिमाणप्रका
रणे द्रष्टव्यम् वायुवरुणमंत्रौ भुवनग्रहयज्ञप्रकरणे दर्शितौ
इति श्वासकासहरध्वजपाशदानम् अथ श्वासकासहरमूर्ति
दानम् तल्लक्षणं कर्मविपाकसारे श्वासास्त्रिबाहुः पाशात्तक
मण्डलस्तुतो ज्वलन् कासः कूर्मांगसंस्थानो दीर्घदंडधरः कृशः
केशेनानादयन् चेतो विस्मितास्तो विभीषणः श्वासास्त्रिबाहुरित्य
त्र विशेषानुपादानादतिणपार्श्वे बाहुद्वयं वामे त्वेको वा कः ए
वमन्यत्रापि विषमबाहुस्थले विज्ञेयं कूर्मांगसंस्थानः कूर्मवत्
संकुचितांगः इत्येव कर्तव्यः एतत्प्रतिमापूजाविधानं तत्प्राते
के देवते त्यारभ्य परिभाषायां व्याधिप्रतिमादानविधावुक्तम्
इति श्वासकासमूर्तिदानम् महार्णवाख्ये महति प्रबन्धे मान्धा
त्रा श्रीमदनात्मजस्य सत्कर्मरत्नप्रकरान्विते स्मिन्नेकादशो
यं प्रथितस्तरंगः ॥ अथ शोकहराणि तत्र कर्मविपाकसमु
च्चये शोकी कृच्छ्रत्रयं कुर्याद् गायत्र्याश्च युतं जपेत् तिलहोमस
हस्रं तु जपेत् सहस्रं जपं तथा तिलहोमस्तु व्याहृतिभिः गायत्री
व्याहृतित्र्यम्बकमंत्राणामयुतादि तथा कृच्छ्रलक्षणं परिभा

षायां द्रष्टव्यम् मृत्युंजयजपसंख्यापि सहस्रकम् इति कर्म
विपाकसमुच्चयोक्तं शोकापहरम् अथ च तत्समुच्चये शोकहरं
श्रद्धैमार्गे नदीतीरे छायायां पुलिने नरः शृंगं पुरीषं वल्मीके यः
प्रमुंचेज्जले पिबा स यक्ष्मव्याधिमाप्नोतीत्येवमाह सदाशिवः
छायायामिति वृक्षदेवालयच्छायायां शृंगं पुरीषग्रहणं श्री
वनादेरुपलक्षणं अश्वादिग्रहणं च पुण्यस्थानोपलक्षणा
र्थं इंद्रं व इति मंत्रं हि जपेद्दशांशमराघृतम् आपो हिष्ठेति होमः
स्याच्चरुणा सर्पिषा घृतम् इंद्रं वो विश्वतस्परीत्येषा परिभाषा
यां नवग्रहप्रकरणे लोकपालमंत्रेषु द्रष्टव्याः आपो हि ष्ठेति
त्र्यचः परिभाषायामेव रोगप्रतिमादानविधौ द्रष्टव्याः चरु
णा सर्पिषा घृतमिति चरुणा घृतेन सर्पिषा घृतमिति प्रत्येकं स
म्बध्यते व्याधितरतमभावेन होमसंख्यायां न्यूनाधिकभावः
परिकल्प्यः इति कर्मविपाकसंग्रहोक्तं शोकापहरम् अथ शो
कहरवस्त्रदानम् तत्र बौधायनः विघ्नकर्ता च भो नृणां शो
की भवति मानवः तस्य कर्मविपाकोक्तं व्याधिनाशनमुत्तमम्
दानं वस्त्राण्यशेषाणां सर्वशोकविनाशनम् हैमवस्त्रं समानी
य वस्त्रमूल्यं च यद्भवेत् मुक्ताफलानि वभीयात् हस्तप्रांते समंत
तः कुंकुमेनांकितं सम्यक्कर्पूरागुरुधूपितम् तंडुलोपरि सं
स्थाप्य तं तुलाभ्यस्वशक्तितः उपचारैः षोडशभिराचार्यं प्रपूज
येत्तदा होमं चापि प्रकुर्वीत समिदाज्यतिलैः क्रमात् उद्बुध्य

म
क

सेतिदं विस्तरंच व्याहृतिभिस्तथा मंत्रैः क्रमेणजुहुयात्स्वि
ष्टकृञ्च ततःपरम् हुत्वाहुत्वाच संपातान्पात्रे सर्वान्निवेशयेच
संख्याचाष्टोत्तरशतमष्टाविंशतिरेववा सम्पातेनांगमभ्य
ज्य सर्वमेवहि रोगिणः अद्भीर्भ्यामिति सूक्तेन यथालिंगंत
थैवच वाससामार्जनं कुर्यान्मार्जनं दर्भमुष्टिना आचार्याय
यत्नद्वस्त्रं दद्यात्तत्र सदक्षिणम् मंत्रेणानेन विधिवद्दक्षिणा
मित्रावेःशुचिः ऋषीणांप्रवरोगस्त्यो लोपामुद्रापतिःप्रभुः
होमवस्त्रप्रदानेन तुष्टो व्याधिं व्यपोहतु ब्राह्मणेभ्यस्तथा
न्येभ्यो दद्याच्छक्त्या च दक्षिणाम् ततः स्नात्वा शुचिर्भूत्वा वस्त्र
माल्योपशोभितः ब्राह्मणैर्बंधुभिःसार्धं भुंजीत सुसमाहितः
तंदुलाश्च स्वशक्तितःस्युरिति भवेतीति शेषः आचार्यं पूजयेदित्य
र्थः पूजामंत्रस्तु अगस्त्यः खनमान इत्यस्याऽगस्त्यांतेवासी ब्र
ह्मचारी ऋषिः इंद्रो देवता अथवाऽगस्त्यप्रीतये वासो दीयत
इतिवस्त्रपूजायामगस्त्यो देवता त्रिष्टुप्छंदः वासःपूजायां
विनियोगः अगस्त्यःखनमानःखनित्रैः प्रजामपत्यं बलमि
च्छमानः उभौ वर्णावृषिरुग्रः पुपोष सत्या देवेष्वाशिषो ज
गाम उद्बुध्यस्वेत्यादि उद्बुध्यस्वाग्ने इदं विष्णुः व्याहृतीनां वर्णा
दि परिभाषायां नवग्रहप्रकरणे कूष्मांडहोमप्रकरणे च द
र्शितम् तथा स्विष्टकृद्धोमस्य चरुत्वा हुत्वाच संपातानिति
यदाज्यहोमस्तदा मन्या हुतिहोमानंतरं संपातानाज्य विंदु

पात्रांते स्थापयेत् तेन संपातेनाज्यबिंदुसमुदायेन रोगिणां स
र्वं गात्रं परिमार्जयेत् केन मंत्रेणाक्षीभ्यामिति सूक्तेन पतत्सू
क्तं परिभाषायां रोगप्रतिमादानविधौ द्रष्टव्यम् गात्रपरिमा
र्जनसाधनद्रव्यमाह वाससा मार्जनं कुर्यादित्यादि अजि
नवाससा वस्त्रांतरेण वा प्रथमं वाससा परिमार्जनं पश्चाद्दर्भ
मुष्टिना तद्वस्त्रं अजितवस्त्रमाचार्याय दद्यात् आचार्यप्रतिप्रति
गृहीतुपलक्षणं तच्च दानं सदक्षिणं भवति इति शोकहरव
स्त्रदानम् अथ शोकप्रतिमादानम् तल्लक्षणं कर्मविपा
कसंग्रहे शोकः पंचकरस्त्रीस्तो दशमास्यः शरचापधृक् दधान
क्षुरिकां चैव टंकमसिं शंखकमलिसं तथा पंचकर इति दक्षिणे त्रयः
करा वामे द्वाविति पंचप्रजाविधानेन आतंको देवता तन्त्रो
त्यारभ्य परिभाषायामुक्तं व्याधिप्रतिमादानविधौ महार्णवा
द्येम हतेप्रवन्येमान्यात्तनाक्रोम दनात्मजस्य सत्कर्मरत्ना
परिमितरोगः श्रोणिभयाद्वादशपथरोगः १२ अथ पांडुरोगह
रणम् तत्र कर्मविपाकसमुच्चये देवद्विजद्रव्यहारी पांडुरो
गी भवेन्नरः कृच्छ्रातिकृच्छ्रे कुर्यात्स चांद्रायणमतंद्रितः कुर्या
त्कूष्मांडहोमं च सुवर्णं चंद्रवाससी ब्राह्मणेभ्यो यथाशक्ति पां
डुरोगस्य शांतये देवद्विजेत्यादि देवानां द्विजानां च चन्द्रं रजतं
कृच्छ्रादिकूष्मांडहोमपर्यंतानां स्वरूपाणि तथा सुवर्णादि
दानमंत्राश्च परिभाषायां निरूपिताः इति कर्मविपाकसमुच्च

म· क·

योक्तपांडुरोगप्रायश्चित्तम् अथ शिरोवेदनासहितपांडुरोग
हरं कर्मविपाकसंग्रहे अग्निष्टोमादिकर्माणि प्रकपानं समाप
येत् स पांडुरोगी भवति शिरोवेदनवांस्तथा कृच्छ्रातिकृच्छ्रं
कुर्याच्च चांद्रायणमतंद्रितः शतं च भोजयेद्विप्रानग्निष्टोमेन यथे
प्सितम् कृच्छ्रादिलक्षणानि परिभाषायामुदीरितानि इति शिरो
वेदनासहितं पांडुरोगहरम् पांडुरोगहरं चेष्टीदानम् तत्र शौ
नकः अंत्यजागमने मर्त्यः पांडुरोगी प्रजायते वक्ष्यामि तत्प्रती
कारं दानहोमादिकर्मणां पलत्रयेण कुर्वीत रजतेन वसुंधरां
तदर्धेन यथाकार्या हिमशाद्वलेन कारयेत् सपर्वतवनां कृत्वा
समुद्रपरिवेष्टिताम् नवरत्नानि निक्षिप्य श्वेतवस्त्रेण वेष्टयेत्
कांस्यपात्रे विनिक्षिप्य पलाष्टकाविनिर्मितां देवीमावाहयेत्तत्र
सर्वाधारां हरिप्रियाम् एह्येहि देवधात्रि त्वं रूपेस्मिन्समुपागाविश
सहिता पर्वतैर्द्वीपैः समुद्रैश्च मनोहरैः एवमावाह्य तां देवीं गं
धमाल्यैः समर्चयेत् उपचारैः षोडशभिराचार्यः सर्वशास्त्रवित्
होमं चापि प्रकुर्वीत समिदाज्यतिलैरपि भूमिभूत्रेति मंत्रेणास्
मिन्होमः प्रकीर्तितः तथा भूमिर्भूम्निमगान्माता मातरमित्यपि
मंत्राः प्रकीर्तितास्त्वाशौनजड्यास्तर्पिणातिलैः अग्नेरुत्तरतस्थापि कु
भं वस्त्रेण वेष्टितम् स्थापयेद्ब्राह्मणश्रेष्ठमश्वस्थानादिमृत्तिकां
प्रक्षिपेत्तु तथाशुद्धवारिणा परिपूरितम् पावमानादिभिर्मंत्रैर
भिषेकं च कारयेत् शमीवातानुवाकेन शांतिं चापि प्रकल्पयेत्

अभिषिक्तस्य चांगानि वस्त्रेण परिमार्जयेत् अतीभ्याम अनुवाकेन
यथालिंगं सदर्भकम् आचार्यायततंदद्यीदद्याद्रोगीसमाहितः
मंत्रेणानेन विधिवस्रास्नुखोयस्त्रदस्नुखेः यथायथ्वीश्वतानां वरा
हेनोद्धृता पुरा रत्नगर्भा समुद्रैकवसना सर्वशोभना दानेनाने
नस्य प्रीता पांडुरोगं व्यपोहतु पलत्रयेण कुर्वीतेत्यादि पलस्व
रूपं परिमाणं प्रकरणे द्रष्टव्यम् गंधमाल्यैः समर्चयेदित्यादि
अर्चनं तत्र भूमिश्वत्रेत्यादि मंत्रेण अस्य मंत्रस्य अत्रिऋषिः भूमिर्देव
ता उपरिष्टादभिहित भजायां होमे विनियोगः भूमिर्भूत्रायो
वीरिणां तमिलं सहिता उपस्थे देवादिते अग्निमंत्रादमंत्राया व्याद
धे समिद्धोम इत्याज्यतिलहोमयोरप्युपलक्षणम् अथ तिलहो
मे व्याहृतिभिः होमसंख्या चाष्टोत्तरशतादि सहस्रांता भूमिजा
दौ मंत्रविकल्पमाह भूमिर्भूत्रेत्यादिना अस्याप्यत्रिरेव ऋषिः
स्तुर्यो देवता अनुष्टुप्छंदः भुवि वारिणा पूरितं कुंभं स्थापयेदित्य
न्वयः कुंभस्थापनप्रकारो नक्षत्रिकाग्रहनवग्रहयज्ञप्रकरणे द्र
ष्टव्याः पूर्वमानादिभिर्मंत्रैरिति पूर्वमानमंत्राः स्वादिष्टया म
दिष्टयेत्येवमादयः पवमानः सुवर्चनः इत्यनुवाकस्य आदिश
ब्देसंक्रांतराण्यनुवाकांतराणि च नानाशाखापरिपठितान्य
भिषेके विनियुक्तानि लक्ष्यंते तानि च यथाशाखं ग्राह्याणि
स्वादिष्टयेति सूक्तमत्रैवाग्रे प्रदर्श्यते पवमानः सुवर्चन इत्यनु
वाको गणहोमप्रकरणे दर्शितः अभिषिक्तस्य चांगानीति अ

म॰ क॰

172

त्रीभ्यामितिसूक्तं रोगप्रतिमादानविधौ द्रष्टव्यं एवं इष्टग्रीदाने
कृते फलमाह अनेन विधिना दत्तं इष्टग्रीदानं प्रयत्नतः यज्जातं वै
कृतं मर्त्यैर्वेत्यजागमनेन च तत्सर्वं नाशमायाति पांडुरोगादिकं
महत् शांत्यर्थं ब्राह्मणेभ्यः सार्वं कुर्यात्पुण्याहवाचनम् एतत्पुण्या
हवाचनं इष्टग्रीदानानंतरे कर्तव्यम् अथ स्वादिष्ठया मदिष्ठयेत्येत
त्सूक्तं अस्य दशर्चस्य सूक्तस्य वैश्वामित्रो मधुच्छन्दा ऋषिः पाव
मानः सोमो देवता गायत्री छन्दः अभिषेके विनियोगः स्वादिष्ठ
या मदिष्ठया पवस्व सोम धारया इंद्राय पातवे सुतः १ रक्षोहा वि
श्वचर्षणिरभियोनिमयोहतम् द्रोणा सधस्थमासदत् २ वरि
वोधातमो भव मंहिष्ठो वृत्रहंतमः पर्षि राधो मघोनाम् ३ अभ्य
र्ष महानां देवानां वीतिमंधसः अभि वाजमुत श्रवः ४ त्वामच्छा
चरामसि तदिदर्थं दिवे दिवे इंदो त्वे न आशसः ५ पुनाति ते प
रिस्रुतं सोमो सूर्यस्य दुहिता वारेण शश्वता तनः ६ तमीमण्वी
समर्य आ गृभ्णंति योषणो दश स्वसारः पार्ये दिवे ७ तमीं हिन्वं
त्यग्रुवो धमंति बाकुरं दृतिं त्रिधातु वारणं मधु ८ अभीममघ्न्या
उत श्रीणंति धेनवः शिशुम् सोममिन्द्राय पातये ९ अस्येदिंद्रो
मदेष्वा विश्वा वृत्राणि जिघ्नते शूरो मघा च मंहति १० इति स्वादि
ष्ठेति सूक्तं इति पांडुरोगहर इष्टग्रीदानम् अथ शतातपप्रो
क्तं पांडुरोगहरम् अग्निहर्ता चैव पांडुरोगः प्रजायते कल्प
तिकापलं दद्याद्ब्राह्मणाय समृद्धये एतेन च गृहफलच्छुपसाव्याधि

तरतमभावानुसारेण योज्याः इति शातातपोक्तं पांडुरोगहरं
अथ पांडुरोगहरं प्रतिमादानम् तत्र प्रतिमालक्षणमुक्तं
श्वित्यादिनामूलरोगप्रकरणेभिहितः अत्राशिष्टविधिस्त
आतंकोदेवता तत्रेत्यारभ्य परिभाषायां रोगप्रतिमादानवि
धावुक्तः इति पांडुरोगप्रतिमादानम् महार्णवात्क्षेमरत्ने
प्रबन्धेमान्धातृनाम्नोमदनात्मजस्य स्वकर्मरत्नप्रकरेण
शुभेत्रयोदशोयं प्रथितस्तरंगः १३ अथांत्रपीडाहराणि
कर्मविपाकसमुच्चये छिन्नान्यंत्राणि जायंते वैश्यहंतुस्ततः
परम् ज्वरो शीतोष्मकौ दाहश्चापतेतान्निवृत्तये कृच्छ्रातिकृ
च्छ्रं कुर्याच्च कृच्छ्रातिकृच्छ्रस्वरूपमुक्तंचतत्रचपरिभाषा
यां द्रष्टव्याः आतेसूक्तेनेति आतेपितर्मरुतामिति सूक्तेन
एतत्सूक्तं क्षयरोगप्रकरणे द्रष्टव्यम् घृतस्याज्यं च प्रत्येकम
ष्टोत्तरशतं च जुहुयात् अत्र च सकलसूक्तमंत्रेण प्रत्यृचं म
हिषीदानमत्र लक्ष्मीसकामप्रकरणे द्रष्टव्यः महिषीप्रतिमा
यां सुवर्णपरिमाणं वित्तानुसारेण कल्प्यम् इत्यंत्रपीडाह
रप्रायश्चित्तं महिषीदानं च अथांत्रवृद्धिहरनारायणदानम्
तत्र ब्रह्मपोक्तम् यज्ञविघ्नकरो मर्त्यो जायते चांत्रवृद्धिमान्
वक्ष्यामि तत्प्रतीकारं दानहोमादिकर्मणा कुर्यात्स्वर्णमयीं
मूर्तिं शुभां नारायणस्य तु व्यावहारिकनिष्काभ्यामेकेनाथ त
दर्धतः नारायणमूर्तिलक्षणं पंचरात्रागमे नारायणे च तत्र

म॰
क॰

बीहोशंखचक्रेणतथोत्तरे दक्षिणेनगदापद्मेनीलजीमूतस
न्निभे वामेश्रीर्वल्लकीहस्तापुष्टिःपद्मकरापरा: इतिनाराय
णेदक्षिणभागेउपरिगदापद्ममधस्तात् एवंचतुर्बाहुषु
विन्यसेत् वामेनारायणस्यवामपार्श्वेवल्लकीहस्ताहस्तद्वय
मित्येव वल्लकीयुक्तालक्ष्मीःस्थापनीयाः लक्ष्मीपुष्टिप्रतिमे
अपिहोमसमये एवंविधांनारायणमूर्तिंवक्ष्यमाणप्रकारे
णपूजयेत् कथंतदित्याह मत्स्यालयंपंचगव्येनस्थापयेत्कुंकु
मोपरि श्वेतवस्त्रेणसंवेष्ट्यगंधमाल्यैःसमर्चयेत् उपचारैःषो
डशभिराचार्यैर्वेदपारगैः सर्वशास्त्रार्थतत्त्वज्ञोब्रह्मवि
द्यासुनिष्ठितः होमंचकारयेत्तत्रत्वाग्नेय्यांदिशिशास्त्रतः स
मिदाज्यतिलैश्चैवजुहुयान्मूलमंत्रतः तिलांश्चाहुतिभिर्हु
त्वासर्वरोगान्प्रमुच्यते नमोऽन्तनामसौकारंमूलमंत्रःप्रकीर्ति
तः तत्रस्थांप्रतिमांदद्यात्साङ्गुसुवर्णयत्नदक्षिणैः मंत्रेणाने
नविधिवद्भक्त्यापरमयायुतः नारायणजगन्नाथशंखचक्रग
दाधर पूर्वजन्मनियत्नादैर्विज्ञायदुष्कृतिंमम श्वेत्रकुष्ठमिमहा
रोगंदानेनानेनतोषितः चक्रहस्तगदापाणेनाशयाशुजग
त्पते एवंदत्वाततोदेवंतमाप्यब्राह्मणांस्ततः विप्राणांभोजनं
दत्वास्नात्वाभुंजीतबंधुभिः एवंकृत्वासमाप्नोतिनीरोगत्वंनरो
भुवि आरोग्यपुष्टोनित्यंतुसचिरंसुखमेधते आग्नेय्यांदिशि
इत्यादिनानारायणमूर्तिप्रदेशादाग्नेय्यांशास्त्रतइतिहस्तोक्त

173

प्रकारेणाग्निं प्रतिष्ठाप्य विधायेत्यर्थः मूलमंत्रेणाज्यसमिदाज्य
योर्होमः मूलमंत्रेण नारायणमर्चयेदित्यन्वयः विधिवत्पूर्वैवेद्य
मिति विधिवच्चरुं संपाद्य तस्माच्चरोरुद्धृत्य नैवेद्यं नारायणाय
वशिष्टेन होमं कुर्यादित्यर्थः विधिवत्संपादनेनात्मगृह्योक्त
प्रकारेण निर्वापादिविधिपूर्वकमुपस्तद्धायणे मूलमंत्रमाह न
मोनंतायेति नमस्त्वशाह्योंतेस्थितिर्यस्य नारायणऋषिः देवी
गायत्रीछंदः नारायणःपरमात्मा देवता विहितार्थे विनियो
गः होमसंख्या चाष्टोत्तरशतादिदेशकालवयःशक्त्याद्यपेक्ष
याकल्प्या व्याहृतीनामप्यादि कूष्मांडहोमप्रकरणे प्रदर्शितं
इत्यंब्रह्महांडिहरं नारायणदानम् अथांब्रह्मडिहरंमूर्तिदानम्
तल्लक्षणं कर्मविपाकसारे ब्रह्महा द्विःकृशोन्नरत्यमेधिनीमव
लोकयन् आलंबधारीसततं कपालेनापिवन्मधु आलम्बधा
रीतिआलंबशह्नेनो द्वाणमुच्यते अथ वाशिकादि अन्यक्षिति
कर्तव्यताकलापो रोगशांतिमादानविधावातं को देवता तत्रे
त्यादिना दर्शिताः इत्यंब्रह्मडिमूर्तिदानम् महार्णवाख्येमह
तेप्रबन्धेमान्धाता नाम्नो मदनात्मजस्य सत्कर्मरत्नप्रकरेणाश
वैचतुर्दशोयं प्राप्तितस्तरंगः १४ अथ ब्रणहराणि तत्रशाता
तपोक्तं मस्तकब्रणहरम् जातश्चत्मस्त्रीगमनाज्जायतेमस्त
कब्रणी आचरेत्सविशुद्ध्यर्थं प्राजापत्यचतुष्टयं अत्रैतन्माप
शुद्ध्यर्थं प्रजापत्यलक्षणं कृच्छ्रप्रकरणेभ्यधायि इति शाताता

म॰
क

१७५

पोक्तंमस्तकव्रणोहरम् अत्रव्रणमात्रमूर्त्तिदानम् नहलत्रणं
वाजुरक्षेषु रोगेष्वित्यादिनास्थलरोगप्रकरणेभिहितम् इ
जाविधानेपरिभाषायांरोगप्रतिमादानविधावातेकोदेवता
तत्रेत्यादिनानिरूपितम् इतिव्रणमूर्त्तिदानम् महार्णवाख्ये
महतिप्रबन्धेमान्धातृनाम्नोमदनात्मजस्य सत्कर्मरत्नप्रक
रणमहार्णवेपंचदशस्तरंगः १५ अथनासिकाव्रणह
रणम् शातातपः श्रोत्रियस्त्रीप्रसंगेनजायतेनासिकाव्रणी
आचरेत्तद्विशुद्ध्यर्थंप्राजापत्यचतुष्टयम् इतिनासिकाव्रण
हरणम् अथप्रकारान्तरेणनासिकाव्रणहरणम् कर्मविपा
कसंग्रहे कर्मकालेकुक्कुटंचखरादीन्वायदीक्षते सनासिका
व्रणीचस्यात्दानेनाप्यजायते उपत्रचेतच्चेनाज्यंजुहुयाद्दशतं
चरुम् श्रीसूक्तंचजपेद्दत्वाहर्वाशतनामिविश्रुताम् शिलोयांच
निवभीयाच्छिवसंकल्पमेवचताम् कर्मकालइत्यादिकर्मकाले
कुक्कुटखरमेतलादीन्युद्दिश्यवकंदृष्टापश्चात्तापयुक्तित्वेना
वमनप्राणायामादीस्तत्कर्मस्वभिहितोन्यःकरोतिसएवंवि
धव्याधिमान्भवतीत्यर्थः उपत्रचतच्चस्यार्थादिपरिभाषायां
द्रष्टव्यम् व्याधितरतमभावेनाश्रुतंतदर्थमधिकंवाहवनंक
ल्पं श्रीसूक्तजपेपिव्याख्यायपेतयासहस्रायुतंतान्यसंख्या
विधानेदर्शितम् हिरण्यवर्णामित्येतस्यपंचदशर्चस्यानन्दवि
क्लीतकर्दमश्चिक्लीतानामऋषयः श्रीर्देवताआद्यास्तिस्रोनुष्टुभः

पन्नाप्रस्तारपंक्तिः जपे विनियोगः हिरण्यवर्णां हरिणीं सुवर्ण
रजतस्रजम् चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो मम आवह १ तां म
आवह जातवेदो लक्ष्मीमनपगामिनीं यस्यां हिरण्यं विन्देयं गाम
श्वं पुरुषानहम् २ अश्वपूर्वां रथमध्यां हस्तिनादप्रमोदिनीम्
श्रियं देवीमुपह्वये श्रीर्मा देवीर्जुषताम् ३ कां सोस्मितां हिर
ण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् पद्मे स्थितां पद्मव
र्णां तामिहोपह्वये श्रियम् ४ चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रि
यं लोके देवजुष्टामुदाराम् तां पद्मनेमिं शरणं प्रपद्ये अलक्ष्मीर्मे
नश्यतां त्वां वृणोमि ५ आदित्यवर्णे तपसोधिजातो वनस्पति
स्तव वृक्षोथ बिल्वः तस्य फलानि तपसा नुदन्तु मायान्तरा या
बाह्या अलक्ष्मीः ६ उपैतु मां देवसखः कीर्तिश्च मणिना सह
प्रादुर्भूतोस्मि राष्ट्रेस्मिन् कीर्तिमृद्धिं ददातु मे ७ क्षुत्पिपासामला
ज्येष्ठामलक्ष्मीं नाशयाम्यहम् अभूतिमसमृद्धिं च सर्वां निर्णुद
मे गृहात् ८ गंधद्वारां इति ९ मनसः काममाकूतिं इति १० कर्दमेन
प्रज्ञा इति ११ आपः सृजन्तु स्निग्धानीति १२ आर्द्रां पुष्करिणीं
यष्टिमिति १३ आर्द्रां पुष्करिणीं पुष्टिमिति १४ तां म आवह इति
१५ यथास्येव सूक्तस्य फलश्रुतिः यः शुचिः प्रयतो भूत्वा जुहुया
दाज्यमन्वहम् श्रियः पंचदशर्चं च श्रीकामः सततं जपेत् पद्मा
लिनी पद्मकरे पद्माक्षि पद्मसंभवे तन्मे भजसि पद्माक्षि येन सौ
ख्यं लभाम्यहम् अश्वदायी च गोदायी धनदायी महाधने धने

१ मं क

मेज्ञवतां देवि सर्वकामार्थसिद्धये तत्पुरोक्तयन्नेथान्येहस्त
योष्ठ्रगवेतकम् प्रजानां हृद्धिं मे माता आपुष्यं तेकरोत्वमां
यनमाग्निर्यनेवायुर्यनेसूर्येयनेवस यनमिंद्रो हस्पतिर्व
रुणो यन उत्सृजेत् वेनतेयसोमं पिव सोमं पिवन हृवहा
सोमिनो मिहं ददांत सोमिनः श्रीवर्यस्वमापुष्यां सारोग्यमा
पुथाः शुभनेमहीयते यान्यं यनंवद्भुपुत्रे लाभं शतं संवत्सरं
दीर्घमायुः इति श्रीसूक्तम् इति प्रकारांतरेणनासिकाब्रण
हरणम् अथ ब्रणहरणम् शातातपोक्तं सजातिजायाग
मने जायते हृदयब्रणी तस्मात कविशुद्धर्थं प्राजापत्यं द्वयं
चरेत् सजातिजायागमनं इति जायाया अगमनमित्येकः
समासः अयमभिप्रायः ब्राह्मणादयः पुरुषायथायोगवर्णा
चतुष्टयेपि ब्राह्मणी क्षत्रियां वैश्यां शूद्रां चेति यथाणीय सजा
तीयां ब्राह्मणादिस्त्रियं पातित्यदोषाभावेपुपभोगाय्यजंति ते
सजातिजायागमनाः इति व्यपदिश्यते तदा तेषु विहिताना
चरणात् सजायागमनरूपेणाविधानकप्रयत्नेन दुरितांशर्व
मुत्पद्यते तेन च कालांतरे हृदयब्रणवंतो भवंतीति अथवा
केवलस्वजातीयामेवाभियमुद्वाह्य व्यभिचारादिभिस्तां नोप
भुंजतीतितादृशाभवंति सजातिजायागमनइत्यस्यान्योर्थः
ब्राह्मणस्य ब्राह्मणः सजातिः पर्वताक्षियादेरपिक्षत्रियादिः
तस्य या जाया सवर्णा पुरुषांतरभार्येत्यर्थः तस्या उपयोगः

स्वजातिजायागमने प्राजापत्यलक्षणं तु कृच्छ्रप्रकरणे द्रष्ट
व्यम् इति हृदयव्रणहरम् कर्मविपाकसमुच्चये जलान्मु
ह्यन्प्राप्य निमित्तेन म्रियेत यः भवेदुरसिदष्टं च व्रणं तस्यापि
निष्कृतिः सद्याङ्होमयेत्सम्यक् चाशाद्विप्रभोजनम् दक्षिणां च
यथाशक्ति मुक्तो भवति रोगतः अनधिकारिणा विहितमार्गेण
जलाधिमरणे कृत इत्यर्थः गोदानमंत्रस्तु शय्याभिनोपक्रमप
इताबुक्तः इत्युरोव्रणहरम् अथ दक्षिणांगव्रणहरम् शाता
तपोक्ते पितृस्वस्रादिगमने दक्षिणांगव्रणी भवेत् तेनापि
निष्कृतिः कार्या अजादानेन यत्नतः अजादानमंत्रस्तु नवग्रह
याज्यप्रकरणे द्रष्टव्यः इति दक्षिणांगव्रणहरम् शातातपोक्ते
मातृस्वस्रादिगमने वामांगे तु व्रणी भवेत् तेनापि निष्कृतिः का
र्या सम्यग्दासीप्रदानतः सम्यगिति शक्त्यनुसारेणालंकृत्य दद्या
दित्यर्थः अथ दासीदानमंत्र इयं दासी मया तुभ्यं श्रीवत्स प्रति
पादिता सदा कर्मकरी भोग्या यथेष्टं भद्रमस्तु ता इति वामांग
व्रणहरम् अथांगुलीव्रणहरम् शातातपे फलापहारी पुरुषो
भवेच्चैकांगुलिव्रणी नानाफलानाम युतं सदद्याद्विजसत्तमे
अथ चरणव्रणहरम् शातातपे हीनजातिस्त्रीगमनाज्जायते
चरणव्रणी तस्यात्तकाविशुद्ध्यर्थं प्राजापत्यं समाचरेत् प्राजा
पत्यलक्षणं कृच्छ्रप्रकरणेऽभ्यधायि इति चरणव्रणहरम् अथ
भगव्रणहरम् कर्मविपाकसंग्रहे मृते भर्तरि या नारी व्रत

म॰ क॰

वर्यविघातिनी साभवेद्व्रणदोषेणसंभोक्तंत्वमतेनच संभोगा
नंतरंतीव्रवेदनाप्ररुषस्यच द्यान्नीलवृषंस्त्रीवैमधुसर्पिस्ति
लानपि व्रणदोषेनेतिव्रणदोषेणयुताभवेदित्यर्थः संभोक्तं
नचत्वमतइत्यभिधानार्थयोनावेवव्रणंचशङ्कात् स्त्रीपुंसयो
रुभयोरपितीव्रवेदनाभवतिनीलवृषमितिलोहितोयस्तुवर्णे
नपुच्छेविप्रवपांडुरः श्वेतःखुरविषाणाभ्यांसनीलोवृषउच्यते
एवंलक्षणताभावेतत्वर्णेननीलोग्राह्यः वृषादानमेतत्तुनवग्र
हप्रकरणेद्रष्टव्यः इतिभगव्रणहरम् आचार्यभार्यागमनेजा
यतेचभगंदरइतिकर्मविपाकसमुच्चये भगंदरस्तुनवग्रहदानंवि
लिख्यते तद्गौतमः माणिक्यंपद्मरागंचवज्रंवैडूर्यमेवच गो
मेदंमौक्तिकंचैवपुष्पंमरकतंतथा हरितंचनवैतानिस्वर्णपात्रे
परिन्यसेत् अन्यथाराजतेपात्रेगंधाद्यैस्तुप्रपूजयेत् ततोब्राह्म
णमाहूयवेदशास्त्रार्थकोविदम् तापसंव्रतसंपन्नंपूजांतस्यप्र
कल्पयेत् कुंडिकांकुंडलंवस्त्रंउपानच्छत्रकैरपि मंत्रेणानेन
विधिवद्दद्याद्व्राह्मणपुंगवे तत्रमंत्राः आदित्यादिग्रहाः सर्वे
नवरत्नप्रदानतः विनाशयंतुमेदोषांस्त्विप्रमेवभगंदरम् इति
दानमंत्राः अनेनकर्मणान्नेयणावहिहितेसति नीरुजत्वमवा
प्नोतिक्षिप्रमेवभगंदरी इतिभगंदरहरनवग्रहदानंशातातपः
गोत्रिणः स्त्रीप्रसंगेनजायतेसौभगंदरी तेनापिनिष्कृतिःकार्या
महिषीदानेनयत्नतः इतिप्रकारांतरं अथभगंदररोगनिरदानं

नलक्षणंच कर्मविपाके भगंदरः प्रोक्तः शीर्णकेशः कृताभिबं
धनः पंगुः पाशांकुशधरः पीतासीनः कुक्कुटस्थः प्रहारयुक्तः क
र्तव्यः कुक्कुटस्थानेगंतदिदंग्रीवापक्षाङ्गोगेहकृत्वा तत्रस्थः प्रहा
रयुक्तः कर्तव्यइत्यर्थः अथवा कुक्कुटशब्देन मस्तकं लक्ष्यते
तत्रस्थः एतत्स्वरूपविधानं तत्परिभाषायां रोगप्रतिमादानवि
धावातंकोदेवतातत्रेत्यादिनाप्रदर्शितम् इति भगंधररोगप्र
तिदानम् अथ भगंदरहरम् वराहपुराणे योगृहीत्वाद्विजो
मोहाद्विप्रस्को धर्मनिश्चये भगंदरो भवेत्तस्य स्वधर्मं वदतो ध्रु
वं योगृहीत्वेतियो लोभादुत्कोचं गृहीत्वाधर्मनिश्चये विप्रस्कः
सन्नधर्मं वदति तस्याधर्मं वदतो भगंदरो भवतीत्यर्थः पद्मपु
राणे आचार्यभार्यागमने भगंदरयुतो भवेत् अत्र प्रतिक्रिया
माह वृद्धगौतमः माणिक्यं पद्मरागं च वज्रं वैडूर्यमेव च गोमे
दं च मरकतं पुष्परागं च मौक्तिकम् हरितं च नवैतानि स्वर्णपा
त्रे परिन्यसेत् अथवा राजते ताम्रे गव्याज्येन प्रपूजयेत् नव
ग्रहाणां प्रीत्यर्थं ब्राह्मणानिर्मितं पुरा गंधपुष्पादिभिर्धूपैर्नैवे
द्यैश्चाग्र्यमणिलक्षणानि कृच्छ्रप्रकरणे द्रष्टव्यानि अतेपि तेम
रुताभिर्निस्सकं साध्य सर्वरोगहरे द्रष्टव्यं सूक्तेन समर्पणहो
मः परिभाषायां द्रष्टव्यः सोमारुद्रेत्यस्य सूक्तस्य वार्हस्पत्यऋ
षिः सोमरुद्रौ देवता त्रिष्टुप्छंदः जपे विनियोगः जपसंख्या
चाष्टोत्तरसहस्रम् सोमारुद्रा धारयेथामसुर्यं प्रवामिष्टे

म· योरमथ्रवंत दमेदमेसमारत्नानमरत्ना दथानाशश्रोभूतंहि
क· पदेशंचतत्रथ २ सोमारुद्रावेहहतेविश्चीसमीवासानोग
यमाविवेश आरेवाधेथांनिर्ऋतिंपरानदेनसेरुद्रास्मैत्ता
न्यसजयेत् स्वलिंगैश्चैवमंत्रैश्चहोमःकार्यस्त्वसर्ववत् ततो
ब्राह्मणमाहूयसर्वशास्त्रार्थकोविदम् आदित्यादिग्रहाःसर्वे
नवरत्नप्रदानतः विनाशयंतमेव्याधिंप्रहृष्टाःसर्वेभगंदरम्
अनेनकर्मणाननंयथावद्विहितेनतु नरोनैरुज्यमाप्नोति
निःसंदिग्धंभगंदरी हरितेचेत्यादिहरितेहरितरत्नं अथवाना
जतइति अथवेतिपात्रविकल्पः यस्मिन्स्वर्णादिपात्रेनवरत्ना
निस्थापितानितत्पात्रंगन्धेनाज्येनाश्रयित्वादित्यादिग्रहाणां
पुरःस्थापये तान्ग्रहान्स्वलिंगैरादित्यादिप्रकाशकैर्मंत्रैःश्चर्वव
त्सजयेत् इजाप्रकारस्तुपरिभाषायामस्माभिर्दर्शितः आदित्या
दिग्रहाःसर्वइतिरत्नोपेतपात्रदानमंत्राः एवंपात्रंदत्वा पश्चा
न्नवग्रहयज्ञऋत्विग्भ्योदक्षिणांदत्वाग्रहयज्ञोक्तप्रकारेणग्रह
यज्ञशेषंसमापयेत् इतिभगंदरहरम् अथप्रकारांतरेणभ
गंदरहरम् शातातपेप्रोक्तम् स्वगोत्रस्त्रीप्रसंगेनजायतेसभ
गंदरी तेनापिनिष्कृतिःकार्यामेषीदानेनयत्नतः मेषदान
विधिरत्रैवमेहाग्निहरप्रकारेणप्रदर्शयिष्यते अयंतुविशेषः
तत्रराजतमयोमेषः अत्रप्रत्यक्षमेषीतिस्ववर्णाद्युरत्नायःस
कलोपिविधिरत्रापिज्ञायः मेषीदानमंत्रेणहोमःकार्यः तद्यथा

177

देवानांयोसुत्वंहव्यवाहनः सर्वेशजितः तस्यत्वंवाहनेशक्योदेवैः
सेंद्रैर्महर्षिभिः भगंदरः सर्वकर्मविपाकोयंतद्यन्मम तत्सर्वंना
शयाशुप्रसीदत्वंचापिप्रवर्धयेति इतिप्रकारांतरेणभगंदरहरे
अथशयब्रणहरम् कर्मविपाकसंग्रहे अतिमानादतिक्रोधा
दतिस्नेहाद्भयादपि योधर्मनिश्चयंजानन्नन्यथाकुरुतेनरः
तस्यशोणितवद्ब्रणीतच्छांतयेसततंसकृच्छ्रंप्रकुर्यात्
तिलप्रस्थप्रदोभवेत् होमश्चरुद्रसूक्ताभ्यांतुतिलैरष्टोत्तरंशतम्
सहस्रंवाव्याहृतिभिःकुर्याद्ब्राह्मणभोजनम् तप्तकृच्छ्रलक्षणं
कृच्छ्रप्रकरणेद्रष्टव्यम् प्रस्थलक्षणंपरिमाणप्रकरणे व्याधिगु
रुलघुभावेन सहस्रंशतंवाहोमः ब्राह्मणभोजनंशक्त्यनुसा
रेण इतिशयब्रणहरम् अथनाडीब्रणहरम् उमामहेश्वरसं
वादे परेषांब्रणभेदेनगुह्यघातेनचैवहि असत्यवचनाद्वेवसी
हस्तीपदवांस्तथा नाडीब्रणीचजायेततद्रोगस्यापनुत्तये
चांद्रायणंचातिकृच्छ्रंयतिचांद्रायणंचरेत् आतोरौद्रेणसूक्तेन
शतमष्टोत्तरंद्भुतिः कूष्मांडहोमःकर्तव्यःसोमारुद्रजपस्तथा
यत्किंचिचेदममिमंसम्यग्जपेद्युतसंख्यया चांद्रायणादीनिव्या
धिगुरुलघुभावेनव्यस्तानिसमस्तानियोज्यानिअश्ववस्तानिसंत
सोमारुद्राधवसेताभ्यःसेविश्वाततनुभेषजानिचत्तम् अव
स्यतंदतंयन्नोआस्तितनुवद्धंकृतमेनोअस्मते २ तिग्मायुधे
तिग्महेतीसुशेवौसोमारुद्राविरप्रमलतेनः प्रनोपंचतोवरु

म०
क

178

णस्यपाशाद्धोपायतेनः स्वमनस्यमाना सोमरुद्रेतिसूक्तमिति
यत्किंचेदमित्यस्य वसिष्ठऋषिः वरुणोदेवता जगतीछन्दः
जपेविनियोगः यत्किंचेदं वरुणदैव्यजनेभिद्रोहंमनुष्याश्चराम
सि यदिंत यत्तवधर्मायुयोपिम मानस्तस्मादेनसोदेवरीरिषः इ
तिनाडीव्रणहरम् अथगंडमालाहरम् वायुव्राणि गलगंडी
गणाद्वयेहतेभवतिमानवः दानेनतत्प्रतीकारंवक्ष्यामिश्रृण
भास्कर माणिक्यंपद्मरागंचवंद्रंमौक्तिकमेवच वैडूर्यंपुष्परा
गंचवज्रंमरकतंतथा एभिर्मालांप्रकुर्वीतसूत्रमप्यत्रराजतम्
अलाभेमौक्तिकानामन्यतमैस्तांप्रकल्पयेत् सर्वंअराजतंसूत्र
मितिवेदेप्रकल्पयेत् ताम्रपात्रेविनिक्षिप्यतिलानामुपरिन्यसे
त् तिलानांचपरीमाणंद्रोणपंचकमिष्यते यद्दानतदर्थमेवस्या
त्स्वशक्त्यावापिकारयेत् महाशांतिंतथाकुर्यात्ब्राह्मणोवेदपारगैः
महाशांतिर्नवग्रहशांतिरितिचिंतामणौ सचास्माभिः परिभाषा
यांदर्शिताः आचार्यस्तुशुचिर्दक्षः सर्वशास्त्रार्थतत्त्ववित् कृत
व्रतोपसंपन्नः सर्वप्राणिहितेरतः एवंविधंप्रजायित्वावस्त्रमाल्या
नुलेपनैः होमंतुकारयेत्तेनसोमिराज्यचरुत्कटम् आसत्येनत
थामंत्राः सोमंराजानमित्यपि मंत्रेणाभिषिक्तंदयादुल्लगंडीव
वागपतः मंत्रेणानेनविधिवत्प्राङ्मुखोयमुदङ्मुखः मालेयं
सर्वदैवत्याब्रह्मविष्णुशिवादिभिः इंद्रादिलोकपालैश्चतथान्यैस्त
र्वीमैरपि इयंमेकंठलग्नाचधारितापीतिसर्वकम् व्रणाण

यच्चदन्नेयं गलगंडं व्यपोहत ग्रहशांतिः कृता येस्तेभ्यो दद्या
द्दिवत्सणाम् पुण्याहवाचनं कृत्वा भुंजीत सह बंधुभिः होमं च
कारयेतेनेत्यादिष्वयं च होमो ग्रहयज्ञहोमः एवं नततः श्यगम्
नः अग्नएवादित्यादिप्रकाशकमंत्रोपलक्षणार्थमासत्येनमंत्र
इत्याद्युक्तं मंत्रेणास्विष्टकृतमिति स्विष्टकृतो मंत्रस्तनवग्रहय
ज्ञप्रकरणे कूष्मांडहोमप्रकरणे च द्रष्टव्यः गलगंडी वाग्यतः स
न्नवक्ष्यमाणमंत्रेणमालां दद्यादित्यन्वयः मालेयमित्यस्य गल
गंडं व्यपोहत्वित्यन्वयः इति गलगंडमालाहरम् अथ प्रकारांत
रेण गंडमालाहरम् कर्मविपाकसंग्रहे अध्यापयति शिष्यांस्तु
यः प्रतार्य गुरुस्तथा शिष्यो गुरुं वंचयित्वा योधीते तस्य तस्य च
जायते गंडमालाख्यो रोगस्तदुपशांतये तथा अमत्स्यमत्स्यपा
पीवा गंडमाली भवेन्नरः कृच्छ्रत्रयं प्रकुर्वीत चांद्रायणमथापरं
अघोरमस्त्रसहस्रं तु जपेत्कृच्छ्रैककम् सौरमंत्रं जपेन्नद्दस्ती
भ्याममितिमार्जनम् ब्राह्मणान्भोजयेच्छक्त्या ततो रोगाद्विमुच्यते
कृच्छ्रादिलक्षणं कृच्छ्रप्रकरणे निरूपितम् सौरमंत्रं जपेन्नद्दि
ति अघोरमस्त्रसहस्रमित्यर्थः स च मंत्र उग्रमंत्रं चेत्र चरुपरिभाषायां
प्रदर्शितः पुरुषसूक्तं च तत्रैव प्रदर्शितम् मार्जनं शिरःप्रभृति
पादपर्यंतं कुशैरेव मार्जनम् इति प्रकारांतरेण गंडमालाहरम्
अथ सपित्तव्रणहरम् कर्मविपाकसमुच्चये चांडालादिवचः
स एवान्यो भुंजानस्तथैव हि भुंक्ते स पाटलतनुः पित्तरोगी च जा

मं॰ यते अग्नावानपिजायेतनत्याप्स्याप्तमत्ये कृच्छ्रातिकृच्छ्रेक
क॰ वीतचांद्रायणमथापरम् यथाविभवतोदद्यातिलान्वेदविदेन
था यमसूक्तेनविप्रेंद्रसर्पिषामधुसूदनम् सहस्रंजुहुयादर्म
यमप्रीत्यर्थमेवच चांडालादिवचःश्रावंवानित्यादियोभोजनका
लेऽप्यसकृत्कामतश्चांडालादिवचःश्रुत्वापिभोजनंनपरित्यज
ति अथतत्प्रायश्चित्तंनकरोत्यपितस्यजन्मांतरेपादलतन्त्वा
दिरोगोभवेत् कृच्छ्रादिलक्षणानिकृच्छ्रप्रकरणेद्रष्टव्यानियम
सूक्तेनेतियमसूक्तमग्रेवाग्रेप्रदर्श्यते यमसूक्तेनप्रत्यृचंमधु
सूदनमुद्दिश्यापिसर्पिषासहस्रसर्पिषासहस्रमेवजुहुयात् त
थायममुद्दिश्यापिसर्पिषानेनचसहस्रंसहस्रंजुहुयात् सह
स्रमित्याद्यादिकंसहस्रंसूक्तस्य त्रिषष्टिवाराहत्येयंसंख्याजाय
तेपरीयिवांसंप्रवतोमहीरन्वितिषोडशर्चस्ययमसूक्तस्ययमऋ
षिः मधुसूदनमुद्दिश्यहोमपक्षेयमशब्दोपेतोमधुसूदनोदे
वतायमोद्देशेनहोमेनमधुसूदनशब्दाविशिष्टोयमोदेवता
त्रिष्टुप्छंदः त्रयोदशीचतुर्दशीषोडशीवानुष्टुभः पंचदशीबृ
हतीहोमेविनियोगः परेयिवांसंप्रवतोमहीरनुबहुभ्यःपंथाम
नुपस्पशानम् वैवस्वतंसंगमनंजनानांयमंराजानंहविषादु
वस्य १ यमोनोगातुंप्रथमोविवेदनैषागव्यूतिरपभर्तवाउयत्रा
नःपूर्वेपितरःपरेयुरेनाजज्ञानाःपथ्याअनुस्वाः २ मातलीक
व्यैर्यमोअंगिरोभिर्बृहस्पतिर्ऋक्वभिर्वावृधानः यांश्चदेवावावृधु

येचदेवान्स्वाहान्येस्वधयान्येमदंति ३ इमंयमप्रस्तरमाहि
सीदांगिरोभिःपितृभिर्संविदानः ४ आत्वामंत्राःकविशस्ता
वहंत्वेनाराजन्हविषोमादयस्व विवस्वंतंहुवेयःपितातेस्मिन्य
ज्ञेबर्हिष्यानिषद्य ५ अंगिरसोनःपितरोनवग्वा अथर्वाणो
भृगवःसोम्यासः तेषांवयंसुमतौयज्ञियानामपिभद्रेसौमनसे
स्याम ६ प्रेहिप्रेहिपथिभिःपूर्व्येभिर्यत्रानःपूर्वेपितरःपरेयुः
उभाराजानास्वधयामदंता यमंपश्यासिवरुणंचदेवम् ७
संगच्छस्वपितृभिःसंयमेनेष्टापूर्तेनपरमेव्योमन् हित्वायाव
द्यंपुनरस्तमेहिसंगच्छस्वतन्वासुवर्चाः ८ अपेतवीतविचसर्प
तातोस्माएतंपितरोलोकमक्रन् अहोभिरद्भिरक्तुभिर्व्यक्तंयमो
ददात्यवसानमस्मै ९ अतिद्रवसारमेयौश्वानौचतुरक्षौशबलौ
साधुनापथा अथापितॄंत्सुविदत्रांउपेहि यमेनयेसधमादंमदं
ति १० यौतेश्वानौयमरक्षितारौचतुरक्षौपथिरक्षीनृचक्षसौ
ताभ्यामेनंपरिदेहिराजन्स्वस्तिचास्माअनमीवंचधेहि ११ उरूण
सावसुतृपाउदुंबलौयमस्यदूतौचरतोजनाँअनु तावस्मभ्यं
दृशयेसूर्यायपुनर्दातामसुमद्येहभद्रम् १२ यमायसोमंसुनुत
यमायजुहुताहविः यमंहयज्ञोगच्छत्यग्निदूतोअरंकृतः १३
यमायघृतवद्धविर्जुहोतप्रचतिष्ठत सनोदेवेष्वायमद्दीर्घमायुः
प्रजीवसे १४ यमायमधुमत्तमंराज्ञेहव्यंजुहोतन इदंनमऋ
षिभ्यःपूर्वजेभ्यःपूर्वेभ्यःपथिकृद्भ्यः १५ त्रिकद्रुकेभिःपतति

म॰ क॰

खलुवीरेकमित्युक्तम् त्रिष्टुब्गायत्रीछन्दांसि सर्वतायमन्त्रा
दिता इतियमसूक्तम् इतिसापिन्ब्राह्मणम् अथब्राह्मणोक्त
गजदानम् इष्टगोतमः पलेनवातदर्धेन तदर्धार्धेन वा पुनः
कारयेद्धाटकं हैमं च तद्दंतं तेन वारणम् दंताः स्वर्णमया कार्या र
त्नैर्नानाविधैर्युताः सर्वाभरणसंयुक्तं करिणं चोपकारकम्
आचार्यः प्रयतात्मा तु तस्य पार्श्वे समाहितः उपचारैः षोडशभि
रर्चयेदिष्टपुष्पकैः ततो ब्राह्मणमाहूय सर्वशास्त्रार्थकोविदम्
श्रुतवित्तोपसंपन्नमुद्वेगकारणम् भक्त्या संपूज्य वस्त्राद्यै
र्हेमं तेन च कारयेत् मंत्रैः पौराणिकैः सम्यक्संहिताशास्त्रचोदि
तैः चत्वारो दिग्गजा ये च पृथ्व्यादंतादयस्तु ये सर्वभौमादयो ये
च यथाहृत्य धर्माहृताः मंत्रेणानेन विधिवद्दद्याद्भक्तिसमन्वि
तः मातृभ्रातृशरण्येऽणीचोदङ्मुखाय इत्येवासनाम् ऐरावण
श्चतदंतीगजानां नायकस्तथा दिग्दंतिनां प्रयच्छतमोक्षणं तदप
यत्प्रभुः अनन्तरं च संपूज्य तमाचार्यं गुरुस्ततः ब्राह्मणान्भो
जयित्वा च स्वयं भुंजीत वाग्यतः एवं कृते ब्राह्मणो वाथ तल्लक्षणादेव
नश्यति तेनैव ब्राह्मणैर्भिन्नेनं कार्यमारोग्यहेतवे पलेन वा तदर्धे
नेत्यादि अत्रव्याहृतिर्धानमपि ब्राह्मणहरोक्तं सर्वं ज्ञेयम् पलस्वर्ण
णमपरिमाणमित्यर्थः उपकारकमिति श्रमियारणादिनाविष्टो
पकारकम् पार्श्व इति समीप इत्यर्थः मंत्रैः पौराणिकैरनादिभिः
संहिताशास्त्रचोदितैः संहितामंत्रभागो वेदः सैव संहिताशास्त्र

नाख्यातम् अथवा शास्त्रे स्मृतिस्तत्र वेरितैरेतदुक्तं भवति वै
दिकैः स्मार्तैश्च गजप्रकाशिकैर्मंत्रैरिति तेच गणपतिप्रकाशका
वैदिकाः स्वस्वशाखोक्ता ग्राह्याः तत्र केचन नवग्रहयज्ञप्रकरणे
दर्शिताः तथा श्रौतः स्मार्तोऽपि मंत्रो गणपतिगायत्री विनायक
शांतिप्रकरणे दर्शितः अथवा पौराणिकैः पुराणविहितैस्तदे
वं प्रकटयति संहिताशास्त्रचोदितैरिति संहिताशास्त्राणि महा
भारतादीनि सर्वपुराणार्थसारत्वाद्भारतादीनि पुराणानीत्युच्यते
तच्चोदितैर्मंत्रैरथवा पौराणिका अन्ये संहिताशास्त्रचोदिताः स्त
पे तत्रैको मंत्रः ऐरावण श्वेतदंत इति गजदानमंत्रश्च रञ्जाहो
मयेरपि ग्राह्यः अपरो मंत्रः चत्वारो दिग्गजा ये चैत्यत्रैव सर्वलोक
मेऽग्रंतरे तु सुप्रतीकगजेंद्रत्वं सरस्वत्याभिषेचनः इंद्रस्य वाह
नश्चैष इन्यदेवेंद्रवंदितैति च ते मंत्रा विकल्पेन ग्राह्याः पद्ममंत्रे
पुष्पप्रतीकादीनि पदानीतरदिग्दंतिनामपुलक्षकाणि इति
अणेश्च गजदानम् अथ पार्श्वस्फोटहरम् कर्मविपाकसंग्रहे
खरकाकादिमांसानां भक्षकः स्फोटवान् भवेत् पार्श्वयोश्चानिह
त्यर्थं कृच्छ्रं चांद्रायणं तथा अतिकृच्छ्रं च कर्तव्यो जपश्चाष्टोत्तरा
युतम् शिवसंकल्पसूक्तस्य पार्श्वस्फोटादिरुच्यते कृच्छ्रादिस्व
रूपाणि कृच्छ्रप्रकरणे द्रष्टव्यानि शिवसंकल्पसूक्तं तु परिभाषा
यां रुद्रविधाने प्रदर्शितम् व्याधितारतम्यात्कृच्छ्राद्या यथाशक्ति क
ल्पनीयाः इति पार्श्वस्फोटहरम् अथ हस्तपादतलस्फोटहरम्

म· क

कर्मविपाकसमुच्चये चंडालकृतवापीषु तडागकूपकारिषु
स्नात्वा पीत्वा च सर्वांगे दाहवान् हस्तपादयोः स्फोटयुक्तस्तु भवे
त्कृच्छ्रं सांतपनं चरेत् गोहिरण्यं च वासश्च दद्याच्छ्रमानुसारतः
कूपकर्म्मे चंडालेन यजमानेन कारितवाप्यादिषु स्नानात्तदोत्तानस
र्वमस्तकं नित्यनैमित्तिकादिषु स्नानादिकर्म कुर्यात् सर्वांगदा
हादिमान् भवेदित्यर्थः इति हस्तपादतलस्फोटहरम् अथ स्तन
स्फोटहरम् कर्मविपाकसमुच्चये अवमन्य च भर्तारं जारमा
लिंगिते तया सार्धं क्रीडितया नारी तमेवात्र स्मरत्यपि तस्या
स्तनस्तनयोः स्फोटो जायते जन्मांतरे भगेचरलं स्ववति तद्रोग
स्य च शांतये दद्याद्गाः पंच लवणं हरिद्रां धान्यमेव च उमामहे
श्वरं चैव प्रजयेत् धने सति निष्कद्वादशकं दद्याज्जपेन्नामाग्निसू
क्तकम् अवमन्यादित्यादि अवमन्य तु भर्तारमित्यस्यैव विवरणं
जारमालिंगेदित्यादिकं गावः पंच दद्यादित्यन्वयः धने सति निष्क
द्वादशकं दद्यात् सुवर्णगवादिदानानंतरं धनवांश्चेद्द्वादशसौ
वर्णानिष्कां दद्यात् धनरहितश्चेत् निष्कदानं यथाशक्ति कुर्यादि
त्यर्थः लवणादीन्यपि विभवानुसारेण दद्यात् तामग्निवर्णामि
त्यनेन जातवेदस इत्ययमत्र वाक्योपलक्ष्यते जातवेदस इत्यस्य
सूक्तस्यात्र वाक्यस्य याज्ञिकी देवता उपनिषद् ऋषयः दुर्गाग्नि
रेषमेको यथायोगं देवता त्रिष्टुप् छंदः जपे विनियोगः जपसंख्या
चायुतम् जातवेदसे सुनवाम सोममित्यादि । तामग्निवर्णां तपसा इति

181

२ अग्ने त्वं पारया नव्यो ऽ इति ३ विश्वानि नो दुर्गहा जातवेद इति
४ इतना जितं सहस्वान ऽ उग्रमग्निं हुवेम परमात्सधस्थात् स
नः पर्षदति दुर्गाणि विश्वा क्षामा देवो ऽ अति दुरितात्यग्निः ५ षड्भ्रो
त्रिकर्मी ज्यो ऽ अथ रेखु सनाम्लेहेतानस्य सन्ति स्वांचाग्नेत नवंसि
प्रयस्वाः सम्यंच सौभगमायजस्व ६ गोभिर्जुष्टमयुजो निष
क्तं तवेन्द्र विष्णोरनुसंचरेम नाकस्य पृष्ठमभि संवसानो वैस
वी लोका इह मादयंताम् इति शीतलनस्फोटहरम् अथ नाना
स्थानस्फोटहरम् कर्मविपाकसमुच्चये अनिर्दशाया गोः पी
त्वा पयः स्फोटकवान्भवेत् उपवासत्रयं कृत्वा भोजयेद्विंशतिं
द्विजान् इति नानास्थानगतस्फोटहरम् अथ गण्डमालारो
गप्रतिमादानम् तल्लक्षणं कर्मविपाकसारे गण्डरोगः करैः ष
ड्भिः शंखचक्रपरश्वधान् पाशचापशरान्बिभ्रदाह्लक्ष्यीणांशिरो
रुह इति कर्तव्यताकलापस्तु पलिमाणायामानं कोदेवता त
थैव्यादिना रोगप्रतिमादानविधावभ्यधायि इति गण्डमालारोग
प्रतिमादानम् महार्णवात्प्रेमहते प्रवक्ष्ये मान्यात्ननाशो मद
नाभ्यजस्य सा कर्मरत्नप्रकरेण शर्मी शर्णस्त्र रंगः स्वल्प षोडशो
यम् १९ अथ वातरोगहरणानि कर्मविपाकसंग्रहे देवानां ब्रा
ह्मणानां च धनापहरणात्तथा स्वामिद्रोहहृदात् रोगी भवेदस्यापि
निष्कृतिः कृच्छ्रातिकृच्छ्रे कुर्वीत चान्द्रायणमथापरम् वातभ्रा
वातमन्त्रैर्हि जपेदयुतसंख्यया अग्निरस्मीत्यृचं वा जंजपेज्जनः

म·
क

182

याद्पि कृच्छ्रादिस्वरूपाणिपरिभाषायांकृच्छ्रप्रकरणेद्रष्टव्या
णि वातआवातभेषजंमित्यस्यावातायननलऋषिः वायुर्देव
ता गायत्रीछन्दः विहितार्थेविनियोगः वातआवातभेषजं
शंभुमयोभुवोहृदेप्राणआयूंषितारिषत् अत्रवायुतसंख्यया
होमश्च एवमग्निरस्मीत्यनयापि अस्यदेवश्रवादेवरातश्चेति
हाऋषी अग्निर्देवता त्रिष्टुप्छंदः विहितार्थेविनियोगः अग्नि
रस्मिजन्मनाजातवेदघृतंमेचक्षुरमृतंमेआसन् शार्कस्त्रिधातुर
जसोविमानोजस्रघर्मोहविरस्मिनाम होमद्रव्यमाज्यंयथाश
क्तिहिरण्यदानमपिकुर्वीत इतिवातरोगहरप्रायश्चित्तम्
अथप्रकारान्तरेणवातरोगहरम् कर्मविपाकसंग्रहे गुरुप्र
त्यर्थितांयातोवातरोगीभवेन्नरः नामत्रयेणकुर्वीतजपंहो
मंचशान्तये अच्युतायनमः अनंतायनमः गोविन्दायनमः
इतिनामत्रयमंत्रः अस्यनामत्रयस्यवसिष्ठकश्यपनारदाऋष
यः महाविष्णुर्महानारसिंहोमहावराहश्चदेवताः अनुष्टुब्गा
यत्रीसततानिछन्दांसि विहितार्थेविनियोगः जपहोमयोः
संख्यानव्याख्यातसहस्रेणसहस्रादिलक्षाद्यंताकल्प्या होमद्रव्यं
चाज्यं केचनलिंगपुराणोक्तंप्रभुःशंभुरुमापतिरित्यपिनामत्र
यंवदंति इतिप्रकारांतरेणवातरोगहरम् अथोन्मादवातह
रम् कर्मविपाकसमुच्चये गोहत्यिनापरान्यस्तुअंत्केवस्त्वावि
गर्हितम् सोन्मादवातयुक्तःस्यात्कृच्छ्रंचांद्रायणंचरेत् ज

पेत्सारस्वतंमंत्रंकुर्याद्ब्राह्मणतर्पणम् मोहयित्वेतिपरानन्या
न् पित्राचार्यराजादीन्मोहयित्वा मतार्थविगर्हितं शास्त्रानि
रितंवस्त्रलक्षणादिव्याध्यपनोदनादिनिमित्तमंतरेणयोवं
केइत्यर्थः कृच्छ्रादिलक्षणंकृच्छ्रप्रकरणेभ्यथापि सारस्व
तोमंत्रः यद्वागितिऋचः अस्यनेमऋषिः वाग्देवता त्रिष्टु
प्छंदः जपेविनियोगः यद्वागवदंत्यविचेतनानिराष्ट्री
देवानांनिषसादमंद्राः चतस्रऊर्जंदुदुहेपयांसिकस्विदस्याः
परमंजगाम देवींवाचमजनयंतदेवास्तांविश्वरूपाःपशवो
वदंति सानोमंद्रेषमूर्जंदुहानाधेनुर्वागस्मानुपसुष्टुतैतु
अत्रापिजपसंख्याव्याध्यनुसारेणन्यूनाधिकाकल्प्या ब्राह्म
णतर्पणमितिकुर्यादित्यनुषंगः इत्युन्मादवाग्घरम् अथ
निष्ठुरभाषितादिहरम् शातातपप्रोक्ते परीषांतर्कर्मरणानि
ष्ठुरोक्तिःप्रजायते खरोक्तिकस्यकरणोद्द्यान्मौक्तिककांच
ने खरोक्तिर्निष्ठुरोक्तिर्नीरसोक्तिर्वागर्दभस्वनत्वेवाहास्यकरणा
त् परोद्वेगजननस्यहस्यस्यकरणात् मौक्तिककांचनयोर्दानं
शक्त्यनुसारेण इतिनिष्ठुरभाषादिहरम् अथयज्ञवीतहरम्
कर्मविपाकसमुच्चये अनिच्छंतीमदत्तांवाउपभुंक्तेपरस्त्रियं
बलाद्वाक्रम्यसनरः सर्वसंधिषुवेदनां तीव्रामाप्नोत्यरुचिमा
न्यज्ञवीतयुतोभवेत् ज्वरीनदपतनूत्यर्थमरिष्टीदानमाचरेत्
कृच्छ्रातिकृच्छ्रंकुर्वीतचांद्रायणमथापरं अयुतंवाजपश्चैव

म· क

शक्त्या ब्राह्मणानतर्पणम् नामत्रयं जपेन्मर्त्यो रोगशान्त्यर्थमात्म
नः सहस्रनामकं चापि स्तोत्रं सम्यग्विधानतः अच्युतानन्तगो
विन्दनामोच्चारणभीषिताः नश्यन्ति सकला रोगाः सत्यं सत्यं व
दाम्यहम् अच्युतचिन्तया हन्या जपेद्रोगस्य शान्तये पुरुषसूक्तं
जपेद्विद्वांस्ततो रोगात्प्रमुच्यते अनिच्छन्तीमहं तामित्यादि
अत्र नाम दत्तयोन्निं पुरुषोपभोगरहितामिति यावत् महिषी
च सवत्सा देया अद्यान्महिषीं क्षीरसोमवत्सां प्रजयेनतत्प्रतिब्र
ह्मपुराणवचनात् महिषीदानमंत्रस्तथा सकासहरेदार्शितः
लक्ष्म्यादिस्वरूपं क्षुद्रप्रकरणे उपमचेतिमत्रः परिभाषायां
अत्र जपसंख्या पूर्वत्रयम् एवं सहस्रनामादीनामपि नाम
त्रये स्यादिकं प्रकारान्तरेण वातरोगहरे अध्यायविष्णुसह
स्रनामानि पुरुषसूक्तं च परिभाषायाम् इति पक्षवातहरम्
अथ पक्षवातहरम् शातातपोक्ते सभायां पक्षपाती च जाय
ते पक्षघातवान् निष्कत्रयमितं हंसं तदर्धाच्छादितं जातये आ
ढं च वेसवं क्रयी दान्मानो हितामिच्छताम् समयान्यानिद
द्याद्गोदानं तत्र कारयेत् निष्कस्वरूपं परिमाणप्रकरणे नि
रूपितम् आढं च वैसवामिति अद्ध्यादीयते इति आढं तदेव
विल्मैरवताना हिस्यरेणेन ब्राह्मणान्यथाशक्ति भोजयेदित्य
र्थः समयान्यानि ब्रीह्यादीनि यथालाभोपपन्नानि द्रोणादन
ल्पपरिमाणानि देयानि द्रोणस्वरूपं परिमाणप्रकरणे द्रष्टव्यं

इतिपत्नघातहरम् अथहिक्काहरम् कर्मविपाकसमुच्चये
योकृत्वाब्राह्मणःस्नानसंध्याहोमजपादिकम् सहिक्कारोगसं
युक्तस्तस्यापनुत्तये चांद्रायणत्रयंकुर्यात्रीन्कृच्छ्रांश्चस
माचरेत् नामाग्निवर्णमितिजपेल्लक्षंसमाहितः चांद्रायण
प्राजापत्यकृच्छ्रयोस्स्थानेपंचकृच्छ्रप्रकरणेभिहितम् नामाग्नि
वर्णमित्येतल्लक्षंतुहीलक्षस्फोटहरेभ्यथापि जपसंख्यान
याप्यनुसारेणसहस्रायुतंतांतात्कल्प्या इतिहिक्काहरम्
अथवातव्याधिहरमगदानम् अस्यनिदानंवायुपुराणे वा
तव्याधिश्चतत्स्त्रीपीलशोत्तुपायंचाह बौधायनः हरिणंकार
येत्ताम्रंचनेन्दशभिःपलैः तदर्थेनतदर्थेनस्वंगेरोप्यमयेदृढे
तेतुल्लोपरिसंस्थाप्यब्राह्मणायनिवेदयेत् आढकत्रितयंवापि
तदर्धवास्वशक्तितः पदेशचतुर्थस्याप्यंकोस्यपात्रचतुष्टयम्
वायुदैवतमंत्रैश्चहोमंतत्रप्रकल्पयेत् समिदाज्यचरूंहुत्वाश
तमष्टोत्तरंद्विजः अष्टाविंशतिरेवाथमंत्रेणानेनतंदिशेत्
वायोचरसिभूतानामंतस्त्वंलोकपावन वाहनस्यप्रदानेनवा
तव्याधिंप्रनाशय अनेनकृतमात्रेणयथोक्तेनविधानतः वा
तव्याधिविनिर्मुक्तोनीरुजःसुखमेधते चनेतदशभिःपलैरि
त्यादिचनेनिविडंदृढमिति हरिणंवायुवाहनायनमइतिमंत्रे
णषोडशोपचारैःपूजयित्वावक्ष्यमाणहोमंचानिवर्त्यपश्चात्तर
तिणंब्राह्मणायदद्यादित्यर्थः तंदुलपरीमाणमाह आढक

म॰
क॰

1864

त्रितयमितिग्राह्यकस्वरूपमपिपरिमाणप्रकरणेनिरूपितं
वायुदैवतमंत्रैरितिबहुवचनं वायुदैवत्यानांमंत्राणांबहुत्वा
दन्येषांमित्रशाखापरिपठितानामुपलक्षणार्थं अतःस्वस्वशा
खोक्तोमंत्रोविकल्पेनग्राह्यः अथवासमिदाज्यचरूणांबहुत्वा
पेक्षयाबहुत्वमतएवबहूक्तंभवति समिदाज्यादयोवायुदैव
तैःपृथग्मंत्रैर्होतव्याः इतितत्रैकोमंत्रोवातरोगहरप्रायश्चि
त्तेदर्शितः अपरेचमंत्रानवग्रहप्रकरणेप्रदर्शिताः समि
दाज्यचरूंहुत्वेतिप्रादेशमात्राःसमिधइतिसमित्करणं स
मिधश्चयज्ञियाःस्वगृह्योक्तविधिनाआज्यसंस्कारः आज्यकर
णंगृह्योक्तविधिनैवनिर्वापोहोमनप्रतिष्ठितामिश्राणांतसं
स्कारैश्चरुनिष्पादनंचरुकरणं वायोचरसीतिदानमंत्रः इति
वातव्याधिहरंमृगदानम् अथरक्तवातशमनम् शतातप
प्रोक्तं रक्तवस्त्रप्रवालानांहारीस्याद्रक्तवातवान् सहस्रांमहि
षींदद्यात्सप्तरागसमन्विताम् वस्त्रमपिरक्तमेवमहिषीदान
मंत्रस्तुश्वासकासहरेदृष्टव्यः इतिरक्तवातशमनम् अथवा
तरक्तपित्तहरलक्ष्मीनारायणदानम् बृहद्बौधायनः सुवर्णा
गमनेवातरक्तवांजायतेनरः स्ववर्णागमनेवातपित्तवानपि
जायते लक्ष्मीनारायणंरूपंसुवर्णेनप्रकल्पयेत् पलेनवातद
र्धेनतदर्धेनाथवापुनः लक्ष्मीनारायणंरूपंसर्वदासर्वकामिकं
पद्मासनगतंकुर्याद्देवदेवंचतुर्भुजम् दक्षिणोर्ध्वकरेःपद्मंशं

खमूर्ध्वकरेन्यसेत् वामोर्ध्वकरे चक्रं लक्ष्मीदक्षेकरेपरः
वामोत्संगगता लक्ष्मीरत्नपात्रकरा भवेत् इति गारुडजो दे
व्याः दक्षे देवस्य चक्रिणः गरुडं राजतं कुर्याद्देवदेवस्य वाह
नम् पत्नी च तस्य सौवर्णी सुवर्णेनैव नासिका वस्त्रैरत्यंतरु
चिरैः परिधाया तिकौतुकम् मुक्तादामपरीतिमं चन्दनागुरु
लेपितम् अर्चयेत्कुसुमैर्युग्मं लक्ष्मीनारायणात्मिकम् प्रसन्नं
रमणीयं च गरुडोपरि संस्थितम् ततो विप्रं समाहूय सुशील
लक्षणान्वितम् आचारवंतं धर्मज्ञं वेदवेदांगपारगम् प्रतिष्ट
हनि शुभं च श्रुतिस्मृतिपथे स्थितम् स्वयं भक्त्या समानीय पूज
येद्धेमकुंडलैः कुंकुमागुरुकर्पूरैरुपवीतांगुलीयकैः सर्वोक्ते
न विधानेन होमं तत्र तु कारयेत् मंत्रेणानेन तं दद्यात्सर्वलोक
नमस्कृतम् लक्ष्मीपते देवकीनंदनेश क्षीराब्धिशायिन्नवसा
मगम्य गोविन्ददामोदर वातरक्तं विनाशयाशुलिपचारिवर्गे
लक्ष्मीनारायणस्यैवं श्रुतिं दद्यात्तु भक्तितः आरोग्यवान्सुखी नि
त्यं जायते नात्र संशयः पलेन वै तिपलस्वरूपं परिमाणप्रकर
णेवगंतव्यम् सर्वोक्तेन विधानेन तिहोमं च कारयेत्त्रैत्यार
भ्योत्रषड्भिर्हरनारायणदानोक्तप्रकारेणेत्यर्थः तदा लक्ष्मीपते
देवकीनंदनेशेत्यस्मिंदानमंत्रे गोविन्ददामोदर वातपित्तमित्य
हः कार्यः इति वातपित्तवातरक्तहरनारायणदानम् अथवा
तपित्तहरं कर्मविपाकसमुच्चये लशुनं शृंजनं तालफलं वा

म॰
क॰
१८५

ख्यातियो द्विजः सवातपित्तरोगी च भवेच्चांद्रायणं चरेत् ॥ ओ
षधव्यतिरेकेण लशुनादिभक्षणे चान्द्रायणं कामतश्चेद्द्विगु
णम् चान्द्रायणलक्षणं तु कृच्छ्रप्रकरणे द्रष्टव्यम् ॥ इति वात
पित्तहरम् ॥ अथ वातरक्तहरम् ॥ शातातपः ॥ रक्तवस्त्रस्य वा
लानां हारी स्याद्रक्तवातवान् ॥ चांद्रायणद्वयं कुर्याद्देवे रोगस्य
शांतये ॥ चांद्रायणस्वरूपं कृच्छ्रप्रकरणे अभ्यधायि ॥ इति वातर
क्तप्रायश्चित्तम् ॥ अथ प्रकारांतरेण वातरक्तहरप्रायश्चित्तम् ॥
हेडबौधायनः ॥ सवर्णागमने रक्तवातवान् जायते नरः ॥ पतद्रो
गनिवृत्त्यर्थं षडब्दं कृच्छ्रमाचरेत् ॥ षडब्दं कृच्छ्रं प्राजापत्यकृ
च्छ्राणामशीत्युत्तरं शतं भवति ॥ इदं प्रायश्चित्तं स्वल्परोगस्यापि
धनवतः ॥ अल्पधनस्यापि अधिकारो भवत्येव ॥ इति प्रकारांतरे
ण वातरक्तप्रायश्चित्तम् ॥ अथ वातरोगहरप्रतिमादानम् ॥
तल्लक्षणं कर्मविपाकसारे ॥ वायुर्भयंकरः पंगुः पाशीधारावसम
न्वितः ॥ विशीर्णकेशः पार्श्वस्थान्मत्स्यं यंत्रेण वाहनः ॥ इज्याविधा
नेन परिभाषायां व्याधिप्रतिमादानविधावातंकोदेवतेत्यादि
नादर्शितम् ॥ इति वातरोगप्रतिमादानम् ॥ महाराणावाख्येमहि
ते प्रबन्धे मान्धातृनाम्नो मदनात्मजस्य सत्कर्मरत्नप्रकरेण
शोभिप्रतीभवत्स्मदशास्तरंगः ॥ १२ ॥ अथ पित्तहराणि ॥ कर्म
विपाकसंग्रहे ॥ वैद्यस्य मद्यपस्त्रीकृतैौषधमथान्यथा प्र
योजयेन्नरः संयोरक्तपित्तयुतो भवेत् ॥ अष्टौ नराधुतं वकावति

ईतमितिस्त्राचा चर्वाज्याभ्यां प्रजज्ञुर्याद्रक्तपित्तापत्तमये वैद्य
शास्त्रमहं जानामीति गर्वादोषमन्यशास्त्रविरुद्धं कृत्वा प्रयोजये
त् अथवा औषधमेतच्छास्त्रविरुद्धमेव कृत्वा शास्त्रोक्तमार्गे
णायोदद्यात्स रक्तपित्तवंश्यो जायत इत्यर्थः अथ वैद्यशास्त्रमदाय
इति अनेनाभिषक्त्रियाचरणमभिहितमतो व्याधितरतमभा
वेनाभिषक्त्रियाचरणप्रायश्चित्तानि चांद्रायणकृच्छ्रातिकृच्छ्र
पराकादीनि व्यस्तानि वा योज्यानि चांद्रायणादीनि तथा सर्वो
क्तहोमश्चेति मिलित्वा द्वयमपि रोगानिहन्ति साधनं चांद्रायण
दीनि तथा सर्वोक्तहोमश्चेति मिलित्वा द्वयमपि रोगनिहन्तिसा
धनं चांद्रायणादिस्वरूपाणि कृच्छ्रप्रकरणे वगंतव्यानि
अग्निरीतं वृणीमहे इत्यस्याष्ट्यादिश्वासकासहरेद्दशव्याम्
अयं तु विशेषः तत्र स्तकं विनिष्कृत्तमन्त्रत्वप्रथमार्चगे वेति
चरुणा घृतार्थमाज्येनार्थमित्य घृतसंख्या प्रणीया अथवा
व्याधिशान्त्यार्थिकोच्चरुणा घृतमाज्येनाघृतं होमः इति रक्तपि
त्तहरम् अथ प्रकारान्तरेण रक्तपित्तहरम् शातातपप्रोक्ते
मद्यपो रक्तपित्ती स्यात्स दद्यात्सर्पिषो घटम् मधुनोर्धघटं
चैव सहिरण्यं विशुद्धये अत्रापि मद्यपप्रायश्चित्तानि त्रैमासि
कादीनि षडब्दपर्यन्तानि व्याधिशान्त्यापेक्षया योज्यानि प्र
कास्मिन्मासि मासद्वयप्राजापत्यकृच्छ्रपरिगणनया त्रैमासि
कप्रायश्चित्ते सार्धसमप्राजापत्यकृच्छ्राणि भवंति एवमन्य

म॰
क॰
186

गाहृत्यम् आज्यदानमंत्रस्तु प्रायश्चित्तोपक्रमपद्धतावुक्तः म
धुदानमंत्रस्तु उत्सर्जनसहितस्यामकामहरेणाभिहितः इति प्रका
रांतरेण रक्तपित्तहरम् अथ पित्तरोगप्रतिमादानम् तल्लक्ष
णे चात्रत्रके शूलरोगे गोष्ठित्यादिना शूलरोगप्रकरणोक्तमेवात्रापि
ज्ञेयम् पूजाविधानं तु परिभाषायां रोगप्रतिमादानविधावाते
को देवता तत्रेत्यादिना प्रपंचितम् इति पित्तप्रतिमादानम् ॥
महार्णवाख्ये महिते प्रबन्धे मान्धातृनाम्नो मदनात्मजस्य स
त्कर्मरत्नप्रकरांचितेऽस्मिन्नष्टादशोऽयं प्रथितस्तरंगः १८ ॥
अथ श्लेष्महराणि तत्र शातातपः त्रपुहारी च पुरुषो जायते
श्लेष्मलः सदा अत्र च द्रव्याणामल्पसाराणां स्तेयं कृत्वा पृथेवस्म
नः चरेत्सांतपनं कृच्छ्रमिति मन्त्रक्तसांतपनं चरेत् सांतपनल
क्षणं कृच्छ्रप्रकरणेऽभ्यधायि इति श्लेष्महरणम् अथ प्रकारां
तरेण श्लेष्मघ्नम् शातातपप्रोक्ते त्रपुहारी च पुरुषो जायते
श्लेष्मलः सदा उपोष्य दिवसं सोऽपि दद्यात्पलशतत्रयम् त्रपुप
लपरिमाणं परिमाणप्रकरणेऽवगंतव्यम् इति प्रकारांतरेण श्ले
ष्महरणम् अथ चिकित्सककफव्याधिहरम् यमः नित्यातुरश्च
नराहितः कफरोगी भवेन्नरः पराभवं समाप्नोति चेत्याह भगवा
न्यमः पराभवं श्लेष्मणा शत्रुभिश्च समाप्नोतीत्यर्थः तच्छांत
ये मासमेकं यावकं भक्षयेन्नरः सहस्रनामपावकस्य होमश्चाशे
क्रशासनम् नामत्रयेण कुर्वीत चर्वाज्यं च हविर्भवेत् यावकत्र

तत्स्वरूपं कृच्छ्रप्रकरणेऽभिहितं नियमैर्युक्तो मासे यावकं भ
क्षयेदित्यर्थः विष्णुसहस्रनामानि च परिभाषायां दर्शिता
नि नामत्रयस्यार्थश्च दिवातरोगहरे द्रष्टव्यम् नामत्रयेण होमः
सहस्रनामस्तोत्रस्य जपो जपसंख्या च व्याध्यनुसारेणोत्तर
सहस्राधिका कल्प्या इति चिकित्सकफव्याधिहरम् अथ
श्लेष्मरोगप्रतिमादानम् तल्लक्षणं तच्छूलरोगहरप्रकरणे
श्लेष्मके शूलरोगे वित्यादिनाभिहितमेवात्राप्यनुसंधेयम्
पूजाविधानं च परिभाषायां रोगप्रतिमादानविधावातंको
देवता तत्रेत्यादिनाभिहितम् इति श्लेष्मप्रतिमादानम्
अथापस्मारहराणि शातातपप्रोक्ते धृतोपस्मारोगी स्या
त्सदा तद्दोषशांतये ब्रह्मकूर्चत्रयं कृत्वा धेनुं दद्यात्सदक्षि
णां ब्रह्मकूर्चलक्षणं तु कृच्छ्रप्रकरणे प्रदर्शितम् धेनुदान
मंत्रस्तु नवग्रहयज्ञप्रकरणे प्रदर्शितः इत्यपस्मारहरम् अ
थ प्रकारांतरेणापस्मारहरम् कर्मविपाकसंग्रहे शरीमायां
प्रयुंजानो यस्तु प्राति सोपस्मारी भवेन्नरः कुर्याच्चांद्रायणं न
रः सदसस्पतिमिति मंत्रेण च बीजं जुहुयात्तथा कया न इति मं
त्रं जपेद्ब्राह्मणतर्पणम् कुर्याद्धिरण्यदानं च शान्त्यै रोगस्य शां
तये चांद्रायणलक्षणं कृच्छ्रप्रकरणे द्रष्टव्यम् वा बीजमिति
तमेव वह्निसमानम् इष्टकरण्यां होमसंख्या च रोगानुसारेण
शेन शताद्ययुतां ता कल्प्या एवं सूक्तजपेऽपि सदसस्पति

म
क

मित्यस्य मेधातिथिर्ऋषिः सदसस्पतिर्देवता गायत्री छन्दः
होमेविनियोगः सदसस्पतिमद्भुतंप्रियमिंद्रस्यकाम्यं सनिं
मेधामयासिषम् कयानश्चित्रेति पंचदशर्चस्यसूक्तस्यवामदे
वऋषिरिंद्रोदेवतागायत्रीछंदोजपेविनियोगः कयानश्चित्र
आभुवदूतीसदावृधःसखा कयाशचिष्ठयावृतः कस्त्वासत्यो
मदानांमंहिष्ठोमत्सदंधसः दृढाचिदारुजेवसु अभीषुणः
सखीनामविताजरितॄणां शतंभवास्यूतिभिः अभीनआ
ववृत्स्वचक्रंनवृत्तमर्वतः नियुद्भिश्चर्षणीनाम् प्रवताहिक्रतूना
माहापदेवगच्छसि अभक्षिसूर्येसचा संयत्तइंद्रमन्यवः संचक्रा
णिदधन्विरे अधत्वेअधसूर्ये उतस्माहित्वामाहुरिन्मघवानंशची
पतेदातारमविदीधयुम् उतस्मासद्यइत्परिशशमानायसुन्वते
पुरूचिन्मंहसेवसु नहिष्मातेशतंचनराधोवरंतआमुरः नच्यौ
त्नानिकरिष्यतः अस्माँअवंतुतेशतमस्मान्त्सहस्रमूतयः अ
स्मान्विश्वाअभिष्टयः अस्माँइहावृणीष्वसख्यायस्वस्तये महो
रायेदिवित्मते अस्माँअविड्ढिविश्वहेंद्ररायापरीणसा अस्मान्वि
श्वाभिरूतिभिः अस्मभ्यंताँअपावृधिव्रजाँअस्तेवगोमतः न
वाभिरिंद्रोतिभिः अस्माकंधृष्णुयारथोद्युमाँइंद्रानपच्युतः गव्यु
रश्वयुरीयते अस्माकमुत्तमंकृधिश्रवोदेवेषुसूर्यवर्षिष्ठंद्या
मिवोपरि इतिकयानश्चित्रेतिसूक्तम् अतिप्रकारांतरेणाप
स्मारहरं अथापस्मारहरविनायकदानं -- तत्रबौधायनः

ब्राह्मणः श्वासरोपेनत्वपस्मारीभवेन्नरः वक्ष्येतस्यप्रतीकारं
दानहोमक्रियादिभिः पलेनवातदर्थेनतदर्धार्थेनवापुनः
विनायकप्रतिकृतिंकुर्यात्स्वर्णेनशोभनाम् राजतेचतथाता
गंस्रुपवीतंप्रकल्पयेत् मुकुटंपद्मरागेणकंठंरत्नैःप्रकल्पये
त् विनायकार्धमानेनआखुंदेवस्यकल्पयेत् तस्याग्रेगेप्रदे
यानिरत्नानिविविधानिच मानिकेनप्रकुर्वीतचवस्त्रवीतस्य
शोभने पूर्वेद्युःमंडपंकुर्यात्स्तंभैःषोडशभिःदृढम् यद्वाथ
दशभिःकुर्याद्दृष्टभिर्वाप्रयत्नतः मंडपस्यचतुर्भागेवेदिका
मपिकल्पयेत् रात्रौविनायकस्यापित्वधिवासनमिष्यते
चतुर्भिःब्राह्मणैःसार्धमाचार्यःसर्वशास्त्रवित् स्वयमेवतथा
चार्योधर्मज्ञःसत्यवाक्शुचिः कुलीनोनचहृउग्रसर्वप्रा
णिहितेरतः रात्रौजागरणंकृत्वामध्यरात्रेबलिंहरेत् मत्स्य
मांसेनसहितंतथात्वीरोदकेनच आचार्यःप्रयतोभूत्वामंत्रे
णानेनसंयुतः पूर्वस्यांदिशितंदद्याद्बलिंचसर्वकामिकम्
आदित्यावसवोरुद्रादेवाभूतानिसर्वशः सर्पाःपिशाचाडाकि
न्यःशाकिन्यःपांतुदेवताः अपस्माराधिदेवंचवेतालानैर्ऋता
स्तथा बलिदानेनदत्तेनशांतिंकुर्वंतुसर्वशः ततःप्रभातेवि
मलेस्नात्वाअहतवाससा भूषितःकटकैःसम्यगुपवीतांगुली
यकैः कुंडानिदिक्षुचत्वारिमेखलासंहितानिच कुर्यात्तेषुप्र
कुर्वीतहोममंत्रैःस्वकैस्तथा पूर्वस्मिन्कुंडकेकुर्यात्सामिदाज्य

म०
क

चतुरस्रके विनायकं समुद्दिश्य गणानां त्वेति मंत्रतः अध्वर्युर्
दक्षिणे कुंडे कुर्याद्धोमं समाहितः छंदोगः पश्चिमे कुंडे कुर्याद्धो
मं समाहितः आथर्वणश्चोत्तरे च कुंडे होमं प्रकल्पयेत् विना
यकाय देवाय सर्वभूतहिताय च समिदाज्यचरुं हुत्वा शर्णेद्
त्यंतमेव हि आचार्यः प्रतिमां तां तु ब्राह्मणैः सह संयुतः आस
ने वेदिकामध्ये वितानादिपरिष्कृते तिलानामुपरिस्थाप्य गंध
पुष्पैः समर्चयेत् वस्त्रैर्नानाविधैः शुभ्रैः कर्पूरकटकादिभिः
उपचारैः षोडशभिः नैवेद्याद्यैश्च मोदकैः यथा देवे तथाचार्ये भू
षणादि प्रकल्पयेत् आचार्यः परया भक्त्या गणेशाय प्रकल्प
येत् अश्वपादि तथान्यच्च कारयेद्धस्तिकान्वितम् निवेद्य पार्व
तीं चापि देवदेवं महेश्वरम् पूजयेत्परया भक्त्या त्वाचार्यः स्वय
मेव हि तथैव रोगवान् भक्त्या संपूज्य गणनायकम् गणानां त्वे
ति मंत्रेण तु स्त्रीशूद्रस्तु पूजयेत् ततो मध्याह्निने प्राप्ते प्रतिमां
दक्षिणायुताम् मंत्रेणानेन दद्याच्च स रोगी प्राङ्मुखः स्वयम्
उदङ्मुखोपविष्टाय ब्राह्मणायातिभक्तितः विनायक प्रपन्ना
र्तिहर विघ्नविनायक त्वं देवः प्रार्थितः सर्वविघ्नविघ्नपरायणैः
ब्राह्मणैश्चास्य रोगेण यज्जातं मम वैकृतम् सर्वकर्मविपाकेन
अपस्मारान्मकादिकम् नाडीं वाप्यथवापि यैनालिके चाप
भाषणम् त्वदर्चायाः प्रदानेन रोगमाशु विनाशय चतुर्णां ब्रा
ह्मणानां तु दद्याच्छक्त्या च दक्षिणाम् एवं कृत्वा गणपतेर्दानं म

र्थः स्वस्थोभवेत् पलेनोचेत्यादि पललक्षणंप्रात्रक्रमम् विनायक
वाहनं मूषिकायास्तु मत्स्येत्यादि मत्स्येन मांसेन क्षीरेणोदकेन च
सहितं विचित्रमन्नं बलिं च दद्यादित्यर्थः बलिदानमंत्रमाह
आदित्या रुद्रा इत्यादि श्लोकद्वयेन होमं मंत्रैः स्वकैरिति स्वशाखो
क्तैर्विनायकप्रकाशकैः मंत्रैरित्यर्थः तत्र विनायकप्रकाशकमं
त्राः विनायकयंतो नवग्रहयज्ञे च होमसंख्यात्वष्टोत्तरशतादि
सहस्रांता कल्प्या सर्वस्मिन्कृच्छ्रे चेत्यादि अत्र विनायकाधिवास
नवेदिकांताः सर्वा दिदिशो ग्राह्याः सति संभवे तत्तत्स्थदिक्स्व
कृचादिभिः होमः कारयितव्यः वेदचतुष्टयविरामभावे स्वशाखी
यब्राह्मणेन तस्याप्यभावे तस्मिन्कर्मण्याचार्यत्वेन योवृतस्त
च्छाखोक्तमार्गेणाधिवासनवेदकान आग्नेय्यां दिशि कुंडादि
विधौ उपदिष्टहोमे चतुर्गुणं कारयेत् एवमाचार्यऋत्विक्सहि
तो होमं कृत्वा सर्वांगहुत्यंते सर्वाधिवासितविनायकप्रतिमां षो
डशोपचारैः पूजयेदित्याहाचार्यः प्रतिमां तां वित्यादिना मत्स्यका
न्वितमपूपादिनैवेद्यार्थं कारयेदित्यर्थः तुलसीपत्रेति आचार्ये
णपूजितं विनायकं रोगवान्यजमानोपि पूजयेत् सचेयज
मानः स्वस्थः सन् तुलसीमंत्रेण विनायं पूजयेदित्यर्थः विनायकप्रप
मार्तिहरेत्यारभ्य रोगमाशु विनाशयेत्यंतो दानमंत्रः त्वदर्चाया
इति अर्चायाः अर्चितायाः प्रतिमायाः इत्यपस्मारहरविनायक
दानम् अथापस्मारहरमूर्तिदानम् तल्लक्षणं चातुर्केशत्तरोगो

म॰
क॰

ऽत्यारभ्यशूलहरप्रकरणे दर्शितमेवात्रापि ज्ञेयम् एतावि शिष्ट
परिभाषायां रोगप्रतिमादानविधावातंकोदेवता तथेत्यादिना
प्रदर्शितम् महार्णवाख्ये महितेभुवन्येमान्यासनाश्रीमदना
त्मजस्य सत्कर्मरत्नप्रकरो वितेस्मिन्नेकोनविंशः प्रथितस्तरंगः
१९ अथ शिरोरोगहराणि शातातपप्रोक्ते नागहारीचसततं
प्रकृष्टः शीर्षरोगवान् सीसंपलशतं दद्यात्षोडशैकं तु वासरम्
नागः सीसं इति शिरोरोगहरसीसदानम् अथ शिरोरोगहरंप्र
कारांतरेणोक्तम् कर्मविपाकसमुच्चये गुरुपत्नीशिरश्छिरोग
वान् जायते नरः कृच्छ्रातिकृच्छ्रं कुर्वीत चांद्रायणमथापरम् औष
धानि प्रदद्याच्चदिनमात्रेण तथापरम् औषधानि वैद्यशास्त्रे शिरो
रोगघ्नानि कृच्छ्रादिलक्षणं प्रागुक्तम् इति प्रकारांतरेण शिरो
रोगहरम् अथ प्रकारांतरेण कर्मविपाकसंग्रहोक्तं शिरोरोगह
रम् प्रायोपवेशनादीनां व्रतानां त्यागकारणात् शिरोरोगयुतो
भयात निष्कृतिरथोच्यते गोहत्याव्रतं कुर्यात्पंचाशद्विप्रभोजनं
त्र्यंबकं च जपेद्वह्नौ होमः कृष्णां तु संज्ञकः भवेदिति शेषः गोहत्या
व्रतस्वरूपं तु कृच्छ्रप्रकरणे विप्रभोजनं विप्रान्भोजयेदित्यर्थः
त्र्यंबकं त्र्यंबकं यजामहे इति मंत्रः होमद्रव्यं परिभाषायां रोगप्रतिमादान
विधौ तज्जपसंख्यानरोगानुसारेण शेषं नरशतादप्युत्तरतोत्कलक
ल्प्या कृष्णांडहोमस्तु परिभाषायामेव इति कर्मविपाकोक्तं
शिरोरोगहरम् अथैकैकांशाशिरोरोगहरम् नारदः ब्रह्महा

रीयद्राक्षीयाद्भिन्नपात्रे विशेषतः एकांशेन शिरोरोगी भवती
त्याह नारदः अशीभ्यां ते इत्येतत्त्र्यक्षमष्टोत्तरं शतम् जपस्तु
कृताभ्यां च जुहुयाच्च तथैव हि औषधानि प्रदद्याच्च विशान्नाद
श्च भोजयेत् भिन्नपात्रे विशेषत इति स्ववर्णरजतपात्रव्यतिरिक्त
भिन्नपात्रे भोजनं रोगजननं विशेषतो भिन्नकांस्यपात्रभोजन
मित्यर्थः अशीभ्यां ते नासिकाभ्यामिति सूक्तं परिभाषायां रो
गप्रतिमादानविधौ द्रष्टव्यम् जुहुयाच्च तथैव हीति अष्टोत्तरं
शतमित्यर्थः चरुणाष्टोत्तरशतं हुतेन चाष्टोत्तरशतमत्रास्त्रम
न्त्रसूक्तं मन्त्रः न तु प्रत्येकं औषधानि वैद्यशास्त्रे शिरोरोगहराण्ये
नोक्तानि इत्येकांशाच्छिरोरोगहरम् अथ सूर्यावर्तहरम् शाता
तपप्रोक्ते औषधस्यापहरणात्सूर्यावर्तः प्रजायते तेन सूर्यः
प्रदातव्यो निष्कैकस्य यथाविधि निष्कपरिमितस्वर्णनिर्मि
तसूर्यप्रतिमां दद्यादित्यर्थः निष्कलक्षणं परिमाणप्रकरणे
ऽभ्यधायि अथ शिरोरोगत्रय यज्ञोपवीतदानम् एतन्निदानं त्वा
दिपुराणे ब्रह्महा शिरोरोगीति अत्र निष्कृतिर्वायुपुराणे
उपवीतं हिरण्येन निर्मितं तत्पलार्धतः तदर्धेन तदर्धेन यथा
विभवतोपि वा उत्तरीयं राजतं वा नानावस्त्रासंख्येयाकृतम् ब्रा
ह्मणाय ब्रह्मविदे श्रोत्रियाय निवेदयेत् मंत्रेणानेन विधिव
त्पूजितां वेगुलीयकैः धाता विधाता जगतां परमात्मा चतुर्मु
खः विनाशयत्वमेतद्विप्रं रोगवेगं शिरोगतम् अत्र यज्ञोपवी

म॰ क॰

190

तदानमंत्रोथानाविधातेत्यादि ब्रह्मप्रकाशकशास्त्रोपादानं ब्रह्मघ्नंचषोडशोपचारसहितं ब्रह्मप्रकाशब्रह्मप्रकाश केर्वैदिकैर्मंत्रैर्ब्रह्मजज्ञानमित्येव मादिभिर्नमोन्तैर्नाममंत्रैर्वासोत्तरीयेयज्ञोपवीतेविधायतद्यज्ञोपवीतंब्राह्मणायोक्तप्रकारेणदद्यात् ब्रह्मजज्ञानमित्यादयोब्रह्मप्रकाशकामंत्रानवग्रहयज्ञप्रकरणेदर्शिताः पलार्थेनेतिपललक्षणं परिमाणंप्रकरणेनिरूपितम् यथाविभवतोपिवेतिस्वम् हेनपलादप्यधिकपरिमाणसुवर्णेनयज्ञोपवीतंकारयेदित्यर्थः यावद्धन्मानंयज्ञोपवीतंतावद्धन्मानमुत्तरीयंभवतीति शिरोरोगयज्ञोपवीतदानम् अथशिरोरोगप्रतिमादानम् तद्धेसणमद्यकेषित्यादिनामूलरोगप्रकरणोक्तमेवात्राप्यनुसन्धेयम् पूजाविधानंत्वातंकोदेवता तत्रेत्यादिनापरिभाषायांरोगप्रतिमादानविधावुक्तम् इतिशिरोरोगप्रतिमादानम् महार्णवाख्येमहेप्रबन्धेमान्धातृनाम्नोमदनात्मजस्य सत्कर्मरत्नप्रकरेणषष्ठोविंशस्तरंगोयमगादगाधः २॰ अथमुखरोगहराणि तत्रपूतिवक्त्रहरम् कर्मविपाकसंग्रहे धर्मकर्माण्युपक्रम्यधर्मंत्यजतियोनरः अविद्यमानदोषत्वात्परेषांयःप्रकाशयेत् सभवेत्पूतिवक्त्रीतुकुर्याच्चांद्रायणंव्रतम् धूपसकुंदनादीनिसुगंधीनिवशक्तितः दद्याद्विप्रायपंचाशद्ब्राह्मणान्भोजयेत्तथा

चांद्रायणंसांतपनंकृच्छ्रप्रकरणोद्दिष्टव्यम् इतिसर्ववक्त्रव्रणहरम्
अथप्रकारांतरेणमुखरोगहरम् कर्मविपाकसंग्रहे परवाचांवि
घ्नकर्तामुखरोगीप्रजायते मर्मोद्घाटनतोप्येषांमुखरोगःप्रजाय
ते सकृच्छ्रंवितयंकुर्यान्मंत्रैर्व्याहृतिभिर्हुतम् जुहुयाद्विसहस्रंच
दद्याद्व्रीह्यादिकांचनं प्राजापत्यकृच्छ्रसांतपनंकृच्छ्रप्रकरणोक्तयथावि
व्रीह्यादिदद्यात् कांचनंदद्यात् इत्यन्वयः आदिशब्देनयवगोधू
मादयोगृह्यंते व्रीह्यादीनिस्वशक्त्यनुसारेणदद्यात् इतिमुखरो
गहरम् अथप्रकारांतरेणमुखरोगहरम् शातातपप्रोक्ते श्वमा
र्जारादिभिःस्पृष्टंभुक्त्वादुर्गन्धवान्भवेत् भुक्तोतिभोजनस्यनिर्मि
मत्वेनोपादानम् इतिप्रकारांतरेणमुखरोगहरम् अथमुखरोग
हरांतरंकर्मविपाकसमुच्चये कूटसाक्षीभवेद्वक्त्ररोगोशोणित
पित्तवान् कृच्छ्रातिकृच्छ्रेकुर्वीतचांद्रायणमथापरम् कुर्यात्कू
ष्मांडहोमंचगायत्रीमयुतंजपेत् दद्याद्धिरण्यंव्रीहीन्मुखरोग
स्यशांतये कृच्छ्रादिलक्षणानिकृच्छ्रप्रकरणोद्दिष्टव्यानिकूष्मांड
होमःपरिभाषायांनिरूपितः हिरण्यंव्रीहयश्चविभवानुसारेण
दातव्याः अथमुखरोगहरगजदानम् बौधायनः वाग्विरोधं
गुरोःकृत्वामुखरोगीप्रजायते तस्यदानेनाविहितःप्रतीकारोय
मुच्यते सौवर्णंराजतंताम्रंपलेनार्धपलेनवा कारयेत्करिणंसौ
म्यंयथाविभवतोपिवा तस्यैवकारयेद्दंतौशुडेनरजतेनत ७
ढंसमौक्तिकंकुर्याद्दन्ताभ्यांमालिनींतथा संवेष्ट्यपीतवस्त्रेणगं

म॰
क

धत्तुष्पाक्षतादिभिः अर्चयेद्धान्यराशिसंस्थाल्यं द्रोणाष्टकं मतम्
कृतव्रतोपपन्नं च ब्राह्मणं संयतेन्द्रियम् शांतं कुलीनं धर्मिष्ठमनु
द्वेगकरं नृणाम् आहूय परया भक्त्या वस्त्रालंकारभूषणैः पूजये
त्प्रयतोश्वात्तेनैतत्कर्मकारयेत् समिदाज्यतिलैश्चैव होमं चा
भिप्रवर्तयेत् अग्निनाग्निस्तथाचाग्नुः शुक्रज्योतिरिति क्रमात्
मंत्रा एते विनिर्दिष्टाश्च्यम आयस्त्यश्यते कृत्वा चैव प्रणीतां भ
स्तितो हस्त्यर्चनं भवेत् स्वाहांते कर्मकृत्वाथ प्रणीतामोक्षणं तथा
पलेनार्धपलेनैवेति पलस्वरूपं परिमाणप्रकरणे वगंतव्यम्
तस्यैव कारयेद्धंतावित्यादि यो हस्ती सर्वर्णेन ताम्रेण वा निर्मि
तस्तस्य शुंडेन रजतेन कारयेत् यदा रजतेन हस्ती निर्मितः तदा
रजतेन दंतविधानमनुपपन्नम् रजतस्य प्राप्तत्वात् द्रोणस्वरू
पं धान्यपरिमाणप्रकरणे द्रष्टव्यम् समिदादिहोमक्रमेण मंत्र
माह अग्निनाग्निरित्यादिना अग्निनाग्निरित्यस्य मेधातिथिर्ऋषिः
आद्येपाद्ये निर्मथ्याग्निराहवनीयाग्निश्च देवता इतरत्राग्निर्देव
ता गायत्रीछन्दः समिद्धोमे विनियोगः अग्निनाग्निः समिध्यते
कविर्गृहपतिर्युवा हव्यवाड्जुह्वास्यः अग्नावग्निः समिन्यते
इत्यस्य त्रिशंकुर्ऋषिः अग्निरिंद्रश्च देवता गायत्रीछन्दः समि
दाज्यहोमे विनियोगः अग्नावग्निमिन्धतिस्त्रिणोतिर्बर्हिरग्नु
षक् येमामित्रोपुवासखो शुक्रज्योतिरित्यस्य मंत्रस्य यजुर्वेदो
ग्निकांडे च समाम्नायात् अग्निर्विश्वेदेवा ऋषयः मरुतो देवता

अथवालिंगोक्तादेवता यज्ञस्थानच्छंदो नियमः तिलहोमेवि
नियोगः शुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्मां
श्च सत्यश्च तपश्चात्येहाः इत्यस्याप्यत्यरण्यते इतिइध्मेति निर्वि
शेषोपादानाद्धोमेसमिधः पालाशोवाभवंति तदभावे यज्ञीय
काष्टे रिध्मादिभवति होमसंख्याच प्रत्येकमष्टोत्तरशतं कृत्वा
चैवं प्रणीतांभ इतिकर्मविपाकसंकल्पानंतरं स्वगृह्योक्तविधि
नाग्निंप्रतिष्ठाप्य पात्रसाधनानंतरंप्रणीतांभः प्रणीतापात्रस्था
पनोपपत्तिं कृत्वा ततो हस्त्यर्चनं भवेत् पूर्वोक्तधान्यराशिस्थि
तेहास्तिनेषोडशोपचारैः पूजयेदित्यर्थः हस्तीचायं सुप्रतीको
दिग्गजः दानमंत्रे सुप्रतीकशब्दश्रवणात् स्वाहांतेकर्मकृत्वे
ति पूर्वोक्तप्रकारेणकरिणंपूजयित्वा स्वाहांतेकर्मसमिदादि
कर्मनिर्वर्त्यपश्चात्प्रणीतमोक्षणं पूर्वस्थापितप्रणीतपात्रवि
सर्जनं स्वगृह्योक्तविधिनाकर्मकुर्यादित्यर्थः एवं पूर्वोक्तकर्मा
नंतरं किंकुर्यादित्याह ततः शुक्लाम्बरधरः शुक्लमाल्यानुलेप
नः तस्मैदद्यान्नवनीतदयाकरिणंचसदक्षिणम् मंत्रेणानेनावि
धिवत्पाढुःखोयविशेषतः सुप्रतीकगजेंद्र त्वंसरस्वत्याभिषेच
क इंद्रस्यवाहनेशक्तं सर्वदेवैश्च पूजितः दानेनानेनदमेनसुवे
रोगंविनाशय ब्राह्मणान्भोजयेदंते सार्भस्नंजीतबंधुभिः इति
श्वरोगहरगजदानम् अथसाधारणेन सुवरोगप्रतिमादा
नम् तल्लक्षणंचानुक्रेपवरोगेधिस्यादिना स्थलरोगहरप्रकारेण

म॰
क

192

क्रमेणाज्ञापि ज्ञेयम् इत्याविधानेन तथा ते को देवता तत्रेत्यादि
परिभाषायां रोगप्रतिमादानविधौ इति साधारणेन सर्वरोग
प्रतिमादानं अथ जिह्वारोगहरम् शातातपप्रोक्ते पक्वान्नह
रणे चैव जिह्वारोगः प्रजायते गायत्र्याः सञ्जपेल्लक्षं दशांशेन
जुहुयात्तिलैः जपकरणाशक्तो गायत्र्यास्तु तज्जपस्य कृच्छ्रमस्याम्ना
यताल्लतज्जपस्थाने दशकृच्छ्राणि कृत्वा गायत्र्या दशसहस्रा
णि जुहुयात् कृच्छ्रस्वरूपं कृच्छ्रप्रकरणे द्रष्टव्यम् इति जिह्वा
रोगहरम् अथ प्रकारान्तरेण जिह्वारोगहरम् कर्मविपाक
समुच्चये परेषां दुःखकरणात् सदाचारानृतभाषणात् जिह्वाच्छे
देन थान्येषां पक्षपाताच्च संसदि जिह्वारोगी भवेदास्ये वाणी
चैवाभिजायते पराकद्वितयं चैव होमः कूष्माण्डसंज्ञकः कया
नश्चित्र सूक्तस्य जपो होमस्तथैव च ब्रीह्यादीनां तथा दानमौष
धस्य च संस्मृतम् सर्वदेति एतच्च पदं काकाक्षिवदुभयत्र संब
ध्यते असकृदन्येषां दुःखकरणादसकृदनृतभाषणाच्चेत्य
र्थः पक्षपाताच्चेति पक्षपातो व्यवहारिणः पराकलक्षणं कूष्मा
ण्डहोमश्च परिभाषायामुदीरितम् कयानश्चित्रआभुवदिति
सूक्तमपस्माररोगहरप्रकरणे प्रदर्शितम् अनेन सूक्तेन होम
श्च कर्तव्यः जपहोमयोः संख्या व्याधिशान्त्या यत्र सारेण होमश
शान्तिकाकल्प्या सूक्तं सकलं मंत्रोन प्रत्यृचं ब्रीह्यादीनामि
त्यादिशब्देन यवगोधूममुद्गादयः संगृह्यन्ते एतानि शास्त्र

नुसारेण देयानि औषधस्यायुर्वेदे जिह्वारोगहरत्वेनाभिहित
स्य इति प्रकारांतरेण जिह्वारोगहरम् अथ जिह्वारोगप्रतिमा
दानं दंतरोगप्रतिमादानं च तल्लक्षणं कर्मविपाकसारे लंबा
करस्थिता जिह्वा दंतौ रोगो द्विवाहुकौ भवतो जिह्वादंतरो
गौ नराकृती तयोर्दानेन जिह्वायां दंतानां च रुजः क्षयः इज्या
दीतिकर्तव्यताकलापश्च परिभाषायां रोगप्रतिमादानविधौ
प्रातेको देवतेत्यादिना निरूपितः इति जिह्वादंतरोगप्रतिमा
दानम् अथ छर्दिरोगहरम् शातातपप्रोक्ते विषप्रदश्छर्दि
रोगी गां च दद्यात्पयस्विनीम् चकारादेकः कृच्छ्रः सौरमंत्रजप
श्च समुच्चीयते कृच्छ्रशब्दस्तपोरूपकृच्छ्रसाध्यश्चांद्रायणादि
परः अतो व्याख्यानुसारेण प्राजापत्यपराकचांद्रायणादिष्व
न्यतमो ग्राह्यः सौरमंत्रश्च सौराष्टाक्षरो वा उपमंत्रश्चो वासौ
रमंत्रो वरीयान् एते च परिभाषायामेव तत्र तत्र दर्शिताः त
थाप्राजापत्यादिस्वरूपाण्यपि गोदानमंत्रश्च जपसंख्योक्त
व्याख्यनुसारेण होमश्शतेनाष्टोत्तरतो वा कल्प्या इति छर्दिरोगहरं
अथ दंतपीडाहरम् शातातपप्रोक्ते ग्रामाग्रहरणे चैव दंतपी
डा प्रजायते स दद्याद् अश्विनौ हेमनिष्कद्वयविनिर्मितौ निष्क
स्वरूपं परिमाणप्रकरणेऽभ्यधायि अत्र चाश्विनप्रकाशकमंत्रे
णाश्विनप्रजौ विधाय ब्राह्मणाय दद्यात् स्वमंत्रो नवग्रहय
ज्ञप्रकरणे विनायकादिपंचमंत्रेषु दर्शितः इति दंतपीडाह

म॰ रम् अथदंतरहरम् शातातपप्रोक्ते स्तकरेनिहतेचैवदंतरो
क॰ जायतेनरः सदद्यात्तविशुद्ध्यर्थंघृतकुंभंसदक्षिणम् कुंभल

193

क्षणंधान्यमानप्रकरणेद्रष्टव्यम् घृतदानमंत्रस्तप्रायश्चित्तो
पक्रमएवउक्तः इतिदंतरहरम् अथश्यामदंतत्वहरम् शा
तातपप्रोक्ते मद्यपःश्यामदंतःस्यात्प्राजापत्याष्टकंचरेत् श
र्करायास्तुलाःसप्तप्रदद्यात्पापशुद्धये जपित्वाचमहारुद्रंदशां
शंजुहुयात्तिलम् ततोभिषेकःकर्तव्योमंत्रैर्वरुणदैवतैः प्र
जापत्यस्वरूपंप्रागुक्तम् शार्करेति अत्रतुलेनशर्करयात्तुलित्वा
तांशर्करांब्राह्मणेभ्योदद्यादिति तुलादानमंत्रस्तु त्वंतुलेसर्व
भूतानांप्रमाणंपरिकीर्तिता मांतोलयंतिसंसाराद्उद्धरस्वनमो
स्तुते महारुद्रलक्षणंपरिभाषायां दशांशहोममंत्राविच्छेद
स्तथाद्धृति संख्याविशेषश्चरुद्रविधानोक्तएव वरुणदैवतैरि
त्युपलक्षणं अतःखशाखासमाम्नातैर्वारुणैरापोहिष्ठाभिषेकं
कृत्वाततःस्नानैरभिषेकःकार्यः स्नानीयमंत्रानवग्रहयज्ञप्र
करणेदर्शिताः इतिश्यामदंतत्वहरम् अथमूकत्वहरम् शा
तातपप्रोक्ते मूकोभ्रातृवधाद्भवतस्येयंनिष्कृतिःस्मृता तेन
कार्यविशुद्ध्यर्थंयतिचांद्रायणत्रयम् व्रतांतेपुस्तकंदद्यात्स्व
र्णपलसंयुतम् इमंमंत्रंसमुच्चार्यब्राह्मणेतेविसर्जयेत् य
तिचांद्रायणलक्षणंकृच्छ्रप्रकरणेपललक्षणंपरिमाणप्रकर
णे इमंमंत्रंसमुच्चार्यपुस्तकंदद्यादित्यन्वयः तमेवदानमंत्रमा

ह सरस्वति जगन्मातः शब्दब्रह्माधिदेवते दुष्कर्मकारिणं पापं
रक्ष मां परमेश्वरि इति मूकत्वहरम् अथ मूकत्वहरं तिलपद्मदानं
वाग्गुप्ताणे स्वरोपघाती वाचां च हर्ता मूकः प्रजायते वक्ष्यामि
तत्प्रतीकारं येन संपद्यते सुखम् वाचोहर्ता गुर्वज्ञा मंतरा वेदा
दियाद्रीवा मूकहर्ता च कुर्यात्स्वर्णमयं पद्मं पलार्धेन तदर्धतः
अथवापि विभवात्समस्यापि वित्तशाठ्यं न कारयेत् तदर्धतः पलार्धेन
त्वर्धः पलस्वरूपं वक्ष्यमाणे ढकस्वरूपं परिमाणप्रकरणे रक्त
वस्त्रेण संवेष्ट्य ताम्रपात्रे परिक्षिपेत् ताम्रपात्रपरीमाणं पला
नामष्टकं विदुः पीतवस्त्रेण संवेष्ट्य पात्रं तत्र विनिक्षिपेत् आढ
कद्वितोयोन्मानेन तिलराशौ प्रयत्नतः उपचारैः षोडशभिराचार्यः
सर्वशास्त्रवित् रक्तचंदनपुष्पाद्यैर्मंत्रेणानेन पूजयेत् मंत्रमा
ह ब्रह्मणस्त्वं नमस्तुभ्यं विष्णोरमिततनाभिज अतिप्रीतिकरभा
नोस्तथा रुद्रस्य चैव हि पूजां मम गृहाणात्वं सर्वक्लेशविनाशक
पूजानंतरं कर्तव्यमाह आग्नेय्यां दिशि वै होमः कर्तव्यो मंत्रपूर्वकः
समिदाज्यतिलैश्चैव सावित्र्याष्टशतेन तु सामिद्धोमं प्रकुर्वीत स
र्वरोगोपशांतये आज्यहोमश्च कर्तव्यः स्वित्रमित्यनयार्चा ति
लानां यत इंद्रेति व्याहृतीभिरथापि च अग्नेरुत्तरदिग्भागे कलश
स्थापनं भवेत् पूर्वोक्तेन विधानेन चाभिषेकादि कारयेत् प्रणी
तमोक्षपर्यंतं कर्म कृत्वा विधानतः तस्मैडनवते पद्मं दद्यात्स्वत्वा
चनमुखम् देवानामपि सर्वेषां यतस्तत्प्रीतिकारणम् विशेषतो

म॰ ब्रह्मणश्च समस्तत्वात्महेश्वरोऽपि यस्माग्वाचां निरोधेन वैव्रत्यं मम देह
क॰ जम् स्वरोपघात जंतीव्रंदुःखरोगकरं तथा तत्सर्वं नाशयं त्वय
ब्रह्मविष्णुशिवाग्रयः त्रिदशेशादयो देवा हविष्यं तत्तथा भुवि
एवं कृत्वा ततस्तस्मा आचार्यायातिभक्तितः इदं तस्मै गुरुब्रह्मस्व
रमेदाग्निरुच्यते एवं पद्मोद्भवः प्राह नारदाय महात्मने आग्नेय्यां
दिशि इत्यादि पद्मस्थानप्रदेशाद् आग्नेय्यां समिद्धोमे सावित्र्या शत
होमंत्रः स च परिभाषायां समिधश्च यज्ञियाः आज्यहोमे चित्रं
देवानामिति मंत्रः अस्य कुत्स ऋषिः सूर्यो देवता त्रिष्टुप् छंदः
आज्यहोमे विनियोगः चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य
वरुणस्याग्नेः आप्रा द्यावापृथिवी अंतरिक्षं सूर्य आत्मा जगत
स्तस्थुषश्च तिलहोमे यत इंद्रेत्यनया व्याहृतिर्वा भवेत् यत इंद्रे
त्यस्याः भर्गो देव ऋषिः इंद्रो देवता बृहती छंदः तिलहोमे विनि
योगः यत इंद्र भयामहे ततो नो अभयं कृधि मघवं छग्धि तव त
न्न ऊतिभिर्वि द्विषो विमृधो जहि व्याहृतीनां संख्यादि नवग्रह
हेहोमसंख्या च प्रत्येकमष्टोत्तरशतं सहस्रमयुतं वा सर्वौक्ते
ति अभिषेकप्रकरणोक्तविधानेन तच्च नवग्रहशांतिप्रकरणे
प्रणीतमोक्षपर्यंतमिति प्रणीतपात्रस्योदकविसर्जनपर्यंतं क
र्मस्वशाखोक्तविधानात्कृत्वेत्यर्थः देवानामपि सर्वेषामित्यारभ्य
हविष्यं तत्तथा भवीत्यंतः पद्यदानमंत्रः इति सकलतत्त्वातिलप
प्रदानम् अथ सकलदानफलहरम् कर्मविपाकसंग्रहे वेदंवी

धर्मशास्त्रं वा विक्रीणीयाद्धि यो नरः अधीतं तस्य नश्यति जिह्वा
याः स्खलनं भवेत् अपरिस्फुटवक्ता वा जिह्वायां ब्रणवान्भवेत्
कृच्छ्रातिकृच्छ्रौ कुर्वीत चान्द्रायणमथापि च सूक्तं नामशिव
णीं त्वं जपेत् स्तवा श्रुतत्रयम् दद्याद्धिरण्यं विप्रेभ्यो भोजनं च स्व
शक्तितः वेदं वा धर्मशास्त्रं वा विक्रीणीयादिति भक्तकाध्याप
क इत्यर्थः कृच्छ्रादिलक्षणानि कृच्छ्रप्रकरणे दर्शितानि एता
नि गुरुलघुभावेन समस्तानि व्यस्तानि वा योज्यानि नामशिव
णीमिति ह्रीं स्वनस्फोटहरे ऽभिहितम् इति स्खलद्वाकत्वहरम्
अथ स्खलद्वाकत्वहरम् शातातपप्रोक्ते शुकशारिकयोर्वा
तान्नरः स्खलितवाग्भवेत् सच्छास्त्रपुस्तकं दद्यात्स विप्राय स
दक्षिणम् सच्छास्त्राणि वेदाविरुद्धानि मीमांसादीनि अत्रापि
पुस्तकदानेन मूकहरत्वोक्तो मंत्रोऽध्यायः इति स्खलद्वाकत्वहरम्
अथ वाग्मूकत्वहरं सरस्वतीदानम् तत्र वायुपुराणे वाग्विरो
धे गुरोः कृत्वा भवेन्मूकत्वाङ्नरः तस्य वक्ष्ये प्रतीकारं दानेन त
द्विभाषितम् पलेन च तदर्धेन तदर्धेनाथवा पुनः सरस्वत्याः स्व
प्रतिमां कुर्याद्भुजचतुष्टयम् वरदं चाक्षसूत्रं च बिभ्रतीं दक्षिणे
करे पुस्तकं चाभयं वामे दद्यान्नेहंसवाहनम् अतिशुभ्रेण रौप्ये
ण कूटस्वर्णेन वासनम् प्रकुर्वीत यथासम्यक्सौवर्णोपमश्रुत
नम् कूटस्वर्णेन ताम्रादिमिश्रितेन रौप्येण कूटस्वर्णेन वास
नपीठं विधाय तस्योपरि सौवर्णोपमं न्यसेदित्यर्थः पद्मस्योप

म· क·

195

तिसंस्थाप्य देवीं वागीश्वरीं पराम् शुक्लाम्बरसमायुक्तां शुक्लव
र्णेन संयुताम् वागीश्वर्या हि मंत्रेण पूजयेच्छ्वेततंदुलैः श्वेतपु
ष्पैः श्वेतगंधैः सत्कृत्य विधिपूर्वकम् वागीश्वर्या हि मंत्रेणेतिय
द्भगवद्दत्त्या विचेतनानिशतिक्ररगृह्यं वागीश्वरीमंत्रः सद्योन्माद
वाग्वरे दर्शितः ब्राह्मणः सर्वशास्त्रज्ञः तेन होमं समाचरेत्
पायसं जुहुयादष्टशतं शालिमयं तथा जुहुयात्समिधश्चापि
तथाज्यं च तिलानपि कृत्वाधिवासनामेनामाचार्याय निवेद
येत् संस्पृश्य ब्राह्मणं सम्यग्वस्त्रालंकारभूषणैः मंत्रेणानेन वि
धिवत्प्राङ्मुखोपवहृदङ्मुखः यावन्मे ब्रह्मणो देवी या सा वागी
श्वरी परा ब्रह्मविष्णुशिवस्थान्यैः पूजिता सर्ववन्दिता तस्याम
वतदानेन दत्तेनानेन वा सदा वाग्विरोधं गुरोः कृत्वा यन्मे गद्गद
भाषणम् तत्सर्वं विलयं यातु संत्राण्मीत्वं लोकपालिनी अनुज्ञा
प्य ब्राह्मणं तं स्वयं भुंजीत बंधुभिः अष्टशतमित्यष्टाधिकशतं
कृत्वाधिवासनामित्यनेन रात्रौ रात्रौ जागरणं लभ्यते अतः पूर्वे
द्युरात्रावधिवासस्य जागरणं विधाय प्रातः पुनः पूजयित्वा हो
मानंतरं ब्राह्मणाय निवेदयेत् यावन्मे इत्यारभ्य लोकपावनीत्यं
तो दानमंत्रः इति गद्गदत्वहरसरस्वतीदानम् अथैडमूकत्वह
रम् शातातपप्रोक्ते विद्यापुस्तकहारी च पडमूकः प्रजायते
इतिहासशतं दद्याद्ब्राह्मणाय सदक्षिणम् गुर्वाज्ञामंतरेणावेद
यित्वा विद्याहारी उत्पत्तिप्रभृति दोषप्रतिबद्धश्रोत्रेंद्रियस्ताद

शवाग्निंद्विय्यैडाम्बकः इतिहासशतेमहाभारतम् उल्कदान
मंत्रस्तम्बकत्वहरेदर्शितः इत्येडाम्बकत्वहरम् महार्णवाख्येमहि
तेप्रवन्येमान्यात्तनाम्नोमदनोत्मजस्य सत्कर्मरत्नावधिरेकविं
शस्तेगमस्तरंगोयमगादगाधः २१ अथनेत्ररोगहराणि कर्मवि
पाकसमुच्चये परदारिशिविज्ञातेनमिषंमिथ्याचरेणच कामात्पर
स्त्रियंदृष्ट्वानेत्ररोगीभवेन्नरः चांद्रायणंपराकंचपंचाशद्विप्रभोज
नम् कुर्याद्वयःसुपर्णेतिचरुणासर्पिषातथा अष्टोत्तरसहस्रंतत
जुहुयाद्रोगशांतये वर्चोदाअसिमंत्रंतजपेदाज्यसकांचनम्
दद्याद्विप्रायविधिवन्नेत्ररोगःप्रशाम्यति मिषंमिथ्याचरेमिषंमि
थ्याचरणम् चांद्रायणादित्रतणंप्रायुक्तमेव विप्रभोजनमिति
भोजनेप्यकृत्प्रथानेप्युक्तामेदद्यान्नेत्ररोगप्रशांतयइतिब्राह्मणोडग्रा
णस्मरणात् वयःसुपर्णइत्यनयर्चाचरुघृताभ्यांपृथक्पृथगष्टो
त्तरसहस्रंजुहुयात् इयंचऋक्कुम्भलप्रकरणेदर्शितावर्चोदाअ
सीतिमंत्रोपितत्रैवजपसंख्यात्वाध्यनुसारेणसहस्रायुतं
वाकल्प्या सकांचनाज्येस्वरूपंसमीत्यब्राह्मणायदद्यात् आज्य
वीक्षणमंत्रस्तुकादम्बलहरेदर्शितः इतिनेत्ररोगहरम् अथनेत्र
द्वयहरम् कर्मविपाकसंग्रहे दस्रातिभ्यांप्रहृतंनेत्रमेघुनंयोनिरी
क्षते सनेत्रद्वययुक्तःस्याद्दस्रोभ्यामितिमंत्रतः जपहोमौचकुर्वी
तशास्त्राब्राह्मणभोजनम् सहस्रकलशस्नानंरवेःकुर्याद्विजो
त्तमः नेत्रद्वययुक्तइतिसाक्षात्स्वयंवा अतिप्रसुरतरहाधिकावा

म·
क·

196

इयमित्यभिधीयते अस्तीभ्यामिति इयंमृगमंत्रः इयंचऋक्परि
भाषायांरोगशांतिमादानविधोप्रदर्शिताः जपहोमसंख्याव्याधि
गुरुलघुभावेनाष्टोत्तरशतायुतोत्तकल्प्या जपहोमौचेतिचश
ब्देनपुनरग्निश्चसूर्यादित्यस्यमंत्रस्यजपहोमः समुच्चीयते अयंच
मंत्रो यन्मआत्मनइतिमिन्दामन्त्रस्यप्रस्तावेकूष्मांडहोमेप्रदर्शि
तः जपहोमयोःसंख्यानुपूर्वोक्तैव रवेःसहस्रस्नानम् महासौरे
णकुर्यात् महासौरंनामसूर्यदैवत्याऋचःसूक्तानिच एतेषामा
वीरिपरिभाषायां इदंस्नानंचसूर्यमंडलस्थघृतैर्वाकुर्यात् स्ना
नीयद्रव्यंचदुग्धाज्यमधिक्षीरगुगुलपंचतीर्थोदकानियथाशास्त्रमुपपन्ना
नि इतिनेत्ररोगहरम् अथप्रकारांतरेणनेत्ररोगहरम् शाता
तपप्रोक्ते चूतचौरस्तुपुरुषोजायतेनेत्ररोगवान् उपोष्यसंप्रद
द्यात्देचूतपेत्रंविधानतः चूतपेत्रविधिश्चतत्ररोगहरे इतिप्रका
रांतरेणनेत्ररोगहरम् अथान्धत्वहरम् अन्धत्वंनामप्रतिबद्धदृ
ष्टित्वमुन्मादितनेत्रत्वंनक्तांधत्वंवाशातातपप्रोक्ते पितृहाचेतना
हीनोमातृहान्धःप्रजायते नरकांतेप्रकुर्वीतप्रायश्चित्तंयथाविधि
चेतनाहीनोनिश्चेष्टोनिर्बुद्धिश्च अस्यापिवक्ष्यमाणमेवप्रायश्चित्तं
रोगानिष्कृतिरेतः नरकांतेअन्धःप्रजायतेइत्यन्वयः प्रायश्चित्तमा
ह प्राजापत्यादिकुर्वीतविंशत्यासविधानतः अतोनेकारयेत्ना
वेस्वर्णपलसंख्यया संभेरोगमयंचैवताम्रपात्रेचसर्ववत् प
लसंख्यापलेनेत्यर्थः संभोपिपलेनैवसर्ववदिति पलैश्चतुर्भि

द्वीभ्यां वा ताम्रपात्रं भवेन्मानमिति परिभाषोक्तप्रकरणे इत्यर्थः
पलत्रयपात्रं वक्ष्यमाणवासुदेवप्रतिमास्थापनार्थं पलस्वरूपं प
रिमाणप्रकरणे तथा वक्ष्यमाणनिष्कस्वरूपं मा परिभाषायामु
क्तं हेमनिष्केण कर्तव्यो देवः श्रीवत्सलाञ्छनः सडूकूलेन संवेष्ट्य
पूजयेत्तं विधानतः नौका द्विजाय दातव्या सर्वोपस्करसंयुता
नौकेत्युपलक्षणं स्तम्भो विष्णुप्रतिमा च दातव्या सोपस्करेति
उपस्करो नौकादण्डः सोपि सौवर्ण एव तं वासुदेवं विधानतः पू
जयेदित्यर्थः पूजाविधानं तु परिभाषायामग्निविधानस्य पूर्वरूप
स्तक्तविधावस्माभिः प्रदर्शितम् अथायं क्रमः ताम्रपात्रे वासुदे
वमूर्तिसंस्थापनस्य पुरस्तात्त्वं स्तम्भं चोपरि तस्मिन् वासुदेवं सर्वो
क्तप्रकारेण समभ्यर्च्य नौकादिसहितां वासुदेवप्रतिमां ब्राह्मणा
य दद्यादिति दानमन्त्रमाह वासुदेव जगद्वंद्य सर्वभूताशयास्थित
पातकार्णवमग्नं मां तारयाश्रिततारक इत्युदीर्य प्रणम्याथ ब्रा
ह्मणं तं विसर्जयेत् इत्युदीर्य मन्त्रं पूर्वोक्तं प्रतिमादिकं दत्वा प्रण
म्य विसर्जयेदित्यर्थः अन्येभ्योपि यथाशक्ति विप्रेभ्यो दक्षिणां दि
श्येत् इत्यन्धत्वहरं चेन नाहीनत्वहरं च अथ नीललोचनत्वहरं
शाकहारी च पुरुषो जायते नीललोचनः ब्राह्मणाय प्रदातव्यं
महानीलमणिद्वयम् इति नीललोचनत्वहरम् अथ कापिला
त्वहरम् शातातपप्रोक्ते रीतिहा कापिलाक्षः स्यात्तु पीष्यादिव
सद्वयम् रीतेः पलशतं दद्यादलंकृत्य द्विजातये रीतिर्नाम ताम्र

म· क

197

प्रकृतिकोधातुविशेषः पित्तलकमित्युच्यते एतत्स्वरूपं परिमा
णप्रकरणे इतिकपिलत्वहरम् अथमन्ददृष्टित्वहरम् क
र्मविपाकसंग्रहे अक्षिः सत्य आदित्यं पश्येदुद्यंतमेवच मध्यं
गतमथास्तं च यांतमुद्धिरूपवच नक्षत्राणि यथा चेद्दं समभवे
न्मंददृष्टिभृत् अत्रनिष्कृतिः कर्मपुराणे घृतेनचरुणानेत्रर
श्मिहीनो हुताशन जुहुयादयुतं सम्यगिति शास्त्रविनिश्चितः
दद्याद्दत्तं चैव रक्तवाससी व्याधिशांतये रोगाधिके चरुघृताभ्यां
प्रत्येकमयुतं जुहुयात् रोगाल्पत्वे र्धं चरुणा घृतेनेति मिलित्वायु
तसंख्या होमणीया होममंत्रस्तूद्यन्नद्यमित्रमह इत्यृचः स च परि
भाषायां रोगप्रतिमादानविधौ प्रदर्शितः अथ दानं ब्राह्मणेभ्यः
स्वशक्त्या वाससी इति वृद्धवचनात् त्रिभ्यो न्यूनेभ्यः इति मन्ददृष्टि
त्वहर अथ तिमिरहरम् कर्मविपाकसमुच्चये देवद्विजगृहे ती
र्थे पुण्यस्थाने च संस्थितम् प्रदीपं भंजयित्वा तु तिमिरव्याधिमा
न्भवेत् रूपप्रकाशकैर्मंत्रैरभिमंत्र्य जलं ततः गात्राणि प्रोक्षये
त्तस्मान्मुक्तो भवति किल्बिषात् सहस्रकलशस्नानमीश्वरस्या
पि कारयेत् देवद्विजगृहे इति देवगृहे द्विजगृहे पुण्यस्थाने पु
राणश्रवणस्थाने च तद्व्यापारे च रूपप्रकाशकैर्मंत्रैर्गुणवचने
न रूपशब्देन रूपवचनेन प्रकाशवानादित्यो लक्ष्यते अतः सूर्य
प्रकाशकैर्मंत्रैर्जलमभिमंत्र्य गात्राण्यंगानि नेत्रप्रधानानि पु
ण्यस्थितानि प्रोक्षयेद्यावद्रोगनिवृत्तिः एतदुक्तं भवति सौरमंत्रै

सम्यतमेनसलिलमशेषंरशतायाहत्यास्त्रमिमंचितंतेननेत्र
प्रथानेत्रयुवंप्रक्षालयेदिति रूपप्रकाशकैरित्यस्यान्योर्थः रूप
प्रकाशकैर्नेत्रगततेजःप्रकाशकैःसौरैरन्यैस्त्रमंत्रैर्जलमभिमं
त्र्यतेननेत्रप्रथानेत्रयुवंप्रक्षालयेदिति तत्रैकोमंत्रः उदुत्यन्त्र
चःसौरःपरिभाषायां अन्यश्चमहासौरःपरिभाषायामेवनिरू
पितःतथापुनरग्निश्चसत्रागादितिकृष्मांडहोमेमिन्द्रमंत्रयोर्द
र्शितः वर्चोमेदेहीतिवयःसुपर्णातिमंत्रोनयनस्थलेदर्शितो
एवंचमंत्रोविकल्पेनयाल्यः एतांश्चविकल्पेनेतिन्यायात् इति
तिमिरहरम् अथाक्षिवेदनाहरंगरुडदानम् पद्मपुराणे परे
ष्मामाक्षिरोधेनजायतेक्षिवेदना वक्ष्यामितत्प्रतीकारंस्वल्प
एणभाषितंउरा एलेनकारयेद्धेम्नागरुडंविष्णुवाहनम् राज
तौचतथाकार्यौपक्षौरत्नैश्चविस्तृतौ कर्तव्यंताद्विगलेमाणि
क्याभ्यांप्रकल्पितम् पादयोःस्वर्णकटकेरत्नाभ्यांपरिकल्पयेत्
रत्नाभ्यामितिरत्नयुक्तकटकद्वयंकुर्यादित्यर्थः ग्रैवेयकंस्वर्ण
मयंग्रीवायामपिविन्यसेत् नासिकायांचवैडूर्यंमौक्तिकैःपरि
कल्पयेत् मौक्तिकैर्युक्तंवैडूर्यमित्यर्थः वस्त्रैर्नानाविधैर्विद्रुम
लंकृत्यतथाकृतम् स्थापयेत्पुरतोविष्णुप्रीत्यर्थंतत्स्वगायिपम
वेदवेदांगकुशलंवेदविद्याविशारदम् गन्धपुष्पाक्षतैर्वस्त्रैह
णीतब्राह्मणोत्तमम् पूजयेत्स्रुचिर्भूत्वागंधपुष्पाक्षतादिभिः
होमश्चात्रकर्तव्योमंत्रैस्तद्वाचकैःशुभैः यद्वागरुडगायत्र्या

म॰ क॰ 198

समिदाज्यतिलादिभिः मन्त्रैः प्रतिष्ठा कार्या तत्स्वगृह्योक्तविधा
नवत् विस्रोपुरतश्चेति विस्रालये विस्रोः पुरतः स्थापयित्वा प
तत्कर्म कुर्यादित्यर्थः अथवा सालग्रामस्य पुरतः मन्त्रैस्तद्वाचकैरि
ति गरुडप्रकाशकैर्मन्त्रैरिति बहुवचनम् स्वस्वशाखागतमन्त्रो
पलक्षणार्थं तत्रैको मन्त्रो मनोजवाश्रयमानश्चस्य सुनेमो भार्ग
व ऋषिः सुपर्णो देवता अनुष्टुप् छन्दः विहितार्थे विनियोगः
मनोजवा अश्रयमाना आयसीमतरत्पुरम् दिवं सुपर्णो गत्वाय सो
मं वज्रिण आभरत् गरुडगायत्र्या व्यास ऋषिः गायत्री छन्दः
गरुडो देवता विहितार्थे विनियोगः पक्षिराजाय विद्महे स्वर्ण
पक्षाय धीमहि तन्नो गरुडः प्रचोदयात् समिदाज्येति आदिश
ब्देन चत्वारो व्रीहयो गृह्यन्ते होमसंख्या च शतिद्वयमष्टोत्तरम
ष्टमेव संपूज्य दत्वा च किं कुर्यादित्याह ब्राह्मणवाचनं कार्यं
ब्राह्मणैर्वेदपारगैः तस्मैद्दत्तवतीदद्याच्छोरिष्टीत्यर्थमाहत्ताः
भक्त्या संपूज्य विधिवत् कर्णेरकटकादिभिः मन्त्रेणानेन विधिव
त्प्राङ्मुखायोदङ्मुखः दानमन्त्रमाह देवदेवजगन्नाथल
क्ष्मीप्रियपरायण वाहनस्य प्रदानेन हरकर्मविपाकजम्
व्याधिरोगं जगन्नाथ नारायण जगन्मय पुण्यं च परत्रेवापि
वान्तरकमपापिवा रक्तं वाप्यथरक्तांत्तं तथाईदमपापिवा
ततो विसृज्य विप्रेन्द्रं शिष्टैरिष्टैश्च बन्धुभिः स्नात्वा विप्रान्भोजयि
त्वा सुखी भवति मानवः दानादनन्तरं स्नात्वा ब्राह्मणवाचनं वि

था याज्यावेष्टणेऽकृत्वा विप्रान्भोजयित्वा बंधुभिः सह भुंजीतेत्य
र्थः प्रणपाहवचनेकार्यमित्यत्रैवमाविहितमाज्यावेष्टणंतत्र
स्तोऽप्रणाणेविहितम् अतिसंभवेरोगाणामाज्यंकनकसंयुतं
दद्यात्क्रिमायविधिवद्रोगस्यापनुत्तयेइति आज्यवीक्षणमंत्रस्तु
कटिशूलहरेदर्शितः इत्यातिरोगहरणकरुद्दानम् अथनष्टको
ष्ठहरगोपालदानम् बाले नष्टकोष्ठंजायतेतस्ययोगवान्नय
नहृये करोतिशूलप्रक्षेपंतस्यवक्ष्यामिनिष्कृतिम् श्रीविष्णोर्गो
पवेषस्ययथाशक्त्याचभक्तितः सवर्णेनप्रतिकृतिंवेणुवादन
तत्पराम् बर्हापीतकसंयुक्तां द्विभुजांभुवनोत्तमाम् कारयित्वा
शुभाकारांप्रक्षाल्यशुचिवारिणा वस्त्रेणावेष्टयित्वाचगंधमाल्यैः
समर्चयेत् तंडुलोपरिसंस्थाप्यदेवंशास्त्रानुसारतः आचार्यःस
र्वशास्त्रज्ञोवेदवेदांगपारगः पूज्यांसमूलमंत्रेणकुर्याद्देवस्यभ
क्तितः शास्त्रानुसारतोगंधमाल्यैःसमर्चयेदित्यन्वयः पूज्याचमूल
मंत्रेणेति मूलमंत्रोद्धारस्तोकस्यमंत्रशास्त्रे कृपामंत्रगतास्ताया
गवर्णयत्वमध्यगाः गोपीजनस्यकारास्युःभारवास्ताहारस्मरा
दिकाः उद्धृतमंत्रः क्लींकृष्णायगोविन्दायगोपीजनवल्लभायस्वा
हाइति अस्यनारदऋषिः गायत्रीछन्दः गोपीवल्लभोदेवताभि
ष्टसिद्धयर्थेविनियोगः होमंचतत्रकुर्वीतसमिदाज्यतिलैरपि इदं
विष्णप्रतद्विस्वविष्णोत्रकमितिक्रमात् मंत्राश्चेत्योक्तमंत्रेणचा
ग्नेःसंस्थापनंभवेत् जुहुयान्मूलमंत्रेणविधिसम्पादितंचरुम्

म॰ क॰

१९९

प्रणीतामोक्षपर्यंतंकृत्वादेवंप्रपूजयेत् देवस्यदद्यान्नैवेद्यंहविः
सर्वंसमंततः इदंविष्ण्वादयोमंत्राःक्रमेणसमिदादिहोममं
त्राभवंतीत्यर्थः समिद्धोमानंतरंप्रवैकेनमूलमंत्रेणविधिस
म्पादितंस्वगृह्योक्तप्रकारेणपक्वंचरुंकृत्वापश्चादाज्यादिहोमः
कार्यः होमसंख्याप्रतिद्रव्यमष्टोत्तरशतंइदंविष्णुरित्यस्यर्षादि
नवग्रहयज्ञप्रकरणेदर्शितम् प्रतद्विष्णुविष्णोर्नुकमित्यनयो
र्दीर्घतमाऋषिःविष्णुःदेवता त्रिष्टुप्छंदःक्रमेणाज्यतिलहो
मयोर्विनियोगः प्रतद्विष्णुस्तवतेवीर्येणमृगोनभीमःकुचरो
गिरिष्ठाः यस्योरुषुत्रिषुविक्रमणेष्वधिक्षियंतिभुवनानिविश्वा
विष्णोर्नुकंवीर्याणिप्रवोचंयःपार्थिवानिविममेरजांसि योअ
स्कभायदुत्तरंसधस्थंविचक्रमाणस्त्रेधोरुगायः एवंहोमंविधाय
स्वगृह्योक्तमार्गेणप्रणीतामोक्षपर्यंतंकर्मकृत्वापुनरपिदेवं
गोपीजनवल्लभमूर्तिंप्रपूजयेत् प्रकृष्टंयथातथापूजयेत् अ
स्यांपूजायांहोमार्थंसम्पादितंहविर्नैवेद्यमन्यच्चसम्पादितंसर्व
मपिपक्वान्नादि एवंनैवेद्यंदत्वा पश्चात्समंततोदेवमभितःप
रितोदद्यात् अष्टभ्यादिक्षुबलिमपहरेदित्यर्थः सर्वोक्तकर्मान्त
रंकर्तव्यमाह ततःशुक्लाम्बरधरःशुक्लमाल्यानुलेपनः दद्या
द्गोमीपर्वसुवत्सःप्रतिमांतांसदक्षिणाम् मंत्रेणानेनविधिवत्स
मभ्यर्च्यायभक्तितः दानमंत्रमाह गोविन्दगोपीजनवल्लभेश
कंसासुरघ्नत्रिदशेशवंद्य गोवर्धनाद्रिप्रवरैकहस्तसंरादि

ताशेषगवामनीक गोचरत्वं जातिनिरोधनेनजाताविमोघं
ममनाशयाशु त्वदीयदानेंहिसहस्त्रपंनकोध्यमेतत्समपाक
रोत एवं कृत्वाप्रतीकारंगोपदेशस्यदानतः अचिरादेवहिस्वस्थी
जायतेनात्रसंशयः इतिनक्रोध्यहरगोपालदानम् अथकेकरा
त्वहरम् शातातपप्रोक्ते नरस्तौतिहतेचैवजायतेकेकरेक्षणः
दद्याद्रत्नमयींधेनुं सतत्सातकशांतये तारत्वंमर्गादनःरत्नधेनु
विधिरत्नत्रयरोगहरेरत्नधेनुप्रसंगे इतिकेकरात्वहरम् अथ
पिंगलेक्षणत्वहरम् मार्जारंनिहतेचैवजायतेपिंगलेक्षणः तेन
वैडूर्यरत्नानिदातव्यानिसशक्तितः रत्नानीतिबहुवचनंचित्वा
न्यनत्वप्रतिपादनार्थम् सशक्तितइतिविषापिरत्नेषुमूल्यगता
स्पत्वेबहुत्वद्योतनार्थंत्रिभ्योप्यधिकसंख्याद्योतनार्थंच इतिपिं
गलेक्षणत्वहरम् अथनेत्ररोगहरतर्पणम् अत्रायंवैदिकमांत्रि
कसम्प्रदायः तद्यथा उद्यन्नद्येत्यर्धर्चे पादर्धर्चेशोर्धर्चेशः अर्क
छः सार्धर्चेशः अर्चोनत्रिः इतिप्रवोक्तमार्षोयत्रसौकार्योर्थमभि
धीयते उद्यन्नद्येतित्र्यृचस्यकाण्वः प्रस्कण्वऋषिः सूर्योदेवता
अनुष्टुप्छंदः तर्पणेविनियोगः ॐउद्यन्नद्यमित्रमहः ॐसूर्यंत
र्पयामि ॐआरोहन्नुत्तरांदिवं ॐसूर्यंत० ॐहृद्रोगंममसूर्य०
ॐसूर्यंत० ॐहरिमाणंचनाशय ॐसूर्यंत० ॐशुकेषुमेहरिमा
णं ॐसूर्यंत० ॐरोपणाकासुदध्मसि ॐसूर्यंत० ॐअथोहरि
द्रवेषुमे ॐसूर्यंत० ॐहरिमाणंनिदध्मसि ॐसूर्यंत० ॐउदगा

म०
क०

दयमादित्यो ॐ सूर्यं त० ॐ विश्वेन सहसा सह ॐ सूर्यं त० ॐ द्विषं
तं मह्यं रन्धयन् ॐ सूर्यं त० ॐ मो अहं द्विषते रधम् ॐ सूर्यं तर्प०
अथार्धर्चशः ॐ उद्यन्नद्य मित्रमह आरोहन्नुत्तरां दिवम् ॐ सूर्यं
तर्पयामि ॐ हृद्रोगं मम सूर्य हरिमाणं च नाशय ॐ सूर्यं तर्प०
ॐ शुकेषु मे हरिमाणं रोपणाकासु दध्मसि ॐ सूर्यं त० ॐ अथो
हारिद्रवेषु मे हरिमाणं नि दध्मसि ॐ सूर्यं त० ॐ उदगादयमादि
त्यो विश्वेन सहसा सह ॐ सूर्यं त० ॐ द्विषन्तं मह्यं रन्धयन् मो अ
हं द्विषते रधम् ॐ सूर्यं तर्पयामि इत्यर्धर्चशः अथ पच्छः ॐ
उद्यन्नद्य मित्रमह आरोहन्नुत्तरां दिवम् हृद्रोगं मम सूर्य हरि
माणं च नाशय ॐ सूर्यं तर्प० ॐ शुकेषु मे हरिमाणं रोपणाका
सु दध्मसि अथो हारिद्रवेषु मे हरिमाणं नि दध्मसि ॐ सूर्यं त०
ॐ उदगादयमादित्यो विश्वेन सहसा सह द्विषन्तं मह्यं रन्धयन् मो
अहं द्विषते रधम् ॐ सूर्यं त० इति पच्छः अथ सार्धर्चः ॐ उद्यन्न
द्य मित्रमह आरोहन्नुत्तरां दिवम् हृद्रोगं मम सूर्य हरिमाणं च
नाशय शुकेषु मे हरिमाणं रोपणाकासु दध्मसि ॐ सूर्यं त०
अथो हारिद्रवेषु मे हरिमाणं नि दध्मसि उदगादयमादित्यो वि
श्वेन सहसा सह द्विषन्तं मम रन्धयन् मो अहं द्विषते रधम् ॐ सू
र्यं त० इति सार्धर्चशः अथ ऋचेन त्रिः ॐ उद्यन्नद्य मित्रमह आ
रोहन्नुत्तरां दिवम् हृद्रोगं मम सूर्य हरिमाणं च नाशय शुके
षु मे हरिमाणं रोपणाकासु दध्मसि अथो हारिद्रवेषु मे हरिमा

४९९
200

णं निवपधामि उदगादयमादित्यो विश्वेन सहसा सह द्विषंतं मम
रंधयन्मो अहं द्विषते रधम् सूर्यं तर्पयामि एवं द्विः त्रिः अस्य सक
लस्यापि तर्पणप्रयोगस्याध्यवसायेण द्वाविंशतिरष्टोत्तरश
तमित्याद्याहुतिः कल्पनीया अत्र तर्पणं रक्ताक्षतावारक्तपुष्पा
णि ग्राह्याणि अयं च तर्पणप्रकारो न केवलनेत्ररोगहरः अपित
ज्वरादिहरोपि इति नेत्रादिरोगहरतर्पणम् अथ क्रिमिलोच
नहरम् शातातपप्रोक्ते उदक्यावीक्षितं भुक्त्वा जायते क्रिमिलो
चनः गोमूत्रयावकाहारः सप्तरात्रेण शुध्यति गोमूत्रयावकाह
रं कृच्छ्रप्रकरणेभिहितम् इति क्रिमिलोचनहरम् अथ कम
लाहरगरुडदानम् वृद्धगौतमः कामलीभक्तचौरः स्यात्तस्य
वक्ष्यामि निष्कृतिम् कुर्यात्तु पक्षिराजानं विष्णोर्वाहनमुत्तमम्
सुवर्णेन यथाशक्त्या पक्षयोर्मौक्तिकद्वयम् नासिकायां तथाव
ज्रं नेत्रयोश्च राजतम् एवं कृत्वा गरुत्मन्तं तु तं द्रोणोपरि न्यसेत्
द्रोणलवणपरिमाणं प्रकरणे द्रष्टव्यम् श्वेतवस्त्रेण संवेष्ट्य श्वे
तमाल्यैः समर्चयेत् सर्वशास्त्रार्थतत्त्वज्ञो वैष्णवो धर्मपाठकः
ब्राह्मणः सर्वविन्नो भक्त्या यजमानेन भक्तितः उपचारैः षोडशभि
र्द्विजमभ्यर्चयेत्तथा द्विजं पक्षिणं गरुत्मन्तमिति यावत् अर्चि
तो ब्राह्मणः श्वेतवस्त्रादिभिर्द्विजमभ्यर्चयेदित्यन्वयः आग्नेय्यां
दिशि होमश्च कर्तव्यः स्थण्डिले शुभे समिदाज्यतिलैस्तत्र पाला
शः समिधः स्मृताः मंत्रो गरुडगायत्री समिदाज्यहुतौ भवेत्

म०
क०

तिलहोमो व्याहृतिभिस्ततः स्विष्टकृतं यजेत् । स्विष्टकृद्धोमः कर्त
व्यः स्वगृह्योक्तप्रकारेण तत्र कश्चन स्विष्टकृद्धोमप्रकारः कूष्माण्ड
होमे दर्शितः स्थापयेद्वरुणं कुंभं सितवस्त्रेण वेष्टयेत् । निक्षिपेत्तं
च रत्नानि मन्त्रिकां चापि रोचनाम् । अश्वस्थानाद्गजस्थानाद्वल्मीका
त्संगमाद्ध्रदात् । पंचत्वचः पल्लवानि क्षिपेत्तीर्थवारिणा । स्थापयेद्व
रुणं कुंभमिति । अत्र पाठक्रमो न विवक्षितः । अतो होमात्पूर्वं गरु
डध्वजन समय एव तदनंतरमैशान्यां दिशि कलशं स्थापयेत् ।
रोचना गोरोचना पंचत्वचः आम्राश्वत्थवटप्लक्षोदुम्बराणां पल्ल
वान्यपि तेषामेवास्मिन्कलशे नवग्रहयज्ञप्रकरणोक्तैर्वारुण
मंत्रैः वरुणाय नमः इति नाममंत्रेण वा वरुणमावाह्य समभ्यर्च
येत् । एवं गरुडध्वजा कलशस्थापनहोमानंतरं कर्तव्यमाह
तेनाभिषेकं कुर्वीत आपो हि ष्ठादिभिः क्रमात् । हिरण्यवर्णा इति
च पावमानेन चैव हि । आपो हि ष्ठा मयोभुव इति च हिरण्येत्याद्य
श्च मंत्राः परिभाषायां रोगप्रतिमादानविधौ । पवमानेन स्वादिष्ठ
येति सूक्तेन पवमानः सुवर्जन इत्यनुवाकेन च । तत्र स्वादिष्ठये
ति सूक्तं पांडुरोगहरं स्त्रीदाने द्रष्टव्यम् । पवमानः सुवर्जन इत्य
नुवाकस्तु गणहोमप्रकरणे एवमभिषेकानंतरं किं कार्यमित्या
ह ततः स्नातानुलेपी रोगी विष्णोर्वाहनमुत्तमम् । सदक्षिणाख्यदा
युक्तः प्रांजलिस्तु वोधयन्निवेदयेत् मंत्रेणानेन विधिवत्प्रांजलिस्तु वोध
यन्स्तुवद्भिः श्रीकृष्णपरमानन्दजगतः परिपालक सर्वजन्म

नि यत्पापं मम कौर्यं मया कृतम् तेन शमं च वैवर्ण्यं यन्मयात्यं
तदुःसहम् कामलोऽयमिमं देव तव वाहन दानतः विनाशाया
शु मे कुरुष्व जगतां पालकोऽसि एवं गरुडदानं तु कृत्वा मर्त्यः
सुखी भवेत् आचार्यं भोजयित्वा तु प्रणिपत्य विसर्जयेत् इति
कामलाहर गरुडदानम् अथ कमलारोगप्रतिमादानम्
तल्लक्षणं कर्मविपाकसारे पीताङ्गः कामलारोगः कलापीशु
मलान्वितः पूजाविधानं तु प्राग्युक्तमेव अथ साधारणेन नेत्र
रोगप्रतिमादानम् तल्लक्षणं तत्रैव अक्षोलि रोगलक्षणीरपा
शम्रहरदाभयः पूजादीतिकर्तव्यता कलापस्य परिभाषायां रो
गप्रतिमादानविधाने को देवता तत्रेत्यादिना दर्शितः ॥
महार्णवाख्ये महिते प्रबन्धे मान्धातृनाम्नो मदनात्मजस्य स
त्कर्मरत्नप्रकरे चितेऽस्मिन् द्वाविंशपद्यप्रमितस्तरंगः २२ अथ
नासिकारोगहरम् कर्मविपाकसंग्रहे लवणस्यापहर्ता च शी
र्णघ्राणो विपाणिकः वर्धिरस्ववांश्चैव जायते तस्य निष्कृतिः उप
युक्तं च सम्यग्जपेदष्टोत्तरायुतम् जुहुयाच्चरुसर्पिर्भ्यां रक्तवा
सांसि कांचनम् दद्याद्देवद्विजगवां कुर्यात्तज्जोऽस्य शान्तिकः उप
युक्तं च स्यादीदि परिभाषायां रोगप्रतिमादानविधौ होमोऽप्य
नेनैव मन्त्रेण होमसंख्या जपदशांशः चरुणा पृथक् सर्पिषा च
पृथक् वासांसीति बहुवचनात् त्रिभ्योऽन्यतानि दद्यात् कांचनं त
प्रसादेन देवद्विजगवां पूजा देवस्य स्वर्णादेः सवर्णातिल
शक्त्यनुसारेण देवद्विजगवां पूजा

म०
क

कादिभिः पूजा आदित्यस्य सदा पूजां तिलकं स्वामिनस्तथा
महागणपतेश्चैव कुर्वन्सिद्धिमवाप्नुयात् इति याज्ञवल्क्यस्मर
णात् स्वामी स्कन्दः द्विजपूजा स्रक्चंदनवासः सुवर्णादिभिः
गोपूजा आहारदानादिभिः इति नासिकारोगहरम् अथ वक्र
नासत्वहरम् शातातपप्रोक्ते कुक्कुटे निहते चैव वक्रनासः
प्रजायते तेन निष्कः प्रदातव्यो ब्राह्मणाय हिरण्मयः निष्क
स्वरूपं परिमाणप्रकरणे इति वक्रनासत्वहरम् अथ नासिका
रोगहरमूर्तिदानम् तल्लक्षणं चोक्तं प्रागुक्तेषु रोगेष्वित्यारभ्य मूल
रोगहरप्रकरणोक्तमेव पूजाविधानं त्वानंको देवतान्तरेत्या
दिना परिभाषायां रोगप्रतिमादानविधौ इति नासिकारोगहर
मूर्तिदानम् महार्णवाख्ये महति प्रबन्धे मान्यात्नाम्नोमद
नात्मजस्य सत्कर्मरत्नोपचिते गतोयं व्याख्यानस्य योविंशतयात
रंगः २२ अथ कर्णरोगहराणि कर्मविपाकसंग्रहे मातापि
तृगुरूणां हि देवब्राह्मणयोस्तथा शृणोति निन्दां तु ह्यायः क
र्णाभ्यां तस्य शोणितम् स्वयं च प्रस्रवत्यस्य शान्तिः कृच्छ्रं चरे
यात् हिरण्यपरकवस्त्राणां दानाद्ब्राह्मणभोजनम् जपाद्धोमा
च्च भवति सौरमन्त्रेण शाकिन इति सर्वत्र समन्वयन्ते अतः कृच्छ्र
मपि शक्त्यनुसारेण प्राजापत्यपराकचान्द्रायणादीनि ग्राह्या
णि तल्लक्षणानि च कृच्छ्रप्रकरणे दर्शितानि हिरण्यदानाद्य
पि स्वशक्त्यनुसारेण कुर्वीत जपहोमश्च सौरमन्त्रेणैवान्यत्र श

तामिकः कार्यः सौरमंत्रमथाग्नेयसूक्तमृचः अथ वाथादिने
त्रोरोगहरे दर्शितम् इतिकर्णश्रवणशोणितहरम् अथ कर्ण
क्रिमिरोगहरम् कर्मविपाकसमुच्चये सर्वाचारविहीनश्च
प्रेतश्राद्धाशनोद्भवः सम्भवेत्क्रिमिकर्णस्तु तत्पापस्यापनुत्तये
दद्यान्नीलवृषभं च यथोक्तविधिना नरः नीलवृषलक्षणं भ
गवाणहरेभिहितम् विधानतः वृषभदानेसुभोजनं ब्राह्मणभुक्ता
न्वरकांचनः इत्येतेन प्रकारेण वृषभदानमंत्रोनवग्रहयज्ञेश्च
करणे दर्शितः इतिकर्णरोगहरम् अथ वाधिर्यहरम् शातातप
प्रोक्ते स्वस्त्यातीतवधिरो नरकांते प्रजायते तेनकार्यं विशुद्ध
र्थं यतिचान्द्रायणत्रयम् अन्ते तेपुस्तकं दद्यात्सुवर्णपलसंयु
तम् ब्राह्मणाय च तत्त्वेदविदे वस्त्रेणसंयुतम् इमं मंत्रं समुच्चा
र्य ब्राह्मणं तं विसर्जयेत् इमं मंत्रं समुच्चार्य पुस्तकं दद्यादित्यन्व
यः तमेव मंत्रमाह सरस्वति जगन्मातः शब्दब्रह्माधिदेवते
दुष्कर्मकारिणं पापं रक्ष मां परमेश्वरि यतिचान्द्रायणलक्षणं
कृच्छ्रप्रकरणे परिमाणं परिमाणप्रकरणेऽभ्यधायि इति वाधि
र्यहरम् अथ कुब्जकर्णत्वहरम् शातातपप्रोक्ते शय्यां दद्या
त्सविप्राय सोपधानां सतूलिकाम् शय्यादानमंत्रस्तु नवग्र
हयज्ञप्रकरणे दर्शितः इति कुब्जकर्णत्वहरम् अथ कर्ण
रोगप्रतिमादानम् तल्लक्षणं च कर्मविपाकसारे कर्णरोगः
कर्णशूलसकपालीजपांस्थितः इज्याविधिस्तु परिभाषायां

म॰
क॰
३०६

रोगप्रतिमादानविधावान्तेकोदेवतानन्त्रेस्यादिनाख्यातः ॥
इतिकर्णरोगेप्रतिमादानम् महार्णवाख्येमहितेप्रबन्धे
मान्धातनाम्नोमदनात्मजस्य सत्कर्मरत्नप्रचितेगतोयंव्या
नप्रख्तर्विंशतयातरंगः २४ अथकंठरोगहराणि शातात
पप्रोक्ते अश्वेविनिहतेचैववक्रकंठःप्रजायते प्राजापत्या
निचत्वारिसप्तधान्यानिचोत्सृजत् शतंपलानिदद्याच्चवेद
वेत्तद्विजातये प्राजापत्यस्वरूपंकृच्छ्रप्रकरणेनिरूपितम्
सप्तधान्यानिव्रीहिशालियवगोधूमादीनियथाविभवंद
द्यात् पलसंख्यापरिमाणप्रकरणेवोद्धव्यम् इतिवक्रकंठ
त्वहरम् अथदीर्घगलत्वहरम् शातातपप्रोक्ते वकघाती
दीर्घगलोदद्याद्गन्धवलांशुभाम् गोदानमंत्रेणनवग्रहयज्ञ
प्रकरणेदर्शितः इतिदीर्घगलत्वहरम् अथकंठरोगहरम्
ब्रह्मोद्धरणे अभक्ष्यभक्षणाच्चैवकंठरोगःप्रजायते कृ
च्छ्रत्रयंप्रकुर्वीतदद्यादुत्तमदक्षिणां दद्याद्वैकंठरोगाणां
कम्बलंकम्बलोद्भवम् कम्बलदानंकृच्छ्रप्रकरणेदर्शितम्
थेत्रदानमंत्रस्तुनवग्रहयज्ञेप्रकरणेभिहितः कम्बलदानमं
त्रस्तु ऊर्णाच्छादनलोकानांशीतवातभयापह सर्वदुःखहरं
यस्मादतःशांतिंप्रयच्छमे इतिकंठरोगहरम् अथविकृतस्व
रत्वहरंशातातपप्रोक्ते उष्ट्रेविनिहतेचैवजायतेविकृतस्वरः
सतत्पापविशुद्ध्यर्थंकृच्छ्रमेकंचरेन्नृपः कर्पूरस्यपलंदद्यात्ता

रद्व्याणिशङ्कितः कृच्छ्रपलयोः स्वच्छपंपरिभाषायां नतस्य
करणे कर्पूरदानमंत्रस्तु कर्पूरं रुचिरं विप्र ग्रहाणेमं स्वशक्ति
तम् पुष्पगंधाश्रितानामेकमलाप्रीयतामिति इतिविकृत
स्वरत्वहरम् अथकंठरोगप्रतिमादानम् तल्लक्षणंकर्मविपा
कसारे कंठरोगःकरालास्याद्विभुजःपाशकंठतमस्तत् कपाल
मालाधर्धरः सोऽस्मीवोहारश्च षणः इत्यादीतिकर्तव्यताकला
पस्तुपरिभाषामात्रंकदेवतातन्त्रेत्यादिनारोगप्रतिमादानवि
धानिरूपितः इतिकंठरोगप्रतिमादानम् महार्णवाख्येम
हितेप्रबंधेमान्धात्रनाम्नोमदनात्मजस्य सत्कर्मरत्नप्रकरे
णेश्रीपूर्णोस्तरंगः खल्वपंचविंशः २५ अथपाणिरोगहरा
णि शातातपप्रोक्ते परावतेचनिहतेपीतपाणिःप्रजायते
पारावतंचसौवर्णंप्रदद्यान्निष्कमात्रकम् निष्केयन्नापरिमाण
प्रकरणेसमुपवर्णिता इतिपीतपाणित्वहरम् अथरूक्षपा
णित्वहरम् शातातपप्रोक्ते कंदकूलस्यहरणाद्रूक्षपाणिःप्र
जायते देवतायतनेकर्पीडन्यानंतस्यशांतये चांद्रायणंच
कुर्वीतब्रह्मकूर्चंविधानतः चांद्रायणब्रह्मकूर्चलक्षणंकृच्छ्र
प्रकरणेभ्यधायि इतिरूक्षपाणित्वहरम् अथाखिन्नपाणित्व
हरम् शातातपप्रोक्ते क्षीरहारीचपुरुषःखिन्नपाणिःप्रजाय
ते सद्यश्चैवविप्रायकाश्मीरंचपलत्रयम् काश्मीरंकुंकुमं
केसरः तद्दानमंत्रस्तुविकृतस्वरत्वहरोक्तः कर्पूरदानमंत्रः एवं

म॰ क॰

तत्रकर्शेरुहचिरमित्यत्रकाश्मीरेरुहचिरमित्यूहः कार्यः पलस्व
रूपंपरिमाणप्रकरणेनिरूपितम् इतिश्वित्रपाणिवहरम् अ
थभुजस्तंभशमने शातातपप्रोक्ते अयोनौचाभिगमनाद्भुज
स्तंभः प्रजायते सहस्रकलशैःस्नानंशंभोःप्रजायथाविधि
चांद्रायणस्यचरणेनमकृच्छ्रेश्चनिष्कृतिः ईश्वरस्यसहस्रकल
शस्नानप्रकारः पूजाप्रकारश्चरुद्रविधानेऽभिषेकप्रकरणे
निरूपितः तत्रस्नानेरुद्राऽनुवाकमंत्राः चांद्रायणनमकृच्छ्र
योर्लक्षणंकृच्छ्रप्रकरणेदर्शितम् इतिभुजस्तंभशमनम्
अथपाणिरोगप्रतिमादानम् तल्लक्षणंचानुक्तेषुरोगेष्वि
त्यादिनाशूलरोगहरप्रकरणोक्तमेवात्राप्यनुसन्धेयम् पूजा
विधानन्तुपरिभाषायामातंकोदेवतानेत्र्यादिनारोगप्रति
मादानविधौनिरूपित इतिपाणिरोगप्रतिमादानम् अथकु
नखित्वहरम् शातातपप्रोक्ते कुनखीनरकस्यांतेजायतेवि
प्रहेमहृत् सस्वर्णपलंदद्यात्कृत्वाचांद्रायणत्रयम् कुनखी
जायतेइत्यन्वयः पलचांद्रायणयोर्लक्षणंतत्तत्प्रकरणेभिहितं
इतिकुनखित्वहरम् महार्णवाख्येमहितेप्रबंधेमान्धातृना
श्रीमदनात्मजस्य सत्कर्मरत्नप्रकरेणएकोनत्रिंशपवप्रथि
तस्तरंगः २९ अथहृदयरोगहराणितत्रहृत्कृमिहरम् शा
तातपप्रोक्ते अभक्ष्यभक्षणाच्चैवजायंतेकृमयोहृदि यथाव
त्रदिष्टव्यार्थंत्रपीत्वाभीष्मपंचकं यथावत् व्रतोगमूत्रबल

चर्यं दाक्षिणाद्यनादि शुक्लशुक्रमित्यर्थः कार्तिकशुक्लैकादश्या
दीनी वा माघशुक्लैकादश्यादीनी वा पंचदिनानि भीष्मपंचकमुच्य
ते इति हृत्क्रिमिहरम् अथ क्रिमिकुक्षित्वहरं कर्मविपाकस
मुच्चये गजो विनिहतो वा येन क्रिमिकुक्षिः प्रजायते तथा स्त्रीभ
र्तरियानारी नीलीवस्त्रं प्रधारयेत् सा गता नरकं याति क्रिमिकुक्षि
स्ततः परं ततः परं नरकभोगानंतरं मानुष्यशरीरमाप्तायेत्यर्थः
सा नीलवृषभान्वं च दद्याच्चांद्रायणं व्रतम् कुर्यात् त्रिंशद्द्विजान्भोज्या
दद्याच्छत्रान्तदोषघम् नीलवृषभलक्षणं भगवत्प्रोक्तं हरेराभिहिते
वृषदानमंत्रस्तु नवग्रहयज्ञप्रकरणाभिहितः चांद्रायणस्वरूपं
तु कृच्छ्रप्रकरणेभ्यधायि अंतेवं क्रिमिकुक्षिहरत्वेन वैद्यशास्त्रो
क्तम् इति क्रिमिकुक्षित्वहरम् अथोदरगुल्महरं शातातपप्रोक्ते
स्तेयो विकारहारी च भवेदुदरगुल्मवान् गुडधेनुः प्रदातव्या तेन
तद्दोषशांतये गुडधेनुविधिस्तत्पयोरोगप्रकरणे दर्शितः इत्यु
दरगुल्महरम् अथ वातगुल्महरं कर्मविपाकसंग्रहे गुरुपत्न्य
र्थिनं याति गुल्मवान् जायते नरः गुल्मवान् वातगुल्मवानित्यर्थः
आचरेत्तन्निवृत्त्यर्थं मासमेकं पयोव्रतम् मुंचामि त्वेति मंत्रकेन प्र
त्यहं चरुं सर्पिषा जुहुयाद् घृतं सम्यग्वातश्चापवानभेषजम् एत
स्या कं जपेद्दद्याद् अन्नपानं च शक्तितः पयोव्रतस्वरूपं कृच्छ्रप्रकर
णे समुपवर्णितम् मुंचामि त्वेति पंचर्चस्य सूक्तस्य प्राजापत्यो य
क्ष्मनाशनऋषिः यक्ष्मो देवता इति त्रिष्टुप् छंदः अंत्यानुष्टुप्

म० क०

205

होमे विनियोगः मुंचामि त्वा हविषा जीवनाय कमज्ञातयक्ष्मादु
त राजयक्ष्मात् ग्राहिर्जग्राह यदि वैतदेनं तस्या इंद्राग्नी प्र मुमुक्त
मेनम् यदि क्षितायुर्यदि वा परेतो यदि मृत्योरंतिकं नीत एव तमा
हरामि निरृतेरुपस्थादस्पार्षमेनं शतशारदाय २ सहस्राक्षे
ण शतशारदेन शतायुषा हविषाहार्षमेनम् शतं यथेमं शरदो नयातीं
द्रो विश्वस्य दुरितस्य पारम् ३ शतं जीव शरदो वर्धमानः शतं हेमं
ताञ्छतमु वसंतान् शतमिंद्राग्नी सविता बृहस्पतिः शतायुषा हवि
षेमं पुनर्दुः ४ आहार्षं त्वाविदं त्वा पुनरागाः पुनर्नव सर्वांग स
र्वं ते चक्षुः सर्वमायुश्च तेऽविदम् ५ मुंचामि त्वेति निसृक्कं चरुं सर्पिषे
ति चरुणा घृतम् सर्पिषा घृतेन च वात आ वातु भेषजमिति अस्य
सूक्तस्य वातायन उल ऋषिः वायुर्देवता गायत्री छंदः जपे
विनियोगः जपसंख्यायामयुतमेव वात आ वातु भेषजं शंभु म
योभु नो हृदे प्राण आयूंषि तारिषत् उत वात पितासि न
उत भ्रातोत नः सखा स नो जीवातवे कृधि यददो वात ते गृहेऽमृतस्य
निधिर्हितः ततो नो देहि जीवसे ३ वात आ वात्विति सूक्तम् इति
वातगुल्महरम् अथ गुल्महरविनायकदानम् पद्मपुराणे
गुल्मी स्याद्धस्तिजागमः अथ शांतिप्रकारमाह बोधायनः सौ
वर्णं राजतं ताम्रं कारयेत्कांस्यमेव वा यद्वार्कमूलं काष्ठेन विघ्ने
शं शक्तितो नरः प्रथमं कल्पयेद्धैमं सौवर्णं लोचनद्वयम् प्रथमं
कल्पयेद्धैममिन्द्रादिराजतप्रतिमादौ हृद्यम् आखुं च कल्पयेत्

नस्य यथा देवो विनिर्मितः यथा येन स्ववर्णादिना देवो गणेशो नि
र्मितः तेनैवास्त्रैमपि कल्पयेदित्यर्थः नागयज्ञोपवीतं च कल्पये
त्तस्य गुल्मवान् चंदनागुरुवस्त्राद्यैः पूजितं तं विनायकम् सहिर
ण्यं ब्राह्मणाय स्वशक्त्या पूजिताय च कृतहोमाय शान्ताय सर्वशा
स्त्रार्थवेदिने मंत्रेणानेन विदिवद्दक्षिणाभिस्तुवोयच दद्यादि
तिशेषः विनायकं वक्ष्यमाणमंत्रैः पूजयित्वा तेनैव होममप्याज्ये
नाष्टोत्तरशतादिसहस्रान्तं व्याध्यनुसारेण विधाय तत्तत्संविना
यकं स्वशक्त्यानुसारेण हिरण्योपेतं ब्राह्मणाय दद्यादित्यर्थः दा
नमंत्रमाह विनायक गणेशान सर्वदेवनमस्कृत पार्वतीनंद
न मम गुल्ममाशु विनाशय कृतेवानेन दानेन नीरोगो जायते
नरः विनायकपूजाहोममंत्रास्तत्र गायत्री विनायकशान्तौ दर्शि
ताः तथान्यो विनायकप्रकाशको मंत्रो नवग्रहशान्तौ निरूपितः
तथापि विनायकप्रकाशकाः स्वस्वशाखोक्ता ग्राह्याः इति गुल्म
हरविनायकदानम् अथ गुल्मप्रतिमादानम् तत्र लक्षणं कर्मवि
पाकसारे गुल्मः कुंचितसर्वांगो दंडधारी भयंकरः दयानः किं
किणीमालो बद्धकेशो हि विलोचनः पूजादीतिकर्तव्यतानुपरिमा
वायोरोगप्रतिमादानविधावानंको देवतानश्चेत्यादिना निरूपिता
इति गुल्मप्रतिमादानम् अथ प्लीहजलोदरहरम् शातातप
प्रोक्ते गर्भपातनजारोगाय कृत्प्लीहजलोदरः तेषां प्रशमनार्थं
य प्रातश्चित्तमिदं स्मृतं पतेत्तु दद्याद्विप्राय जलधेनुं विधानतः स

म· क·

२०६

वर्णरौप्यताम्राणांपलत्रयसमन्वितम् पलत्रयसमन्वितंप्रायश्चि
त्तमिदंस्मृतमितिकर्मविपाकंसामान्यप्रामत्वात्त्रैवार्षिकमित्य
र्थः पलत्रयषड्वार्षिकंसाशीतिशतकृच्छ्रदइत्यनेनपरिभाषायां
दर्शितः प्रायश्चित्तोपक्रमप्रकारोपिपरिभाषायामेव जलधेनु
विधानेनतत्तद्रोगहरेत्युक्तधेनुविधानप्रसंगेदर्शितम् पलत्रय
समन्वितमितिस्वर्णरौप्यकेरजतस्यचैकेनघातात्रयस्यापीतिपल
त्रयंतेनयुक्तं पललक्षणेपरिमाणप्रकरणेद्रष्टव्यम् इतिप्लीह
जलोदरहरम् अथप्लीहोदरहरम् कर्मविपाकसंग्रहे भ्रूणका
प्यापकोयस्तुकन्यायाद्दूषणोनरः प्लीहवान्सभवेद्विप्रोजपेद्रुद्री
स्तु कमवहि अयुतत्रयसंख्याकंप्लीहोदरविशुद्धये प्रत्यहंचभ
वेद्धोमस्त्रहणेसर्पिषापृथक् श्रीसूक्तस्याद्यदिनासिकाब्रणेहर
प्रकरणेप्ययापि होमस्तव्याधिशमनायरुद्रसारेणायुतत्रयसार्धंद
शांशेनाभवति इतिप्लीहोदरहरम् अथप्लीहप्रतिमादानम्
तल्लक्षणमपिकर्मविपाकसारे प्लीहायकृद्गुडंचोभौवरदाभयधा
रिणौ कृशांगौपार्श्वकुक्षिस्थौनवक्ररदंडभयंकरौ गुदंगुदजोरोगः
अत्रविशेषणेनलिंगव्यत्ययश्छांदसः पूजाविधानेनपरिभाषायां
रोगप्रतिमादानविधानेतंकोदेवतानतेत्यादिनानिरूपितम् इति
प्लीहप्रतिमादानम् अथोदरव्याधिहरंकर्मविपाकसमुच्चये
योब्रह्मविस्मृतद्रव्याणांभेदंकृतेमदाहृतः साधयेदुदरव्याधिमुक्तोभ
वतिमानवः कुर्यात्कृच्छ्रंचातिकृच्छ्रंचांद्रायणमथापरम् सहस्र

कलशस्नानमीश्वरस्यत्नकारयेत् जपेदयुतसंख्याकमुग्रयन्त्रय
म्बकंतथा आतेपितरतः स्वक्काहुतेनचरुणा॰पृथक अशेनरस
हस्रेहिजहुयाद्गुततःपरम् मधुनाज्येनसंयुक्तंभोजनेशक्तितो
दिशेत् प्राजापत्यकृच्छ्रादिलक्षणानिकृच्छ्रप्रकरणेद्रष्टव्या
नि सहस्रकलशस्नानंशतरुद्रेण श्रयस्नार्षादिरुद्रविधाने
द्रष्टव्यम् ऊयम्बुयेरुचस्यार्षादिपरिभाषायांरोगप्रतिमादान
विधौ आतेपितरित्यस्यार्षादिअरुणविधानेउक्तमसाध्यसर्वरोग
हरंमधुनाज्येनसंयुक्तंहिरण्यमिति त्रीण्यपिदृष्टफलत्वाद्रध्या
त् अथवाहिरण्यंप्रधानेमधुसर्पिषीअंगंयथाद्रष्टफलत्वाद्दीयं
ते तथादानमंत्राअपिदृष्टफलेव तत्राज्यदानहिरण्यदानमं
त्रौ प्रायश्चित्तोपक्रमपद्धतावुक्तौ मधुदानमंत्रस्तुकफसहित
श्वासहरे यदातुहिरण्यप्राधान्येनमधुसर्पिषीदीयते तदाकेव
लहिरण्यदानमंत्रमेवोच्चार्यमध्वाज्योपेतंहिरण्यंतुभ्यमहंसंप्र
ददइतिप्रयोगःकार्यः इत्युदरव्याधिहरम् अथजलोदरहरं
कर्मविपाकसंग्रहे राज्ञावातात्मिशुक्केनानिषुक्तोपर्मनिश्चये
पुरोहितःशाहिवाकःसचिवोवान्यथाचरेत् जलोदरंतप्राप्नोति
तस्यवक्ष्यामिनिष्कृतिम् पयसावर्तयेन्मासत्रितयंव्रतमुत्तमं
सहस्रकलशस्नानंशतरुद्रेणअस्यचार्षादितथास्नानविधि
श्चरुद्रविधानेप्रदर्शितः इतिजलोदरहरम् अथजलोदरहरं
मकरदानम् तत्मिदानंपद्मपुराणे उदरव्याधियुक्तस्तुभवेत्तु

म
क॰

वेंगनागमे उदरव्याधिर्जलोदरव्याधिरित्यर्थः अथ निष्कृतिमा
ह बौधायनः कुर्यान्मकरं सम्यग्राजतं ताम्रमेव वा पलत्रयेण
द्वाभ्यां वा यद्वैकेन शुभाकृतिम् मुक्तैरत्नानि देयानि कटिं रौप्ये
ण कारयेत् नेत्रे स्वर्णमयी जिह्वां रीत्या धीमान्प्रकल्पयेत् पाद
योः प्रक्षिपेत्तत्र युक्तपात्रे पुरोद्वयोः यदा ताम्रेण निर्मितो मकर
स्तदायं विशेषः कटिं रौप्येण कारयेदिति शिष्टं पूर्ववद्द्वयोरपि समा
नं रीतिः पित्तलकाख्यः पादयोः प्रक्षिपेदिति अग्रिमपादद्वयस्य पु
रतो युक्तपात्रे प्रक्षिपेदित्यर्थः कृष्णवस्त्रेण संवेष्ट्य चंदनागुरुच
र्चितम् ताम्रेण जलपात्रे तं स्थापयेन्मकरं शुभम् ब्राह्मणैर्व्रतसं
पन्नैर्हृद्यैर्दान्तैरलोलुपम् वस्त्रैः कटककेयूरैः पूजयेदंगुलीयकैः
होमो वरुणदैवत्यैर्मंत्रैः कार्यो यथाविधि वरुणदैवत्यैरिति बहु
वचनं स्वस्वशाखोक्तवरुणमंत्रप्राप्त्यर्थं तत्र वरुणप्रकाशका
मंत्रास्तत्त्वामोश्वग्रे तत्त्वायामीत्यादयो मंत्रा नवग्रहयज्ञप्रकरणे ऽष्ट
लोकपालावाहनप्रस्तावे कलशावाहनप्रस्तावे च दर्शिताः ज
पसंख्या न वशेन्नरशतं द्रव्यमाज्यं होमस्य वरुणपूजां च विधाय
स्विष्टकृदोक्तविधिनाग्निप्रतिष्ठाप्य कार्यः ततः किं कुर्यादित्यत आ
ह ततस्तु पूजिते विप्रे मकरं तं निवेदयेत् विप्राय दद्यादित्यर्थः
दानमंत्रमाह जलाधिदेवदेवेश पाशिमाशापते विभो उदरव्या
धिनाशं मे कुरु दानेन तोषितः इति जलोदरहरमकरदानम्
अथ महोदरप्रतिमादानं तत्र तत्र कर्मविपाकसारे महोदरा

मयस्याल्कशेमहिषस्प्रगः खेद्वचर्मधरःकांतस्तथापीतांबरा
वृतः इत्यादीतिकर्तव्यताकलापस्वपरिभाषायांरोगप्रतिमावि
धावातंकोदेवतातत्रैत्यादिनोपवर्णितः इतिमहोदरप्रतिमादा
नम् महार्णवात्क्षेमाद्रितेप्रबंधेमान्धातृनाम्नोमदनात्मजस्य
सत्कर्मरत्नप्रकरेरोगप्रणाशार्णस्तरंगःखेल्लसमविंशः २७ अथ
मंदाग्निहरणम् आतातपप्रोक्तं मंदोदराग्निर्भवतिसातिद्वयेन
वैयजेत् सातिद्व्येकदन्नंभुंगीतिपादः प्राजापत्यत्रयंकृत्वाभोज
येत्सशतंद्विजान् नवैयजेदितिनित्यनैमित्तिकानिसायंप्रातर्हो
मवैश्वदेवप्रायश्चित्तहोमादीनि अनापदियोनकुर्यादित्यर्थः
प्राजापत्यलक्षणंकृच्छ्रप्रकरणेभ्यधायि इतिमंदाग्निहरणम्
अथप्रकारांतरेणमंदाग्निहरणम् हृद्धपराशरः गोमांसस्वादको
मंदजठराग्निर्भवेन्नरः प्राजापत्यंचरेत्कृच्छ्रमतिकृच्छ्रंतथैवच
अग्निमंत्रंजपेन्नित्यंश्रीसूक्तंचविचक्षणः सर्वप्रायश्चित्तानिप्रागु
क्तानि अनयोश्चाग्निरस्यामितिसूक्तश्रीसूक्तयोर्जपोयावद्रोगशांति
स्तावत्प्रतिदिनमष्टाविंशत्यादिकोभवेत् इतिप्रकारांतरेणमंदा
ग्निहरणम् अथकर्मविपाकसंग्रहोक्तंमंदाग्निहरणम् अकारणेग
रंदत्वाप्रमापयतियःपुनः समंदाग्निर्भवेदेवंमृतकल्पश्चजायते
अतेरौद्रेणसूक्तेनचरुंचजुहुयाद्धृतम् अष्टोत्तरायुतंसम्यक्कृत्वा
पश्चात्पुनर्नये तामग्निवर्णामितिचसूक्तं सोमलनस्कोटहरेभ्यथा
पि इतिकर्मविपाकसंग्रहोक्तंमंदाग्निहरणम् अथबौधायनोक्तंमं

म॰
क

दाग्निहरमेषदानम् बौधायनः अग्नेर्मांद्यं भवेद्यस्य स्वेनाग्निवि
नाशकः वक्ष्यामि तत्प्रतीकारं यथोक्तं ब्रह्मणा पुरा फलार्थेन तद्
र्थेन तदर्थेनाथवा पुनः राजन्तं कारयेत्सौम्यमग्निवाहनमुत्तमम्
अग्निवाहनं मेषः सौवर्णोस्य शृङ्गाः कार्याः श्वेतवस्त्रेण वेष्टयेत्
श्वेतमाल्यैः श्वेतगंधैर्धूपं दद्यान्मनस्कटम् तंडुलोपरि संस्थाप्य
वाहनं पूजयेत्सुधीः तंडुलानां परीमाणं द्रोणद्वयमुदाहृतम्
द्रोणस्वरूपं परिमाणप्रकरणे वगन्तव्यम् एवं पूजयित्वा पूजान्
देशादाग्नेय्यां दिशि होमः कार्य इत्याह आग्नेय्यां दिशि होमस्तस
मिदाज्यतिलैरपि आचार्येण विनीतेन सर्वशास्त्रार्थवेदिना बहू
चेन तत्कर्तव्यस्तत्र मंत्रानिमाञ्शृणु अग्निर्मूर्धेति मंत्रेण समिद्धोमः
प्रशस्यते अग्नेनयेत्याज्यहोमोप्यग्निनाग्निस्तिलैस्तथा मंत्राध्या
योक्तमार्गेण चाग्नेः संस्थापनं भवेत् प्रणीताम्भोत्र पर्यन्तं कृते स्नानं
विधीयते आपो हि ष्ठेत्यपि ऋचा हिरण्येति त्र्यृचेन च पावमानानु
वाकेन मार्जयेद्रोगिणं तथा शन्नो वातानुवाकेन शांतिं चापि प्र
कल्पयेत् तस्मै दत्तवती रोगी प्राङ्मुखो यमुदङ्मुखः सदक्षिणं
पूजितायदद्याद्वाहनमुत्तमम् देवानां योमुखे हव्यवाहनः सर्वपू
जितः तस्यत्वं वाहने पूज्यं देवैः संदैर्महर्षिभिः अग्निमांद्यं सर्वकर्म
विपाकोत्थं च यन्मम तत्सर्वं नाशय चाशु जठराग्निं प्रवर्धय एवं
विप्राय योर्दद्यात्तस्याग्नेर्वाहनमुत्तमम् बलवानग्निमान्मर्त्यो जीवेद्व
र्षशतं पुनः इतः सर्वं प्रमिर्विप्रैः स्नाताभुंजीत मानवः अग्निर्मूर्धे

त्यादिष्वग्निर्मूर्धेत्ययंमंत्रोनवग्रहयज्ञेमंगलस्ययोगत्वेनप्रदर्शितः
अग्निनाग्निरित्ययंतत्रज्वररोगहरेगजदाने अग्नेनयेत्यस्यागस्त्य
ऋषिः अग्निर्देवता त्रिष्टुप्छंदः आज्यहोमेविनियोगः अग्नेन
यसुपथारायेअस्मान्विश्वानिदेववयुनानिविद्वान् युयोध्यस्म
ज्जुहुराणमेनोभूयिष्ठांतेनमउक्तिंविधेम मंत्राध्यायोक्तमार्गेण
तिमंत्राध्यायोक्तेप्रणीतामोक्षः प्रणीतापात्रस्योदकविसर्जनं
पतदंतेहोमकर्मणिकृतेसतिस्नानंविधीयते वक्ष्यमाणमंत्रैर
भिषेकःकार्यइत्यर्थः अत्राभिषेकविधानादेवाग्निवाहनस्यजा
प्रदेशादीशानदिग्भागेकलशंसंस्थाप्य तत्रवरुणंनवग्रहप्रक
रणोक्तैर्वरुणमंत्रैर्नाममात्रेणवावासम्पूजयित्वा ततःसर्वोक्त
प्रकारेणस्नात्वानेरोगार्णंवरुणकलशस्योदकेनाभिषिंचेत्
अभिषेकमंत्रानाह आपोहिष्ठेत्यादिनापवमानानुवाकेनेत्यंते
न तत्रापोहिष्ठेतितृचोहिरण्यवर्णाइतिऋचश्चपरिभाषायांरो
गप्रतिमादानविधावुदीरितः पवमानःसुवर्जनइत्ययमनुवाको
गणहोमप्रकरणेदर्शितः शन्नोवातानुवाकेनइत्यनेनचस्वस्व
शाखोक्तशांतिरुपलक्ष्यते शन्नोवातइत्यादितैत्तिरीयशाखोक्तशां
तिः तथाश्वलायनशाखोक्तशांतिरपिपरिभाषायामेवरोगप्रतिमा
दानविधौनिरूपिता इत्यग्निमांद्यहरबोधायनोक्तमेषदानम्
अथमंदाग्निप्रतिमादानमेतल्लक्षणंत्वनुक्तेस्वित्यादिना स्थलरी
गप्रकरणोक्तमेवात्राप्यनुसन्धेयं पूजाविधानंतत्तत्कोदेवतेत्या

म॰
क॰

रभ्यपरिभाषायामुदीरितम् इतिमंदाग्निप्रतिमादानम् अथा
जीर्णहरंकर्मविपाकसंग्रहे अन्नहर्तान्नजीर्णोभवेदस्यतानि
ष्कृतिः उपवासत्रयंकुर्यात्प्राजापत्यमथापिवा जुहुयाच्चरुस
र्पिर्भ्यांमाग्निरस्मीत्यृचानया अष्टोत्तरसहस्रंतज्जुहुयात्जपेत्तथा
उपवासत्रयेप्राजापत्ययोश्चशरीरव्याध्यनुसारेणव्यवस्थावि
ज्ञेया चरुणासर्पिषाचसहस्रंजुहुयात् अयंहोमोजपानंतरं
जपोपिसहस्रद्वयम् माग्निरस्मीत्यस्याऋष्यादिवातरोगहरप्रा
यश्चित्ते प्रदर्शितंब्रह्मविधाने यत्पुभुक्तंनजीर्येत्तन्नतिष्ठेद्वाक
ण्ठेचन ध्यानावाचान्तरमेत्रस्यअन्नस्यस्मरतःआन्तरंवाल्यादिकंभ
वेदित्यर्थः इत्यजीर्णहरम् अथप्रकारांतरेणाजीर्णहरम्
परान्नविघ्नकरणादजीर्णमपिजायते लक्षहोमंप्रकुर्वीतप्रा
यश्चित्तंयथाविधि प्रायश्चित्तंकृच्छ्रातिकृच्छ्रचांद्रायणादीनि
व्याध्यनुसारेणव्यस्तानिसमस्तानिवाकुर्वीत लक्षहोमप्रका
रश्चनवग्रहयज्ञोक्तप्रकारेणग्रहहरजांकंउमंउपादिकंचवि
धायव्याहृतिभिर्गायत्र्यावातिलव्रीहियवैर्लक्षसंख्ययाहोमं
प्रकुर्वीत ततोवसुधारांनिवर्तयेत् एतत्सर्वंपरिभाषाया
मस्माभिरभिहितंकृच्छ्रादिलक्षणान्यपितत्रैवद्रष्टव्यानि इति
प्रकारांतरेणाजीर्णहरम् महार्णवात्प्रेमहितेप्रवक्ष्येमान्या
त्वनाश्रीमदनात्मजस्य सत्कर्मरत्नोच्चनिदानमण्यविंशस्तरं
गोयमगात्पगादः २८ अथप्रज्ञाहीनत्वहराणि मन्त्रिमोद्य

स्यांतेशरीरांगत्वेनतस्यतीकारकर्मानंतरमांतरत्वेनभाद्रस्य
त्वादस्यप्रकरणस्यसंगतिः पराशरः परापलापान्मर्त्यस्त्वमति
हीनोभवेदसौ अतिकृच्छ्रंतदाकुर्याच्चांद्रायणसमन्वितम्
अतिकृच्छ्रादिस्वरूपंकृच्छ्रप्रकरणेभ्यधायि अतिप्रज्ञाहीनत्व
हरम् अथप्रज्ञाजाड्यहरघंटादानम् ब्रह्मवैवर्ते शृणुणाल
नेत्रज्ञातोयोवेदाध्ययनंचरेत् चरेत्कुर्यादित्यर्थः धातृनामने
कार्यात् सजडःप्रज्ञयाहीनःसंसारेजायतेनरः वक्ष्यामितस्य
तीकारसुदुर्कांसमयीहच्छाम् शोभनांकारयेद्घंटांशुभरेखा
विभूषिताम् पलैस्तुकुर्याद्विंशत्याविंशतावातदर्धतः स्वस्व
रांतामतिसद्वर्णांपंचगव्येनधावयेत् पलस्वरूपंपरिमाण
प्रकरणेद्रष्टव्यम् धावयेत्शोधयेत् श्वेतवस्त्रेणसंवीतांतंडु
लोपरिविन्यसेत् तंडुलानांपरीमाणंद्रोणत्रितयमिष्यते
तदर्धमथवाप्यास्यपरीमाणंस्वशक्तितः आचार्यःसर्वशास्त्र
ज्ञोवेदवेदांगपारगः धर्मशास्त्रेषुकुशलस्सदाचारःसंयतेंद्रि
यः आहूयपरयाभक्त्यापूजयेत्तंविधानतः आचार्यपूजनंना
मगंधमाल्यादिभिर्वरणंहतेनाचार्येणघंटादिपूजाकार्ये
त्याह तेनैवकारयेत्पूजांविधितःशास्त्रचोदितैः उपचारैःषोड
शभिर्मंत्रेणानेनशक्तितः आवाहयेत्तुवागीशींघंटायांपर
मेश्वरीम् आवाहनमंत्रमाह एह्येहिसर्वदेवेशिघंटायांसन्नि
धिंकुरु सर्वसत्वोपकारार्थंज्ञानमुद्रेपरात्परे एवमावाहितां

म॰
क

वंदां ब्राह्मणो वापि पूजयेत् तां वंदामित्यत्र वंदा शब्देन वंदाया
मावाहिता सरस्वती लक्ष्यते अस्याः पूजायां होमे गीति ह्यचेन अ
यं ह्यचः उन्मादवाग्रहं हरेदर्शितः ब्रह्मप्रकाशकमंत्रं ब्रह्मजज्ञा
नमिति नवग्रहयज्ञेऽभिहितः पूजानंतरकृत्यमाह स्वशक्त्या कर्प
कारेण प्रतिष्ठाप्य कृतासनम् होमं कुर्यात्प्रयत्नेन समिदाज्यति
लैरपि नैवेद्यं पायसं दद्याद्देवं च ब्राह्मणोत्तमः सरस्वति प्रदेमेति
मंत्रो वा तत्र संमतः अत्र पूजायां होमकर्मणि अयं वा मंत्रो यद्वा
गीति ह्यचं वा विकल्पेन ग्राह्यः सरस्वति प्रदेमेति मंत्रप्रथमाम्ना
ततया अस्या गृत्समदऋषिः सरस्वती देवता अनुष्टुप् छंदः पूजा
दिषु विनियोगः सरस्वति प्रदमेव सौभाग्यं वाजिनीवति तां त्वां
विश्वस्य भूतस्य प्रगायामस्याश्रुतः तस्मै हतवती दद्यात् तां वंदां
पूजितां यतः मंत्रेणानेन विधिवद्भोगी सर्ववेदविः श्रुतिः अष्टकृ
त्स्नोपविश्य यस्मरता वागीश्वरी पराम् दानमंत्रमाह शरीरं तत्
याय च स्वाध्यायाध्ययने कृतम् सरस्वति जगन्मातर्जगज्जाड्या
पहारिणि साक्षाद्ब्रह्मकलत्रं त्वं ब्रह्मरुद्रादिभिः स्तुता तन्मया
ध्ययनोत्थं च जाड्यं हर वरानने वंदना येन तच्छास्त्रं ब्रह्मणा
निर्मितं पुरा एवं दानं तु दत्वा च तमाचार्यं तमाप्य च अन्येभ्यः
शक्तितो दद्याद्ब्राह्मणेभ्यश्च भोजनम् ततः स्वबंधुभिः सार्धं स्व
ताशं जीत मानवः एवं यः कुरुते दानं श्रद्धाहीनो जनो पि वा अश्रा
वान्सजडो जेन जीयते वा कातिर्यथा इति प्रज्ञाजाड्यहरवंदादा

नम् अथ चेतनाहीनत्वहरं शातातपप्रोक्ते पितृहा चेतनाहीनो
मातृहीनश्च जायते नरकान्ते प्रकुर्वीत प्रायश्चित्तं यथाविधि नर
कान्ते मातृत्वशरीरमासाद्य तत्र चेतनाहीनो जायत इत्यर्थः प्राय
श्चित्तस्वरूपं सविशेषं नेत्ररोगप्रकरणे पञ्चरत्नप्रपञ्चितम् इति चे
तनाहीनत्वहरम् अथ प्रज्ञाहीनत्वप्रतिमादानम् तल्लक्षणं वा
तुकेषु तत्र रोगेषु इत्यादिना मूलरोगहरप्रकरणोक्तमेवात्रापि वि
ज्ञेयम् इज्यादीतिकर्तव्यता कल्पपरिभाषायामातङ्को देव
तात्रेत्यादिना रोगप्रतिमादानविधावुक्तः इति प्रज्ञाहीनत्वरोग
प्रतिमादानम् महार्णवाख्ये महति प्रबन्धे मान्धातृनाम्ना मद
नात्मजस्य सत्कर्मरत्नोच्चनिदानस्तत्र विंशस्तरंगो यमगाधगाढः
२९ अथ मूत्रकृच्छ्रहरणं शातातपप्रोक्ते गुरुजायाभिगम
नान्मूत्रकृच्छ्रं प्रजायते तेनापि निष्कृतिः कार्या शास्त्रदृष्टेन वर्त्म
ना शास्त्रदृष्टेन वर्त्मनेत्यनेन विधानिष्कृतिरुच्यते तत्रैका प्रा
जापत्यादिकृच्छ्रस्वरूपा सा च नरकाद्युपभोगेन कर्मणः क्षीणत्वा
द्गुरुतल्पप्रायश्चित्तस्यार्धं तदर्धं वा शास्त्रानुसारेण कल्प्या अपरो
निष्कृतिमाह स्थापयेत्कुम्भमेकं तु पश्चिमायां शुभं दिशि नील
वस्त्रसमाच्छन्नं नीलमाल्यादिभूषिते तस्योपरि न्यसेद्देवं लोक
पालं प्रचेतसम् सुवर्णनिष्कषट्केन निर्मितं यादसां पतिम् ज
पेत्सूक्तकेन वरुणं विश्वरूपिणम् वरुणमूर्तिस्तु पाशधर
करा मकरवाहना च भवति सामविद्ब्राह्मणस्तत्र सामवेदं समाप

म॰
क

येत् सुवर्णोत्कृतिकां कृत्वा निष्कविंशतिसंख्यया दद्याद्विप्राय सं
पूज्य निष्पापः स्यामिति ब्रुवन् यादसामधिपो देवो विश्वेषामपि
पावनः संसाराब्धेः कर्णधारो वरुणः पावनोऽस्तु मे इमं मंत्रं समु
च्चार्याचार्याय यथाविधि दद्यादेवमलंकृत्वा मूत्रकृच्छ्रप्रशां
तये अत्रायं प्रयोगः स्वात्रकुले शुभे दिने स्थंडिलमुपलिप्यालंकृ
त्य तत्र पश्चिमदिग्भागे कलशं संस्थाप्य तदुपरि श्वेतवस्त्रं पात्रं नि
क्षिप्य तत्रोक्तवरुणप्रतिमां निधाय तथा विंशतिनिष्कैर्नि
र्मितां सौवर्णीं मूत्रकृच्छ्रप्रतिकामपि निक्षिप्य ततो वरुणोक्तरूप
स्तकेन षोडशोपचारैः रोगप्रतिमां तु मूत्रकृच्छ्रादिदेवतायेनमर
तिनाममंत्रेणार्चयेत् अथ सामवेदविदा ब्राह्मणेन पूजितप्रति
मासन्निधावेव वेदपारायणं कारयेत् तदभावे तु बह्वृचेन वा य
थासंभवं शाखाध्यायिना वा वेदपारायणं निष्पादयेत् रोगनि
वृत्तिरूपस्य प्रयोजनस्यैवमपि निष्पत्तेः वेदपारायणविधिः
परिभाषायामभिहितः यावत्पारायणसमाप्ति प्रतिदिने पूर्वो
क्तरीत्या वरुणं रोगप्रतिमां च पूजयेत् समाप्ते च पारायणे तां रो
गप्रतिमां ब्राह्मणाय दद्यात् तत्रायं प्रयोगः अमुकगोत्रायामु
कशर्मणो रोगशांतयेऽमुकनिष्कृतिं तुभ्यमहं संप्रदायेनमः प्रत्यु
चेयम् इत्युच्चार्यांते निष्पापः स्यामिति प्रगृहीत्रे प्रतिमां ददाति
ततो यादसामधिप इत्यमुं श्लोकमुच्चार्य वरुणप्रतिमां तस्मै वा
दद्यादिति निष्कस्वरूपं परिमाणप्रकरणेऽभ्यधायि यजेत्तु रूप

सूक्तेनेति पुरुषसूक्तेन इज्याप्रकारः परिभाषायामेव पारायण
विधौ प्रतिमालक्षणं तत्पतन्त्यकरणं तेभिधास्यते इति ब्रह्मकृच्छ्र
हरम् अथ प्रकारान्तरेण ब्रह्मकृच्छ्रहरम् शातातपप्रोक्ते पशुयो
नौ च गमनात् ब्रह्मकृच्छ्रं प्रशान्तये तिलपात्रत्रयं चैव स दद्यादात्म
शुद्धये तत्रैकं तिलपात्रदानप्रकारमाह ताम्रपात्रे तिलान्कृत्वा प
लषोडशकल्पिते सहिरण्यं स्वशक्त्या वा विप्राय प्रतिपादयेत्
नाशयेद्द्विविधं पापं वाङ्मनःकायसंभवम् प्रकारान्तरं तु कूर्मपु
राणे तिलपूर्णं ताम्रपात्रं सहिरण्यं द्विजाय तत् प्रातर्दत्वा तु विधि
वद्भिः स्वर्गं प्रतिष्ठति सः तिलपात्रं त्रिधा प्रोक्तं कनिष्ठोत्तममध्यमम्
ताम्रपात्रं दशपलं जघन्यं परिकीर्तितम् सुवर्णं दक्षिणां दद्यात्स
र्वपापक्षयो भवेत् पलसुवर्णयोः स्वरूपं परिमाणप्रकरणे निरू
पितम् इति प्रकारान्तरेण ब्रह्मकृच्छ्रहरम् अथ ब्रह्मकृच्छ्रहरान्तर
कर्मविपाकसमुच्चये मन्त्री गुरुणा यश्च विधवामभिगच्छति
स भवेद्ब्रह्मकृच्छ्रीति गुरुतल्पार्थमाचरेत् गुरुतल्पार्थं गुरुतल्पप्रा
याश्चित्तस्यार्थं षड्वार्षिकं प्रायश्चित्तमाचरेदित्यर्थः इति ब्रह्मकृच्छ्र
हरान्तरम् अथ ब्रह्मकृच्छ्रहरतिलपद्मदानम् तत्र निदानं वायुपु
राणे सुरापी ब्रह्मकृच्छ्री स्यादिति अत्र निष्कृतिमाह बौधायनः
सौवर्णं कारयेत्पद्मं पलेनार्धपलेन वा यथास्वशक्ति मतिमान्दृढ
मष्टदलं शुभम् वित्तशाठ्यं न कुर्वीत भवेन्निष्फलमन्यथा तिल
द्रोणाढकेनापि ताम्रपात्रे जलान्वितम् निदधीतेति शेषः द्रोणप

म॰
क॰

212

रिमितेवाढकपरिमितेवातिलराशौजलशरितेताम्रपात्रेनिदधी
तेत्यर्थः पलद्रोणयोर्लक्षणंपरिमाणप्रकरणेद्रष्टव्यम् पात्रेत
कमलेहृदयेनिदध्यात्कुंकुमान्वितम् आलिख्याकृतिसम्पन्नंदशदिं
वाग्निहोत्रिणाम् आकृष्णगंधमाल्याद्यैर्विधिनाचाथभक्तितः अर्चये
दितिशेषः एवंआलिख्यसमर्च्यतेनचभास्करंपद्ममध्येस्थापयित्वा
मीढुत्वाचतत्पश्चेआलिख्यायवक्ष्यमाणप्रकारेणदद्यात् तथाच
बौधायनप्रोक्तपद्मतिलपद्मदानांतरे अग्नेनचतिलहोमःकार्य
स्वाष्टोत्तरंशतम् पद्मेचावाहयेद्देवंभास्करंग्रहनायकम् एह्येहि
भगवन्देवपद्मेस्मिन्सन्निधिंकुरु ग्रंथीततर्हीदशान्मासहस्रैर्हि
तिमिर्हृतः इत्यावाहनमंत्रः आवाह्यतास्मिन्देवेशंपूजयेद्गंधचं
दनैः पुष्पधूपकैर्दीपैःकुंकुमागरुचंदनैः नैवेद्यंपायसंदद्याद
लाभेतीममेवचेति आज्यहोमात्तिलैर्होमश्चाष्टाहुतिभिःकार्यः
एवंसंपूज्यकिंकुर्यादित्यतआह ततःस्वर्णमयंपद्मंदद्यान्मंत्रेण
संयुतम् दानमंत्रमाह रविःप्रजापतेगोसौहाद्दशात्मात्रयीतनुः
पद्मेनानेनदत्तेनप्रीतस्त्वंशरणोस्त्वमे कृतेनानेनमत्कृत्योस्तुब्रह्म
क्षीत्युच्यते कृष्णकृच्छ्रान्तरस्तस्मादेतत्कुर्यात्प्रयत्नतः एतच्चप
द्मदानमादित्यवासरेकार्यम् पद्मदानप्रयोगस्त्वादित्येहृन्निका
र्येदितिबौधायनस्मरणात् इतिमूत्रकृच्छ्रहरतिलपद्मदानम्
अथमूत्रकृच्छ्रप्रतिमादानम् तत्रादौचकर्मविपाकसारे मूत्र
कृच्छ्रमयःखंडकर्तरीवज्रधरवरः कर्तनेकर्तरःखेदनेखंडशः

करणे अनेनच्छेदनसाधनविशेषो लक्ष्यते तदस्यास्तीति खेड
कर्तरी खेटः क्रूर इत्यर्थः प्रजादीति कर्तव्यताविशेषस्तु परिभाषा
यां रोगप्रतिमादानविधावातंकोदेव इत्यादिना निरूपितः इति
मूत्रकृच्छ्रप्रतिमादानम् अथाश्मरीहरं शातातपप्रोक्ते मातु
लपत्नीगमनाज्जायते चाश्मरीगदी सतप्तपापविशुद्ध्यर्थं प्रायश्चि
त्तं समाचरेत् प्रायश्चित्तमथ त्रैमासिकं दद्याद्विप्राय विशुद्धये मधु
धेनुं यथोदिताम् तिलद्रोणशतं चैव हिरण्येन समन्वितम् म
धुधेनुविधानं तु सर्वरोगहरे प्रदर्शितम् द्रोणस्वरूपं परिभाषाप्र
करणे इत्यश्मरीहरम् अथ बहुमूत्रत्वहरं शातातपप्रोक्ते दुग्ध
चौरस्तु पुरुषो जायते बहुमूत्रवान् स दद्याद्दुग्धधेनुं च ब्राह्मणा
य यथाविधि दुग्धधेनुविधिः सर्वरोगहरे धेनुप्रस्तावे द्रष्टव्यः
इति बहुमूत्रत्वहरम् अथ प्रकारान्तरेण बहुमूत्रत्वहरं कर्मविपा
कसमुच्चये सोदर्यागामिनो रोगो जायते बहुमूत्रता पराकं द्वि
तयं चत्वारिंशद्ब्राह्मणभोजनम् आतेन रूपकेन दद्यादष्टोत्तरस
हस्रकम् सर्पिषा चरुणा होमेन जपस्तावान्हितेन तु सहस्रना
मः स्तुकस्य पौरुषस्य च शाकिनः गायत्र्या च जपः कार्यस्तत्पाप
स्यापशमये पराकलक्षणं कृच्छ्रप्रकरणे द्रष्टव्यम् आतेपितन्म
हतामित्येतन्मन्त्रस्याते तल्लक्षणं पतस्य वीदिवास्विधानोक्ता
साध्यसर्वरोगहरे निरूपितम् रोगस्यास्य तेन तत्सर्वं होमः व्याधि
केन सकलस्य कालहत्या होमः पतद्वयेऽपि चरुणा पृथक्कार्यं

म॰
क

षाद्यंकं जपत्सावा नित्यष्टोत्तरसहस्रमेवेति आ ते पितरित्यने
नसूक्तेन सहस्रनामोंऽग्रऋषभसूक्तस्य गायत्र्यास्य जपः शक्तितो भव
ति अष्टोत्तरसहस्राद् अधिकं न्यूनं वेत्यर्थः एतेषामष्यादिपरिभा
षायामुदीरितम् इति प्रकारांतरेण बहुसूक्तहरम् महाणीवाख्ये
महितेष्वबल्येमामाधात्तनाम्नोमदनात्मजस्य सत्कर्मरत्नप्रकरणे
लिंगासिद्धिशमांगोयमगादग्नापः ३॰ अथ प्रमेहहराणि कर्मवि
पाकसमुच्चये चंडालीगमनान्मर्त्यः प्रमेहव्याधिमान्भवेत्
तत्पापासान्तरस्यैवजायते तस्य निष्कृतिः चांद्रायणत्रयं कुर्याद
वमर्धं तथापरम् अपरं पिपीलिकामध्यचांद्रायणं चेत्यर्थः इद
मापइतिद्वाभ्यां उद्गुत्तममस्येकयाज्जुहुयात्सर्पिषा चैतां जपेन्मंत्रा
न्समाहितः इदमापः प्रवहत इति द्वयोर्मेधातिथिर्ऋषिः आपो
देवता अंत्यायेर्ग्निर्देवता अनुष्टुप्छंदः विहितार्थे विनियोगः
इदमापः प्रवहत यत्किंचिदुरितंमयि यद्वाहमभिदुद्रोह यद्वाशे
पउतानृतम् १ आपो अद्यान्वचारिषं रसेन समगस्महि पयस्वा
नग्न आगमतंमासंसृज वर्चसा २ इति ऋग्द्वयं मिलित्वेको मंत्रः
उदुत्तममित्यस्याः शुनःशेप ऋषिः असावेव देवतेत्यभिधीयते व
रुणो देवता त्रिष्टुप्छंदः विहितार्थे विनियोगः उदुत्तमं वरुणपा
शमस्मदवाधमम् विमध्यमं श्रथाय अथा वयमादित्यव्रते तवाना
गसो अदितये स्याम जपहोमयोः संख्या व्याख्यानुसारेणाष्टोत्तरसह
स्रादि प्रसंगात्कल्प्या इति सर्वप्रमेहहरम् अथ सप्रमेहहरं क

र्मविपाकसंग्रहे तिर्यग्गामी सम्फलेन प्रमेहेन युतो भवेत् कुर्या
त्सांतपनादीनि प्रायश्चित्तं यथाविधि सांतपनादीनीति सांतपनय
तिसांतपनमहासांतपनानीत्यर्थः एतल्लक्षणानि च कृच्छ्रप्रकर
णे दर्शितानि इति सम्फलप्रमेहहरम् अथ वातप्रमेहहरम् कर्म
विपाकसंग्रहे पर्वव्यवायी मनुजः कन्यागामी तथैव च वातप्रमे
हयुक्तः स्यात्कुर्याच्चान्द्रायणत्रयम् चान्द्रायणस्वरूपं कृच्छ्रप्रकर
णे ज्ञेयम् इति वातप्रमेहहरम् अथ मधुप्रमेहादिहराणि कर्मवि
पाकसमुच्चये मधुमेही मातृगामी सततं जायते नरः पितृभार्या
दिगामी च जलमेही नराधमः यो गच्छेद्भगिनीं नित्यमिक्षुमेहीति
निश्चयः पितृभार्याजननीसततं मधुमेही नित्यमिक्षुमेहीत्यन्व
यः एतेन रोगा अपि कथ्यन्ते प्रायश्चित्ते क्रमाद्दशषड्वर्षाण्यथापं
चच अब्दानित्याचरेत्सम्यक् ततो रोगाद्विमुच्यते षडब्दं पंचाब्दं च क
मात्प्रायश्चित्तं च भवतीत्यर्थः सर्वत्र सौरमंत्रेण जपहोमौ च कर्त
व्यौ संख्या चाष्टोत्तरसहस्रं सौरमंत्रास्तु बहवः उदुत्यमित्यादयः प
रिभाषायां तत्र तत्र दर्शिताः इति मधुप्रमेहादिहराणि अथ प्र
मेहहरस्वर्णधेनुदानम् वायुपुराणे ब्राह्मणः स्वर्णहारी च प्रमे
ही जायते नरः हृद्रोगी तमः धेनुं स्वर्णमयीं कुर्यात्सर्वेण विधिना
ततः सर्वेण विधिना पलेन वा तदर्धेन वा चन्दनस्येत्यादीति कर्तव्य
ता कलापरुक्तत्यरोगहरप्रकरणे गुडधेनुदानप्रसंगेन दर्शितः
स्वर्णश्रृंगी चरत्नाढ्यां तथारोप्य खुरामपि तथा व्रतपर्णां कुर्यादि

म० क०

भागेनसर्ववत् ब्राह्मणंभक्तसंपन्नंवैसवं च कुटुम्बिनम् आचार
वंतंधर्मिष्ठंद्विजश्रुत्स्वगुणोपेतम् श्रद्धमाह्लयविधिवत्पूजयेद्भूष
णादिभिः यथाविभवतोभक्त्याहोमंसर्ववदेवाहि सर्ववत्स्वगृह्यो
क्तविधिनाग्निस्थापनादिकृतेत्यर्थः मंत्रैस्तैर्वैसवैः सम्यक्पलाश
समिधैस्ततः होमसंख्योचाष्टोत्तरशतंवैसवमंत्रास्तद्विष्णोरित्या
दयः तत्रतद्विष्णोरितिऋक्यांउहोमप्रकारोदर्शितः अन्येपिस्वस्व
शाखोक्ताग्राह्याः तथानारायणाष्टाक्षरमंत्रः अंब्रह्मद्विहरनाराय
णाद्यर्तिंदानेगोपालमंत्रस्तत्रकंध्यहरगोपालदानेप्रदर्शितः हो
मांतेकिंकुर्यादित्यतआह होमांतेतंप्रदद्यात्अमंत्रेणानेनमेह
वान् मंत्रमाह चक्रंसुदर्शनंयस्यराजतेग्रेतथैवहि प्रमेहंहर
तुहिशंखंविसर्गकडवाहनः अब्जेशंखेपञ्जेशंखेपञ्जगदापद्मधारी
त्यर्थः दानंप्रमेहरोगघ्नमेतत्कार्यंमनीषिभिः कृतेनानेनशाम्यंति
प्रमेहादारुणाअपि इतिप्रमेहघ्नसुवर्णधेनुदानम् अथप्रकारां
तरेणप्रमेहहरम् शातातपप्रोक्ते तपस्विनीप्रसंगेनप्रमेहोजा
यतेगदः मासंरुद्रजपःकार्योदद्याद्रुक्माचकांचनम् तपस्विनी
प्रसंगस्तपस्विनीगमनम् रुद्रलक्षणंपरिभाषायांरुद्रविधानेद
र्शितम् कांचनंस्वर्णंयथाशक्तिदद्यादित्यर्थः इतिप्रकारांतरेणप्र
मेहहरं अथप्रमेहप्रतिरूपकदानम् तल्लक्षणंकर्मविपाकसारे
प्रमेहःपाणिसुघस्पर्दरिणांपापिनामीषणः पापपार्श्वेद्वर्णांकुर्व
न्यारद्यानंचगर्जति प्रजादीतिकर्तव्यताकल्पायत्रपरिभाषाया

मातंकोदेवतातत्रेत्यादिनानिरूपितः इतिप्रमेहप्रतिरूपकदानं
महार्णवाख्येमहितेप्रबन्धेमान्धातनाम्नोमदनात्मजस्य सकं
र्मरत्नोघनिदानमेकविंशस्तरंगोयमगाद्गाधः २१ अथालिं
गहानिरूपणाव्याधिहरणाणि तत्रलिंगहानिहरंशातातपप्रोक्ते
मातृगामीभवेद्यस्तुतस्यलिंगंविनश्यति चंडालीगमनेचैवह्री
नःशंढःप्रजायते तस्यप्रतिक्रियांकर्तुंकुंभस्तुनरतोन्यसेत् उ
रतःशुक्रस्यलिंगप्रदेशस्योत्तरदिग्भागे उदकाभिपूरितंकलशंस्था
पयेदित्यर्थः अत्रचमल्लिकापल्लवादीनिनवग्रहयज्ञप्रकरणोक्त
लशस्थापनप्रस्तावोक्तानिस्थापयेत् कुम्भवस्त्रेणसमाच्छन्नंकुम्भ
माल्यविभूषितम् तस्योपरिन्यसेत्कांस्यपात्रेदेवंधनेश्वरम् रूव
र्णनिष्कषट्केननिर्मितंनरवाहनम् यजेत्पुरुषसूक्तेनधनदं
विश्वरूपिणं निष्कस्वरूपंपरिमाणप्रकरणेवोद्धव्यं धनदंनरवा
हनंवरदाभयकरंकुर्यात् यजेत्पूजयेत्पूजाप्रकारस्यपरिभाषायां
गुरुपरस्तकविधानेनिरूपितः अथर्ववेदविद्विद्वानथर्वाणंसमा
पयेत् अथर्ववेदपारायणंकुर्यादित्यर्थः अतस्त्रयावद्भिर्दिनैर्वे
दपारायणसमाप्तिर्भवति तावत्सुदिनेषुकुवेरपूजावक्ष्यमाण
प्रतिमापूजाचकार्याः पारायणविधिस्तुपरिभाषायांनिरूपितः
अथर्ववेदविदभावेबहुव्ययेनवायथालाभोपपन्नशाखाध्यायिना
वावेदपारायणंकारयेत् अस्यकर्मणोनिदाननिरूपणस्यार्थोपयो
गाद्देशतःपारायणेनापिहरणार्थासिद्धिः अथर्ववेदपारायणकथ

म· नैऋतयक्षरक्षःपिशाचादीनां तद्देवप्रियत्वात् धनदस्य च यक्षराट्त्वं
क· प्रसिद्धमेव कुबेरं प्रतिदिनमावेदपारायणसमाप्ति पूजयेदित्युक्ते
तद्देवरोगप्रतिमामपि पूजयेदित्याह सुवर्णप्रतिकोकुर्या
त्रिंशद्विंशतिसंख्यया दद्याद्द्विजाय संपूज्य निष्पापः स्यामिति ब्रु
वन् इयं च प्रतिमा रोगप्रतिमा अस्याश्च लक्षणमेतत्प्रकरणान्ते
निरूपयिष्याति अत्र च लिंगहानिप्रतिमाधिदेवतायै नमः इत्यने
न मंत्रेणतां प्रतिमां पूजये एवं प्रतिदिनं संपूज्य वेदपारायणस्यां
ते अनेन प्रतिमादानेनाहं निष्पापः स्यामिति ब्रुवन्निमां प्रतिमां
विप्राय दद्यात् यथाशक्ति दक्षिणाधनेश प्रतिमादानमंत्रमाह
निधीनामधिपो देवः शंकरस्य प्रियः सखा सौम्याशाधिपतिः श्री
मान्मम पापं व्यपोहतु इमं मंत्रं समुच्चार्य आचार्याय यथाविधि द
द्यादेवं हीनकुक्षी लिंगनाशी च मुच्यति प्रयोगप्रकारो मूत्रकृच्छ्र
प्रकरणादावुपवर्णितः इति लिंगहानिहरम् अथ लिंगहानिप्र
तिमादानम् वृषणव्याधिप्रतिमादानं च तल्लक्षणं चात्रके भूतरो
गेष्वित्यादिना मूलप्रकरणोक्तमेवात्राप्यनुसंधेयम् पूजादिविधा
नं त्वातंकोदेवता तत्रेत्यादिना परिभाषायां रोगप्रतिमादानविधा
वुक्तम् इति लिंगहानिवृषणव्याधिप्रतिमादानम् महार्णवा
ख्ये महति प्रबन्धे मान्धातृनाम्नो मदनात्मजस्य सत्कर्मरत्नप्र
करेण शीर्णहानिप्रायश्चित्तस्तरंगः ३२ अथ षंढत्वहरम्
शातातपप्रोक्ते दुष्टभार्यारतः षंढः स्यात्तद्याद्द्विजातये गो

यं पलत्रयं दुग्धघटद्वयसमन्वितम् पलस्वरूपं परिमाणप्रकरणे
निरूपितम् रजतदानमंत्रस्तु शाययस्थितोपक्रमप्रदत्ताद्धरीरितः
इति शंढत्वहरम् अथ दुर्भगत्वव्याधिहरं कर्मविपाकसंग्रहे नृपो
भर्त्यादिहस्त्यादीनपराधं विनैव यः छेदयेत्तस्यषण्ढकत्वंभवेद्दुर
वाहिना शिलीपिष्टसहस्रस्य सब्रणस्याभिजायते रुधिरंप्रस्र
वेत्तस्याप्तस्यैयं निष्कृतिः परा शतरुद्रं जपेत्तस्य गणेशेनरसस्तव
कम् यत्निचांद्रायणं चैव कुर्याद्दद्याच्च गां ततः विस्तरापि जायते
दुर्भगो यस्य व्याधिः परमदारुणः जपित्वा दशसाहस्रं मुच्यते
रुद्रसंहिताम् रुद्रसंहिता रुद्राध्यायः अष्टोत्तरसहस्रदशसह
स्रमित्यनेनचमहारुद्रातिरुद्रयोर्लक्षणं रुद्रविधाने दर्शितम्
यानिचात्रप्रकरणोक्तानि कर्माणि तानि सर्वाण्यपि दुर्भगत्वव्या
धिहराणि विज्ञेयानि यत्निचांद्रायणस्वरूपं कृच्छ्रप्रकरे द्रष्टव्यं
इति दुर्भगत्वव्याधिहरम् महार्णवाख्ये महितेप्रबन्धे मान्धातृ
नाम्नो मदनात्मजस्य सत्कर्मरत्नप्रकरेण शर्मण्याख्यातस्य योऽवि
शतयातरंगः २२ अथ गुदरोगहरं शातातपप्रोक्ते स्वराल
येजलेवापिसक्कूढिपं करोति यः गुदरोगी भवेत्तस्य पापरूपः
सदारुणः मासं सूर्यार्चनेनैव गोदानद्वितयेनच प्राजापत्येन
चैकेन शाम्यति गुदजा रुजः यद्यपि सूर्यार्चनमिति सामान्येना
भिहितं तथापि सूर्यप्राधान्येन रुद्रविस्मरण्यो आरोग्यं भास्क
रादिच्छेदितिस्मृतेः पूजाचशाम्बप्रोक्तसारेणगंधपुष्पवस्त्रालिका

म० क०

216

णादिभिः सूर्यार्चनगोदानप्राजापत्यचरणेषु क्रमो विपार्दक्रमएव
तद्बाधे प्रमाणाभावात् प्राजापत्यस्वरूपं कृच्छ्रप्रकरणेभ्यथावि
गोदानमंत्रस्तु कृच्छ्रोपक्रमएवउक्तौ इतिशुद्ररोगहरम् अथश्वे
वद्रुदरोगहरे कर्मविपाकसंग्रहे विप्रेंद्रोत्सर्जनं कृत्वा योकृत्वा
शौचकर्मत भुंक्ते जन्मांतरे मर्त्यो स भवेत्सत्ववद्रुदः भवेत्तदा कृ
णापीडा तत्र कृच्छ्रातिकृच्छ्रदा चांद्रायणं च कर्तव्यं तथा तीरं च स
पिषा आतिभ्यामितिमंत्रेण सह स्रं जुहुयाच्च हविः ऊयत्रुयश्चं
चैव जपेत्सर्वैर्मासंख्यया कृच्छ्रादिलक्षणानि कृच्छ्रप्रकरणेनि
रूपितानि सर्पिषा मिश्रितं तीरं हविः आज्यमिश्रितं दुग्धं जुहुया
दित्यर्थः आतीभ्यामितिमंत्रं परिभाषायां रोगप्रतिमादानविधा
वुदीरितम् तथोयत्रुयश्चेचोपिहोमसंख्ययश्चम् इतिश्वेतवद्रु
दरोगहरणम् अथशुद्ररोगप्रतिमादानम् तत्रशुद्ररोगप्रतिमा
लक्षणं तु कर्मविपाकसारे उभयत्रभजादीति कर्तव्यताविशेष
स्तु परिभाषायामातंकादेवतातत्रेत्यादिनारोगप्रतिमादानविधा
वुदीरितः अथार्शोरोगहरं कर्मविपाकसमुच्चये दत्वाघवेतनं
योध्येदारायापिचवेतनम् अध्यापयेत्तुजुहुयाज्जपेद्वार्शोयुतो
भवेत् तन्निवृत्त्यै प्रकुर्वीत कृच्छ्रं चैवातिकृच्छ्रकम् चांद्रायणं चैव
तथा जपेल्लक्षं च पौरुषम् ऊयत्रुयश्चं च विस्पदं यं च जपेत्तथा
नामाग्निवर्णामिति च जपेत्लक्षं समाहितः हिरण्यं सघृतं दद्या
द्वौलेयायकुटुम्बिने दत्वाघवेतनमित्यादिभ्रंतकाध्यायीभ्र

तकाध्यापकस्येत्यर्थः यज्ञशास्त्रविहितत्रिंगरद्विणादिव्यतिरे
केणस्वपरिकल्पितभक्तिं गृहीत्वा परार्थं जप्याज्जपेद्वा सोप्यर्शो
रोगयुतो भवेदित्यर्थः कृच्छ्रादिस्वरूपाणि कृच्छ्रप्रकरणे परिभा
षायां पुरुषसूक्तविधानं गणहोमप्रकरणे दर्शितम् उपद्रुय
न्यचस्य तत्रैव रोगप्रतिमादानविधौ विस्तरादुक्तो ऽयमपि परि
भाषायामेव तामाग्निवर्णामित्यस्यार्थो दिग्दीक्षतस्फोटहरेनिद
र्पितम् पुरुषसूक्तादीनां सर्वेषां जपसंख्या व्याधितारतम्यभावेना
शेनसहस्राधिका तथा शतमपि त्वया शताधिका वा कल्पनीया
सा हिरण्यं घृतं दद्यादिति आज्यो हिरण्यं निदध्यादाज्यावेक्षणं कुर्यात्
यादित्यर्थः आज्यावेक्षणमंत्रस्तु कटिशूलहरे दर्शितः तथाश्रो
त्रियाय कुष्ठिने एष वर्षाणि धनं दद्यात् अनेन चाभिप्रायेणात्र
लगीतास्य वचनं समाम्नातं श्रोत्रियाय यत्प्रार्थिनेन विशेषतः समा
ध्याव्याधिनाशस्तोथनं दद्याद्विशांतये इति कृच्छ्रादीन्येतानि व्या
धिशमना यन्नुसारेण व्यस्तानि समस्तानि वा योज्यानि इत्यर्शोरोग
हरं अथार्शोरोगघ्नस्वर्णधेनुदानम् तत्र विधानं पाद्मे अर्शो वा
न्गो वधान्मर्त्य इति तत्प्रकारमाह बौधायनः गां स्वर्णमयीं प्रकु
र्वीत पलार्धेनाथवा पुनः विनशाखं न कुर्वीत चतुर्थांशेन तर्णकं
पललक्षणं परिमाणप्रकरणे लक्षितं तर्णको वत्सः रत्नशृंगी
रौप्यखुरां नानारत्नैरलंकृताम् ब्राह्मणाय परिस्थाप्य नवधान्या
नि विन्यसेत् होमस्तु सर्ववत्कार्यो गोविंदप्रीतये तथा ब्राह्मण

म· क·

217

ग्रुपरीति नवग्रहस्थापनप्रदेशादुपरीत्यर्थः एतेन नवग्रहयज्ञो
पि कर्तव्य इत्युक्तं भवति सच परिभाषायां विशेषतो निरूपितः
अतो नवधान्यानि नवसंख्याकानि व्रीहियवादीनि सति संभवे
नूतनान्येव विन्यसेत् होमस्तु सर्ववदिति ग्रहयज्ञोक्तप्रकारेणात्र
हहोमः कार्य इत्यर्थः गोविंदप्रीतये इति स्वर्णगोदानस्य गोविं
दप्रीत्यर्थत्वात्तदुद्देशेनापि होमस्य कर्तव्यतां दर्शयति अस्मिन्होमे
मंत्रान्द्रव्याणि च दर्शयति इदं विष्णुः एतद्विष्णुर्विष्णुरुक्कामिति क्रमा
त् समिदाज्यचरुं हुत्वा शर्णोद्दत्यंतं एव हि इदं विष्णुरित्यस्यात्र
ष्यादि नवग्रहयज्ञप्रकरणे दर्शितः एतद्विष्णुर्विष्णुरुक्कामित्यनयो
स्तन्नकांचगोपालदाने इदं विष्णुरित्यादयो मंत्राः समिदादिहोमेषु
क्रमेण भवंति होमे त्वन्यप्रक्रमः समिद्धोमानंतरं चरुहोम इति
होमसंख्या तत्त्वाधिनारतम्येनाष्टोत्तरशताहिका कल्या शर्णोद्द
त्यंत इति शर्णोद्दत्यंते होमकर्मणि निर्वृत्त इत्यर्थः ततः किं कुर्यादि
त्यत आह एवं तत्स्वनं तो रोगी ब्राह्मणं वेदपारगम् कृतहोमोपसं
पन्नं कुलीनं धर्मचारिणम् इद्दं स्नानोपसंपन्नमनुद्वेगकरं नृणाम्
मनसा स्वयं समानीय पूजयेत्सोतिसर्वकम् अंगुलीयकवस्त्राद्यैरु
पानच्छत्रकैरपि मंत्रेणानेन तस्मै तां दद्याद्रोगी यतात्मवान् गोवि
न्दं मनसा ध्यायन्गां वामध्येऽस्थितं शुभम् मंत्रेणानेन गोविंदं श्रीगो
पीजनवल्लभेति वक्ष्यमाणेन एवं च नाध्यानश्लोकमाह बर्हापीडक
मंयुक्तं वेणुवादनतत्परम् गोपीजनैः परिवृतं वन्यपुष्पावतंसकम्

दानमंत्रमाह गोविंद गोपीजनवल्लभेश कंसासुरघ्न त्रिदिवेंद्रवं
द्य. गोदानतस्तः कुरु मे दयालो अर्शोविनाशं द्विपतारिवर्गः दाने
नानेन नियतमर्शसां जायते लयः तस्मात्कुर्यात्प्रयत्नेन दयार्थी
ह्यैतद्दर्शसः इत्यर्शोघ्नं सवत्सधेनुदानम् महार्णवाख्ये महति प्र
बन्धे मान्धातृनाम्नो मदनात्मजस्य सत्कर्मरत्नप्रकरेण हवैद्यो
नम्रत्नाश्लिष्टतयान्तरंगः २४ अथातिसाररोगहराणि कर्मवि
पाकसमुच्चये स्मार्ताग्निं शमयेद्यस्तु सोतीसारयुतो भवेत् अग्नि
रस्मीत्यृचं जप्याद्दशांशं जुहुयात्तिलान् सर्पिषा चान्नसंदद्यादि
रण्यं ब्राह्मणाय वै स्मार्ताग्निरोपासनाग्निः अन्नप्राशन्यसादनेप्र
यत्नतं त्रैमासिकमपि कर्तव्यम् अग्निरस्मीतीयमृग्वातरोगहरे
दर्शिताः जपश्चाप्यितरत्सम्भावेन प्रतिदिनं यावद्रोगशांतिर
ष्टोत्तरशतमष्टोत्तरसहस्रं वा कार्यः अथवायुतमयुतद्वयादपि कंच
संकल्पपरिसमाप्तिः कर्तव्या दशांशहोमेप्येवं यद्यपि प्रायशस्त्वित्व
होमेन्यत्र व्याहृतयो मंत्रा दृष्टास्तथाप्यत्राशितमंत्रेणैव होमस्तान्या
प्यत्रादाग्निरस्मीत्येव होमेत्र मंत्रः हिरण्यं शमनत्रुसारेण दद्यात् इत्य
सार रोगहरम् अथातिसाररोगहरं वाक्यिशक्तिदानम् तन्निदानं
पाद्ये अतिसारी सम्भवति यस्तेनाग्निविनाशकः अत्र प्रतीकारो
वैधायनीये स्ववर्णेनाष्टमांशेन कुर्यात्प्रतिकृतिं बुधः वक्ष्यः श
क्त्यनुसारेण पलेनार्धेन वा पुनः वाक्यिशक्तिं लक्षणोपेतां चिंतामण्या
दिष्टदर्शितम् वस्त्रेणाच्छादितां रक्तचंदनेनानुविलेपितां रक्त

म॰ क॰

वस्त्रेणसंवीतान्मेषस्योपरिसंस्थितान् रक्तमाल्यैःसुसंछिन्नस्रुक्का
दामपरिष्कृतान् कनकाचलवर्णाभान्द्वादशार्कान्निभांस्तुभान्
ब्रह्मचर्यान्वितेविप्रेकनिष्ठेवाग्निहोत्रिणि अंगुलीयकवस्त्रा
द्यैर्भूषितेतांतांनिवेदयेत् मंत्रेणानेनविधिवदग्निप्रीत्यर्थमाद
तः विप्रेकनिष्ठेचाग्निहोत्रिणीतिअत्राकनिष्ठइतिपदविभागे
अकनिष्ठेज्येष्ठेस्वावारोपितेउत्तमइतियावत् कनिष्ठइतिपाद
विभागेकनिष्ठेवृद्धेतरुणेइत्यर्थः एवंविधेविप्रेतांप्रतिमांनिवे
दयेत् विशिष्टायविप्रायदद्यादित्यर्थः दानमंत्रमाह श्वेतानूपो
ग्निरीउस्त्वमेनमस्वरासिवैनराणाम् तवेत्यप्राक्तनेपापमतिसारंवि
नाशय एवंकृत्वानरःसम्यगतिसारंव्यपोहति नीरुजःसुस
(ोनित्यंदीर्घमायुश्चविन्दति इत्यतीसारहरवाक्यमूर्तिदाने
अथातिसारहरंशातातपप्रोक्तं स्त्रीहन्ताचातिसारीस्याद्दद्यात्या
नोपयेदश दद्याच्चशर्करायेनुंभोजयेच्चशतंद्विजान् शर्करा
येनुविधिश्चराजयक्ष्महरेदर्शितः इतिशातातपप्रोक्तातिसार
हरम् अथरक्तातिसारहरं शातातपप्रोक्ते दावाग्निदायकश्चै
वरक्तातीसारवान्भवेत् तेनोदपानंकर्तव्यंरोपणीयास्तथावटाः
उदपानमिति उदकंपीयतेऽस्मिन्नित्युदपानंकूपोवानिपानंवाअ
पावा इतिरक्तातिसारहरम् अथग्रहिणीरोगहरं कर्मवि
पाकसमुच्चये अनन्यगतिकांभार्यामदुष्टांकारणंविना परि
त्यजतियःसोऽथग्रहिणीरोगवान्भवेत् शिवसंकल्पसूक्तस्य

जपः स्यात्तत्रशांतये अशेनरसहस्रं हि हिरण्यं च तथा मधु
दद्याद्विमात्रसारेण सौरमंत्रजपस्तथा शिवसंकल्पसूक्तस्य
चार्थादिरुद्रविधानेनगन्यासप्रस्तावे दर्शितमशेनरसहस्रमि
त्युपलक्षणं व्यापितरतमभावेन सहस्रादप्यधिकद्विगुण
त्रिगुणादिकं कल्प्यः सौरमंत्र उद्यन्नद्यऋचः अस्यतात्पर्यादिपरि
भाषायां रोगप्रतिमादानविधावुदीरितम् अत्रापि जपसंख्या
पूर्ववदेव केवलं शिवसंकल्पादिजपपर्वआपितधेनुमपि
दद्यादित्याह धेनुं सलक्षणां दद्यात्स्वाभरणसंयुताम् पय
स्विनीं गुणोपेतां ब्राह्मणाय कुटुम्बिने वस्त्रेन चाभरणेन च यु
क्ताम् इति ग्रहिणीरोगहरम् अथ ग्रहिणीरोगधेनुदानम्
तत्र पद्मपुराणे ग्रहिणीवानपत्यहेतितत्रविधानमभिहितम्
अत्रैव गौतमो निष्कृतिमाह धेनुं पयस्विनीं दद्यात्तां दामभूषणैर्भू
षिताम् हेमशृंगीं रौप्यखुरीं वासोभिर्वेष्टितां नरः नवधान्यैः
समायुक्तामेकैकं पंचद्रोणकम् नवधान्यानि व्रीहियवादीनि
देशकालोचितानि धान्यपरिमाणं दर्शितमेकैकमित्यादिना
सहिरण्यां तां दद्याद्ब्राह्मणाय कुटुम्बिने अलोलुपाय शांता
यधर्मज्ञाय विशेषतः होमं च पूर्ववत्कुर्यात्समिदाज्यचरूत्कटं
सहिरण्यामिति क्रियाविशेषणम् दक्षिणां च यथाशक्ति स्व
र्णं दद्यादित्यर्थः पूर्ववदिति रौप्यवृषदानवदित्युक्तम् हेमाद्रौ
अत्रायमभिप्रायः तत्र यथा स्वगृह्योक्तविधिनाग्निस्थापनं स

म॰
क
~~219~~
219

मिष्टोमानंतरंचरुहोममंत्रापिसर्वंकार्यमिति यद्यपितत्रहोम
मंत्रारौद्रास्तथात्रवैसवाः स्वस्वशाखोक्ताद्रष्टव्याः तत्राद्यंविष्णु
रितिमंत्रः कूष्मांडहोमप्रकरणेदर्शितः प्रतद्विष्णुर्विष्णोर्नुक
मितिमंत्रौनक्तांध्यहरगोपालदानेद्रष्टव्यौ एतेत्रयोमंत्राः स
मिच्चर्वाज्यहोमेषुक्रमेणयोज्याः अत्रवैसवमंत्रग्रहणे अयं
हेतुः देवस्यत्वेत्यादिनादानमंत्रेणविष्णोर्देवतात्वप्रीतिः तथा
पार्थैमंत्रवर्णिकीदेवताभवतीत्युक्तं तदनेन चतुर्थ्यावामं
त्रवर्णेनवेष्यते देवतासंगतिस्तत्रदुर्लभंतत्परंपरामिति हो
मसंख्यात्वष्टत्येकमष्टोत्तरशतादिकाशक्त्यायथासारेणकल्प्या
तस्मैदत्तवतीदद्यात्सजितायांगुलीयकैः गांकृष्णांविष्णुरूपा
यमंत्रेणानेनरोगवान् मंत्रमाह देवकीपुत्रचाणूरकंसारि
ष्टविनाशन नाशयग्रहणीं कृष्णगोपीजनमनोत्सव कृते
नानेनदानेनग्रहणीनाशमृच्छति तस्माद्देवत्वकर्तव्यंग्रहणी
रोगिणासदा इतिग्रहणीहरधेनुदानम् अथातिसाररोगप्र
तिमादानेग्रहणीरोगप्रतिमादानेचतत्रातिसारप्रतिमालक्ष
णंकर्मविपाकसारे अथातिसारोस्तिफलकौकिंकिणीनूपु
रीकृशः ग्रहणीरोगप्रतिमालक्षणंतत्तुक्तेषुतरोगेष्वित्युप
क्रम्यशूलरोगहरप्रकरणोक्तंविज्ञेयमुभयत्रेतिकर्तव्यताक
लापस्तुपरिभाषायांरोगप्रतिमादानविधावातंकोदेवतातत्रे
त्यादिनानिरूपितः इत्यतिसारग्रहणीरोगप्रतिमादानंच

महार्णवाख्ये महति ग्रन्थे मान्धात्रा श्रीमदनात्मजस्य
सत्कर्मरत्नप्रकरणे पंचव्योत्तरस्तथाविंशतयातरंगः २५
अथ पादरोगहरणानि तत्र खंजत्वखंजपादत्वहरं च शाता
तपप्रोक्ते हरिणो निहन्ते खंजः शृगाले खंजपादकः अश्व
स्तेन प्रदातव्यः सौवर्णो निष्कसंमितः निष्कलक्षणं परिमा
णप्रकरणे द्रष्टव्यम् निष्कपरिमितेन स्वर्णेन अश्वं कार
यित्वा आश्विनमंत्रेण अश्वं प्रजाययित्वा श्रोत्रियाय ब्राह्मणाय
दद्यादित्यर्थः आश्विनोरश्वाय देवत्वात् दाश्विनपवमंत्रो ग्रा
ह्यः आश्विनायज्ञरीरिव इत्यस्य सूक्तस्य समभृत्कुत्स ऋषिः आश्वि
नौ देवता गायत्री छंदः विहितार्थे विनियोगः आश्विनाय
ज्ञरीरिवहुवत्याणी शुभस्पती पुरुभुजा वनस्पताम् आश्वि
ना पुरुदंससा नराशंवीरयाधिया वनतंगिरा दस्रायुवा
कवः सत्ता नासत्या हृक्क वर्हिषः अयातं रुद्रवर्तनीम् उपल
क्षणमेतत् तत्राश्विनी प्रकाशकाः स्वस्वशाखोक्ता मंत्रा ग्रा
ह्याः अश्वदानमंत्रस्तु नवग्रहयज्ञप्रकरणे दर्शितः इति
खंजत्वहरे खंजपादत्वहरं च अथ वक्रपादत्वहरम् शाता
तपप्रोक्ते जायते वक्रपादस्तु निहन्ते भ्रूनि मानवः निष्कत्रय
मितं दद्यात्सौवर्णं विशुद्धये सुवर्णं विशुद्धये इत्यापि पादः
आश्विमादे स्वर्णनिष्कत्रयसंवरानं निष्कलक्षणं परिमा
णप्रकरणे भ्यधायि प्रथमपादेन सौवर्णमिति तन्नादितत्र

१८८ स॰ क॰

वर्णनिष्कत्रयपरिमितसुवर्णनिर्मितं स्थाने देवशुन्याः सर
मायाः प्रकाशकैर्मंत्रैः सम्पूज्य ब्राह्मणाय दद्यात् इंद्रस्य दूती
सरमाप्रकाशकस्य मंत्रस्य काश्यपो भूतीशऋषिः सरमा
देवता त्रिष्टुप्छंदः सरमापूजायां विनियोगः इंद्रस्य दूतीरि
षितां चरांसि मह इच्छंती पणयो निधेवः अतिष्कदो भियसात
नआवाकथा रमायाः अंतरं पयांसि अन्येपि स्वस्वशाखोक्ताः
सरमादिदेवस्य प्रकाशकाः मंत्राः ग्राह्याः इति श्वकपादत्वहरं
अथ पादरोगहरं शातातपप्रोक्ते मार्गहा पादरोगी स्यात् द
पदानं समाचरेत् अश्वापि वंजनहरप्रकारेण अश्विनौ वि
तिपूजिते कृत्वा स्वं ब्राह्मणाय दद्यात् अयं तु विशेषः तत्र सौ
वर्णयोरश्विनोः पूजा अक्षत अभिलिखितपुंजादिषु अश्विना वा वा
ण पूजयेदिति इति पादरोगहरम् अथ पादरोगप्रतिमादा
नम् तल्लक्षणं तु अक्षिपतरोगे घित्यादिना स्थलरोगहरप्रक
रणोक्तमेवापि द्रष्टव्यम् पूजादीतिकर्तव्यता तु परिभाषायां
रोगप्रतिमादानविधावातंको देवतातत्रेत्यादिना निरूपिता
इति पादरोगप्रतिमादानम् अथाधिकांगत्वहरम् अजामि
त्यात्मनैव वाधिकांगः प्रजायते अज्ञाते न प्रदातव्याविधि
वत्सनान्विता अजायाः प्रजापत्यत्वात् प्रजापतिं तत्प्रका
शकमंत्रेण संपूज्य पूजाप्रत्युद्देशेन तामजां यथाशक्ति
दक्षिणान्वितां ब्राह्मणाय दद्यात् प्राजापत्येनत्वहित्याद

यः प्रजापतिप्रकाशका मंत्रा नवग्रहयज्ञप्रकरणादिषु दर्शिताः
प्रजादानमंत्रोपि तत्रैव दर्शितः अथ वल्मीकहरम् ब्रह्मगीता
सु पतिते न तु संपर्के वल्मीकव्याधिमान् भवेत् गोमूत्रयावकाहा
रो मासार्धेन विशुद्ध्यति हिरण्यं च घृतं दद्यात् तस्य पापस्य विशुद्धये
यावकमंत्रं कृच्छ्रप्रायश्चित्ते घृतदानमंत्रस्तु प्रायश्चित्तोपक्रमप
द्धतौ दर्शितः विशेषान्तरमाह जायते यदि तत्राधिकैर्मिर्ब्रह्मवि
दां नरः प्रतिरूपं प्रदद्याद्धै रोगशान्त्यर्थमात्मनः आत्मनो रोगशा
न्त्यर्थं प्रतिमां दद्यादित्यर्थः प्रतिमालक्षणं तु प्रकरणान्ते अभिधास्य
ते इति वल्मीकहरम् अथ प्रकारांतरेण श्लीपदरोगहरम् कर्म
विपाकसंग्रहे स्वगोत्रस्याभिगमनात् श्लीपदे जायते नरः योन्या
मसृक्स्रवति तत्र चांद्रायणं चरेत् मासं पयोव्रतं चैव तस्माद्रोगा
द्विमुच्यते स्वगोत्रस्येत्यत्र लिंगमविवाहितं योनिशब्देन मैथुनसा
धनमिंद्रियं लक्ष्यते अतः स्त्रीपुंसयोरुभयो रोगिणोरेतत्कर्म रोगह
रं भवति चांद्रायणपयोव्रतयोर्लक्षणं कृच्छ्रप्रकरणेभ्यधायि इति
श्लीपदरोगहरम् अथ श्लीपदरोगप्रतिमादानम् तल्लक्षणं च क
र्मविपाकसारे श्लीपदी हि पदः ॐ उः पतत्वरयत्वर्थरः इति कर्तव्य
ता विशेषस्तु परिभाषायां रोगप्रतिमादानविधावानेकोदेवतात
त्रेत्यादिनानिदर्शितः इति श्लीपदरोगप्रतिमादानं महार्णवाख्ये
मारिते प्रबन्धे मान्धातृनाम्नो मदनात्मजस्य सत्कर्मरत्नप्रकरणे
वष्टव्यातस्तथात्रिंशत्तमो रोगः २८ अथ त्वग्दोषहराणि कर्म

म॰
क

विपाकसमुच्चये परुषंभाषतेश्वक्रंसत्वग्दोषयुतोभवेत् चांद्रा
यणत्रयंकुर्यात्सदनादोषधानिच वैद्यकोक्तानिविप्रायशक्त्या
ब्राह्मणान्भोजयेत् वैद्यकोक्तान्यौषधानिवज्रमर्दादीनि चांद्रा
यणस्वरूपंकृच्छ्रप्रकरणेनिरूपितम् इतित्वग्दोषहरं अथदुश्च
र्मत्वहरं कर्मविपाकसंग्रहे गुरुतल्पगदोषाच्चगाविमैथुनदोष
तः दुश्चर्मास्यादसौकुर्याद्गुरुतल्पातिदोषतः प्रायश्चित्तंयथाशा
स्त्रंततोदोषात्प्रमुच्यते गुरुतल्पातिदोषतःप्राप्तंप्रायश्चित्तंकुर्या
दित्यन्वयः षड्वार्षिकंकुर्यादित्यर्थः व्याधिगुरुत्वेसंशयोद्वादश
वार्षिकंकर्तव्यं कार्यस्यव्याधेर्गुरुत्वे कारणस्यपापस्याभ्यासादि
नागुरुत्वावगतेः प्रायश्चित्तोपक्रमप्रकारस्तु प्रायश्चित्तक्रमपद्ध
तौनिरूपितः इतिदुश्चर्मत्वहरम् अथगजचर्मत्वहरं शातातपप्रो
क्ते विश्वस्तभार्यागमनेगजचर्मप्रजायते तत्पापस्यविनाशाय
प्रायश्चित्तंविधीयते विश्वस्तभार्यागमनेगुरुतल्पप्रायश्चित्ताति
देशात् षड्वार्षिकंप्रायश्चित्तंकर्तव्यम् प्रायश्चित्तशब्देननिष्कृ
तिरभिधीयते साचकृच्छ्रादिरूपादानरूपाचतदुभयमपिप्राय
श्चित्तशब्देनोपात्ते तत्रगुरुतल्पत्वभावेनद्वयोःसमुच्चयोविकल्प
श्चावगन्तव्यः एवंप्राजापत्यादिस्वरूपंकृच्छ्रप्रकरणेनिरूपितं
एवंप्राजापत्यादिरूपांनिष्कृतिंनात्यर्थतोभिधायेतरांविवक्षुर्द
र्शयति कृत्वारूपमयींधेनुंनिष्कविंशतिसंख्यया सर्वोपस्करसं
युक्तांसोपानत्संहताम् दद्याद्विप्रायविधिवदिमंमन्त्रमुदीर

येत् सर्वोपस्करसंयुक्तामितिसुवर्णशृंगादय उपस्काराः तेचत्र
हरणीहरयेत्तुदानेदर्शिताः तथान्येचोपस्काराः त्वयरोगहरप्रकर
णेगुडुयेन्वादिषुप्रदर्शिताः यद्यपुपस्कारेषु स्वपदुराणामपिप
रिमाणेतथापिधेनोरजत्वमयत्वासिद्धेनरथशूर्पादुरापेदेति
उपस्करादुरलोपः दानमंत्रमाह सुरभीवैस्वीमातानित्यंविष्णुप
देस्थिता गोदानेंतमयादत्तंममपापंव्यपोहतु इतिगजचर्मत्वहरं
अथत्वग्दोषप्रतिमादानम् एतल्लक्षणंचात्रमेषुतुरोगेष्वित्यादि
नाम्नलरोगहरेभिहितमेवात्रापिविज्ञेयम् इतिकर्तव्यताकलाप
स्तुपरिभाषायांरोगप्रतिमादानविधावाततकोदेवतातत्रेत्यादि
नानिरूपितम् इतित्वग्दोषप्रतिमादानं अथपामाहरंकर्मविपा
कसंग्रहे अतिलेपतियोन्येषांविषयान्सर्वजन्मानि सोन्यजन्मनि
पामावान्भवेत्स्वतिशोणितम् सर्वंतमिहत्यर्थउपवासत्रयं
भवेत् भोजयेच्च द्विजान्सप्तान्संचाशक्त्याप्यन्विताम् अत्रापिव्या
धिगुरुलघुभावेन न्यूनाधिकभावाःपरिकल्पनीयाः इतिपामाह
रम् अथदद्रुरोगहरमुमामहेश्वरदानं बौधायनः ब्राह्मणानथ
योहिंस्याद्दद्रुरोगीभवेन्नरः तस्यापिशमनंवक्ष्येसुवर्णेनतुकार
येत् हिंस्यान्पीडयेत् सुवर्णंषोडशमाषात्मकः माषपरिमा
णं परिमाणप्रकरणेभ्यधायि सुवर्णेनतुवाकुर्यात्तादेनाप्ययं
वाप्तनः उमामहेश्वरंरूपंहेषभाषितिष्ठितंपरम् चतुर्भुजंचाद्विभु
जामुमांकुर्याद्द्विचक्षणः एकवक्त्रोभवेन्नत्रत्रिनेत्रश्चमहाभुजः

म॰
क॰

अक्षमालां त्रिशूलं च तस्य दक्षिणहस्तयोः देवी ह्युत्संगगतस्यैको वरदश्चापरः करः वामोत्संगगता देवी शिवपृष्ठैकपाणिका एष भोत्र्ययतः कार्यो चंदायालंकृतो भवेत् स शस्त्राविनशांतकर्ततो निष्फलं भवेत् तस्मिन्नारोपदेवेशश्च मयासहितं प्रभुं वस्त्रैर्माल्यैस्तथा गंधैः शूलमंत्रेण पूजयेत् मूलमंत्रश्चात्र पंचाक्षरः सर्वशूलरोगहर त्रिशूलदाने दर्शितः होमे रुद्रगायत्री मंत्रश्च रुद्रगायत्रीति विनिश्चितः इत्यग्रे वक्ष्यमाणत्वात् सर्वत्रेति सर्वशूलस्य पूजाव्यतिरिक्ते होमविशेषः अथवा मूलमंत्रो रुद्रगायत्री अतः सर्वत्र पूजादावपि विकल्पेनांगभावं भजते अत्र होमे विकल्पेन मंत्राविधास्यते पूजानंतरकर्तव्यमाह ततो ब्राह्मणमाहूय दरिद्रं धर्मकोविदम् कृतस्नानोपसंपन्नं शांतं चैवात्मवोधितम् वस्त्रांगुलीयकैस्तस्य पूजां भक्त्या प्रकल्पयेत् होमं च कारयेत्तेन समिदाज्यतिलैरपि मंत्रश्च रुद्रगायत्री सर्वत्रेति विनिश्चयः रुद्रगायत्रीति लिंगपुराणे विहिता सर्वेश्वराय विद्महे शूलहस्ताय धीमहि तन्नो रुद्रः प्रचोदयात् इ अस्य श्री वेदव्यास ऋषिः श्री रुद्रो देवता गायत्री छंदः विहितार्थे विनियोगः एवं रुद्रगायत्री पूजायां होमे च सर्वत्र विनियोज्य समिदाज्यतिलहोमे तु क्रमेण मंत्रांतराण्यपि विकल्पेन विनियुक्तानि यद्वापि त्र्यम्बकेनैव समिधो जुहुयात्सुधीः कद्रुद्रायेति मंत्रेण जुहुयादाज्यमादृतः तिलांश्च मूलमंत्रेणेत्येवं मंत्र होमो भवेत् होमसंख्या प्रत्ये

कमष्टोत्तरशतंत्र्यम्बकमंत्रस्यार्थोत्रुः सत्वरहरेद्दर्शितम् कद्रु
द्रायेत्यस्यकण्वऋषिः रुद्रोदेवता गायत्रीछंदः आज्यहोमे
विनियोगः कद्रुद्रायप्रचेतसेमीढुष्टमायतव्यसे वोचेम
शंतमंहृदे मूलमंत्रस्यपंचाक्षरीवारुद्रगायत्रीवा होमानं
तरंकर्तव्यमाह तथात्रलोहासनंतैमिथुनंब्राह्मणायत
त्रलोहासनंनामसवर्णलोकंप्रकारेणब्राह्मणा ऋत्विजोवि
सर्जनंमिथुनंतुउमामहेश्वरात्मकंदानमंत्रमाह कैलासवा
सीभगवानुमयासहितःपरः त्रिनेत्रश्चहरोदद्रुरोगमाशु
व्यपोहतु तच्चास्त्रब्राह्मणान्त्र्यम्बकाणिपत्यसमापयेत् ब्रा
ह्मणान्भोजयेच्चापिस्वयंभुंजीतवाग्यतः एवंदद्यान्महादा
नंदद्रुरोगाद्विमुच्यते इतिदद्रुरोगउमामहेश्वरदानं अथ
दद्रुमंडलहरं शातातपप्रोक्ते स्त्रीमंगनाभिगमनेजायते
दद्रुमंडलं कृत्वालोहमयींधेनुंपलषष्टिप्रमाणतः कर्णम
भारसंयुक्तंसप्तधान्यसमन्वितम् दद्यादिप्रायविद्धिवेपापंमे
त्तीयतामिति पलस्वरूपंप्रातकम् अत्रयद्यपिसामान्यतः
पापंमेत्तीयतामित्युक्तं तथापिदद्रुमंडलनिदानस्वरूपंपापंत
त्पापकार्यंभूतोरोगोवात्तीयतामितिउच्चार्यकार्पासादिसम
न्वितांलोहमयींधेनुंदद्यात् इतिदद्रुमंडलहरम् अथलूत
कितहरम् शातातपप्रोक्ते गोत्रहालूतकीचैवप्राजापत्य
शतंचरेत् व्रतांतेमेदिनींदद्याद्ब्राह्मणायाच्चैवभारतम् भ्रमेर

म॰क

१२३

भावेमेदिनीप्रतिनिधित्वेनगांपयस्विनीमलंकृत्वादद्यागोदा
नमंत्रस्तनवग्रहयज्ञप्रकरणेदर्शितः प्राजापत्यलक्षणो
कृच्छ्रप्रकरणेभिहितम् भारतश्रवणप्रकारस्तुमहाभार
ते वाच्यमानेतुविप्रेभ्योराजन्पर्वणिपर्वणि स्वस्तिवाच्य
विधानेनततःकार्यंप्रवर्तते समाप्तेपर्वणिततःस्वशक्त्या
तर्पयेद्द्विजान् आदौतुवाचकंपूज्यस्रग्गन्धसमन्वितम्
विधिवत्पूजयेद्राजन्मासंपायससन्ततमम् ततोमूलफलप्रा
येपायसंमधुसर्पिषी आस्तीकंपूजयेन्नाजंदद्याच्चैवगुडौ
दनम् स्वस्तिवाचेत्यादिविधिर्विधानंपुराणपाठेः तस्मादौ
स्वस्तिवाच्यस्वगृह्योक्तप्रकारेणस्वस्तिवाचनंविधायततः
कार्यंप्रवर्तते पुस्तकपूजानंतरंभारतपाठरूपंकार्यंप्रव
र्तते पर्वयोःस्वेदेवाश्रोतुमिच्छन्नित्यादयोदित्यर्थः ततःका
र्यंप्रवर्ततइत्यनेनैवार्थांतरमपिसूच्यते स्वस्तिवाचनंवि
धायतदनंतरंकार्यंकृत्यंस्रक्चन्दनवस्त्रतोद्भूलालंकारा
दिभिर्वरणरूपंकार्यंप्रवर्तते ततःपुराणपाठइतिपत
त्सुसर्वसाधारणेनयथासमाप्तौब्राह्मणभोजनंस्वशक्त्यापुरा
णपाठकपूजासर्वपुराणसाधारणम् आदौतुवाचकंपूज्ये
तिसमास्यनंतरमादौप्रथमतोवाचकंपाठमात्रप्रवर्तकं
संपूज्यपश्चात्तदर्थव्याख्यातारंपूजयित्वाततस्ततरांद्विजां
स्तर्पयेदुक्तप्रकारेणपूजयेद्दैनयेदित्यर्थः आस्तीकइति

पूर्वोक्तमधुपायसायाल्लौकेदद्यादित्यन्वयः सात्विकइत्य
त्रैकवचनमविवक्षितं मातंविद्यासंस्त्राण्येकत्वमविवक्षि
तमेवमादिपर्वण्यभिधायसभापर्वादिषुक्रमेणाह अथपू
पैस्त्रद्वीपैस्त्रमोदकश्चसमन्वितम् सभापर्वणिराजेंद्रहवि
ष्यंभोजयेद्विजान् हविष्यंब्रीहिगोधूममुद्गयडगपायसा
दि आरण्यकेमूलफलैस्तर्पयेच्चद्विजोत्तमान् आरण्यपर्व
मासाद्यजलकुंभान्प्रदापयेत् तर्पणानिचशुभ्राणितथामधू
लफलानिच तर्पणानिस्त्रक्चंदनद्रव्याणिवस्त्रादीनिसर्व
कामगुणोपेतंविप्रेभ्योन्नंप्रदापयेत् विराट्पर्वणितथाचा
मांसानिविविधानिच तथेत्यनेनब्राह्मणभोजनमद्भुतकृष्य
ते उद्योगेभरतश्रेष्ठसर्वकामसमन्वितम् भोजनंभोजये
द्विप्रान्गन्धमाल्यैरलंकृतान् भीष्मपर्वणिराजेंद्रदत्वादा
नमनुत्तमम् अनुत्तमंदानंगोदानादि ततःसर्वगुणोपे
तमन्नंदद्यात्सुसंस्कृतम् द्रोणपर्वणिविप्रेभ्योभोजनंपर
मार्चितम् ॥ राज्यदेयाराजेंद्रचापान्यासिवरांस्तथा कर्ण
पर्वण्यपितथाभोजनंसर्वकामिकम् विप्रेभ्यःसंस्कृतंस
म्यक्कदद्यात्संयतमानसः शल्यपर्वणिराजेंद्रमोदकैःस
गुडोदकैः सपूपैस्तर्पणैश्चैवसर्वमन्नंप्रदापयेत् गदापर्व
ण्यपितथामुद्गमिश्रंप्रदापयेत् स्त्रीपर्वणितथारत्नैस्तर्प
येद्विधिवद्विजान् ततःसर्वगुणोपेतमन्नंदद्यात्सुसंस्कृतम्

म॰
क

शांतिपर्वणि पितथा भोजनं सार्वकामिकम् तथाश्रमणि वा
सांसिद्धयादित्यर्थः सौसले सर्वशाणिक गंधमाल्यानुलेपनम्
हरिवंशे तथाश्राद्धपायसं चरुभोजनम् पारणे पारणे राज
न्यथावद्भरतर्षभ पारणे पारणे शान्ति इतरपर्व पारायणे पारा
यणे पाठे यावत् यथावत्सर्वार्थप्रकारेण वस्त्रालंकारादिभि
र्यथाशक्त्या पूजयेदित्यर्थः समाप्य सर्वां प्रयतः संहितां शा
स्त्रकोविदः शुभे देशे निवेश्याथ क्षौमवस्त्रादिसंयताम् शुक्ला
म्बरधरस्तत्र स्रग्वी शुचिरलंकृतः अर्चयेत यथान्यायं गंधमा
ल्यैः पृथक्पृथक् संहितापुस्तकं तत्र प्रयतस्तु समाहितः भ
क्ष्यैर्भोज्यैश्च पेयैश्च कामैश्च विविधैः शुभैः हिरण्यं च सुवर्णं
च दक्षिणां तत्र दापयेत् रूपैः रूपैः कौतुकैर्गीतनृत्यादिभिस्त
था सुवर्णं षोडशमाषात्मकं पतत्तु पुराणश्रावयितृदक्षि
णां तथा स्वशक्त्यनुसारेण हिरण्यं तथान्येषु श्वदक्षिणां दद्यात्
देवताः कीर्तयेत्सर्वा नरनारायणौ तथा ततो गंधैश्च माल्यैश्च
स्वलंकृत्य द्विजोत्तमान् तर्पयेद्विविधैः कामैर्धान्यै रत्नादिभि
स्तथा शुक्लवस्त्रं च विप्रेषु यथावत्संप्रवाचयेत् वाचकं भरत
श्रेष्ठ भोजयित्वा स्वलंकृतम् ब्राह्मणेषु प्रसन्नेषु प्रसन्नास्तस्य
देवताः वाचके परितुष्टे तु शुभा प्रीतिरनुत्तमा ततो विवरणं
कार्यं संहितां भरतर्षभ शुक्लवस्त्रं च विप्रेषु इत्यारभ्य तेनपु
राणोपक्रमोभिहितः इतरपुस्तकपूजाद्युपक्रमोपसंहार

योर्थयोवितं योज्यं इतिहासमिमं श्रुत्वा यथावदनुपर्वशः
संयतात्मा शुचिर्भूत्वा पारं गत्वा तु भारते तेषां श्राद्धानि देयानि
श्रुत्वा श्रुत्वा तु भारतं श्रद्धया दीयते इति श्राद्धानि तानि च त
त्सर्वोपक्रमे समासे समासे च पर्वप्रदर्शितानि ब्राह्मणेभ्यो
यथाशक्ति भक्त्या च भरतर्षभ महादानानि देयानि रत्ना
नि विविधानि च गावः कांस्योपदोहाश्च रत्नानि समनोह
रः सर्वकामगुणोपेतयानानि विविधानि च भवनानि वि
चित्राणि भूमिर्वासांसि कांचनम् वाहनानि च देयानि हया
मत्ताश्च वारणाः शयनं शिविकाश्चैव स्यन्दनाश्च स्वलंकृताः
यद्यद्गृहे वरं किंचित्किंचिदस्ति महद्वसु तत्तद्देयं द्विजाति
भ्य आत्मा दाराश्च सूनवः श्रद्धया परया दद्यात्क्रमशः पार
पारगः आत्मा दाराश्च सूनव इति एतच्च कैमुतिकन्यायेनैव
वस्तूनां कुटुम्बविरोधेन देयत्वप्रतिपादनाय अथात्मांतःक
रणं वित्तस्य दानमवचनं दत्ताश्च सूनवः पुत्रसमा दासा इत्यर्थः
शक्तितः तन्मनः भूत्वा सत्कृतश्च विमत्सरः एवं करोति यो वि
द्वान् दानं सर्वं प्रतिष्ठितम् सर्वयज्ञफलं प्राप्य सदेवैः सह मो
दते यश्चानेन प्रकारेण भारतं श्रावयेन्नरः नदातद्दानमाहा
त्म्यालोकान्नुद्धरति एषो लोकात्स्वर्गादिलोकानुद्धरत्यात्म
सात्करोतीत्यर्थः इति भारतहरिवंशे तत्पुराणानां च श्रव
णविधिः इति लतांकितहरम् अथ वंधनोगतहरम शान्ता

म॰
क

तपप्रोक्ते लोहहारीचपुरुषोभवेद्वेवंधनांगकः लोहंपलश
तंदद्यादुपोष्यसमवासरम् पलसप्तंपरिमाणप्रकरणेभ्यथा
पि लोहदानमंत्रस्तु नवग्रहयज्ञप्रकरणेदर्शितः इतिबं
धनांगत्वहरम् अथकुनखत्वांगत्वहरम् शातातपप्रोक्ते
कारुकाणांवधेकुनखोत्वत्वांगेप्रजायते तेनतत्पापशुद्ध्य
र्थंदद्याद्वैवृषभंसितम् कारुकाःशिल्पिनःवृषभदानमंत्रो
नवग्रहयज्ञप्रकरणेदर्शितः इतिकुनखत्वांगत्वहरम् अ
थकंडूतिरोगहरम् शातातपप्रोक्ते तैलचौर्येणभवतिनरः
कंडूयतःसदा उपोष्यसोपिविप्रायदद्यात्तैलघटद्वयम्
इतिकंडूतिरोगहरम् अथशीतांगत्वहरम् शातातपप्रो
क्ते वस्त्रहारीचशीतांगःसप्रदद्यात्सुशोभनम् हेमनिष्कच
यमितंवस्त्रयुग्मंद्विजातये वस्त्रदानमंत्रमाह पीतवस्त्रद्व
येयस्माद्वासुदेवस्यवल्लभम् प्रदानात्तस्यमेविष्णोस्ततःशां
तिंप्रयच्छमे सहसममभिव्याहारंसुवर्णमपिवासुदेवप्रीत्य
र्थमेवदद्यात् इतिशीतांगत्वहरम् अथदुर्गंधांगत्वहरम्
शातातपप्रोक्ते सौगंधिकस्यहरणाद्दुर्गंधांगःप्रजायते ल
क्षमेकंतुपद्मानांजुहुयाज्जातवेदसे सौगन्धिककल्हारंसौगंधि
द्रव्यंचजातवेदसइत्यनेन जातवेदसेसुनवामसोममित्यृ
पादानं अतोहोममंत्रश्चयमेवप्राक् अस्याचरणादिशीतत्व
हरउक्तम् इतिदुर्गंधांगत्वहरम् अथवस्तगंधत्वहरम् शा

तातपप्रोक्ते मधुचौरस्तु पुरुषो जायते वस्त्रगन्धवान् मद
द्यान्मधुधेनुं च उपोष्याथ द्विजातये मधुधेनुविधानेन त्वय
रोगहरप्रकरणे उद्धेनुविधाने दर्शितम् वशाह्वाप्तायश्चि
त्तेमस्तु द्वीयते अत्रास्य व्याध्यनुसारेण चान्द्रायणादिकल्पं चा
न्द्रायणादिस्वरूपं च कृच्छ्रप्रकरणेऽभिहितम् इति वस्त्रगन्ध
त्वहरम् अथ बभ्रुमंडलत्वहरम् शातातपप्रोक्ते नकुलस्या
पिहनने जायते बभ्रुमंडलम् निष्कद्वयमितं दद्यान्नकुलं स
विभ्रुजाति निष्कलक्षणं परिमाणप्रकरणेऽन्यथापि शक्त्य
नुसारेण सौवर्णौ राजतौ वापि निष्कौ भवतः विशेषात्तु पादाना
य इति बभ्रुमंडलत्वहरम् अथ कुष्ठमंडलत्वहरम् शाता
तपप्रोक्ते मयूरघातने चैव जायते कुष्ठमंडलम् निष्कत्र
यमितो देयस्तेन स्वर्णमयः शिखी इति कुष्ठमंडलत्वहरम्
अथ श्वेतमंडलत्वहरं विसर्पत्वहरं च कर्मविपाके अमेध्य
स्य प्रदातानां विसर्पव्याधिमान्भवेत् मासे पयोव्रतं कुर्याद्
द्यादंतेपयास्विनीम् इति विसर्पत्वहरं अथ विसर्पहरनाग
दानम् बौधायनः सर्पाश्रयः खोदयति स विसर्पी भवेन्नरः
दानेनोपशमः कार्यो होमेन च विशेषतः वक्ष्यमाणेन नाग
दानेन होमेन चेत्यर्थः पलेन वा तदर्धेन तदर्धेनाथवा पुनः कु
र्यान्नागं सुवर्णेन फलपंचकसंयुतम् माणिक्यानि प्रदेया
नि प्रत्येकं फलपंचके रक्तं पट्टेन धादेयं वज्रं लोचनयोस्तथा

म॰
क

एवं कृत्वा शुभं नागं तुं क्रमेणानुलेपयेत् रक्तवस्त्रेण संवेष्ट्य
तास्त्रपात्रोपरिन्यसेत् पात्रस्य च परीमाणे पलानामष्टकं वि
दुः उपचारैः षोडशभिरर्चयेन्नागमुत्तमम् पललक्षणं परि
माणप्रकरणे निरूपितम् अर्चनेवक्ष्यमाणहोममंत्रेभ्योन्य
तमो ग्राह्यः आचार्यः सर्वशास्त्रज्ञो धर्मशास्त्रविशारदः होमं
चापि प्रकुर्वीत समिदाज्यतिलैः शुभैः नमोस्तु सर्पेभ्य इति
त्रिभिर्मंत्रैर्यथाक्रमात् अष्टोत्तरसहस्रं वाप्यष्टोत्तरशतं तु वा
अष्टाविंशतिमेवाथ परिमाणं पृथग् भवेत् प्रत्येकमष्टोत्तरसह
स्रादि भवेदित्यर्थः नमोस्तु सर्पेभ्य इत्यास्योतिसरणो अग्निर्ऋ
षिः सर्पो देवता अनुष्टुप् छंदः क्रमेण समिदाज्यतिलहोमे
विनियोगः नमोस्तु सर्पेभ्यो ये के च पृथिवीमनु ये अंतरि
क्षे ये दिवि तेभ्यः सर्पेभ्यो नमः ये देवा दो दोषनो दिवो ये वा सू
र्यस्य रश्मिषु येषामप्सु सदः कृतं तेभ्यः सर्पेभ्यो नमः य इषवो
यातुधानानां ये वा वनस्पतीरनु ये वावटेषु शेरते तेभ्यः सर्पेभ्यो
नमः एभिर्मंत्रैः समिदादिहोमो भवति तत्राज्यहोमेयमपरो
विशेषः हुत्वा हुत्वा स्रुन्यावशिष्टानाज्यविंदून् पात्रोत्तरे स्थाप
येत् ते च विन्दवः सम्पाता इत्युच्यंते तेन च संपाताज्येनाचार्ये
रोगिणोंगान्यभ्यंज्यादिति तदेतदाह हुत्वा चाहुतिसंपातैः पा
त्रे चैकीकृते स्वयम् आचार्यो गात्रिचाभ्यज्य रोगिणं तु विसर्पि
णम् अथ कुशादिभिः संमार्जयेदित्याध्याहारः संमार्जनेमंत्रा

नोऽत्र गिभितमापराज्ञीति भूमिर्भूम्नादिभिः क्रमात् स्वस्थो य
थासौ भवति गात्राण्यस्यापि रोगतः भूमिर्भूम्नादिभिः क्रमा
दिति भूर्भूम्नेति सामर्चमारभ्य क्रमात् तिसृभिः ऋग्भिरित्यर्थः य
थासौ रोगी स्वस्थो नीरोगो भवतीति संक्षेपेण कथनं एतदेव
विविच्य कथयति गात्राण्यस्य परोगतश्चेति गात्राण्यंगानि
यथारोगतः रोगादपगतानि भवंति तथा संमार्जयेदित्य
र्थः सर्वावयवानपि यथायोगं मार्जयेदिति तान्यर्थे भूमिः
भूम्नीत्यासां तिसृणां सर्पराज्ञी ऋषिः अग्निर्देवता द्वितीययो
गात्मा सर्पो वाग्निर्वा देवता सर्वत्र लिंगोक्ता वा आद्यात्वनुष्टुवि
तरेगायत्र्यो समार्जने विनियोगः भूमिर्भूम्ना द्यौर्वरिणांतरिक्षं
महित्वा उपस्थे देव्यदितेग्निमन्नादमन्नाद्यायादधे आयं गौः पृ
श्निरक्रमीसदन्मातरं पुनः पितरं च प्रयन्स्वः त्रिंशद्धाम वि
राजति वाक्पतंगाय दिशश्वधिं च प्रतिदारूणि निक्षिपेत् प्रक
ल्प कलशं कुर्यादभिषेक जलैः शुभैः नमोस्तु सर्पेभ्य इति
सार्धं तल्लिंगकैरपि हिरण्यवर्णाः शुचयः पावमाना इत्यवाक
तः आपो हि ष्ठा मय इति शन्नो वात इति दीपयेत् गुग्गुलुः प्रासि
द्धः सुगंधिः कर्पूरादि प्रति दारु देवदारु मार्जनम् इतोग्रत
स्वक्षफलान्यत्र शस्यंते अन्यान्यभिषेक कलशे निक्षिपेत्
प्रकल्प्य निक्षिपेच्च तं कलशमभिषेकोपयुक्तैस्तीर्थादिजलैः
परिपूरितं पूर्णं कुर्यात् नागपूजा प्रवेशान्त्याग्निमभागे कल

म॰ क॰

शंसंस्थाप्यतीर्थोदकेन स्नापयित्वा गुग्गुलादीन्मन्त्रानिलिप्य
नागंस्वप्रतिमायां पूजयित्वा पूर्वस्थापितकलशेन नवग्रहो
क्तप्रकारेण वरुणमावाह्य संपूज्य नमोस्तु सर्पेभ्य इत्या
दिभिर्मन्त्रैस्तदुदकं अष्टाविंशत्याभिमन्त्र्य पूर्वोक्तहोमे विधा
यसंपाते रोगिणोंगानि संमृज्य पश्चादभिषेकं कुर्यादिति
क्रमः तत्राभिषेकेमंत्रानाह नमोस्तु सर्पेभ्य इत्यादिना
आपोहिष्ठामय इत्येतेनाथाभिषिंचेत् इत्यध्याहार्यमिति
लिंगकैरभिषेकप्रकाशकैर्हिरण्यवर्णा इत्यादिभिः सार्धं न
मोस्तु सर्पेभ्य इति त्र्यृचेनाभिषिंचेदित्यर्थः अयंच त्र्यृचोस्मि
न्नति मंत्रैरेव प्रदर्शितः हिरण्यवर्णा इति आपोहिष्ठामय इति
त्र्यृचः परिभाषायां रोगप्रतिमाख्याने विधावुपवर्णितः एवमा
नावबाकस्त्वहोमप्रकरणे दर्शितः शन्नो वात इत्युदीरयएतेन
चसस्वशाखोक्तिशांतिपाठ उपलक्ष्यते शन्नो वातपर्वताभि
त्यादिनैत्तिरीयशांतिस्तथाश्वलायन गोशांतिश्च परिभाषा
यां दर्शिता अयंच शांतिपाठश्चाभिषेकानंतरं कार्यः ततः किं
कुर्यादित्यत आह उत्सादितांगस्तचिरं लिंपेदगुरुचन्दनैः
ततः शुक्लाम्बरधरः स्रक्कमाल्यानुलेपनैः स्वयं समर्चयेन्नागं
गंधपुष्पाक्षतादिभिः सर्पदैवत्यमंत्रेण आचार्योपि समर्चये
त अनन्तं सर्पराजं तमाचार्याय निवेदयेत् उत्सादितांग इत्या
दि उत्सादितांग प्रोञ्छितांग वस्त्रेण प्रकृतशरीरस्यादित्यर्थः

तदेवं यथा भवति अगुरुणा श्रीचंदनादिभिश्चालिंपेत स्वय
मिति रोगी पतन्तु समर्चनं दानकाले सर्वं कृतम् जातोऽन्यदेव
मन्तुदेवेभ्यो मंत्रोत्रैव होमांगत्वेन दर्शितः अधुना नागदान
मंत्रमाह यो धत्ते पृथिवीं कृत्स्नां सशैलवनकाननाम् क्षीरा
ब्धौ यश्च शय्यास्ति वासुदेवस्य शार्ङ्गिणः सोऽयं दानेन नागो
मेतुष्टो व्याधिमपोहतु वैसर्पकविकारं वा तद्दोषजनितं
तथा रक्तरोगोद्भवं वापि मातृतः पितृतोऽपि वा अंगप्रत्यंगसं
भूतं विकारमेव व्यपोहत्विति एवं दत्वा तं नागं आचार्याय स
दक्षिणम् भूमौ प्रणम्य शिरसा शनैः शतपदं व्रजेत् आचा
र्यमनुव्रजेदित्यर्थः आचार्यश्चोपलक्षणं प्रतिग्रहीतुरनुव्रज
नं कुर्यादितियावत् आचार्येणाभ्यनुज्ञातः स्वगृहं प्रविशेत्त
तः ब्राह्मणान्भोजयित्वा तु स्वयं भुंजीत बंधुभिः इति विस
र्पहरं नागदानम् अथ कुष्ठरोगहराणि शातातपप्रोक्ते
ब्रह्महा नरकस्यांते पांडुकुष्ठी प्रजायते प्रायश्चित्तं प्रकुर्वीत
तत्पातकविशुद्धये प्रायश्चित्तं षड्वार्षिकं कुर्वीत पापस्यो
पभोगेन क्षीणत्वात् प्रायश्चित्तोपक्रमप्रकारस्तु प्रायश्चित्तोप
क्रमपद्धताउदीरितः एवं कृतप्रायश्चित्तस्य तदनंतरं कर्त
व्यमाह चत्वारः कलशाः कार्याः पंचपल्लवसंयुताः पंचरत्नस
मायुक्ताः सितसूत्रेणवेष्टिताः अश्वस्थानादिमृद्युक्ताः तीर्थोद
कसंभृताः कषायपंचकोपेता नानाविधफलान्विताः सर्वौ

म॰
क॰

षधिसमायुक्तांस्थापयित्वा प्रतिदिशं ततः पंचपल्लवाः आम्राश्व
त्थवटप्लक्षौदुम्बराणां मदस्थरथ्यावल्मीकनदीसंगमगोकु
लेभ्योग्राह्या कषायाश्च पिप्पलाश्वत्थादीनां त्वचः प्रतिदिशं र
वीदिदित्येवं चतुरः कलशान्संस्थापयित्वा तन्मध्ये परं कल
शं संस्थाप्य तस्योपर्यष्टदले रौप्यं पद्मं निधाय तत्र वासुदेवं सं
स्थापयेदित्याह रौप्यमष्टदलं पद्मं पद्मकुंभोपरि न्यसेत् त
स्योपरि न्यसेद्देवं पुंडरीकं चतुर्भुजम् पलार्धार्धप्रमाणेन सु
वर्णेन विनिर्मितम् यजेत्पुरुषसूक्तेन त्रिकालं प्रतिवासरम्
यजमानः शुभैर्गन्धैः पुष्पैर्धूपैर्यथाविधिः ऋग्वादिकुंभेषु ततो
ब्राह्मणान्ब्रह्मचारिणः पारयेयुः स्वकान्स्वकान्ऋग्वेदप्रभृती
न्शनैः दशांशेन ततो होमो ग्रहशांतिपुरःसरम् तत्कुंडे वि
धातव्यो घृताक्तैस्तु तिलैर्यवैः द्वादशाहमिदं कर्म समाप्याद्वि
जपुंगवः भद्रासने यजमानस्याभिषेकं समाचरेत् पलार्धार्ध
प्रमाणेनेति पलं सुवर्णपरिमाणप्रकरणे निरूपितम् पले
न पलार्धेन पलचतुर्थांशेन वेत्यर्थः यजेत्पुरुषसूक्तेनेति र
जाप्रकाशस्थपरिभाषायां पुरुषसूक्तविधाने दर्शितः द्वादशदि
नमध्यमेतत्कर्म तत्र प्रतिदिनं प्रातर्मध्यंदिनसायंकालेष्वा
चार्येण पूजितं देवं यजमानो गंधपुष्पादिभिः पूजयेत् तथा
एवं स्थापितेषु चतुर्षु ऋग्वादिकुंभेषु ऋग्वेदादीन्पारयेयुः ऋ
ग्वेदादिवेदचतुष्टयपरायणान्कारयेदित्यर्थः ऋग्वेदकुंभे ऋग्वे

दंदक्षिणे यजुःपश्चिमे सामचोत्तरे अथ वेदागारसंपादयेत्
वेदचतुष्टयविदामभावे यथा संभवशाखाध्यायिभिरपि तत्
भिन्नब्राह्मणैरपि वा रिवेदपारायणानि कारयेत् दृष्टार्थत्वाद
स्य कर्मणः रोगनिवृत्तिरूपदृष्टं प्रधानप्रयोजनम् अवांतरप्र
योजनं तु दुरितापूर्वनिवृत्तिः साच वेदपारायणे चतुष्टयस्या
ध्यावेदानामपि चात्र विध्यंस्तत्सिद्धमित्यवेदादिपारायण
कथनं पारायणविधिस्तु परिभाषायां निरूपितः यद्यपि साम
स्यापाठक्रमानेषु वेदांतराणामनध्यायो वेदांतरेषु च पाठक्रमा
नेषु सामांतथापि वेदचतुष्टयपारायणविधिबलादेकत्रक्रं
मस्थापनविधानाद्वा यावता परस्परसंचारो पि कल्प्यः इति श्र
न भवेत्तावति भागे कलशचतुष्टयं स्थापयित्वा मध्ये वा स्वदे
वाधिष्ठानकलशं स्थापयेत् दशांशेन होमश्रुतियास्मिन्देव
सेयावान्वेदपाठो जायते तावत्तं ग्रंथसंख्यया गणयित्वा द
शांशेन होमो व्याहृतिभिः कार्यः अत्रायं परिगणनादि प्रका
रः मंत्रब्राह्मणौ मिलित्वा यस्मिन्वेदे यावान्ग्रन्थस्तावंतं द
दशधा विभज्य प्रतिदिनमेकैकांशसंख्यया व्याहृतिभिर्होमः
कार्यः इति होमद्रव्यं च घृताक्ताः तिला यवा वा पंचकर्मदिनेषु
प्रथमदिन एव ग्रहयज्ञोक्तप्रकारेणादित्यादिग्रहान्स्थाप
यित्वा ग्रहशांतिहोमानां निवर्त्य यावत्कर्मसमाप्तिस्तावत्स्था
पितान् ग्रहान्प्रतिदिनं गंधपुष्पादिभिः समर्चयेत् कर्मांते

म॰
क

दक्षिणोदग्यान्तुरस्त्रापरिभाषायां दर्शिताः द्विजस्तु गवस्त्रा
चार्यैः रुद्रासनस्वरूपं विनायकशांतौ दर्शितम् अभिषेकंस
मर्चयेदिति एवं रुद्रासनोपविष्टस्य रोगिणः अभिषेकमाचा
र्येश्चतरब्राह्मणैः सहितो वैदिकैः स्मार्तमंत्रैः कुर्यात् अभिषेक
समयेच वासुदेवाधिष्ठानकलशोदकनवग्रहयज्ञकलशोद
कं वेदपारायणकलशोदकं चैकस्मिन्पात्रेनिधाय विनायक
शांतौ नवग्रहयज्ञे चोक्तप्रकारेण यजमानमभिषिंचेयुः ततः
किंकुर्यादित्यत आह ततो दद्याद्यथाशक्त्या गोभूहेमतिलादि
कम् ब्राह्मणेभ्यस्तथा देवमाचार्याय निवेदयेत् देवं सौवर्णं
चतुर्भुजं वासुदेवस्य प्रतिमां एतत्प्रतिमादानमाह आदित्या
वसवो रुद्रा विश्वेदेवा मरुद्गणाः प्रीताः सर्वे व्यपोहंतु मम पा
पं सुदारुणम् इत्युदीर्य तु कुंभस्थं तमाचार्ये समर्पयेत् एवं
विधाने विहिते श्वेतकुष्ठी विशुद्ध्यति इति शातातपप्रोक्तं पांडु
कुष्ठहरम् अथ प्रकारांतरेण कुष्ठहरम् शातातपप्रोक्ते कु
ष्ठी गोवधकारी स्यान्नरकांते स्य निष्कृतिः स्थापयेत्तु घटमेकं त
त्र वै सक्तद्रव्यसंयुतम् समनंतरप्रोक्ते पांडुकुष्ठहरे यानि पंचप
ल्लवादीनि द्रव्याण्यभिहितानि तैर्युक्तमेकं कलशं स्थापयेदि
त्यर्थः तत्र कलशालंकारादौ विशेषमाह रक्तचंदनलिप्तां
गं रक्तपुष्पाम्बरावृतम् रक्तगर्भं ततः कृत्वा स्थापयेद्दक्षिणा
दिशि तं कलशं कुंडस्य दक्षिणभागे इत्यर्थः ताम्रपात्रं न्यसेत्त

त्रतिलपूर्णंसहरितम् तत्रेतिकलशेनस्योपरिस्थमेदेवंहे
मनिर्मितंयमम् यजेत्पुरुषसूक्तेनपापंमेशाम्यतामिति
यममूर्तिस्तुदक्षिणहस्तेनदंडधारिणीवामहस्तेनाभयदाम
हिषारूढाचभवति पुरुषसूक्तेनयजेत्पूजयेत् पूजाप्रका
रस्तुपरिभाषायांपुरुषसूक्तविधानेनिरूपितः पापंमेशा
म्यतामिति पापंशरीरेवर्तमानगदरूपंतन्मेदानप्रस्तंचशा
म्यतामितिसंकल्पयेदित्यर्थः सामपारायणंकुर्यात्कलशेन
त्रकामतः दशांशंसर्पिषाहुत्वापावमान्याभिषिंचिते विहि
तेधर्मराजंतमाचार्यायनिवेदयेत् सामवेदाविदोऽभावेय
थालाभोपपन्नशाखाध्यायनेनवावेदपारायणंग्रहणेनवेदपा
रायणविधिस्तुपरिभाषायांदर्शितः यावत्पारायणसमाप्ति
स्तावत्प्रतिदिनंयमंपूर्वोक्तप्रकारेणपूजयेत् होममंत्राव्याहृत
यः दशांशहोमप्रकारस्तुपांडुकुष्ठहरोक्तरीत्याविज्ञेयः पाव
मान्येतिपावमानःसुवर्जनइत्यष्टवाकोगणहोमप्रकरणे
दर्शितः स्वादिष्ठयेतिसूक्तंपांडुरोगहरपृष्ठीदानेदर्शितम्
दानमंत्रमाह यमोमहिषमारूढोदंडपाणिर्भयापहः द
क्षिणाशापतिर्देवोममपापंव्यपोहतु इत्युच्चार्यविसर्जयेदेवंमा
संगोभक्तिमाचरेत् ब्रह्मगोवधयोर्भेदःस्यादन्यानास्तिनिष्कृ
तिः ब्रह्मवधस्यसमनंतरप्रोक्तंकर्मगोवधस्येतिविभागः
इतिप्रकारांतरेणोक्तकुष्ठहरम् अथापरंकुष्ठहरम् शिवगीता

म॰
क

230

याम् योनरोहंतिवैजंतनकुष्टरोगीभवेन्नरः संतापनेप्रकु
र्वीतभगवानाहशंकरः संतापनेसांतपनंपलहलदाणेकृच्छ्र
प्रकरणेभ्यथापिज्ञद्जेतहननविषयमिदं प्रायश्चित्तंतथा
पिव्याधेरल्पत्वेपनासिलघुनिलघ्नुनिग्रहणोगुरूणीतिगोतम
वचनात् इत्यपरंकुष्टहरं अथकुष्टरोगहरंवृषदानम् वायु
पुराणे कुष्टीस्त्रेयीनरोभवेदित्युपक्रम्याभिहितम् अथकुष्ट
हरंवक्ष्येवृषदानमनुत्तमम् तत्कुर्यात्कुष्टरोगार्तः शरीरस्याव
कारकम् पलैस्त्रिभिस्तुकुर्वीतद्वाभ्यामेकेनवापुनः भारतेह
षभंस्वर्णंहेमसृंगखुरंतथा महेश्वरेणोमयाचकुर्वीततमधि
ष्टितम् पलत्रयांपरिमाणप्रकरणेभ्यथापि महेश्वरस्योमा
याश्चप्रतिमेद्वेस्वर्णस्यपलैस्त्रिभिः द्वाभ्यामेकेनवाकारयेदित्या
ह सौवर्णेप्रतिमेद्वेतुशर्वोमेकेनक्रमेनतु यथाविभवमानेनवि
त्तशाठ्यंनकारयेत् अत्रवृषदानस्यप्राधान्यादुमामहेश्वरप्रतिमे
विहितपलत्रितयादितयादिपरिमाणादपिन्यूनपरिमाणेनस्व
र्णेनकृतेअपिदोषायनेत्येतत्सूचयति विन्नशाठ्यमित्यनेन
वृषभप्रतिमोक्तपरिमाणेनैवकार्याप्रधानत्वात् पलाष्टकेकां
स्यपात्रेस्थापयेत्तविचक्षणः स्वेतपुष्पैस्तताद्यैः स्वेतपुष्पैरलंकृ
तम् एवंविधंतंवृषभंकांस्यपात्रेविनिक्षिपेदित्यर्थः ब्राह्मणंवि
द्याशुद्धंसदाचारंसंयतेन्द्रियम् सर्वशास्त्रप्रवक्तारंप्रतिग्रहप
राङ्मुखम् दांतंकुलीनंधर्मज्ञमनुद्वेगकरंनृणाम् क्रोधलोभ

विहीनेच सर्वशास्त्रार्थकोविदम् १ इहमाहूय भक्त्यातं यथावि
धिसमर्चयेत् केयूरकटकैर्वस्त्रैर्माल्यैश्चैवाङ्गुलीयकैः होमं
चरुवत्कार्यो मंत्रैर्माहेश्वरैस्तथा १ र्ववदितिस्वरश्लोकप्रक
रणेनाग्निप्रतिष्ठाप्य समिच्चर्वाज्यतिलहोमानष्टोत्तरसहस्रसं
ख्ययादित्यर्थः माहेश्वरामंत्रारुद्रप्रकाशकालेच स्वस्वशाखो
क्ताख्याताः तत्रत्र्यम्बकमितिमंत्रोदर्शितः १ र्वोक्तगुणविशि
ष्टेनब्राह्मणेन तं वृषभं वक्ष्यमाणदानमंत्रास्थितावष्टमूर्तेरधि
ष्ठानमित्यनेन श्लोकेन माहेश्वरमंत्रजां कारयित्वा ततो होमं नि
र्वर्त्ययित्वा यथाविशिष्टं वृषभं ब्राह्मणाय दद्यात् दानप्रकारमा
ह उदङ्मुखोपविष्टाय महादेवस्य सन्निधौ प्राङ्मुखो व्या
यितो दद्यान्मंत्रेणानेन धर्मतः दानमंत्रमाह अष्टमूर्तेर्महेशा
नरूपया वृषभध्वजः श्वेतमोऽम्बरं सर्वमथवा चित्रमेव च
त्वद्दोषजनितं यस्त्वं मंडलान्यथवा हर सर्वकर्मविपाकोत्थं पा
र्वतीनाथ सर्वग कष्टहा भव सर्वेश रक्ष मां पार्वतीपते वृषभ
ध्वजेति ध्वज इति संबुद्ध्यंतेभिमंत्रं पदं अष्टमूर्तेर्ध्वज इति वृषभ
विशेषणम् इति कुष्टहर वृषभदानम् अथ हीनकुष्टहरं शा
तातपप्रोक्ते मातृगामी भवेद्यस्तु तस्य लिंगं विनश्यति चंडा
लीगमने चैव हीनकुष्टी प्रजायते अत्र प्रतिक्रिया लिंगहानि
हरे प्रसंगात्सर्वमेव दर्शितेति तिनात्र लिखिता इति हीनकुष्टव
हरम् अथ रक्तकुष्टहरम् शातातपप्रोक्ते दीक्षितस्त्रीप्रसंगे

म· क·

नजायते रक्तकुष्ठवान् तत्पातकविशुद्ध्यर्थं प्राजापत्यचतुष्ट
यम् कुर्वीतेति शेषः एतत्प्रायश्चित्तं रोगस्याल्पत्वे लघुप्राय
श्चित्तत्वात् रोगाधिक्ये तत्त्रैमासिकं प्रायश्चित्तं द्वैगुण्येन कार
येत् प्राजापत्यलक्षणं कृच्छ्रप्रकरणे निरूपितम् इति रक्त
कुष्ठहरं अथ रक्तकुष्ठहरं पीतकुष्ठहरं च शातातपप्रोक्ते
स्वसृतागमने चैव रक्तकुष्ठी प्रजायते भगिनीगमने चैव पीत
कुष्ठी प्रजायते तस्य प्रतिक्रियां कर्त्तुं सर्वेन्तकलशं न्यसेत् स
र्वतः सर्वदिग्भागे होमस्थानात् पदायेत्यर्थः कलशे च पांडुकुष्ठ
हरोक्तानि पंच पल्लवादीनि स्थापयेत् यस्मिंश्च दिने यावद्वक्ष्य
माणवेदपारायणं जायते तद्दशांशहोमो व्याहृतिभिः कार्यः
होमद्रव्यं च घृताक्तास्तिलाः यवाः घृतमेव वा अग्निस्थापने स्वगृह्यो
क्तमार्गेण दशांशहोमे दशांशपरिकल्पनाप्रकारस्तु पांडुरोग
हरे अभिहितः सर्वतः कलशं न्यसेदित्युक्तम् अधुना तत्कालमलं
करणप्रकारमाह पीतवस्त्रसमाच्छन्नं श्वेतमालाविभूषितम्
रक्तकुष्ठे रक्तवस्त्राभिभूषितं कलशं स्थापयेत् पीतकुष्ठे पी
तवस्त्रादिभूषितमिति भेदः तस्मिन् कलशे वक्ष्यमाणगुणोपेत
मिंद्रं स्थापयेदित्याह तस्योपरि न्यसेद्देवं हेमपात्रे सुरेश्वरम् सु
वर्णनिष्कषट्केन निर्मितं वज्रधारिणम् यजेत्सुकषट्केन वा
सर्वविघ्नरूपिणम् सर्वौषधियुते कुंभे ऋग्वेदं तत्समापयेत्
वज्रधारिणमित्यादि इंद्रमूर्तिस्तु वज्राभयकरा वज्रध्वजापैरा

वणसमाप्तिश्चाचभवेत् यजेत्तु ऋषभसूक्तेनेति पूजयेत् पूजा
विधानं परिभाषायां ऋषभसूक्तविधाने विहितं ऋग्वेदं समाप
येदिति ऋग्वेदपारायणं कुर्यादित्यर्थः ऋग्वेदविदो भावे यथा
संभवशाखोध्ययनेन वेदपाठं कारयेत् यावद्वेदसमाप्तिस्तावत्प्र
तिदिनमिन्द्रं तत्प्रकाशकैर्वैदिकैः स्वशाखोक्तैर्मंत्रैः पूजयेत्
इंद्रप्रकाशमंत्रास्तु नवग्रहयज्ञप्रकरणे दर्शिताः तथावत्यमा
णरोगप्रतिमापि प्रतिदिनं पूजनीया रोगप्रतिमालक्षणं चैव
प्रकरणांते भुत्पादयिष्यते अत्र प्रयोगक्रमस्तु ग्रहकुण्डर
वरुणमूर्तिदानोक्तो विज्ञेयः कलशस्थापनादिविशेषो नैवद
र्शितः रक्तकुष्ठाधिदेवतायै नमः पीतकुष्ठाधिदेवतायै नमः
इति च रोगप्रतिमायाः पूजायां मंत्राः मूलोक्तेन नाम्ना तामेव रोगप्र
तिमाह सुवर्णप्रतिकां कृत्वा सुवर्णदशकेन तु दद्याद्विप्रा
य संपूज्य निष्पापः स्यामिति ब्रुवन् एकः सुवर्णशतेद्व्यवा
चीअपरः परिमाणवाची सुवर्णलक्षणे तथा हेर्वौरूपपरिमाण
प्रकरणे वर्णितम् निष्पापः स्यामिति ब्रुवन्रोगप्रतिमां दद्या
दित्यर्थः साम्प्रतमिंद्रप्रतिमादानमंत्रमाह देवानामधिपो दे
वो वज्री वज्रा निकेतनः शतयज्ञः सहस्राक्षो मम पापं व्यपोहतु
तु इमं मंत्रं समुच्चार्य आचार्याय यथाविधि दद्याद्देवं सहस्रा
क्षं सर्वपापस्योपशांतये इति रक्तकुष्ठहरे पीतकुष्ठहरं च अ
धगुल्मकुष्ठहरं कालकुष्ठहरं च शातातपप्रोक्ते आत्रजाया

म॰
क

भिगमनेगुल्मकुष्ठंप्रजायते स्ववध्वगमनेचैवकण्ठकुष्ठंप्रजा
यते स्ववधूः स्वपुत्रभार्या तेनकार्यंविशुद्ध्यर्थंप्रागुक्तस्यार्ध
मेवच दशांशहोमः सर्वचरुतालैः क्रियतेतिलैः प्रागुक्तस्या
र्धमिति प्राक्षड्वार्षिकंप्रसक्तंतत्तदर्थंत्रैवार्षिकंप्रायश्चित्तोप
क्रमप्रकारस्तुप्रायश्चित्तोपक्रमपद्धतौपरिभाषायांनिरूपितः
प्रागुक्तस्यार्धमित्यस्यान्यव्याख्यासमनंतरकुष्ठहरोक्तस्यार्धं
तद्यथा कलशस्थापनप्रकारः श्वेतार्कपत्रस्वर्णनिष्कत्रयेण
इष्टप्रतिमास्वर्णपंचकेनरोगप्रतिमारुद्रदेवातदभावेवादं
तेरेवासंहितामात्रस्यैवपरिमाणमितिश्वेतार्ककार्यकल्पनास्वा
दिप्रकारस्तद्देव इतिगुल्मकुष्ठहरंकृष्णकुष्ठहरंच अथक
टिकुष्ठहरंशातातपप्रोक्ते पितृव्यपत्नीगमनात्कटिकुष्ठंप्र
जायते निष्कृतिस्तेनकर्तव्याकन्यादानेनयत्नतः ततोरोगा
नुसारेणत्रिवर्षादिसमाचरेत् कन्यादानासंभवे अन्यंधना
दिनाप्रलोभ्यतस्मात्कन्यादानफलंग्राह्यम् कन्यादानजनित
स्वकृतापनोदनादस्यदुष्कर्मणः ततोतिपश्चात्तरंतत्रैवार्षि
कादिप्रायश्चित्ताचरणंप्रायश्चित्तोपक्रमप्रकारस्तुपरिभाषा
यांदर्शितः इतिकटिकुष्ठहरम् अथनेत्रकुष्ठहरम् शातात
पप्रोक्ते मातुलान्यास्तुगमनादृष्टिकुष्ठंप्रजायते कृष्णाजिन
प्रदानेनप्रायश्चित्तंसमाचरेत् यद्गम्यास्वसंवद्धंप्रायश्चित्त
मुदीरितम् तदेवमुनिभिःप्रोक्तंनियतंतत्स्तनास्वपि श्वेतार्के

वार्षिकस्य प्रायश्चित्तं समाचरेदित्यर्थः कृष्णाजिनप्रदाने च वि
ष्णुस्मृतौ अथ वैशाख्यां पौर्णमास्यां कृष्णमृगाजिनं सखुरं सशृं
गं सुवर्णशृंगं रौप्यखुरं शुक्लांगूलं भूषितं कृत्वाविकवस्त्रे प्र
सारितं प्रसारयेत् ततस्तिलैः प्रच्छादयेत् सुवर्णनाभं च कुर्यात्
अहतेन वाससो युगेन प्रच्छादयेत् सर्वरत्नगंधैश्चालंकुर्यात्
चतसृषु दिक्षु चत्वारि तैजसानि पात्राणि क्षीरदधिमधुसर्पिःपू
र्णानि दद्यादाहिताग्नये ब्राह्मणायालंकृताय वाससो युगेन प्रच्छा
दयेदिति अस्यार्थः वैशाख्यां पौर्णमास्यामिति एतच्च कालान्त
राणामप्युपलक्षणार्थं ते च काला मात्स्ये प्रदर्शिताः वैशाखी
पौर्णमासी च ग्रहणे शशिसूर्ययोः पौर्णमासी तथा माघी आषा
ढी कार्तिकी तथा उत्तरायणे द्वादश्यां तस्यां दत्तं महाफलमि
ति निमित्तः कालः शातातपवचनेन प्रदर्शितः कृष्णमृगाजि
नं सखुरं सशृंगं सुवर्णशृंगं रौप्यखुरं शुक्लांगूलं भूषितं कृ
त्वाविके वस्त्रे प्रसारयेदिति गोमयालिप्ते शुचौ देशे आविकं व
स्त्रमास्तीर्य ततः स्वभावसिद्धखुरशृंगसहितं पुनश्च रौप्यखु
रहेमशृंगरजतदंतालंकृतं मौक्तिकघटितपुच्छप्रान्तं कृष्णमृग
चर्म प्रसारयेत् कम्बलं कृष्णाजिनमास्तीर्य तस्याः खुरादीनि स्था
पयेदित्यर्थः तथा च मात्स्ये गोमयेनोपलिप्तेन शुचौ देशे नरा
धिपः आदावेव समास्तीर्य शोभनं वस्त्रमाविकम् ततः सशृं
गं सखुरमास्तरं कृष्णमार्गणम् कृष्णमृगसंबन्धि चर्मेत्यर्थः

म॰ क

233

कर्तव्यंकृष्णस्यशृंगंतद्रौप्यंदंतंतथैवच लांगूलेविद्रुमंचैवनेत्र
योर्मौक्तिकंतथेति तिलैःप्रच्छादयेत् सुवर्णनाभंचकुर्याद्दने
नवासोयुगेनप्रच्छादयेत् सर्वरत्नगंधैश्चालंकुर्यात् चतसृषुदि
क्षुचत्वारितैजसानिपात्राणिक्षीरदधिमधुसर्पिःपूर्णानिदद्यादि
ति तिलैःप्रच्छादयेदजिनंतिलैरात्मसमंराशिमजिनेकुर्यादित्य
र्थः तत्रराशौसुवर्णंषोडशमाषात्मकंवासुवर्णार्द्धमेवाशक्त्यानु
सारेणनाभिस्थानमध्येनिक्षिपेत् एतदेवसुवर्णनाभत्वम् अह
तवासोनूतनवस्त्रद्वययुगमन्यत्रैकमेवाभिहितंअतोवस्त्रवि
षयेविकल्पः कृष्णाजिनस्यचतसृषुदिक्षुक्षीरादिपूरितानितै
जसानिपात्राणिसौवर्णराजतादीनिपात्राणिशक्त्यनुसारेणनि
दधीत तैजसपात्रेषुसर्पयथाशक्तिश्चेन्मृन्मयानांसमुच्चयः अ
न्यथाशक्त्यपेक्षयाविकल्पः एतदभिप्रायेणैवमात्स्येतिलैरात्म
समंकृत्वावासमाच्छादयेद्बुधः सुवर्णनाभंतत्कुर्यादलंकुर्याद्वि
शेषतः रत्नगंधैर्यथाशक्त्यातस्यादिक्षुचविन्यसेत् यानपात्रा
णिचत्वारिदिक्षुदद्याद्यथाक्रमम् मृण्मयेषुचपात्रेषुपूर्वादिदि
क्क्रमेणतु घृतंक्षीरंदधिक्षौद्रमेवंकुर्याद्विचक्षणः इतिविस्तरव
चनादिष्वाहिताग्नेःकृष्णाजिनंदद्यादित्यास्ति अतश्चाहिताग्निर्द्विजे
संप्रदानेतदभावेऽन्योसाधुस्तथाग्निर्योग्यः अत्रदानेफलश्रु
तिर्विस्तरमात्स्यवेवोक्ता अत्रगाथांपठंति यस्तुकृष्णाजिनंदद्या
त्सखुरंसशृंगसंयुतम् तिलैःप्रच्छाद्यवासोभिःसर्वरत्नैरलंकृतम्

ससमुद्रगुहा तेन सशैलवनकानना चतुरंता भवेद्दत्ता पृथि
वी नात्र संशयः कृष्णांश्चैव तिलान्कृत्वा हिरण्यं मधुसर्पिषी
ददाति यस्तु विप्राय सर्वं तरति दुष्कृतम् इति कृष्णाजिनदान
विधिः इति नेत्रकुष्ठहरम् अथ श्वेतकुष्ठहरम् शातातपप्रोक्ते
तांबूलहरणाच्चैव श्वेतकुष्ठं प्रजायते दक्षिणासहितं दद्यात्सुवै
र्णमाणिद्वयम् इति श्वेतकुष्ठहरं अथ कुष्ठहरं शातातप
प्रोक्ते रूपहा नरकस्यान्ते जायते चित्रकुष्ठवान् प्राजापत्यत्रयं
कृत्वा देयं रौप्यपलत्रयम् प्राजापत्यलक्षणं कृच्छ्रप्रकरणेभ्यथा
यिपललक्षणं परिमाणप्रकरणे इति चित्रकुष्ठहरम् अथोदु
म्बरकुष्ठहरम् शातातपप्रोक्ते औदुम्बरी ताम्रचौरो नरकान्ते प्र
जायते प्राजापत्यशतं कृत्वा ताम्रं पलशतं दिशेत् प्राजापत्य
पलयोः कृच्छ्रप्रकरणे परिमाणप्रकरणे लक्षणं निरूपितम् इ
त्यौदुम्बरकुष्ठहरम् अथ कुष्ठरोगप्रतिपादनम् तल्लक्षणं च क
र्मविपाकसारे कुष्ठः कुंचितसर्वांगः स्खलयज्ञोपवीतधृक् धा
वत्माणहरः कृष्णस्त्रिनेत्रः किंकिनीयुतः पूजाविधानं रोगप्र
तिपादनविधावुक्तम् इति कुष्ठरोगप्रतिपादनम् महार्णवा
ख्ये महिते प्रबन्धे मान्धातृनाम्नो मदनात्मजस्य सत्कर्मरत्नप्र
करेण समत्रिंशस्तरणीः प्रायश्चित्ततरंगः ३७ अथापुष्पवतीत्व
हराणि हात्विपासान्तरं नारी भर्तारमवमन्यते मिष्टान्नं स्वयम
श्नाति सा पुष्पवती भवेत् मिथुनानि च पंचाशद्भोजयेत्तामिह

म॰
क

234

मये दद्यात्सौभाग्यवस्तूनि तेभ्यः शास्त्रानुसारतः इक्षवस्तवराजं
तरहरिद्रा चैव धान्यकम् विकारवच्च गोक्षीरं कुसुम्भं चैव शर्करा:
कर्पूरं चाष्टमं ह्येतत्सौभाग्याष्टकमुच्यते राजः सौभाग्यं सुवर्णा
द्रावकं द्रव्यमुच्यते कर्पूरो वा शर्करा वा विकारवच्च गोक्षीराभि
ति क्षीरनिर्मितामित्यादयो विकारा नवादीनि वा तदुक्तमित्य
र्थः इक्षवस्तवराजं च निष्पावं जीवधान्यकमित्यपि पठ्यते अ
त्र च प्रतिवेधाधिको शास्त्रानुसारेण चोक्तकर्मणा त्रातु निर्दिष्टया
श्रयः पुष्पवतीत्वहरम् अथ वंध्यात्वहरं सुवर्णधेनुदानम् वायु
पुराणे चतुर्विधा च या वंध्या भवेद्धस्यावियोजनात् कृत्वैतत्स्यप
तीकारं उत्तमरूपं निबोध मे हिरण्येन यथा शक्त्या सवत्सां कार
येद्धेनुकाम् धेनुं पलेन वत्सं च पादेन कुर्यादब्रवीत् हिरण्येन यथा
शक्त्येति पलेन वा तदर्धेन तदर्धेनाथवा पुनरिति परिभाषोक्तप्र
कारेण शास्त्रानुसारं कुर्यादित्यर्थः धेनुं स्वर्णखुरां रत्नां तस्याः पुच्छे
नियोजयेत् घंटां गले च बध्नीयात्सवत्सां शाङ्गःसुरवैःसुरभिः चंद
नागुरुकर्पूरगंधमाल्यैः सुशोभनैः उपचारैः षोडशभिर्नैवेद्यपा
यसं भवेत् मोदकं च तथा श्र्पं गुडं लवणमेव च जीरकं च सवि
स्तीर्णं सूर्पं वेणुमयं दृढम् धेनोरेकं प्रथातव्यं ब्राह्मणः स्त्रीषु चै
वहि षड्दशो दश वा दद्यात्तदनंतरमेव वा उपचारैः षोडशभिरि
त्यादि पूजयेदित्यशेषः मोदकादिभिः परिपूरितमेकं सूर्पं धेनोः
पुरः स्थापयित्वोक्तद्रव्यपरिपूरितान्येव सूर्पाणि षड्दशो दश वा

सभर्तृकाभ्यो ब्राह्मणीभ्यो दद्यादित्यर्थः ब्राह्मणं सर्वशास्त्रार्थ
कुशलं धर्मवेदिनं दयादिनयसंपन्नं शान्तं चैव जितेन्द्रियम् अ
लोलुपं सर्वज्ञं नाप्रियं कल्मषवर्जितम् आहूय भक्त्या संपूज्य व
स्त्राद्यैर्गन्धपुष्पकैः तेनैव कारयेत्सज्जां मादत्ता धेनुवत्सयोः होमं
च कारयेत्तत्र सामिदाज्यं चरूत्कटम् रक्षायां होमे च मंत्रमाह
सोमो धेनुमिति मंत्रं समुच्चार्य ततः पुनः अस्याः गोतम ऋषिः
धेनुर्देवता त्रिष्टुप्छंदः विहितार्थे विनियोगः सोमो धेनुं सोम
अर्वंतमाशुं सोमो वीरं कर्मण्यं ददाति सादन्यं विदथ्यं सभेयं
पितृश्रवणं यो ददाशदस्मै विनियुक्ताया अस्याः संयोगपृथ
क्त्वन्यायेनात्र धेनुरेव देवता होममुक्तं कारयेदित्यभिधाना
त्सामिदादिभिः प्रत्येकमष्टोत्तरसहस्रं कुर्यात् धेनुदानप्रका
रमाह सार्धश्लोकद्वयेन धेनुर्यांगिरसां सत्रे प्रविष्टा सुरभेश्च
या दुहिता यातष्टामानोरग्नेश्च वरुणस्य च याश्च गावः प्रव
र्तन्ते वनेषूपवनेषु च प्रीणंतु ता मम सदा पुत्रपौत्रप्रदाः सुखं
प्रयच्छंतु दिवारात्रमविच्छेदं च संततेः एवं दत्वा तत्तद्दानं प्र
णिपत्य विसर्जयेत् अत्र च कर्माणि स्त्रीपुंसयोर्मिलितयोः प्र
त्येकं वा यथानिमित्तमधिकारः इति वंध्यात्वहरसवत्सधेनु
दानम् अथ प्रस्रवयोनिशोणितहरम् तत्र कर्मविपाकसंग्र
हे मासोपवासिनी नारी रेतः प्रस्रावयेद्यदि योनिसंपर्कदोषे
ण जायते चान्यजन्मनि स्रावयुक्ता सदा योनौ तन्निष्कृतिरिरो

म० क

९३५

च्यते मासोपवासं कुर्वीत तथा मासं पयोव्रतम् मासोपवास
व्रतं पयोव्रतस्वरूपं कृच्छ्रप्रकरणे निरूपितम् इति सर्वपापो
पनिबर्हणम् अथ गर्भस्रावहरं यज्ञोपवीतदानम् तत्र विधानं वृ
द्धगौतम आह स्रवद्गर्भा भवेत्सा तु बालकं हंति या विधेः ब्रा
ह्मणे यज्ञोपवीतं कुर्वीत कांचनं च स्वशक्तितः अत्यंतवर्णशु
क्लेन राजतं चोत्तरीयकम् अत्यंतवर्णशुक्लकांचनमित्यन्वयः
उत्कृष्टमित्यर्थः तेन कांचनेन वक्ष्यमाणपलादिमितेन स्वशक्ति
तो यज्ञोपवीतं कारयेदित्यर्थः तथा समीचीनं राजतमुत्तरीयं
वा उभयत्र द्रव्यपरिमाणमाह पलार्धेन तदर्धेन तदर्धेनापि वा
पुनः शक्तिप्रदेशं देयं तन्मौक्तिकं वस्त्रमेव च पलद्रोणलक्ष
णे परिमाणेऽप्यथापि यज्ञोपवीतस्य ग्रंथिस्थाने मौक्तिकम् उ
त्तरीयस्य तु वस्त्रमिति विवेकः प्रक्षाल्य पंचगव्येन गायत्र्या ता
म्रभाजने द्रोणप्रमाणेन तस्मिंस्तु निक्षिपेद्दधिमध्यतः आज्यस्यो
परि संस्थाप्य उपवीतं सुपूजितम् गंधपुष्पाक्षतैः धूपैः नैवे
द्यैरपि भक्तितः पंचगव्यस्नाने गायत्र्या मंत्रत्वेनोपादानाद
वशिष्टक्रियायामपि सैव मंत्रः एवं प्रक्षालितमुपवीतमुत्तरी
यं च ताम्रभाजने निक्षिपेत् अथ मितिमाह द्रोणप्रमाणमित्या
दि अयमर्थः द्रोणप्रमाणप्रमाणेन दधिना तस्मिंस्ताम्रभाजने मध्य
तो मध्ये निक्षिपेत् दध्युपर्याज्यं तत्प्रमाणं यथालाभोपपन्नं वा
स्थापयेत् अतो द्रोणप्रमाणपरित्यागे कारणाभावात्तत्प्रमा

णमाज्यस्य आज्यस्योपरिस्थाप्य उपवीतमित्यत्र चाज्यमिति
व्यवस्था तत्र चाज्ये उपवीतमुत्तरीयं निक्षिपेत् तदुपवीतं संपू
जितं च कुर्यात् उक्तं चैतत् उपवीतस्य गर्भस्थानीयत्वाद्ध्यादे
श्च जराय्वादिस्थानत्वाच्च उपवीतं संपूजितमित्यत्रोपवीतश
ब्दः साहचरितमुत्तरीयमपि लक्षयतीति तत्सहचरितमेवोत्त
रीयसहितमुपवीतं निक्षिप्य पूजयेत् इति पूजानंतरं कृत्य
माह ततो ब्राह्मणमाहूय होमं तत्र च कारयेत् तिलैराज्येन म
धुना मिश्रैरष्टोत्तरं शतम् होममंत्रा व्याहृतयो गायत्री वा व्या
हृतीनामष्टादि नवग्रहयज्ञप्रकरणे ग्रहायावाहनस्थाने दर्शि
तम् गायत्र्यास्तु कूष्मांडहोमप्रकरणे [illegible] ततो देयं वस्त्रा
द्यैः पूजिताय च मंत्रेणानेन विधिवत्सा उत्तरीयोपवीतकम्
मंत्रमाह उपवीतं परमिदं ब्रह्मणा विहितं पुरा भवनौकास्य दा
नेन गर्भं संधारयेत्स्वहम् अत्र द्वितीयार्धस्यायमर्थः भवनौका
संसारे द्विजकर्मनिष्पादकत्वेन यत्नसारं यत्तदुपवीतकम् अ
नौरिव नौका वा शिष्टं स्पष्टं यत्नान्यपि ब्राह्मणेभ्यस्तास्मिन्काले
प्रदापयेत् अनुज्ञया तथाचार्यप्राणिपत्य तत्समापयेत् गर्भ
स्रावकरादोषाद्देवं कृत्वा विमुच्यते अस्मिन्कर्मणि स्त्रिया अ
धिकारः इति गर्भस्रावकयज्ञोपवीतदानम् अथ स्त्रीस्तन्यात्
रणाहरं कर्मविपाकसमुच्चये क्षीरं मुञ्चति या नारी सर्वजन्मनि
संभूत जन्मांतरे तत्स्यावै क्षीरं न हरतः स्तनौ क्षीरान्नं भोजये

स॰
क

२३६

द्विशान्नाज्यं समधुमण्डुकम् क्षीरान्नं मधाज्यसहितान्नं तु कां
श्चविप्रेभ्यो दद्यात् विप्रानिति बहुवचनाद्बहवः अवश्यं भोजनी
याः तदुपरि शाल्यन्नसारेण प्रलिंपेत् तेनैव तत् द्विशान्नेन भक्ति
तः विप्रपादोदकैश्चापि क्षालयेत्कुचमंडलम् सुरामांसक्षीरोदक
ताशणानैर्गंधपुष्पकैः भूतेभ्यश्च बलिं दद्याद्भूतान्यत्र च संस्मरण
मधुश्च नवनीतं च पिंडमालोड्य चित्रकः भूतभव्यः स्वशाकिश्च दू
तानां पंचकं विदं स्वशाकिरिति मधादीनां विशेषणम् अत्र स्वरादी
नि बलिद्रव्याण्यभिहितानि तेषु ब्राह्मणादिभिरनिषिद्धान्येव ग्रा
ह्याणि इति स्त्रीनन्यालरणहरम् महार्णवाख्ये माहिते प्रबन्धे मा
न्धात्तनाम्नि मदनात्मजस्य सत्कर्मरत्नोपचिते तथाष्टाविंशतरं
गो यममगाद्गमायः ॥ छ ॥ अथ प्रकीर्णकप्रकरणमारभ्यते तत्र र
क्तार्तुदरमुमामहेश्वरसंवादे विपवागमेनापि नित्यं नारदवे य
तिः रक्तार्तुर्यो भवेत्तत्कुर्यान्मायश्चित्तं प्रशांतये कृच्छ्रातिकृच्छ्रौ
कुर्वीत चांद्रायणमथापि वा एवमेवापि विधवा प्रकुर्याद्दोषशांत
ये कृच्छ्रादीनि व्याधितु फलतुभावेनसमस्तानि वा द्विगुणानि यो
ज्यानि एतल्लक्षणानि च कृच्छ्रप्रकरणे दर्शितानि इति रक्तार्तुद
हरम् अथ प्रकारांतरेण रक्तार्तुपहरं शातातपप्रोक्तं रक्तार्तुथी
वेश्य हंता जायते धर्ममाचरेत् तमेव धर्ममाह प्राजापत्यानि च
तारि समथान्यानि चीर्णकेन ब्राह्मणेभ्य इति शेषः समथान्या
नि च व्रीहियवादीनि यथालाभोपपन्नानि प्राजापत्यस्वरूपं कृ

च्छ्रप्रकरणोऽभ्यधायि इति प्रकारान्तरेण रक्तार्बुदहरम् अथ प्र
दररोगहरं कर्मविपाकसंग्रहे मात्रा वा तरुणा वापि यो नरः
शास्त्रनिर्णये स्पर्धते सोऽप्रजायेत प्रदरव्याधिमान्भुवि चान्द्राय
णं प्रकुर्वीत कृच्छ्रं चैवातिकृच्छ्रकम् तद्दिस्रोरिति च जपेच्छ्रतत्र
यसंख्यया मधुसर्पिःसमायुक्तमंडकान्नेन भोजयेत् विप्रांश्च
न्यादसलिलैर्मार्जयेत्प्रदरी तथा मात्रा वेत्यादि मात्रा वा तरुणा
पि ज्ञात्वा थाचार्यादिभिः सह यो नरः शास्त्रनिर्णये शास्त्रार्थविचार
विषये स्पर्धते कुतर्केण तदुक्तमन्यथा नयन्विवदते स पतत्या
पि पुत्रो भवेदित्यर्थः चान्द्रायणादि स्वरूपाणि कृच्छ्रप्रकरणे निरू
पितानि तद्दिस्रोरिति अत्र च ऋग्द्वयं मन्त्रः अयं च तृचः कर्णश्
लहरे प्रदर्शितः विप्रांश्च तत्र वै शक्त्यनुसारेण भोजयेदित्य
र्थः इति प्रदररोगहरम् अथ वा सृग्दरहरं पेत्रुदानम् पतन्निदा
ने पद्मपुराणे असृग्दरी समभवति यस्त्वहिंसायथापश्चन् हड
वीथायनस्य असृग्दरी दारयति यो हत्वान्वितिविस्तरान् अत्र
निष्कृतिमाह गौतमः पेद्रुं पयस्विनीं दान्तां लोहितां हेमशृंगिकां
तथा रूप्यखुरां च कवस्त्रेणासमलंकृताम् ब्राह्मणायाग्निवर्णा
य दद्यात्संकल्प्य मानवः अग्निवर्णाय कपिलवर्णाय तदभावात्
अरक्ताय पलेन वा तदर्धेन तदर्धेनाथ वा पुनः स्ववर्णेन युतां श्र
क्लां यथा संविभवेन तु द्विजो ममाय ज्येष्ठाय सर्वशास्त्रार्थवेदि
ने पेद्रुं नाग्नि मोहृश्यं मंत्रेणानेन भाक्तिनः दद्यादिति प्रर्वेण

म॰
क॰

न्वयः पलस्वरूपंपरीमाणप्रकरणेभ्यथापि गोदानमंत्रमाह
गावोमेहृदयेसंतुगावोमेसंतुपृष्ठतः देवानांत्वंहिमित्रासिति
पयास्वगदरंचमे विनाशयतिगोदानमपिदीर्घस्वशूदरम् तेन
देयंततःकुर्यादस्वगदरगदार्दितः इतिस्वगदरहरंधेनुदानम् अथा
कास्मिककार्श्यहरंरुद्रमूर्तिदानम् वायुपुराणे अन्नचौरोभवे
यस्तुसोकस्माज्जायतेकृशः वद्वेतस्यप्रतीकारंदानहोमाभिषे
चनैः पलेनवातदर्धेनतदर्धेनाथवापुनः सवर्णेनप्रतिकृतिम
वेद्रुद्रस्यभक्तितः पलस्वरूपंपरिमाणप्रकरणेनिरूपितम् यथा
विभवसारेणत्रिनेत्रंचचतुराननम् चतुर्बाहुंध्यानपरमुपविष्टंस्व
त्वासनम् व्याघ्रचर्मपरीधानंनागयज्ञोपवीतिनम् सौवर्णेनरा
जतेननागेनवायज्ञोपवीतिनंकुर्यादित्यर्थः श्वेतवस्त्रेणसंवेष्ट
तंडुलोपरिविन्यसेत् तंडुलानांपरीमाणंद्रोणानांचतुष्टयम्
यद्वास्वविभवेनैवतत्रशक्त्याप्रकल्पयेत् गंधमाल्यैःसुरभिभिःश्वे
तैर्नानाविधैरपि उपचारैःषोडशभिराचार्यःसर्वशास्त्रवित् मूल
मंत्रेणसर्वंचकार्यंरुद्रस्यवार्चनम् मूलमंत्रःसप्रणवपंचाक्षरो
रुद्रगायत्रीवा आद्यःमूलरोगहरत्रिशूलदानेदर्शितः द्विती
यस्तुरक्तरोगहरोमाहेश्वरदाने होमस्तत्रप्रकर्तव्यःस्थंडिलःसु
परिष्कृते स्वगृह्योक्तविधानेनचाग्नेःसंस्थापनंभवेत् समिदा
ज्यतिलैर्मंत्रानिमांस्तत्रनिशामय त्र्यम्बकंकद्रुद्रायेतिचानेपित
रिनिक्रमात् संख्याचाष्टोत्तरशतंप्रत्येकमिहशूलिने हुत्वाऽ

त्वा च सम्पातान्मात्रेकुर्याद्विधानतः त्र्यम्बकं यजेत्यस्याघोषु
स्तवहरेभिहितम् कद्रुद्रायेत्यस्य दद्रुरोगहरमाहेश्वरदाने
शान्ते पितर्मरुतामित्यस्य श्रविधानोक्तास्यास्य सर्वरोगहरे सं
पातानिति आज्यहोमेकृत्वा प्रत्याहुतिं सम्पातान् स्रुक्स्रुवा
पिस्थिताज्यस्य बिंदून्स्थवा त्रेकुर्यादिति एभिः संपातैराज्यबिं
दुभीरोगिणः शरीरं वक्ष्यमाणसमये भ्यंजीत अग्नेः सर्वोत्तरदे
शेस्थापयेत्कलशं दृढं वाससावेष्टयित्वान्नपंचपल्लवसंयुतम्
पंचपल्लवानि चाश्वत्थवटप्लक्षोदुम्बराणां चूतस्यानाहजस्या
नाहाल्मीकात्संगमाद्ध्रदात् प्रक्षेप्य मृत्तिका चरोचनागु
ल्गुलस्तथा तेनाभिषेकं कुर्वीत होमान्ते भ्यंजितेगुरुः आपोहिष्ठा
दिभिस्तद्वद्धिरण्यादिभिरेवच पावमानानुवाकेन शन्नोवाकेन
चैवहि तेन कलशस्योदकेनाभ्यज्य सर्वोल्कैः संपातवद्भिराज्य
बिंदुभिः तं रोगिणं गुरुराचार्यः आपोहिष्ठेतिऋचो हिरण्यवर्णा
इति ऋचः परिभाषायां रोगप्रतिमादानविधौ प्रदर्शितः पव
मानानुवाको गणहोमप्रकरणे शन्नोवाकेनेति अनेनचवस्व
शाखोक्ताशान्तिरुपलक्ष्यते तत्रच शन्नोवातः पवतामिति तैत्ति
रीयशान्तिस्तथा नो भद्राः क्रतवः श्रुतिचाश्वलायनशान्तिस्वपरिभा
षायां दर्शिता अभिषेकानन्तरकर्तव्यमाह ततः स्रक्काम्बरधरं
स्रक्माल्यानुलेपनैः मूलमन्त्रेन च पुनस्तमेशान्तवतेर्थिने द
द्यात्तां देवदेवस्य प्रतिमां शंकरस्यतु मन्त्रेणानेन विधिवत्प्राङ्मु

म० क

258

स्तोयस्तु दस्तुवः मूलमंत्रेणेति सर्वैकेन पंचाक्षरेण हृदयाय
आवाहर्वमाचार्येण षोडशोपचारैः पूजितो रुद्रप्रतिमां पुनर्यज
मानः संपूज्य दत्तवते तस्मायाचार्यार्थिने दद्यात् अर्थिनः प्रतिवि
शेषणेन सामर्थ्याय द्वाचार्यो न प्रतिगृह्णीयात् तर्हि न्यस्मै श्रो
त्रियाय कुटुम्बिने दद्यादिति गम्यते श्लोकद्वयेन दानमंत्रमाह
देवदेव महेशान वृषभध्वज शंकर अमचौरेण यत्पापं कृतं ज
न्मान्तरे मया तेन तज्जनितं कार्श्यं समग्रं मम देहजम् तव दाने
न दत्तेन प्रीतो मां रक्ष पापिनम् एवं यो विधिनानेन शंकरप्रतिमां
नरः ददाति विप्रवर्याय कार्श्याद्विसप्रमुच्यते ब्राह्मणाद्वाचनं कृ
त्वा ब्राह्मणानपि भोजयेत् इति कृशत्वहरं रुद्रमूर्तिदानम् अ
थास्थिरोगहरं कर्मविपाकसमुच्चये न करोति महायज्ञान् अस्थिरो
गी प्रजायते कृच्छ्रं चान्द्रायणं कुर्याद्ब्राह्मणान्विप्रांश्च भोजयेत् इति
तानेन दद्याच्च हिरण्यं च स्वशक्तितः वातश्चावार्तमंत्रं द्विजपेद्रोगा
त्प्रमुच्यते महायज्ञान् पंचमहायज्ञान कृच्छ्रचान्द्रायणयोर्लक्षणं
कृच्छ्रप्रकरणे वर्णितम् अनयोराचरणानन्तरं विप्रान्स्वशक्त्यानु
सारेण भोजयेत् यदि कृच्छ्रादिकं प्रत्याम्नायभूतं गवादिदानानि
धारयति तदा प्राजापत्यकृच्छ्रचान्द्रायणयोर्दिनानि
तावन्ति सहस्राणि जपेत् इत्यस्थिरोगत्वहरम् अथ मेदोवृद्धिहरं
शातातपप्रोक्ते दधिचौरस्तु त्रस्तमेदुरको भवति मेदसा दधिधे
नुःप्रदातव्या तेन विप्राय शुद्धये दधिधेनुविधानं तु शातातप

प्रोक्ते यत्तस्य हरेभ्यथापि इति मेदोहृदिहरम् अथ मृतभार्यात्वदुष्क
र्महरं कर्मविपाकसंग्रहे ज्येष्ठभ्रातर्यनूढे तु यो ऽनुजो द्वह इति स्मर्य
समवेत्मृतपत्नीक उक्तस्वरसमन्वितः प्राजापत्यत्रयं कुर्याद्दैत्वं
त्रयमेव वा तामग्निमिति चाज्येन चरुणा होमनराधुतम् जुहुयाद्
जयेद्दिशाने वं पापात्प्रमुच्यते प्राजापत्यत्रयमित्यादि सकृन्मृत
भार्यत्वे प्राजापत्यत्रयं द्विर्मृतभार्यत्वे चान्द्रायणत्रयं पुनः पुनः प्राजापत्यत्र
यं चान्द्रायणत्रयं तथा अत एव वा शाहो व्यवस्थित विकल्पेन तामग्नि
वर्णामित्यस्य सूक्तस्य ऋष्यादि देवतादि सहितं लनस्फोट हरेभिहितम्
अर्थं चरुणा अर्धमाज्येन प्रथमं चरोः पश्चादाज्यस्य अत्रपात्र क्रमो
न विवक्षितः प्रत्यृचं होमः अग्निस्थापनं स्वगृह्योक्तमार्गेण इति
मृतभार्यात्वदुष्कर्महरम् अथ प्रकारांतरेण मृतभार्यत्वदुरित
हरं शातातपप्रोक्ते मित्रभार्याभिगामी च मृतभार्यः प्रजायते
तस्य पापविशुद्ध्यर्थं द्विजमेकं विवाहयेत् इति प्रकारांतरेण मृत
भार्यत्वदुरितहरम् अथ स्त्रीविरक्तिहरं कर्मविपाकसमुच्चये
धर्मपत्न्यां सदा नार्यां सदैव मैथुनकारिणः पत्न्यां विरक्तिर्भवति
सुवर्णकलशेन सः उमामहेश्वरं देवं रुद्रैकादशनीं जपेत् स्ना
पयेत्स्वयं हुयादुक्तो स्वविष्किनां धारया त्र्यम्बकेन मंत्रेणाज्ञ
हुयात्सजपेदिति उमामहेश्वराभ्यामित्यादि यदि क्वचन देवता
यतन उमामहेश्वरप्रतिमा लभ्यते तर्हि तत्रैवाभिषेकः अथ
कथमपि न लभ्येत तदा स्वशक्त्या सुवर्णेनोमामहेश्वरप्रतिमां त

स॰
क॰

राजतन्त्रेषाश्लोकारयितात्तद्रोमाममहेश्वरवा बालाभिषेकं कु
र्यात् रुद्रैकादशिनीलक्षणपरिभाषायां रुद्रविधानेन निरूपितम्
तथाभिषेकप्रकारो ऽत्राविच्छिन्नाम्बुधारयेति अत्र ग्रहणप्रदर्श
नार्थं रुद्रविधानेऽभिषेकविधौ क्षीरेक्षुरसादीनां प्रदर्शितत्वात्
होमे त्र्यम्बकमन्त्रः स चोक्तज्वरहरे दर्शितः अनेनैव जपहोमसंख्या
ष्टोत्तरसहस्रं च एवमभिषेकानन्तरं स्वर्णप्रतिमां कलशं च ब्रा
ह्मणाय दद्यात् इति श्रीविराकिहरम् अथ मतान्तरव्रतहरं शान्ता
तपप्रोक्ते बालहानी च पुरुषो मृतवत्सश्च जायते ब्राह्मणोद्वा
हनं चैव कर्तव्यं तेन शुध्यति श्रवणं हरिवंशस्य महारुद्रजपस्त
था जुहुयाद्दशांशेन दूर्वामाज्यपरिप्लुता एकादश सुवर्णानि
ष्काः प्रदातव्याश्च दक्षिणा एकादशपयस्विन्यो दद्याद्विजातुसा
त् अन्येभ्यो ऽपि यथाशक्त्या द्विजेभ्यो दक्षिणां दिशेत् स्नापये
द्दम्पती पश्चान्मन्त्रैर्वारुणदैवतैः आचार्याय प्रदेयानि वस्त्रालंक
रणानि च ब्राह्मणोद्वाहनं कार्यं तेन शुध्यति ब्राह्मणोद्वाहनस्यै
व एषा पद्धतिहेतत्वाभिधानादेतत्स्वतन्त्रतया निष्कृतिः तेन शुध्य
त्येतत्काकालिवन्ध्याभयत्रसम्बध्यते अतः हरिवंशश्रवणाच्छुध्य
तीत्ययं शेषः तथा हरिवंशश्रवणं द्वितीया निष्कृतिः हरिवंश
श्रवणविधिस्तु नवग्रहप्रकरणे सन्तानकितहरे निरूपितः
विशेषप्रयोगक्रमस्त्वत्र निरूप्यते तद्यथा दंपत्योरनुकूले शुभे
दिने स्वस्तिवाचनं कृत्वा स्वशाखागृह्यसारेण विनायकशान्तिग्रहांश्च

239

विधाय पुत्रकामनया हरिवंशश्रवणं करिष्यावहे करिष्ये इति वा
संकल्पयेत् दंपत्योः श्रवणकर्तव्ये हरिष्यावहे इति प्रयोगः अन्यत
रकर्तृत्वे करिष्ये इत्येवं संकल्पस्कृताध्ययनसंपन्नं ब्राह्मणं विभवा
नुसारेण वस्त्रमुद्रिकाकुंडलताम्बूलादिभिः संपूज्य तेन हरिवंशश्रव
णे हृणीत पाभिश्चंदनताम्बूलादिभिर्हरिवंशश्रवणे त्वामहं वृणे इति
प्रयोगः ततश्च प्रतिदिनं प्रतिवंधेन स्नानावलंकृतौ दंपती तदे
कचित्ततया शृणुयातां प्रतिदिनमाचार्यं पुस्तकं च पूजयेत् अंते
वस्त्रालंकृतां गां पयस्विनीं सवत्सां सदक्षिणां स्ववर्णशृंगीमित्यादि
दद्यात् गोदानमंत्रः विनायकशांतिः सर्वेषां प्रकृतमत्रसप्तमः
ब्राह्मणोद्वाहनमेकं प्रायश्चित्तमपरं हरिवंशश्रवणम् पारिशेष्या
न्महारुद्रजपो वितृतीयं प्रायश्चित्तं अतएव वचनास्थितान्यशाहा
वाशाहार्थं च नातिक्षीणापि शाकाद्यपेतया व्यस्तानि समस्तानि
वायोज्यानि महारुद्रलक्षणं दशांशहोमप्रकारो रुद्रानुवाका
नामार्षादि च सर्वं परिभाषायां रुद्रविधाने सम्यग्वर्णितम् निष्क
लक्षणं परिमाणप्रकरणेऽप्युक्तमेव एकादशपञ्चदशेवेति पञ्चारत्र
गोः रुद्रायगामितिस्मृतेः वरुणदेवता मंत्राः कस्य तेनेकनमस्या
मृतानामित्यादयः तथास्य सशाखो काव्यवारुणमंत्रास्तथा पावमा
नास्य वर्जनं इत्ययमनुवाको गणहोमप्रकरणे दर्शितः कस्य नून
मित्यस्य पंचदशर्चस्य सूक्तस्याजीगर्तिः शुनःशेप ऋषिः अस्यावेववै
स्वामित्रो देवरात इति चोच्यते वरुणो देवता आद्याकयाचद्वितीया

स॰
क

द्वितीयाग्नीये च तृतीयायास्तिस्रः सावित्री पंचमे भगदैवत्या चात्रि
ष्टुप्छंदः तृतीयायास्तिस्रो गायत्र्यो विहितार्थो विनियोगः कस्य
नूनं कतमस्यामृतानां मनामहे चारु देवस्य नाम को नो मह्या
अदितये पुनर्दात् पितरं च दृशेयं मातरं च १ अग्नेर्वयं प्रथमस्यामृता
नां मनामहे चारु देवस्य नाम स नो मह्या अदितये पुनर्दात् पितरं च दृ
शेयं मातरं च २ अभि त्वा देव सवितरीशानं वार्याणां सदावन्भाग
मीमहे ३ यश्चिद्धि त इत्था भगः शशमानः पुरा निदः अद्वेषो हस्त
योर्दधे ४ भगभक्तस्य ते वयमुदशेम तवावसा मूर्धानं राय आर
भे ५ नहि ते क्षत्रं न सहो न मन्युं वयश्चनामी पतयंत आपुः नेमा
आपो अनिमिषं चरंतीर्न ये वातस्य प्रमिनंत्यभ्वं ६ अबुध्ने राजा व
रुणो वनस्योर्ध्वं स्तूपं ददते पूतदक्षः नीचीनाः स्थुरुपरि बुध्न एषाम
स्मे अंतर्निहिताः केतवः स्युः ७ उरुं हि राजा वरुणश्चकार सूर्याय पं
थामन्वेतवा उ अपदे पादा प्रतिधातवेऽकरुतापवक्ता हृदया
विधश्चित् ८ शतं ते राजन्भिषजः सहस्रमुर्वी गभीरा सुमतिष्टे अ
स्तु बाधस्व दूरे निर्ऋतिं पराचैः कृतं चिदेनः प्रमुमुग्ध्यस्मत् ९ अमी य
ऋक्षा निहितास उच्चा नक्तं ददृश्रे कुह चिद्दिवेयुः अदब्धानि वरुण
स्य व्रतानि विचाकशच्चंद्रमा नक्तमेति १० तत्त्वा यामि ब्रह्मणा वंद
मानस्तदा शास्ते यजमानो हविर्भिः अहेळमानो वरुणेह बोध्युरु
शंस मा न आयुः प्र मोषीः ११ तदिन्नक्तं तद्दिवा मह्यमाहुस्तदयं के
तो हृद आ वि चष्टे शुनःशेपो यमह्वद्गृभीतः सो अस्मान्राजा वरुणो

240

त्सोक्तः शुनःशेपोह्यव्हृद्गृभीतास्त्रिष्वादित्यंद्रुपदेषुबद्धः
अवैनंराजावरुणःससृज्याद्विद्वांअदब्धोविमुमोक्तुपाशान् १३
अवतेहेलोवरुणनमोभिरवयज्ञेभिरीमहेहविर्भिः क्षयन्न
मभिसमुप्रचेताराजन्नेनांसिशिश्रथःकृतानि १४ उदुत्तमंव
रुणपाशमस्मदवाधमंविमध्यमंश्रथाय अथावयमादित्यव्र
तेतवानागसोअदितयेस्याम १५ इतिकस्यनूनमितिसूक्तम्
इतिमृतवत्सत्वहरम् अथानपत्यहरंशातातपप्रोक्ते विप्रस्त्वा
पहारीयःसोनपत्यप्रजायते तेनकार्यंविशुद्ध्यर्थंमहारुद्र
जपादिकम् आदिशब्दःप्रातिलोमाभिप्रायेणहरिवंशश्रव
णब्राह्मणोद्वाहनेलक्षयति तेनप्रागेवमृतवत्सहरेदर्शिते
प्रसुमेवाभिप्रायमाविष्करोति मृतवत्सोदितःसर्वोविधिरत्रवि
धीयते दशांशहोमःकर्तव्यःपलाशेनयथाविधिः दशांशहो
मोमहारुद्रजपे महारुद्रलक्षणे दशांशहोमस्तत्र मंत्रविभा
गप्रकारश्चेत्येतत्सर्वंप्राकृतमाह दशांशहोमेद्रव्यमाह पला
शेनेतिपलाशाङ्कसमेनेत्यर्थः एकवचनंजात्यभिप्रायेण
इत्यनपत्यहरम् अथमृतवत्सत्वविशिष्टचर्मकीलत्वहरम्
कर्मविपाकसंग्रहे अष्टकादिपितृश्राद्धहीनोनिःशंकघातकः
प्राणिनांसततंद्वेषीगुरुद्वेषीतथापरः मत्स्यकोमृगपोतस्यन
स्कोतेन्यजन्मनि मृतपुत्रश्चर्मकीलव्याधियुक्तोभवेन्नरः उ
र्मनाश्चैवजायेततस्येयंनिष्कृतिःपरा कृच्छ्रचांद्रायणंकुर्या

म·
क

द्धोमः कूष्मांडसेवकः गणहोमः स्वर्णदानं भूमिदानं तथापरम्
कन्यादानं च पंचम्यां श्राद्धं कुर्वीत यत्नतः सहस्रनामजापी च भ
वेदेवं विमुच्यते अष्टकादीनीत्यादि अधिकारे सत्यष्टकादिपितृ
श्राद्धरहितः प्राणिनां निःशंकघातक इत्यन्वयः एतान्यष्टकादि
श्राद्धरहितादीनि पंचापि पृथक्पृथङ्मिलाति कृच्छ्रचांद्रायण
कूष्मांडहोमो गणहोमश्च परिभाषायां दर्शितः पंचम्यां श्राद्धमि
त्यन्वयः सहस्रनामजापीति ताच्छील्येतेति अतो यावद्व्याधि
प्रमोकस्तावत्सहस्रनामं जपेत् अस्य चार्षादि परिभाषायामे
वाभ्यधायि कृच्छ्रादीन्येतानि व्याधिगुरुलघुत्वापेक्षया शक्त्या
पेक्षया व्यस्तानि समस्तानि वा योज्यानि इति मूत्रकृच्छ्रविशि
ष्टचर्मकीलव्रतहरम् अथ दंतापातनकत्वहरं शातातपप्रोक्ते दं
तापातनका शुक्रः स्याद्दंता भवेन्नरः दंतापातनकमेव दंतापात
नकं तेन शुक्रः अथवा दंतापातनमिति रोगांतरं दंतापातनमि
त्यपिपाठः तत्र निष्कृतिमाह प्राजापत्यं चरेद्देवं दद्याद्धेनुं सद
क्षिणाम् इति दंतापातनकहरम् अथ सर्वांगवेदनाहरं कर्म
विपाकसमुच्चये श्रुतिस्मृतिविरुद्धानि यानि दानानि संति वै
अजाश्वमहिषादीनि तन्मतिग्रहकारणात् निषिद्धयोषिद्गमना
द्विजाश्वस्य वधादपि वेदस्य च परीक्षायां दक्षव्याघ्रादिभिर्हतो
हृदयुद्धादिशस्त्राहिमरणाद्गुरुवित्तात् तडागादेश्च भंगाच्च वा
तशास्त्रोपजीवनात् ब्राह्मणस्यापहरणात्सर्वांगे शूलजायते

241

वेदनादाहरणानदुज्वरस्तदुपशांतये कृष्णातिलकं कुर्वीत
चांद्रायणमथापरम् गोभूहिरण्यवासांसि दद्यात्तु कुर्याज्जपं त
था तद्विष्णोरितिमंत्रस्य संख्यास्यादयुतत्रयम् पानीयं पायसं
मुद्गाः शर्कराघृतसंयुतम् इदमावश्यकं देयं सर्वरोगोपशांत
ये इतिसर्वांगवेदनाहरम् अथाप्रतिष्ठितवृक्षहरं शातातप
प्रोक्ते प्रतिमायाभंगकारीत्वप्रतिष्ठः प्रजायते संवत्सरत्रयं
सिंचेदश्वत्थं सोऽनुवासरम् उद्वाहयेत्तथाश्वत्थं शमीचैव विधा
नतः अश्वत्थस्यात्रमेवकरोपितपवशाखः यदि शमीस्वतःस
मीपास्थितानतर्हितयासह अथनलभ्यते तदाहृष्टोत्सर्गेश्च वत्स
शमीशाखांतदभावेकृपास्तंभं वासमानीयाविवाहः कार्यः श
ष्टाचार्यप्रामं विधानं वेतत् शुभदिने चंद्राद्यनुकूले अश्वत्थं श
मीं च वस्त्रादिभिरलंकृत्यस्वशृंखोक्तेन प्रतिष्ठाप्य व्याहृतिभिः
तिलानाज्यं चरुं पृथक्पृथगष्टोत्तरशतं सहस्रं वाहुत्वा ब्राह्मणान्भो
जयित्वा यथाशक्तिदक्षिणां दद्यादिति एवमश्वत्थोद्वाहनं विधा
य तत्र विनायकमश्वत्थमूलेस्थापयेदित्यादितत्र संस्थापयेद्दे
वं विघ्नेशं सुरपूजितम् तत्राश्वत्थमूले समीपे वा विनायकस्
तिं दारवादिभिर्निर्माय तस्य च यथाविभवमालयं विधाय तत्र वि
नायकं व्याहृतिभिः स्थापयेत् तत्रायं प्रयोगः भूर्भुवः स्वः विना
यकेहागच्छेह तिष्ठेति गंधपुष्पाक्षतैः प्रतिमायां वाहयेदिति
ततः षोडशोपचारैः पूजां कुर्यात् अत्र च विनायकप्रकाशको

म॰ क॰

मंत्रोग्राह्यः तेच मंत्रा नवग्रहयज्ञप्रकरणे विनायकशांतौ दर्शि
ताः अत्रापि तिलानाज्यं च जुहुयात् आदित्यादिभिस्तस्य विवाहो वि
नायकप्रतिष्ठा चेति द्वे कर्मणी तयोरुभयोर्मिलितयोः प्रयोगक्र
मः शुभे दिने अश्वत्थस्य समीपे ब्राह्मणानुपवेश्य स्वगृह्योक्तप्रका
रेण स्वस्तिवाचनं विधाय अग्निं प्रतिष्ठाप्याश्वत्थं शमीं च पूर्वोक्तप्र
कारेण वालंकृत्य विनायकं पंचामृतैः स्नापयित्वा तस्यालये सं
स्थाप्य पूर्वोक्तरीत्या वास्य प्रतिष्ठामपि सृजयित्वा हुत्वा संतर्प्य ब्रा
ह्मणान्भोजयित्वा दक्षिणां च दद्यादित्यप्रतिष्ठितत्वहरम् अ
थ पुंडरीकरोगत्वहरं शातातपप्रोक्ते कांस्यहारी च भवति पुंड
रीकसमन्वितः कांस्यपलशतं दद्याडणोष्यादिवसं नरः इति पुं
डरीकरोगहरम् अथ कुष्ठत्वहरं शातातपप्रोक्ते कुष्ठोत्स्व
कं दद्यात्सप्तधान्यं सकांचनं अत्र परिमाणविशेषानभिधा
नात् स्वपरिमाणराशीकृतं ग्राह्यम् तत्र व्रीहियवादिकं यद्धि
यं सप्तधान्यमित्येकवद्भावात् समुचितमेव कांचनं च शक्त्यानु
सारेण धान्यराशौ स्थापनीयम् कांचनमित्युक्तत्वात् दक्षिणां
च स्वकरग्रहात व्याहानं कृत्वा तस्याश्रितकुष्ठत्वहरम् अथ
निकृष्टत्वहरं शातातपप्रोक्ते अनिवेद्य हरादिभ्यो भुंजानो जा
यते परः स भोजयेत्सहस्रं तु शतं वापि द्विजोत्तमान् हरादि
भ्यो हरिहरादिभ्यो वैश्वदेवकर्म देवताभ्यश्च मात्रादिशाह्वादति
थिपुत्रादिभिश्चापरः निकृष्टो दरिद्र इति यावत् शतसहस्र

242

संख्याविकल्पः शान्तायजुसारेण इति निकृष्टत्वहरम् अथ
महादुःखहरं कर्मविपाकसंग्रहे सर्वदाउःखचित्तःस्यात्तस्य
चित्तविनाशकः चांद्रायणद्वयंकुर्यादुदुत्यंजातवेदसम्
एतत्सूक्तंजपन्नाम अवितयंचविमुच्यते चांद्रायणस्वरूपंक
च्छ्रप्रकरणेनिरूपितम् उदुत्यंजातवेदसमित्यस्यत्रयोदश
र्चस्यसूक्तस्यप्रस्कण्वऋषिःसूर्योदेवता आद्यानवगायत्र्या
श्चत्वार्यस्तस्तोऽनुष्टुभः जपेविनियोगः एतत्सूक्तंपादतःपरिभा
षायांमहासौरवर्गेषुप्रदर्शितम् नामत्रयस्यादिवानरोगह
रेद्रष्टव्यम् अनयोश्चांद्रायणचरणादिनेषुदिवाकर्माविरोधि
निकालेकर्तव्यः प्रत्याम्नायद्वाराचांद्रायणाकरणेप्रत्येकम
युतंजपेत् इति सर्वदाउःखहरम् अथसर्वकार्यार्थसिद्धिह
रंशातातपप्रोक्ते सर्वकार्येषुसिद्धार्थीजपध्यानीभवेन्नरः प्रा
सादंकारयेत्तत्रगणनाथस्यभक्तितः अथवागणनाथस्यमं
त्रंलक्षंजपेन्नरः दशांशहोमः कुर्वीतगणशांतिपुरःसरम्
प्रासादोदेवालयः गणनाथस्यमंत्रोगणानांत्वेत्यादि अस्यर्च
स्तमदऋषिःगणपतिर्देवता गायत्रीछंदःजपेविनियोगः
गणानांत्वागणपतिंहवामहेकविंकवीनामुपमश्रवस्तमम्
ज्येष्ठराजंब्रह्मणांब्रह्मणस्पतआनःशृण्वन्नूतिभिःसीदसादनं
अस्यानःइदेतिनवग्रहयज्ञप्रकरणेदर्शितः गणपतिंगायत्री
वाजपेत् इयंतुविनायकशांतौदर्शिताः अथवा स्वस्वशाखा

म
क

समाम्नाता विनायकप्रकाशकाय देशाम्नायानुसारेण वक्रतुंड
गणपतिमंत्रादयोप्याताः पुष्पाणि करवीरादीनि श्वेतानि रक्ता
नि वा गणेशशांतिर्विनायकशांतिरियं परिभाषायामुदीरिता
गणेशशांतिर्विघ्नशांतिर्गणेशशांतिप्रतिपादकमंत्र इतियावत् अ
नेन च स्वस्वशाखोक्तशांतिरुपलक्ष्यते तत्राग्नो रुद्राः इत्यापलाय
नशांतिः शन्नोवात इति च तैत्तिरीयशांतिरपरिभाषायामुद्दिष्टा
इति सर्वकार्यार्थसिद्धिहरम् अथ देशांतरगतस्यातिक्लेशहरं
कर्मविपाकसमुच्चये भयभीतेन रन्ध्रेयः क्षुत्पिपासांतरात्मयम्
शोकः संस्मरेद्राजन्तः कंपनो वपथुस्तिकः निषिद्धवृत्तिजीवीव
जातेपि श्रीमतां कुले देशाद्देशांतरं यातिक्लेशयुक्तो भवेत्तदा
चांद्रायणं चकुर्वीत तथा कृच्छ्रातिकृच्छ्रकम् जुहुयाद्वरुणस्यापि मंत्रं
श्रीसूक्तान्यपरं चैव तथा होमः प्रोक्तो व्याहृतिभिर्जपेत्सूक्तं च वारु
णम् दद्याच्च दक्षिणां स्वर्णं तिलादीन्यपि निर्दिशेत् स्वयं शक्तः
सन्त्रलेदित्यन्वयः चांद्रायणस्य कृच्छ्रातिकृच्छ्रस्य च लक्षणं कृ
च्छ्रप्रकरणे प्यथापि चरुणो सर्पिषा च प्रत्येकमष्टोत्तरशतं स
हस्रं वा श्रीसूक्तांतर्गताभिर्ऋग्भिः प्रत्यृचं जुहुयात् श्रीसूक्तस्या
र्षादीनां सिकाग्रणहरेभिहितं व्याहृतीनां कूष्मांडहोमेन वयहृदय
त्रेदर्शितम् जपेत्सूक्तं च वारुणमिति मन्त्रस्तत्रहरे ते दर्शितम्
तिलादीन्यपि दद्यात् आदिशब्देन यज्ञाहारीब्रीह्यादयो गृह्यन्ते ति
लादीनि यथाशक्ति दद्यात् इति देशांतरगतस्यातिक्लेशहरम्

243

अथ दारिद्र्यहरं धनदमूर्तिदानम् वायुपुराणे दरिद्रो जायते
मर्त्यो दानविघ्नं करोति यः ऐश्वर्यं जायते येन कर्मणा तच्छृणु
ष्वमे पलार्धेन तदर्धेन चतुर्थांशेन वा पुनः धनदस्य प्रतिकृतिं
कुर्याद्धेममयीं शुभाम् द्विभुजां वाहनोपेतां नयनानंदकारिणीं
शंखपद्मनिधिभ्यां च युक्तां तां पार्श्वयोर्द्वयोः श्वेतवस्त्रेण संवे
ष्ट्य तंडुलोपरि विन्यसेत् तंडुलानां परीमाणं भवेद्द्रोणचतुष्टयं
तदर्धं वा तदर्धं वा वित्तशाठ्यं न कारयेत् श्वेतमाल्यैस्तथा गंधै
रनुलिप्य तु पूजयेत् आग्नेय्यां दिशि होमे च समिदाज्यतिलै
र्भवेत् मंत्रो राजाधिराजायेत्येष योज्यः स्वलिंगकैः तिलहोमो
व्याहृतिभिः कर्तव्यो धनकांक्षिभिः पलार्धेनेत्यादि पलद्रोण
योः स्वरूपं परिमाणप्रकरणे निरूपितम् द्विभुजां वरदाभयक
रां वाहनोपेतां कुवेरस्य वाहनं मनुष्यः नरवाहन इति प्रसिद्धः
द्वयोः पार्श्वयोः शंखपद्मनिधिभ्यां युक्तेत्यन्वयः शंखेन कमले
न वोद्भासितो नामांगौ शंखपद्मौ निधी भवतः शंखनिधेर्मूर्तेर्मूर्ध
नि शंखचिह्नं पद्मनिधिमूर्तेर्मूर्धनि पद्मचिह्नमित्यर्थः आग्ने
य्यां दिशीत्यादि धनदप्रतिकृतिपूजास्थानादाग्नेयदिग्भागे
अतुलकसंख्याकत्वात् प्रत्येकं समिदाज्यतिलानष्टोत्तरशतं स
हस्रं वा जुहुयात् पूजायां होमे च मंत्रमाह मंत्रो राजाधिराजा
येति स्वलिंगकैः कुवेरनामद्योतकैः पदैर्युक्तः मंत्रस्यायं पाठ उव
सानः अस्यारुणा ऋषयः विश्वेदेवा ऋषयः कुवेरो देवता प्रति

म॰
क॰

243
244

शक्रर्यष्टिर्वा छंदः राजाधिराजाय प्रसह्यसाहिन्येनमोवयंवैश्रव
णायकुर्महे स मे कामान्कामकामाय कामेश्वरो वैश्रवणो ददा
तु कुवेराय वैश्रवणाय महाराजाय वै नमः एवं प्रजादौ मंत्रमा
भिधाय तिलहोमे विशेषमाह तिलहोमो व्याहृतिभिरिति व्या
हृतीनामार्षादि नवग्रहयज्ञप्रकरणे देवतावाहनप्रस्तावे द
र्शितम् एवंविधं कर्म केन कारयेदित्यत आह आचार्यः सर्वशा
स्त्रज्ञो विनीतः सर्वसंमतः महत्कुलप्रसूतश्च धर्मज्ञः सत्यवा
न्भवेत् कारयेदर्चनं तेन धनदस्याग्रभक्तितः तद्दैवतेन मंत्रेण
स च कामेश्वरो भवेत् स च धनदमूर्तिदाता कामी धनकामी ईश्व
रो भवेत् अस्मिन्दाने कृते सति संपन्नो भवेत् तस्मै होमे कृते व
ते प्रदद्यात्प्रतिमां तां मंत्रेणानेन विधिवन्माङ्गल्याय प्रमुद
ङ्मुखः दानमंत्रमाह उत्तराशापते देव कुवेर नरवाहन शं
खपद्मनिधीनां त्वं पतिः श्रीकंठवल्लभ प्रदानेन यथा शामंदा
रिद्र्यं मम नडःखेदम् तत्सर्वं तव दानेन पापमाशु विनाशय प
वं कुवेर दानेन यः करोति विधिं सर्वकम् धनदेन समो मर्त्यस्त
त्क्षणादेव जायते तत्क्षणादेवेत्यर्थवादो वा प्रवृत्तेतोपिशुदेवते
तिवत् दिष्टफलदायिकं कर्मेत्यर्थः इति दारिद्र्यधनदमूर्तिदा
नम् अथ प्रकारान्तरेण धनिनां दरिद्रं कर्मविपाकसमुच्चये
अरणदत्ताधिकां हानिं शत्रीयायच्छवा भयम् उत्पादयति चान्ये
षां पाषाणेन प्रहारदः तत्प्रहारकश्चैव जातो पि धनिनां कुले

पनेनरहितःप्रायोदेशांतरगतोभवेत् महाक्लेशीचदुष्टरोगी
उदावर्तीभवेन्नरः अथिष्ठाङ्घ्रिग्रहणंनामशास्त्रनिषिद्धश्राद्धिग्रह
णंभयक्षुत्पादयतीति निमित्तमंतरेणभयोत्पादनंतथा पाषा
णप्रहरादिबलप्रहारोमुष्टिप्रहारश्चपेटादानेवानदावर्तीति
ऊर्ध्वमावर्ततइत्युदावर्तीवमनवानित्यर्थः अत्रप्रायश्चित्तमाह
कृच्छ्रःकृच्छ्रातिकृच्छ्रश्चचांद्रायनमतःपरम् कुर्यादाज्यचरुभ्यां
चहोमंव्याहृतिभिस्तथा यत्किंचेदमिदंसूक्तमप्युतेवारुणंज
पेत् प्राजापत्यकृच्छ्रस्यकृच्छ्रादिकृच्छ्रस्यचांद्रायणस्यचलक्ष
णानिकृच्छ्रप्रकरणेनिरूपितानिनिमित्ततारतम्यान्नैमित्तिकानि
कृच्छ्रादीनिव्यस्तानिसमस्तानिवायोज्यानिआज्यचरुभ्यांप्रत्ये
कमष्टोत्तरशतंहोमः व्याहृतीनामृष्यादिनवग्रहयज्ञप्रकरणे
देवतावाहनप्रस्तावेभिहितम् यत्किंचेदमित्यनेनसोष्ठुवरु
णमग्नेयमित्येतत्सूक्तंलक्ष्यते १२ तस्यऋचोयःसूक्तांतःपाति
तत्वात् अस्यसूक्तस्यवसिष्ठऋषिःवरुणोदेवतागायत्रीछंदः
अंत्याजगतीजपेविनियोगः सोष्ठुवरुणमग्नेयंश्हंराजन्
हंगमत् मृळासुक्षत्रमृळय १ यदेमिप्रस्फुरन्निवदृतिर्नध्मा
तोअद्रिवःमृळासुक्षत्रमृळय २ क्रत्वःसमहदीनतःप्रतीपंज
गमाशुचेमृळासुक्षत्रमृळय ३ अपांमध्येतस्थिवांसंतृष्णाविदज्जरि
तरंमृळासुक्षत्रमृळय ४ यत्किंचेदंवरुणदैव्येजनेभिद्रोहंमनु
ष्याश्चरामसि अचित्तीयत्तवधर्मायुयोपिममानस्तस्मादेनसोदे

म॰ क॰

~~244~~ 245

वरीरिव: ५ इतिसोऽपवरुणोनिस्तरूम् प्रतिप्रकारांतरेणाथ
निन्नादिहरम् अथचब्रह्मराक्षसत्वपपिशाचत्वहरम् कर्मविपा
कसंग्रहे अन्यायवर्तिनृपतिसेवनाद्विप्रहिंसनात् महादानस
मादानाद्गुरुभार्याविमर्दनात् दंष्ट्रिभ्यश्चपशुभ्यश्चमारणाद्गुरु
निन्दयावेदब्राह्मणस्यशास्त्रस्यपठनात्कर्मसेवनात् अवैदिक
शास्त्रपाठादवैदिककर्मकारणाच्चेत्यर्थः विप्रोद्वेधनशास्त्रधर्मेर
णादपिविप्रताजननीमैथुनाच्चैव गुरुस्त्रीगमनात्तथा कृतवा
ध्ययनसंपन्नश्रोत्रियब्राह्मणस्यतु उदासीनः सर्वमध्ये कृत्वा
भंगस्वदारुणम् परीक्षासमयेश्रामे कृत्वाभंगस्वदारुणम् वेदा
ध्ययनसंभूतफलदानाविशेषतः कृतान्ध्ययनाद्भूतकाध्ययना
दित्यर्थः देवब्राह्मणराज्ञांश्चस्वर्णापहरणात्तथा अरण्येनिर्जले
देशेजायतेब्रह्मराक्षसः ब्रह्मराक्षसत्वंपिशाचत्वस्याप्युपल
क्षणं कृताध्ययनसंपन्नः उक्तनिमित्तेष्वन्यतरनिमित्तवान्नरः
सपिशाचोजायतइतिभेदः अत्रनिष्कृतिर्ब्रह्मन्मनुनोक्तानतु
व्रादिभिःकार्या गयाश्राद्धंतुकृत्वापिजपहोमादिभिस्तथा ब्र
ह्मस्वार्पणेनतस्यास्यजपनादेवनित्यशः देवतातीर्थसेवाभिःक
न्यादानेनचैवहि ब्रह्मराक्षसपैशाचान्मध्यनेमनुरब्रवीत् जप
होमादिभिरिति जपोवेदपारायणंपवमानादिसूक्तजपश्चतत्
था सहस्रनामादिस्तोत्रजपश्च होमोघृतहोमादिः सवनवग्रह
यज्ञोक्तप्रकारेणतत्रद्रव्यंतिलव्रीहियवादयः मंत्रोव्याहृतयो

गायत्रीं वा आदिशब्देन दानमभिधीयते तच्च गोभूतिलहिरण्या
नां परिमाणं च शक्त्यनुसारेण कल्प्यं गवादिदानमंत्राश्च प्रायश्चि
त्तोपक्रमपद्धतौ दर्शिताः ब्रह्मार्पणेन इति उपलक्षणं चैतत्
यस्य देवस्य वा आत्मनस्य राज्ञो वा इष्टस्य पदं तेन तस्मै यथायोग
तत्तदादेर्वा दत्त्वेत्यर्थः जपन्नादेव नित्यशः इति जपादित्यर्थः
षण्मासान्वत्सरं वाथवा थीकृत्य रुद्रपावमानादीनां स्व
शाखोक्तमस्तानां शाखोक्तमपठितानां शतरुद्रीयादीनां वान्य
तमं प्रतिदिनं शक्त्यनुसारेण जपेदिति यावत् सर्वैः क्वानि नैमि
त्तिकानि गायत्र्याद्यादीनि जातिशक्त्या यथेष्टया व्यस्तानि समस्ता
नि वा योज्यानि वेदपारायणविधिः विष्णुसहस्रनामानि नवग्र
हयज्ञे प्रायश्चित्तोपक्रमप्रकाश्च शतरुद्रीयविधिश्च परिभाषा
यां तत्र तत्र दर्शितः इति ब्रह्मराक्षसत्वहरं पिशाचत्वहरं च मह
र्णवाख्ये महिते प्रबन्धे मान्धातृनाम्नो मदनात्मजस्य सत्कर्मर
त्नौघनिदानभूते चत्वारि पद्यप्राप्तितरंगः ४१ अथ ग्रहप्रक
रणमारभ्यते कर्मविपाकसमुच्चये स्वस्त्यागामिनं च तदुद्धि
श्य भोजिनम् प्रजापतिः अश्वत्थामानिततः सज्वरवान् भवेत्
अतीसारी च कुष्ठी च गात्रसर्वत्रवानवान् स्त्री चेद्गर्भस्य नाशं सा
दत्ते यं निष्कृतिः परा कृच्छ्रं चान्द्रायणं चैव कुर्यात् सांतपनत्रयम्
अश्वेतरसहस्रं तज्जुहुयाज्जुहुयात्तथा पुनर्मामैत्विमंत्रेण जपे
त्सुरूपस्वकम् प्राजापत्यकृच्छ्रादीनां लक्षणानि कृच्छ्रप्र

म॰ क॰

करणे निरूपितानि पुनर्मामैत्विति मंत्रेणाज्यहुत्यादित्यन्वयः पुन
र्मामैत्विंद्रियमिति द्वादशवाकस्यात्र वाकस्य ऋषिणाज्ञ छंदः
ऋषिणा एव देवता यजमानछंदो नियमः अथवा घेतच्चः अनुष्टु
भः द्वितीयास्वराउनुष्टुप् होमे विनियोगः पुनर्मामैत्विंद्रियं पुन
रायुः पुनर्भगः पुनर्ब्राह्मणमैतु मा पुनर्द्रविणमैतु मा यन्मेद्य रे
तः पृथिवीमस्कान्यदोषधीरप्यसरद्यदपः इदं तत्पुनरादये दी
र्घायुत्वाय वर्चसे ४ यन्मे रेतः प्रसिच्यते यन्म आजायते पुनः
तेन माममृतं कुरु २ उक्तस्य कस्यार्थोपि परिभाषायामभिहि
ते जपसंख्यासहस्रं जपहोमयोरनंतरं बलिदानप्रकारमाह
कांस्यपात्रे नवे व्रीहितंडुलानाढकोन्मितान् निक्षिप्यजलकुंभे
न साधेनीत्वा च तत्पश्चात् गंधपुष्पादिभिस्तत्र समभ्यर्च्य बलिं दि
येत् आढकस्वरूपं परिमाणप्रकरणे निरूपितम् बलिदानमं
त्रमाह प्रगृह्णीष्व बलिं चेमां प्रजापते महाबल आत्तरस्य सदैवं
सिद्धिं प्रयच्छ त्वं महाग्रह इति प्रजापतिग्रहहरम् अथ ज्वरग्रहहरं क
र्मविपाकसंग्रहे रजस्वलां वा चांडालीं यो गच्छेत्स नरं ज्वरः पृक्ता
तितेन संतापे ज्वरी भवति मानवः चांद्रायणं संतपनं कुर्याच्च
मधुमिश्रितैः सालस्यपल्लवैर्होमो जातवेदसमंततः नाम्नां स
हस्रं तु जपेत् सूक्तं जातवेदसा शक्त्या हिरण्यदानं च ब्राह्मणान्
भोजयेत्तथा चांद्रायणसंतापनयोः स्वरूपं कृच्छ्रप्रकरणेभ्यधा
यि मधुमिश्रितैर्मधूकैरात्रपल्लवैर्होमः होमसंख्यानवशेमरस

२४८

हस्रेजातवेदसमंत्रंतत्रजातवेदसेसुनवामेत्यनेनमंत्रेण
मुख्यत्वार्षादिशीतज्वरेहरेविहितम् नाम्नांसहस्रंविस्नुनाम
सहस्राणिएतानिपरिभाषायोदर्शितानि अयुतमित्युभय
त्रसंबध्यते अतःसहस्रनामस्तोत्रजातवेदसेसुनवामेत्यन
योःप्रत्येकमयुतसंख्याकोजपोभवति एतस्याप्युक्तेन
युतेनसहस्रंहिसहस्रमित्यादिकल्पेजपानंतरंसर्वौक्तहो
मःकार्यः एवंहोमानंतरंबलिदानमाह पायसंकांस्यपात्रेण
धजैःश्वेतैःपरिष्कृतम् लिप्तिगंधपुष्पाद्यैर्यहस्रजांविधाय
च देवालयेविपिपेहिकात्रिविपेस्वचतथ्यये अत्रमंत्रमाह प्र
शक्तीश्वबलिंचेमांदाहस्वपमहाज्वरम् आतरस्मत्वंसिद्धिं
प्रयच्छत्वंमहाग्रहहरम् इतिज्वरग्रहहरम् अथैकाह्नादिज्व
रग्रहहराणि कर्मविपाकसंग्रहे तस्करोयोहृथाप्राणिहिं
सकोनिर्दयस्तथा आचाररहितोयश्चपरधर्मस्यनिन्दकः
अधर्मनिरतोयश्चतानेताज्वरसंज्ञकः ग्रहीष्टस्त्रातितन्मा
त्रादेकरात्रज्वरीभवेत् त्रिरात्रेणद्विरात्रेणचतराख्यज्वरेणच
शीतज्वरेणसततज्वरेणोग्रज्वरेणच युतोभवतितस्येयंनि
ष्कृतिःशास्त्रचोदिताः चांद्रायणंप्रकुर्वीतकुर्यात्कृच्छ्रातिकृ
च्छ्रकम् आज्यहोमोव्याहृतिभिरष्टोत्तरसहस्रकं सहकाम
प्रवालैश्चमधुमैर्जुहुयात्तथा जातवेदसमंत्रेणदद्याद्धेमचश
क्तितः सहस्रकलशस्नानमीश्वरस्यतुकारयेत् चांद्रायण

म० क २४७

कृच्छ्रातिकृच्छ्रयोर्लक्षणंकृच्छ्रप्रकरणेनिरूपितेव्याहृतीना
मुख्यादिनवग्रहयज्ञप्रकरणेदेवतावाहनप्रस्तावेदर्शितम्
जातवेदसमंत्रेणजुहुयादित्यन्वयः अस्यत्वार्षादिस्त्वेतज्ज्वरह
रेनिरूपितम् तथेत्यनेनपूर्वोक्ताशेनरससहस्रसंख्योक्तकृच्छ्रेते
सहस्रकलशाभिषेकंरुद्रानुवाकैःरुद्रस्यकुर्यात् रुद्रानुवा
कानामार्षादितथाभिषेकप्रकारश्चपरिभाषायांरुद्रविधाने
यथाविधि बलिप्रकारमाह कांस्यपात्रेमधुपायसाज्याःस
शर्कराःनिक्षिप्याश्वयुजैर्जातीकुसुमैःश्वेतवाससा गंधपुष्पा
दिभिश्चैवस्थानेदेशेशुचौवरम् पूजयित्वासहोमेनजलकं
मेनसंयुतः मधादिकंबलिंदद्यात्मंत्रेणानेनसंयुतः अश्व
युजैःशुभ्रयुजैःसाहचर्याज्जातीकुसुमान्यपि श्वेतान्येवबलि
दानमंत्रमाह यस्त्वंक्लीबबलिंचेममेकाह्निकमहाज्वर आ
तुरस्यसुखंसिद्धिंप्रयच्छत्वंमहाग्रह द्वितीयादिज्वरेषुबलि
दानविशेषानाहद्व्याह्निकाख्येज्वरेमातृस्थानेषुद्वेबलिंलिपे
त् त्र्याह्निकेनंदिकेशस्यसमीपेवृषभस्यवा विल्वायतने
दद्याच्चातुर्थिकमहाज्वरे बलिदानमंत्रेद्व्याह्निकाख्यमहाज्वरे
भ्यःकार्यः एवंत्र्याह्निकाख्येत्रिरात्रज्वरेतथाचातुर्थिकम
हाज्वरेष्वपिद्व्याह्निकत्र्याह्निकयोर्ज्वरयोः पूर्वोक्तएवबलिः
चातुर्थिकज्वरेबलिविशेषमाह विल्वायतनेकृत्वामंडलं
तत्रपीठकम् चतुष्पथेस्थापयित्वाग्रहंसंपूजयेद्यत्नतःकुंभं

संस्थापयेत्तत्र पीठस्योपरि संस्थितः तस्मिन्कुंभे बलिं दद्यात्कृ
सराशष्पपायसम् लाजान्मधुसुरां चैव सर्पिः पिण्याकमेव
च रक्तवासो रक्तपुष्पं ह्स्लीं याद्यर्चनाविधौ गंधधूपादिकं
रक्तं दद्याद्रोगस्य शांतये यजातीयानां सत्त्वानि विज्ञातजाती
यानां सा बलिकर्मणि न ग्राह्या शीतज्वरे तु विशेषः विलो
णायतने यद्वा मूलेश्वत्थद्रुमस्य वा शीतज्वरविधानेन संहृत
स्याहरेद्बलिम् बलिहर्तास्त्वसर्वस्वः कृष्णवस्त्रोत्तरीयकः कृ
सरं पायसं चैव तिलांश्चैव तु तंडुलान् कांस्यपात्रे विनिधि
प्य स्वर्णेन तु परिन्यसेत् स्वर्णकुंभेन सहितं बलिं तत्र विनि
क्षिपेत् पूजयित्वा यथा धूपदीपादिभिस्तं द्विजः बलिदान
मंत्रमाह ॐ ह्स्लीं बलिं चेमं ज्वरार्तस्य ज्वरापहं पविवा
हन गोविन्द वराहवदन प्रभो असुरघ्न सुरश्रेष्ठ नरसिंह गदा
धरेति उष्णज्वरे तु विशेषमभिदधाति उष्णज्वरे महेशान स
मीपे बलिमाहरेत् राजवृक्षस्य मूले वा बलिः सर्वोक्त एव हि
सर्वोक्तः शीतज्वरहरोक्तः अत्र मंत्रः गोक्षीरधवलाकार त्रि
शूलधर गोपते भस्मोद्धूलित देवेश त्रिनेत्र शिव शंकर ॐ
ह्स्लीं बलिं चेमं ज्वरितस्य महाग्रह प्रयच्छ त्वं सर्वां सिद्धिं
ज्वरं चाशु विमोचयेति सततज्वरविशेषमाह इति सततज्वरे ईशा
नस्यालये बलिं हरेत् सर्वत्र कथितेऽन्यत्र मो बलिरुदाहृतः
अस्मिन्नेवैकाह्निकादिज्वरग्रहरोगाणि सर्वकथितानि ते

ग्रहबलिदानमंत्रमाह यथ ॐ ह्रीं ग्रहबलिं चेमं हरत्वं सततं ज्वर
शान्तिरस्य सर्वसिद्धिं प्रयच्छंतु महाबलेति इति एकाह्निका
दिज्वरग्रहहरणम् अथ सन्ततज्वरहरं कर्मविपाकसंग्रहे
अश्ववीर्यैः स्पृशेद्देवं ब्राह्मणं वा द्विजसर्वकम् तेन ह्रीं सन्तत
ज्वरोग्रहस्तु हरणात् ततः ज्वरी सर्वभ्रमी पक्षाघाती चैव
प्रजायते कृच्छ्रं चान्द्रायणं कुर्यात् रोगस्यापनुत्तये वा तथा
वा तन्मन्त्रं च जपेद् अयुतसंख्यया दशांशहोमदाने च कुर्या
द्देवं विप्रश्च यते बलिदानप्रकारमाह तिलपिष्टेन सहितं मं
डलाज्यभाजने कस्मिंश्चित् स्थापयित्वा तु गंधपुष्पादिभि
